A.C. Joshi Library
P.U. Chandigarh

MSS No. 260 Subject Language

Name of MSS व्याकरण सिद्धान्त मंजूषा

Author Nageśa Bhatta नागेश भट्ट

Period — — Folios 249

Script Sanskrit Source Prithipal Singh

Missing Folios 184,

260

16

व्याकरण सिद्धान्त मंजूशा
२५० पत्रक

ह०लि०

16

دیوان سہر حالت منجو شاہ شکرت

نادری

मंजू० श्रीगणेशायनमः नागेशभट्टविद्वान्नत्वासांबशिवंलघुः वैयाकरणसिद्धांतमंजूषेयंविरच्यते
१ १ तत्रवाक्यस्फोटोमुख्यः लोकेतस्यैवार्थबोधकत्वात् तेनैवार्थसमाप्तेश्च तदुक्तं न्यायभा
ष्यकृतापदसमूहोवाक्यमर्थसमाप्ताविति अत्रपदंसुबंतंतिङंतंच तेनतत्समूहइत्यर्थः समा
प्ताविन्यस्यसमर्थमितिशेषः तत्रप्रतिवाक्यंसंकेतग्रहासंभवात्तदन्वाख्यानस्यलघूपायेना
शक्यत्वाच्चकल्पनयापदानिप्रविभज्यपदेप्रकृतिप्रत्ययभागान्कल्पनयैवप्रविभज्यकल्पिता
भ्यामन्वयव्यतिरेकाभ्यांतत्तदर्थविभागंशास्त्रमात्रविषयंपरिकल्पयंतिस्माचार्याः एतदे
वाभिप्रेत्यविभाषासुपइतिसूत्रेकैयटः अन्वयव्यतिरेकाभ्यांप्रकृतिप्रत्ययानामिहशास्त्रेऽ
र्थवत्तापरिकल्पनात् इत्याह तत्तदवयवतत्तदर्थबोधनेनसमुदायस्यसमुदायार्थस्यचबो
धनेतात्पर्यमृषीणां स्पष्टंचेदमर्थवत्सूत्रेभाष्यकैयटयोः श्रुतिवाक्यादीनांबलाबलवि
चारकल्पनार्थंचतत्कल्पनेतिबोध्यं तत्रशास्त्रप्रक्रियानिर्वाहकोवर्णस्फोटः प्रकृतिप्र
त्ययास्तत्तदर्थवाचकाइतितदर्थः उपसर्गनिपातधात्वादिविभागोप्येवमेवकाल्पनिकः
तस्यैवान्वाख्यानस्यलाघवेननिर्वाहापत्त्यानिनोलादयआदेशास्तिबादयश्चकल्पिताएव
तेषामर्थाश्चविकल्पिताएव तत्रस्थानिनामर्थाऋषिभिःकंठतउक्ताः आदेशानांचस्थान्य
र्थाभिधानसमर्थस्यैवादेशतेतिन्यायेनतेऽप्यर्थवाचकत्वंतुतथाकल्पनयाबोधतेतत्समुदाय
१

त्येपदे वाक्ये वा लौकिकानां तत एव बोधात् एतदेकमभिप्रेत्य भूवादि सूत्रे भाष्ये भाववचनो
धातुरिति लक्षणे सति प्रत्ययेनाववचत्वं तद्वचनाच्च प्रत्ययस्येत्यन्योन्याश्रयमाशंक्य अनादि
सभाववचनत्वं प्रत्ययः नित्यत्वाच्छब्दानामित्युक्तं पारमार्थिकं नाश्रीयते कल्पितं त्वाश्रीयत
एवेति कैयटः एवं च ध्वानीनां वाचकत्वमादेशानां वेत्यादिविचारो निष्फल एव कल्पितवाचक
त्वस्योभयत्रापि सत्वात् व्याकरणभेदेन ध्वानीनां भेदेपि न क्षतिः लिपीनां भेद इवेति दिक् त
त्राप्तोपदेशः शब्दः प्रमाणं आप्तो नामानुभवेन वस्तुतत्त्वस्य कार्त्स्न्येन निश्चयवान् रागा
दिवशादपि नान्यथावादी यः स इति चरके पतंजलिः तत्रागृहीतशक्तिकस्य शाब्दबोधादर्शनात्
नहि गुड इत्युक्ते मधुरत्वं प्रकारतया गम्यत इति समर्थसूत्रभाष्याच्च तद्धर्मावच्छिन्नविषयक
शाब्दत्वावच्छिन्नं प्रति तद्धर्मावच्छिन्ननिरूपितशक्तिविशिष्टं ज्ञानं हेतुः यद्यपि गुड इत्युक्तेऽर्थप्र
तीतौ तद्गतं मधुरत्वं गम्यते तथापि न तत्तच्छब्दजप्रतीतिविषयः किंतु मानांतरजन्यप्रतीति
विषयः यत्र तु गुडो मधुर इति वाक्यार्थे गुड इत्येकदेशः प्रयुज्यते तत्रापि मधुराभिन्नो गुड इ
त्येव बोधो न तु मधुरत्वप्रकारको गुडविशेष्यकः ध्वनितं चेदं भमेनसंजनमिति सूत्रे भाष्ये
विशेषणविशेष्यभावव्यत्यासेन गृहीतशक्तिकस्य पुंसो घटपदात् घटत्वविशिष्टघटबोधवा
रणाय तद्धर्मावच्छिन्नेति ज्ञाने वृत्तिवैशिष्ट्यं च स्वविषयकोद्बुद्धसंस्कारसामानाधिकरण्यस्वा

अथ पदविषयकत्वोभयसंबंधेन बोध्यं अतो नागृहीतवृत्तिकस्य बोधो नापि विस्मृतवृत्तिक
स्य नापि तत्तद्वाचकपदाज्ञानवतो नापि घटपदात् आश्रयत्वेनोपस्थिताकाशस्य जनकतयोपस्थि
तचैत्रादेश्च बोधः संस्काराजनकशक्तिग्रहसत्वे तेन शाब्दबोधजनने च न मानं संस्कारकल्पि
का च वृत्तिस्मृतिरेव शाब्दबुद्धिरेव वेत्यन्यदेतत् सा च वृत्तिस्त्रिधा शक्तिर्लक्षणा व्यंजना च त
त्र शक्तिः कः पदार्थ इति चेत् अस्माच्छब्दादयमर्थो बोद्धव्य इत्याकारा इदं पदमिममर्थं बोधय
त्वित्याकारा वेश्वरेच्छा तस्याश्च यद्यपि विषयत्वलक्षणः संबंधः पदे अर्थे जन्यजनकभावे बोधे
च तथापि तस्यां बोधनिष्ठजन्यतानिरूपकजनकतावत्त्वेन विषयो वाचकः तस्यां बोधविषय
त्वेन विषयो वाच्य इति नातिप्रसंगः यद्यपि प्रथमशक्तिग्रहो वाक्य एव तथापि आवापोद्वा
राभ्यां शास्त्रकृतकल्पिताभ्यां तत्तत्पदे शक्तिग्रह इति बोध्यं यद्यातादृशबोधविषयको बोध ए
व स्यादिति नैयायिकाः तत्र प्रयोजकप्रयोजकवृद्धव्यवहारं पश्यता बालेन प्रयोज्यस्य प्रवृत्त्या तस्य ज्ञा
नमनुमाय ज्ञानस्य (संबंधस्य) चोपस्थितत्वाच्छब्दमेव कारणत्वेन गृहीत्वा संबद्धस्य कारणत्वानु
पपत्तिज्ञानपूर्वकं कल्प्यमानस्य संबंधस्य स्वयमनुपपद्यमानत्वेन गृहीतजनकत्वघटितस्य
गृहीतुमशक्यत्वात् एतेन बोधजनकत्वमेव पदतदर्थयोः संबंध इत्यपास्तं विनिगमनावि
रहेणेच्छाबोधयोरुभयोः शक्तित्वकल्पने गौरवाच्च किंचैवं इदमस्माद्बुध्यतामितीच्छाविषयत्वमे

वजनकत्वं स्यादिति बहूपप्लवः किंच प्रमाणानां जनकत्वतद्घटितसंबंधातिरिक्तसंबंधेनैव प्रमे
यसंबद्धानां ज्ञानजनकत्वदर्शनेनेह तयोः संबंधत्वानौचित्यं अन्यथा धूमाद्वह्निज्ञानं जायतामिती
च्छाविषयत्वमेव तद्बोधजनकत्वमेव वा हेतुसाध्ययोः संबंधः स्यादिति आपत्तेः किंचेच्छायाजन
कत्वस्य चोभयवृत्तित्वाभावः इच्छाविषयबोधीयविषयतायां इच्छाश्रयतानियामकत्वाभावा
त् संबंधो हि संबंधिभ्यां भिन्न उभयाश्रितः इति द्विष्ठः संबंध इति च विशिष्टबुद्धिनियामकत्वाभा
वात् संबंधो हि संबंधिभ्यां भिन्न उभयाश्रितः इति चाभियुक्तव्यवहारात् नहि विषय इच्छावान्
इत्यादिव्यवहारोऽस्ति जनकताशक्तिरिति पक्षे बोधजनकतायाः पदेऽर्थे च सत्त्वेऽपि तयोः परस्प
रं संबंधस्य दुरूपपादत्वात् ज्ञाने विषयस्य कर्तुश्च कारणत्वेऽपि तयोः परस्परं विशिष्टबुद्ध्यदर्श
नात् अर्थपदयोः संबंधस्य दुरूपपादत्वात् तस्मात् पदपदार्थयोः संबंधांतरमेव शक्तिः वाच्य
वाचकभावापरपर्यायाः तच्चाह केचित् इतरेतराध्यासमूलं तादात्म्यं तच्च संकेतः तस्यापि च पर
निष्ठत्वात् उपकारकत्वात् शक्तिरिति व्यवहारः तस्य संबंधत्वाभावात् भेदाभेदरूपस्य तत्त्वासं
भवात् तद्घटकस्य भेदाभेदस्य वा तत्त्वादर्शनात् अभेदस्यापि तत्त्वं खंडयिष्यते तदुक्तं पातंज
लभाष्ये संकेतस्तु पदपदार्थयोरितरेतराध्यासरूपः स्मृत्यात्मको योऽयं शब्दः सोऽर्थो योऽर्थः स
शब्द इति स्मृत्यात्मक इत्यनेन ज्ञातस्यैव संकेतस्य शक्तिबोधकत्वं दर्शितं किंच पाणिन्यादिस्मा

मंजू० त्तिसंकेतस्यैव वाचकतानियामकत्वं नत्वाधुनिकस्येत्यविरशिंतं एवं चाधुनिकसंकेतस्थले द्वाद
२ शेऽन्हि क्रियमाणनामस्थले च लक्षणा तत्र घटगोविंदादिगुणाध्यारोपेण तन्मूलकतस्य वृत्तिनिमि
त्तारोपेण च बोधः संबंधश्च स्वशक्तसंकेतविषयत्वम् एतदर्थमेव संकेतोपयोगः अत एव त
स्याभाव इति सत्येऽभावे डित्थादिषु प्रकृत्यर्थव्यतिरिक्त प्रसक्त्यर्थाभावात् भावप्रसक्त्यां तद्वृत्तिर्नत्वा
प्रोति डित्थत्वमिति साशंक्य प्राथमकल्पिकडित्थेन कृतां क्रियां गुणान्वायः कश्चित्करोति स उ
च्यते डित्थ एवं तत एव तत् एवं डित्थाः कुर्वंति प्राथमकल्पिके तर्हि कथं यथा तस्य कार्यं चैत्रः प्रयो
गस्तथा वृत्तिरपीति उक्तं तत्र शब्दरूपस्यार्थे ऽसंगात् तत्प्रकारमाश्रित्य यथा शब्दस्यार्थे प्रयो
गस्तथा वृत्तिरपीत्यर्थ इति कैयटः तत्सत्ये कथंचित्सदृशेन तथा त्वारोपमन्यत्राध्यारोपस्य सत्वा
दनुपयोग यो न्यपत्तिस्तथात्वप्रसक्तस्यापीति एवं रीतेरन्यत्र क्वाप्यदर्शनेनात्रापत्ते कथं चिद्दि
युक्तिरस्तं तत्समंजसेति बोध्यं अनादित्वात्संसारस्य ततो विष्णुर्व्व तत्र डित्थादिगुणाद्याश्रित्य प्रयो
गादीति कश्चित् तत्र तत्सत्संकेतज्ञानादेव बोधः शक्त्याद्यभावेपीक्षितुनयुक्तं सर्वसंतरत्वापत्तेः
वृत्तिजन्योपस्थितिं विना शाब्दबोधविषयत्वासंभवाच्च द्वादशेऽन्हि पिता नाम कुर्यादिति श्रुत्यास्म
र्यावानामत्वेन नाम बोधे पि तत्तद्रूपेण ईश्वरेण संकेताकरणेन तत्रापि शक्तेर्दुरुपपादत्वात्
अत्र नामपदेन चाक्षानकरणीभूततो बोधकः शब्द उच्यते यदुपदपदार्थयोर्बोधकवोधत्व

नियामिका शक्तिरेव संबंध इति शक्तेरपि कार्यजनकत्वे संबंधस्यैव नियामकत्वात् दीपगतप्रका
शकत्वशक्तावपि संबंधे सत्येव वस्तुप्रकाशकत्वं नान्यथेति दृष्टत्वात् तदुक्तं हरिणा उपकारः स
यत्रास्ति धर्मस्तत्रानुगम्यते शक्तीनामप्यसौ शक्तिर्गुणानामप्यसौ गुण इति उपकारः उपकार्योप
रकयोरुपकारः स्वभावः संबंधो यत्रास्ति तत्र धर्मः शक्तिरूपः कार्यं दृष्ट्वा अनुमीयते असौ सं
बंधः शक्तीनामपि कार्यजनने उपकारकः गुणानामपि द्रव्याश्रितत्वनियामकः संबंध इति तद
र्थ इति हेलाराजः स संबंधः पदे वाक्ये च तदाह न्यायभाष्यकारः समयज्ञानार्थं चेदं पदलक्ष
णया वाच्यो व्याख्यानं प्रकरणं वा स्यल्लक्षणया वाच्योर्थलक्षणमिदं अनेन हि पदेष्विव वा
क्येष्वपि प्रसरः समय इति स्पष्टमेवोक्तं वाक्यविषये समयग्राहकमाकांक्षाद्यपि समयज्ञानार्थं मि
त्यस्य साधनामित्यादिः एतेन पदार्थसंबंधग्रहवत्स्वपदार्थानि वाक्यार्थसंगतिग्रहानपेक्षाण्येवेति
वाक्यस्फोटो नैयायिकासंमत इति परास्तं एतच्चोपरिष्टाद्वक्ष्यामः पदस्यैवार्थबोधकमवयवा
र्थद्वारा व्याकरणमिति च सूचितं कः शब्दः कोर्थ इति प्रश्ने घट इत्ययं शब्दो घट इत्ययमर्थ इत्येकाका
रोत्तरदर्शनात्तयोरध्याससिद्धिः घट इत्याकारं ज्ञानमिति व्यवहाराच्छब्दज्ञानयोरविशेषः इति
शब्दस्य शब्दस्वरूपपरता तात्पर्यग्राहकत्वात् अत एव पद्यं स्मृतं अयमर्थं अमुमर्थं वदती
त्यादिव्यवहारः शब्दार्थयोरितरेतराध्यासादेव हरिणा दैव ओमित्येकाक्षरं ब्रह्मेति शाक्तिया ह

कत्वात् अतएवपद्यंश्रुतंगद्यञ्जर्थमणुअर्थंवर्ततीत्यादिव्यवहार। कश्चितिसमासो : सामानाधिक
रण्येनप्रयोगः तादात्म्यंचतदभिन्नत्वेसतितदभेदेनप्रतीयमानत्वं अभेदस्याधस्तत्वाच्चनतयोर्वि
रोधः नत्रभेदस्योद्भूतत्वविवक्षयार्थस्यार्थस्यायंवाचकः उभेः प्रण्टस्तंतस्यवाचकः प्रणवदस्यादौ
षष्ठीअभेदस्यतत्वविवक्षयातुप्रथमा यथोक्तेषु अतएवार्थेशब्दधर्मत्वव्यवहारः अत्यंतभेदे
ऽन्यपुरुषयोरिवतद्व्यवहाराभावात् नाप्यत्यंताभेदेसः घटेस्वधर्मत्वव्यवहाराभावात् अयमथा
नन्त्रादिव्यवहारस्त्वीश्वरकृतएवएतत्प्रसिद्धितोस्यवाचकस्यवाच्येनसहसंबंधः संकेतलक्षणरूप
ईश्वरस्यास्थितमेवार्थमभिनयतियथावस्थितः पितापुत्रयोः संबंधः संकेतेनावद्योत्यते ऽयमस्य
पितायमस्यपुत्रइतिसादिना पातंजलभाष्येएवमुक्तंहरिरप्याह इंद्रियाणांस्वविषयेष्वनादिर्यो
ग्यता यथा अनादिरर्थैःशब्दानांसंबंधोयोग्यता तथा संबंधशब्देसंबंधोयोग्यतांप्रतियोग्यता
समयाद्योग्यतासंविन्मातापुत्रादियोगवत् मतिप्रत्ययहेतुत्वंसंबंधेउपपद्यते शब्दस्यार्थेयत
स्तस्मात्संबंधोस्तीतिगम्यतेइति अस्यार्थः यथाचक्षुरादीनांरूपादिविषयज्ञानजनने ऽनादिः
पुरुषयत्नानपेक्षायोग्यतातज्जनकतावच्छेदकधर्मवत्वरूपातथाशब्दानामर्थैरनादिः संबंध
एवयोग्यतानिरूपितोयः स्वारात्म्यलक्षणसंबंधः सएवयोग्यतासाच स्वाभाविकेपेवातादिव्य
हारपरंपरापरपर्यायात्समयादाहीतोकेश्वरसमयान्निश्चीयते यथामातापुत्रयोर्ज

मजननकत्वाद्विसंबंधस्य व्यवहारो निश्चायकत्वहेत् ननु जनकत्वमेव योग्यता एतज्जनकत्वं संयोग इति
व्यवहारान्नदाहसतीति यतः शब्दस्यार्थेन संबंधे सति तस्यात्संयहेतुत्वमुपपद्यते तस्मादित्यन्वयः अ
तएवैतदुपक्रमे ज्ञानं प्रयोक्तुरर्थश्च स्वरूपं च प्रतीयते शब्दैरुच्चरितैस्तेषां संबंधः समवस्थित
इत्यादिना शब्दार्थज्ञानानामभेदाध्यासस्योपपादनं कृतं अत्र तेषामितिस्मात इत्यादि: अयंसा
स्नादिमानर्थो गौरित्यर्थकायं गौरस्येवं लोकानां व्यवहारादुक्तं तादात्म्यं संबंध इत्यर्थः एतेन तयो
रभेदे घटादिशब्दे मधुधारणाद्यापत्तिरित्यादि शब्दोच्चारणे मुखदाहाद्यापत्तिरर्थे वर्णमालाद्यनु
भवापत्तिश्चेति निरस्तं भेदाभेदयोरुपपादनात् वस्तुतो वौद्धएवार्थः शब्दः परमार्थतो वौद्धं तयोरभे
दः न च वौद्धे दाहादिशक्तिमत्वमित्यग्रे निरूपयिष्यामः अतएव चतुरो वर्णे डित्थं पश्यतो नामजि
ज्ञासया कोयमिति प्रश्ने डित्थोयमित्युत्तरे सन्निहितदेशं पिंडमुद्दिश्य डित्थशब्द विधेयतया प्रतीतिः
संगच्छते अस्यायमर्थो अस्यार्थस्येदं पदमित्यादौ षष्ठ्यनुपपत्तेस्तयोः स्वाभाविकयोगांगीकारात
त्वत्र संवद्धानां घटपटादीनामेवं व्यवहाराभावात् अस्यायं वाचक इत्यादि व्यवहारोप्येवं अयं
वाच्यक एतत्संबंधीत्यादि तदर्थांतर स्पष्टं चेदं अस्यायं वाचको वाच्य इति षष्ठ्या प्रतीयते योगः

शब्दार्थयोरिति हरिकारिकाव्याख्यावसरे हेलाराजीये समयः संकेत इति चाप्तोपदेशव्यवहारप
र्यायो अत एव न्यायभाष्यकारादयः सामयिकः शब्दादर्थप्रत्यय इति तत्रैकः पुनरयं समयः
अस्य शब्दस्येदमर्थजातमभिधेयमिति अस्येदं नामधेयमित्यादिनियोगरूपं अस्माच्छब्दादय
मर्थो बोद्धव्य इति नियोगश्चेत्याहुः नियोगश्चोपदेशादेव सामयिकः शब्दादर्थप्रत्यय इति करणा
दित्यत्र आख्यातेभिन्नं नकुलदंष्ट्रास्पृष्टा या काचित् औषधिः सा सर्पविषहंत्री सा सोपदेशस्ये
व समयत्वमुक्तं अयमदमितिनियोगोपि समय इति पातंजलाः उक्त ईश्वरसंकेत एव शक्ति
रिति न युक्तं अयमेतच्छब्दो वास्य शक्तिरित्यस्य संकेतस्यानापत्तेः ईदृशसंकेतस्य लोके दर्शने
न तादृशेश्वरसंकेतस्याप्यनुमानात् अत एव न्यायवाचस्पत्ये उक्तं सर्गादिभुवां महर्षिदेवता
नामीश्वरेण साक्षात् देवकृतः तद्व्यवहाराच्चास्मदादीनामपि प्रयुत्तः संकेत इति तथा योग
वाचस्पत्ये उक्तं सर्वे च शब्दाः सर्वार्थाभिधानसमर्था इति सर्वैरर्थैः सर्वशब्दानां संबंधश्च यो
गिज्ञानगम्य एव तेषां योगवत्त्वेनोभयरूपपराप्रसत्तात् युक्तं चैतत् एकस्यैव स्फोटस्य
शब्दब्रह्मरूपस्य सर्वशब्दतदर्थोभयोपादानत्वे नोभयरूपतयोभयोरपि तत्कार्ययोरुभय

रूपत्वात् क्रियाशक्तिप्रधानायाः शब्दशब्दार्थकारणं प्रकृतेर्बिंदुरूपिणः शब्दब्रह्माभवत्
देतिउक्तेः नित्यत्वं तु यावत्सृष्टिस्थितिसाव्यवहारनित्यतया च बोध्यं श्रुतिश्च सूक्ष्मामर्थेनाप्रवि
भक्ततत्त्वामेकां वाचमभिष्यंदमानां तामन्ये विदुरन्यामिव च नानारूपामात्मनि सन्निविष्टामि
ति अभिष्यंदमानां तत्तद्रूपेणाभिव्यक्तां अन्यामिव भेदवतीमिव आत्मनि चित्ते प्राणापानांतरे
वी वाग्वेनि संस्थलिष्ठतिस्थानेषु विहिते वायौ कृतवर्णपरिग्रहा वैखरी वाक् प्रवर्तते अवि
भागानुपश्यंती सर्वतः संहृतक्रमा स्वरूपज्योतिरेवांतः परावागनपायिनीति भारतं च एते
चस्रुतिभारते हरिग्रंथे स्पष्टे हरिवंशोपि अक्षराणामकारस्त्वं स्फोटस्त्वं वर्णसंश्रय इति योग्य
तालक्षणः संबंधः सादेः केयरस्य कारणतावच्छेदकधर्मरूपः संबंधस्सर्थः तत्त्वमस्यादि
वाक्यस्याखंडार्थेनमुहेनापि ब्रह्मणाध्यासिकं तादात्म्यं केनकुहश्चनेह नास्ति इत्यादिनिषेध
वाक्यमननेसतिशमदमादिसंपन्नस्यातिशुद्धचित्तस्यैवेतिनदोषः यद्वा शब्दादिशिष्टबोध
एव अखंडार्थस्तु मानसबोधविषय एव यद्वा निषेधवाक्यसहकारेण धर्मोपलक्षिते शक्ति
ग्रहात् तदुपलक्षिताखंडार्थस्यैव बोध इत्यादि द्रष्टव्यं तादात्म्यमूलकस्य संबंधत्वे अर्थभे
दात्तादात्म्यापन्नशब्देषु भेदो चित्तेनार्थभेदाच्छब्दभेदस्तु उपपद्यते समानाकारत्वमात्रे
णतु एकोयं शब्दोनानार्थ इति व्यवहारः तस्य निरूपकाश्रयभेदाभ्यां भेद इत्येके अन्ये त्वेक

त्रैवाम्रफलेरूपरसगंधादीनांभिन्नानांतादात्म्यवत् एकत्रैवशब्देनेकार्थनिरूपभेदरस्येके
ऋम्येत्येकत्रैवाम्रफलेरूपरसगंधादीनांभिन्नानांतादात्म्यवत् एकत्रैवशब्देनेकार्थनिरूपिता
निभिन्नानितादात्म्यानि इत्याहुः परेतुनिरूपकभेदेपितादात्म्यमेकमेवेति शक्तैरेकमेवेत्याहुः
हलोनंतराइतिसूत्रेसरूपसूत्रेचभाष्येसूचितमिदंपक्षद्वयंसर्वजातीयेः संकेतैरस्यसंबंधत्वे
नैवज्ञानंतरेवचबोधसाधनमितिबोध्यं नचतयोस्तादात्म्यस्वीकारेसमव्याप्ततयाशाब्दादनु
मानमेवस्यादर्थस्येतिप्रमाणांतरत्वभंगः पक्षधर्मताज्ञानाद्यनपेक्षतयातस्यप्रमाणांतरत्वा
त् सिद्धिसत्त्वेच्छांविनापिबोधदर्शनाच्च किंचपरमाचासदार्थप्रत्ययस्यजायमानस्यानुमिति
त्वासंभवः परेभ्यस्तुतिरेवेतितुनयुक्तं तत्रानुल्लेखात् वाक्यादर्थितदापत्तेश्च किंचशाब्दया
मीसनुव्यवसायान्तस्यतिस्वमनुमितित्वंवातज्जन्यप्रत्ययस्य किंचतथानुव्यवसायप्रयोज
काभावः शाब्दत्वजातेस्तदवच्छिन्नेआकांक्षादिज्ञानहेतुत्वस्यचकल्पनावश्यकत्वेनदृसनुमि
तित्वस्यव्याप्तिस्मृत्यादेश्चकल्पनेगौरवं किंचसिद्धित्वेपिशाब्दबोधोदयेनानुमितेश्चानु
दयेनसिद्धिप्रतिबध्यतावच्छेदककोटौशाब्दातिरिक्तत्वविशेषणदानेगौरवं नचतस्यसत्त्वादि
ताननाशादेवतत्रानुमितिः अनुभवविरोधात् सर्वत्रतथापत्तेश्चेतिदिक् साधुत्वाप्तिः
साधुत्वधीवापभ्रंशेष्वपिशक्तिग्राहकशिरोमणेर्व्यवहारस्यतुल्यत्वात् व्यवहारदर्शनेनचपर

र्वजन्मानुभूतशक्तिस्मरणं अत एव बालानां तैरप्यां च बोधः नहि तेषां तद्दैव तत्संभवदस्मने
न च साधुस्मरणान्ततो बोधः ते साधुष्वनुमानेन प्रसयोसत्तिहेतवः एवं चेति परास्ताः शि
समाणः प्रभाषते अयकं नहि द्विरो तेन भक्ते भवति निश्चय इति हर्युक्तेः अनुमानमत्र ज्ञानं साधु
विषयस्मरणेनेत्यर्थः नहि द्विरां साधुविरो असाधोः साधुप्रकृतिकत्वात् सादृश्येन ततस्तान
मितिवाच्यं साधुस्मरणेन विनापि बोधानुभवात् तथा च कसाधुशब्दमजानतां बोधानापत्ते
श्च तदर्थज्ञापकत्वेन स्मरणं तु नार्थोपस्थापकं शक्ततावच्छेदकानुपूर्व्यग्रहात् तथा च कसर्व
नामस्मरणाननुभवाच्च उच्चारितस्यैव बोधकत्वेन स्मृतसाधुतो बोधासंभवाच्च न च शक्तिभ्र
माद्बोधः पूर्वपूर्वभ्रमाच्चोत्तरभ्रम इति पामराणां शक्तिग्रहेपि तद्भ्रमोपपत्तिरिति वाच्यं घ
टत्वविशिष्टघटादिरूपार्थबोधनिरूपितताया घटादिपदस्य इति त्वेग्रहीताया भिन्नानुपूर्वीक
त्वरूपविशेषदर्शनसत्वेन साधारणधर्मदर्शनाभावेन च गगरीपदादौ भ्रमानुपपत्तेः य
दि तु अशक्याके नचित् गगरीति प्रयुक्ते एवं वेमादावपि घट इति साधुस्मरणात् प्रयोजनस्य बो
धे तटस्थस्य गगरीशब्दादेवास्य बोध इति भ्रमेणास्य शक्तिभ्रमं तन्मूलभ्रान्त्येषामपि तदुक्तं
हरिणा तादात्म्यमुपगम्यैव शब्दार्थस्य प्रकाशका इति एवशब्देन तदुपगमस्य भ्रमत्वं सूचितं
तादात्म्यस्य शक्तित्वं च स्पष्टमेवोक्तं जैमिनिना च तत्र शक्तिग्रहानुरूपत्वादिति तद्भाष्यकृता

मंजू०
७

चतत्रोक्तरीत्या शक्तिभ्रम उपपादित इति उच्यते तदा प्रत्येकं तत्तत्संस्कृतस्य तत्तदपभ्रंशेन विनिगम
नाविरहात्तेषु शक्तिः न च सकलदेशशिष्टपरिगृहीतत्वं विनिगमकं शवतिर्गतिकर्मा कंबोजे
ष्वेव विकार एवैनमार्या भाषंते इत्यादिभाष्यरीत्या तत्तद्देशनियतसंस्कृतेषु शक्तिसिद्ध्यनापत्तेः
वाचकस्य व्यंजकत्वे आलंकारिकाणां प्राकृतभाषोदाहरणस्यासंगतत्वापत्तेश्च तत्तद्देशीयशि
ष्टानां तत्तद्भाषाप्रयुज्यमानस्य निर्विचिकित्सशक्तत्वप्रत्ययस्य बाधकं विना भ्रमत्वायोगाच्च
अत एव स्त्रीशूद्रबालानां प्रयुक्ते साधौ अर्थसंशये तदपभ्रंशेन निर्णयः आर्यम्लेच्छाधि
करणस्य तु दृष्टांतासंगर्यं तत्र हि यद्यपि आर्या यवशब्दं दीर्घशूके प्रयुंजते तमेव बुध्यंते म्लेच्छास्तु
प्रियंगौ प्रयुंजते तमेव बुध्यंते म्लेच्छपदेनानार्यास्तथापि आर्यप्रसिद्धेर्बलवत्त्वाद्दीर्घशू
कपरत्वमेवेति सिद्धांतितं तत्र हि शवतिर्गतिकर्मेत्याद्युक्तभाष्यादृष्टयोरविशक्तिग्रहाद्बोधे
नोभयत्रापि साधुत्वेन शक्तत्वे न च तृतीयस्य संदेहे विकल्पबोधे वा आर्यप्रसिद्धेर्बलवत्त्वाद्दे
रेतद्बोध एवोचित इति एवं चानार्यैरपि यत्नेन यवा एवोपादेयाः पूर्वपक्षे तु अनार्यैः प्रियंगव
एवोपादेया इति विशेषः ननु उक्तं हरिणा शब्दतत्त्वविद्भिः शिष्टाः शब्दार्थेषु व्यवस्थिता इति आर्या
णां शिष्टत्वात्तत्प्रसिद्धेर्बलवत्त्वमिति बोध्यं ननु अनार्यप्रसिद्धेर्ये शक्तत्वे साधुत्वे वा तात्पर्यं
जैमिनिराह तेष्वदर्शनाद्विरोधस्य समा विप्रतिपत्तिः स्यादिति यवशब्दे उभयथाप्रयोगेव

गमादिकल्पः स्यादित्यर्थः एवं पूर्वपक्षे सिद्धांतसूत्रं शास्त्रस्थानां तन्निमित्तत्वादिति यः शास्त्र
स्थानां शिष्टानां स शब्दार्थो वेदे इति शेषः तेषामविच्छिन्नात्स्मृतिः शब्देषु वेदेषु च तेशिष्टाहि
तिस्मृतिसाधारणे निमित्तमित्यर्थः यवो दीर्घशूकेषु शक्तः सादृश्यात् प्रियंगुषु प्रयुज्यते एवं
सर्वेष्वीलेद्वयोरप्युत्पत्तेः तत्र तयोः तादृशमिति शबरस्वामी अथ वदंति तत्र एकस्य गौणत्वमि
ति विकल्पस्य पक्षासंगतिः किंच यत्रान्या ओषधयो म्लायंते यैते मोदमाना उत्तिष्ठंति इति दीर्घ
शूकान् यवान् दर्शयति वेद इति भवदुक्तस्य संगतिः प्रियंगूनामपि तथैवोत्पत्तेः अन्यथा भवदुक्त
सादृश्यासंगतिः वाक्यशेषोपि उक्तयुक्तिमूलक इति दिक् न्यायभाष्यकारोपि आप्तोपदेशः
शब्द इति सूत्रेर्थसाक्षात्कारवानाप्तः स यथा दृष्टार्थं तु बोधयिषया यं प्रयुंक्ते स प्रमाणं शब्द इ
ति ऋष्यार्यम्लेच्छानां समानमाप्तलक्षणमित्याह अत्र रुचिर्वेदोम्लेच्छोपशब्दवक्ता ततः स्व
रूतासामयिकः शब्दार्थप्रत्यय इति प्रमाणत्वेन नत्वितरः शब्दमात्रजप्रत्ययस्य तुल्यमेव सामा
यिकत्वमुक्तं सामयिकत्वं समयगृहीतसंबंधजन्यत्वमिति न ऋषीणां विरोधः काव्येषु च्युतसं
स्कृतिदोषस्य दूषकताबीजं तु साधुपदसमुदायमध्ये असाधुपददर्शने न विप्रसभायां चंडाल
दर्शनेनेव सहृदयोद्वेग एवेति बोध्यं साधुत्वं तु नापभ्रंशानां शिष्टैर्धर्मबुध्यानादरप्रयोगात्
न चैवं ततो बोधानापत्तिः असाधुत्वनिश्चयस्य तत्प्रतिबंधकत्वात् इति वाच्यं तत्सत्वेपि ततो

बोधदर्शनेनतस्यतत्प्रतिबंधकत्वात् साधुत्वंचव्याकरणव्यंग्योर्थविशिष्टशब्दनिष्ठः पुण्यजन
कतावच्छेदकोजातिविशेषः तदुक्तमेकः पूर्वपरयोरितिसूत्रेभाष्येएकःशब्दःसम्यक्ज्ञातः
शास्त्रान्वितः(शास्त्रानुसारनमार्गेणान्वि)सुप्रयुक्तःस्वर्गेलोकेचकामधुग्भवतीति सम्यक्ज्ञातः
सम्यक्त्वेनसाधुत्वेनज्ञातःशास्त्रान्वितः शास्त्रानुसारनमार्गेणानुसंहितःसुप्रयुक्तः शिष्टो
च्चरितःप्रयुक्तः तस्यचशिष्टप्रयोगकोशव्याकरणाद्यनुमापकं नालिके द्वीपिवास्यार्थमा
दायैवपदस्यसाधुत्वं पदांतरसंबंधेऽन्वयाद्यनुपपत्त्याशक्यतावच्छेदकारोपेणैवलक्ष्यार्थ
बोधात्गोपीत्यादौप्रक्रियादशायांगोवेतिप्रातिपदिकस्यगोपत्वारोपेणतत्प्रबोधकत्वा
नुमानंपुंयोगादाख्यायामितिशास्त्रतः लिंगलिंगपरिज्ञानेसूत्रेप्रत्ययशासनं सोयमित्यभि
संबंधात्शब्दस्याभिधायितेतिहर्युक्तेः अतएवयदिह परिनिष्ठितं तत्साध्वित्यपरिपतित
मवाक्यात्साधुत्वबोधकंव्याकरणमितिभाष्यंसंगच्छतेतद्बोधकंव्याकरणमयत्वेपाणि
नीयमेवेत्यपिभाष्येस्पष्टं एवंचपाणिनीयव्याकरणमुपसत्तिज्ञानपूर्वकं साधुत्वेनज्ञातसा
धुशब्दप्रयोगाद्धर्म इतिबोध्यं अतएवसमानायामर्थावगतौशब्देनचापशब्देनचशास्त्रेण
धर्मनियमइतिभाष्येउक्तं वाचकत्वाविशेषेपिनियमः पुण्यपापयोरितिहरिणाप्युक्तं किं
चापभ्रंशेशक्तिभ्रंशेकदापिकस्यापिभवहेतुः बाधादर्शनेनतत्रशक्तिज्ञानस्यभ्रमत्वंग्रसति

बाधके प्रमाणत्वस्यैवासिद्धत्वात् किंचैवमक्षीणामार्थत्वानेन तदभावनिश्चयात्तेषामप्रमासंभवे
न ततो बोधानापत्तिः किंच प्रमाणानामेव शब्दार्थबोधकत्वेन तेषां मध्यस्थेन संबंधस्यावश्यकः
अत एव गौरित्यस्य शब्दस्यार्थे बहवो गावी गोणी गोता गोपोतलिकेत्यादयोऽपभ्रंशा वर्तन्ते इत्यर्थ
कं गौरित्यस्य शब्दस्य गाव्यादयोऽपभ्रंशा इति भाष्यमाजस्येन संगच्छते अत एव धर्मार्थत्वं साधू
नामुक्तं भाष्ये एतेनार्थोपपद्येनेउक्तं तेनोच्चारणं धर्मायेति शबरस्वामिनुक्तमपास्तं जैमिनिसूत्रस्या
प्ययमर्थः अपभ्रंशा अपि साधवः तेपि हि साधयंत्यर्थमिति पूर्वपक्षे अन्यायोनेकसाधुशब्द
त्वमिति केचिदेव साधवो न सर्वे इति मनसि निधाय तर्हि साधोः प्रयोक्तव्ये साधूच्चारणं कथ
मित्याशंक्य शब्दे प्रयत्ननिष्पत्तेरपराधस्य भागित्वमिति सूत्रेण प्रयत्नसाध्यकार्ये प्रमादस्य द
र्शनात् यथाशुक्ले पतितव्यामिति कर्दमे पततीत्यथा साधोः प्रयोक्तव्ये साधोः प्रयोग इत्युक्तं किंचैक
स्यार्थस्यानेकसाधुशब्दत्वमन्याय्यं तस्मादेको नादिरन्येऽपभ्रंशाः हस्तः करपाणिरित्यादयो नियुक्तो
पदेशात्सर्वे साधव इत्युक्तान्ताभियुक्तोपदिष्टः साधुरित्युक्तं तत्रेदमाशंक्यते गौरिति प्रयोक्तव्ये
गाव्यादीनामिव गगर्यादीनामपि प्रमादात्प्रयोगः कुतो नेति तत्रेदं सूत्रं तदशक्तिश्चानुरूपत्वा
दिति तेषामेवाशक्तो उच्चारणमनुरूपत्वादर्थेतो व्ययवतश्चानुरूपत्वादितितदर्थः तत्रार्थतश्चा
नुरूप्यात्ग्रहणे गोपादिशब्दानामपि उच्चारणं प्रसज्येत एकदेशानुरूप्याच्च विभक्ति मसयेप्रम

मत्कैरागच्छामीति प्रयोगादस्मत्केभ्यस्तत्पर्यायाद्विभक्तिर्भवतितत्र यद्यप्यंतरर्थे लौकिकः प्रयोगस्तथाप्यस्सा
धुर्वेदेतु साधुरित्यमत् एवंच पतंजलिनैकवाक्यताभवति नन्वपभ्रंशानां शक्तत्वेर्थवत्वादर्थ
वत्सूत्रेण प्रातिपदिकसंज्ञापत्तिरिति चेदिष्टापत्तेः अतएव पस्पशायामेवंहिश्रूयते पर्वाणस्त
र्वाणोनामऋषयोवभूवुस्तेतत्रभवंतोयद्वानस्तद्वान इतिप्रयोक्तव्ये पर्वाणस्तर्वाण इति प्रयुंजते
यांस्तेकर्मणिपुनर्नापभाषंते इति भाष्येउक्तं तत्रपर्वाणस्तर्वाण इतिलौकिकाद्वापि पर्वाणस्तर्वाणो
नामेति प्रयुक्तं अतएवऋत्वोत्यादिवभूवुरित्यनेनसामानाधिकरण्यंच प्रकृतिप्रत्यययोरुभयो
रपिशास्त्रविषयत्वेएवसाधुत्वंनत्वन्यतरस्य गगरीत्यादिचघट इतिपरस्यैवापभ्रंश इतिनत
नःतुः गगरीमित्यादि प्रयुंजतेचेतिकेचित् परेतुसाध्वनुशासनेऽस्मिन्शास्त्रे इति भाष्योक्तेः अ
र्थवत्वेनसाधूनामेवसंज्ञाविधानुद्देश्यत्वमिति नासाधुषुप्रातिपदिकसंज्ञा पर्वाणस्तर्वा
णइत्यादौसुबप्यसाधुरेव अतएव पस्पशेतिसूत्रेभाष्येकिमप्यद्ययसमित्यसाधुः इतिजसा
दस्येप्यइतिनत्वादिसुक्तं प्रकृत्युद्देशेनैवप्रत्ययानां विधानात्केवलानामसाधुत्वंबोध्यं त
त्रइतिजसदशात्वात्कश्चित्साधुरितिभाष्ये इतः प्रत्ययः परएवेतिनियमेनाप्यस्यासाधुत्व
मुक्तं भाष्ये अर्थतः शब्दतश्चयः प्रत्ययजातीयः सपरएवेत्यर्थेनास्यासाधुत्वं बोध्यते एवंच
शास्त्रविहितत्वाभावादसोप्यसाधुत्वमितिमुक्तप्रायं अन्येत्वन्यशब्दस्यासाधुत्वमुक्तमन्यत्र

अत एव प्रकृतिपर एव प्रत्ययः प्रत्ययपरैव च प्रकृतिरिति नियमाकारो दर्शितो भाष्ये साधु
नामेव प्रत्ययविधानुद्देश्यत्वेन प्रकृतित्वं तेन साधुत्वबोधनद्वारा समुदायसाधुत्वबोधकं
व्याकरणं अर्थवत्त्वबोधनवत् एवं च भाष्यानुसारेण क्रियमाणनामोत्तरं विभक्तिरपि असा
धुरित्याहुः ननु साधुत्वस्य जातित्वे कत्वादिना संकरस्तस्येति चेन्न ययोर्जात्योः परस्परासामा
नाधिकरण्ये नैव सिद्धिः परस्परमाश्रयभेदकता च लोकसिद्धा तयोः सांकर्यस्येवदोषत्वात्
आश्रययोर्भेदभंग एव हि सांकर्यदूषकताबीजं तादृशजात्योर्यत्र सांकर्यप्रसंगः तत्रोभय
वैलक्षण्यं स्वीकार्यं यथानन्त्वे हि अन्यतरे वा ययोस्तु सामानाधिकरण्ये सिद्धिस्तयोः सांकर्यस्य
व्याप्यव्यापकभावापन्नजात्योः सांकर्यस्येवादोषत्वात् एवं सांकर्यमुपाध्योरपि दोषाय यदि
तत्रापि आश्रयभेदभंगप्रसंग इति स्पष्टं श्रीहर्षकृतखण्डने ननु सांकर्यस्य सर्वथा जात्यभाव
कत्वकत्वं मानाभावात् एवं च भूतत्वमूर्तत्वे पृथिवीत्वशरीरत्वे च जातिरूपे त्वक्रियास
मवायकारणतावच्छेदकतया मूर्तत्वादेरिव भूतत्वादिपरशक्ततावच्छेदकतया भूतत्वादेरपि
जातित्वात् न हि कारणतावच्छेदकतयैव जातिसिद्धिः न शक्यतावच्छेदकतयेति राजाज्ञा
स्तीति दिक् इदं च भाष्यानुसारेण कृतानां रुचीमंची अपि कोंडेत्यादि नाम्नामसाधुत्वमेव
एधुनादिसंज्ञानामननुशिष्टप्रयुक्तत्वासाधुत्वमेव सर्वशब्दानां सर्वार्थवाचकत्वेपि हि

सं.त्र.०
१०

रडेजित्थादीनामज्ञातशक्तिज्ञापकसंकेतरूपतया विधित्वमेव यत्तु व्यवहाराय नियमः स
ज्ञायाः संज्ञिनि कश्चित् निसर्ग एव तु संबंधो ऽस्त्यादिगुणवादिवत् डित्थादीनां च शास्त्रे ऽस्मिन्
शास्त्रव्यवच्छेदलक्षणः अकृत्रिमोपि संबंधो विशेषणविशेष्यवत् इति तत्र संकेते कृते तत
संकेतज्ञानरूपप्रकरणवशात्स्वेच्छोपस्थितिर्नामस्येति फलितनियमपर्यंतदेतद्विशेषणविशे
ष्यवदित्यनेन सूचितं यथा नीलो घट इत्यनेन विद्यमान एव घटे नीलसंबंधः पुरुषेण बोध्यते न तु तेन नीलादि
योगः क्रियते नील एव न पीत इति नियमस्य फलितं तद्विदित्यर्थः पाणिन्युपदेशादिरूपसंकेतग्राह्यत्वात्तत्सं
ज्ञात्वस्य संज्ञानामनित्यत्वं व्यवहारे ऽपि वाचकता बोधकत्वे पितृदनुत्पादकत्वात् न शब्दार्थसंबंधनित्यताहा
निः तेषां न द्विपदकाव्यत्वोपदेशे वक्तुरिच्छाया एव नियामकत्वात् यदृच्छाशब्दव्यवहारः स्वेच्छया संज्ञाः क्रि
यंते इति च व्यवहारः वेदमात्रप्रसिद्धशब्दभिन्नत्वरूपलौकिकत्वादुत्कटसाधुत्वाच्च तेषां शास्त्रविषयता
किं च सर्वेषां सर्वार्थवाचकत्वमस्माभिर्ज्ञेयं विशिष्य सकलार्थशब्दज्ञानाभावात् सामान्यज्ञानं तु न बोधो
पयोगि योगिदृष्ट्या तु न तथा व्यवहारः शास्त्रे स्पष्टं चेदं सर्वं रूलकृत्सूत्रे भाष्ये इत्यन्यत्र विस्तरः देशभाषा
नुसारेण क्रियमाणनाम्नः सूत्रवाकादौ संकल्पादौ चोल्लेखस्तु वर्वराणां भाषैव तस्माद्दोषवदाद्यंत
रस्थं दशरं चतुरक्षरं वा नाम कर्तव्यं कृतं कुर्यात् न तद्धितमिति गृह्यसूत्रोक्तनाम्नैव साधुना तदुचितं
किं चास्मादिन तत्र देवता उक्ता न तत्र देवता एता एताभिर्यजकर्मणि यजमानस्य शास्त्रज्ञैर्नाम न

त्रजं स्मृतमिति वेदांगज्योतिषोक्तं नक्षत्रनाम च तदुपयोगिनामकरणेन नक्षत्रं नाम नक्षत्रपादाक्षरादि
कार्यमिति शिष्टाः गृह्यपरिशिष्टे च कश्चित्तथैवोक्तं एतद्व नामकरणप्रकरणेन नक्षत्रनाम च निर्दिशतीतरह
संभवति सापस्तंबेनोक्तं तद्देवचाभिवादनीयं च समीक्ष्य तन्मातापितरौ विद्यातामोपनयनादित्याश्व
लायनेनोक्तं एवमेव नामकरणे बहुशिष्टानामाचारः अत एव ज्योतिषे यज्ञकर्मणीत्युक्तं तत्र नक्षत्रवा
चकेभ्यो जातार्थप्रत्ययेन निष्पन्नं तन्नक्षत्रजं नामेति केचित् तत्र पुत्रस्य नाम गृह्णाति रौहिणाय निष्पा
येति बौधायनसूत्रे मौलं यत्तस्माद्वसावित्यादिरूपनाम नीरसाश्वलायनेनोक्तं तत्तु संदिग्धं यद्यपि दे
वत्रातेनानुराधो देवदत्त इति प्रयोक्तव्यमित्युक्तं तत्र सत्रासत्तरानुग्रहशिक्षः शांखायनादयश्च ज्यो
तिषोक्तमेवाद्रियंते इदानीमाश्वलायनादेवत्रातो न्यायानिर्देशो यजमानस्य नाम सो व्यवहारिकं
नाक्षत्रं च यथाहुः क्षेत्रशर्मा रौहिण इत्यपीत्याश्वलायनश्रौतकारिको न्याय्यश्च तथैवाचरंति नामक
रणेपित्रदेवतानामोपनक्षत्रं एवं हि ज्योतिषेणतेषामेकमत्वकल्पना लाघवं भवति विकल्पस्या
नोचित्याच्च अभिवादनं प्रयोजनमस्येत्यर्थकाभिवादनीयशब्देन तस्य वक्तुमशक्यत्वाच्च तस्यसा
धारणमित्याहुः अत्र तत्त्वं महांतो विदां कुर्वंतु यत्तु कूचीमादीनां साध्वसाधुबहिर्भूतत्वं शास्त्र
विशयताचेति तन्न तृतीयकोटेरभावात् एवंविधेभ्यो न्यत्र शास्त्रविषयेषु साध्वसाधुबहि
र्भावस्य क्वापि दृष्टमात्वाच्च एतएव कूल्लूक भट्टेन ल्कारोपदेशे प्रयोजनं यदछाशब्देद्घृत

काषदेहीत्यत्र भाष्यकृतकस्याभावात् तस्यैवसंज्ञात्वं भाष्यतत्त्वस्येत्यादिना भाषासाधुत्वा
ख्यास्त्राविषयत्वेनपरिहृतं भाष्यस्येतस्यशास्त्रबोधितस्यशिष्टप्रयुक्तस्यचेत्यर्थः यद्यपिसमानेप्र
वृत्तिनिमित्तेन्वाख्यानोनन्वाख्यातस्यनिवर्तकोभवति यथादेवदत्तशब्दो दिष्टशब्दं निवर्त्तयतीतिभा
ष्येणकृतकस्यशास्त्रसिद्धत्वेपिक्रियाप्रवृत्तिनिमित्तकत्वेन कृतकशब्दस्यशब्दप्रवृत्तिनिमित्तक
स्याभिन्नार्थकस्यास्यनासाधुत्वबोधनं लभ्यते तथापिशिष्टाप्रयुक्तत्वेनैवास्यासाधुत्वकैय्यटेनोक्तं
स्वीकृतंचशास्त्रान्वितानामपिवचतोमादीनां शिष्टाप्रयुक्तत्वेनासाधुत्वं सर्वैः ततः पर्यंतरमुक्तं
तदसाधुत्वं शास्त्रविषयत्वं चस्पष्टमेव एवं चैतस्यैकवाक्यतया आरोपितत्वमेवबोधितं
एकस्यैवपक्षभेदेन शास्त्रविषयत्वतदविषयत्वयोर्नवेति सूत्रभाष्येतिरस्कारात्र किंचैवंसाधु
त्वस्य व्याकरणांगतानापत्तिः साध्वनुशासनेशास्त्रेइत्यादिभाष्यासंगतिश्चेतिदिक् एवं चभाषा
शब्दानांशिष्टैर्धर्मबुध्यासाधुपर्यायवदप्रयोगात् व्याकरणलक्षणाननुगमाच्चार्थवत्त्वेपिशास्त्राविषयत्व
मितिनत्त्वात्रआदिपदिकत्वमित्युक्तं शक्तिस्त्रिधा रूढिर्योगो योगरूढिश्च शास्त्रकल्पितावयवार्थाप्रतीतौ
यदर्थनिरूपितं प्रकृतिप्रत्ययसमुदायमात्रेबोधकं तस्यदेशातदर्थनिरूपितारूढिः यथामलिन्पदादे
शास्त्रकल्पितावयवार्थमात्रबोधेयोगशक्तिर्यथापाचकादौ अश्वगंधादिपदमौषधिविशेषबोधेरूढं
अश्वसंबंधवत्तयावाजिशालाबोधेयौगिकं इदंयौगिकरूढमित्युच्यते रूढियोगापहारिणांतितु प्र

करणाभावेबोध्यं यत्रमंडपपदादिभ्यो मंडपानकर्त्रादेरूढ्यर्थमंडपादिगुणवत्वेन बोधस्तत्र प्रथमप्र
तीतरूढिविषयमुख्यार्थत्यागेनयोगारूढिपूर्वकलक्षणायावलवत्वेनलक्षणयैवबोधः यत्रशा
स्त्रकल्पितावयवार्थान्वितविशेष्यभूतार्थनिरूपितसमुदायेबोधकत्वंसायोगरूढिः यथापंकजादिप
देतत्रपंकजनिकर्तृपद्ममितिबोधात् पद्मस्यानुपपत्तिप्रतिसंधानंसंबंधप्रतिसंधानंचविनाबोधा
न्नतत्रलक्षणावसरः क्वचितात्पर्यग्राहकवशात्केवलरूढ्यर्थस्यकेवलयौगार्थस्यबोधः भूमौपं
कजमुत्पन्नंकल्हारकैरवमुखेष्वपिपंकजेष्विसादौ स्पष्टंचेदं शार्हादितिसूत्रेभाष्येशैवाद्युक्तिः संयो
गादिभिर्नानार्थेषुशब्देषुनियम्यते तदुक्तं हरिणासंयोगोविप्रयोगश्चसाहचर्यंविरोधिता अर्थः प्र
करणंलिंगंशब्दस्यान्यस्यसंनिधिः सामर्थ्यमौचितीदेशः कालोव्यक्तिः स्वरादयः शब्दार्थस्यानवच्छे
देविशेषस्मृतिहेतवइति एतेसंयोगादयः शब्दार्थस्यानवच्छेदेनदपाकरणद्वारेणविशेषस्मृतिहे
तवोनिर्णयहेतवइत्यर्थः उपस्थितानामनेकेषामेकतरमात्रार्थेतात्पर्यनिर्णयद्वारातन्मात्रार्थवि
षयकान्वयबोधजनकाइतिभावः संख्यासंज्ञासूत्रेभाष्येपिस्फुटमेतत् अत्रसामर्थ्यमेवैकंमु
ख्यंनिर्णायकंसंयोगादयस्तद्व्यंजकप्रपंचः तैःसामर्थ्यस्यैवाभिव्यक्तेरितिपरे सवत्साधेनुरव
त्साधेनुरितिसंसर्गविप्रयोगयोरुदाहरणेरामलक्ष्मणावित्यादौसाहचर्येणोभयोर्युगपदेवनि
यममितिनान्योन्याश्रयः साहचर्यसादृश्यंसदृशयोरेवसहप्रयोगनियमात् रामार्जुनगतिस्तयो

मंज० १२

रित्यत्रविरोधेनतत् अंजलिनाजुहोति अंजलिनासूर्यमुपतिष्ठते इत्यत्रजुहोत्यादिपदार्थवशात् अंज
लिपदस्यतत्तदाकारांजलिपर्यवसानं सैंधवमानयेत्यादौ प्रकरणेनतत् अक्ताः शर्करा उपदधातीत्यादौ
तेजोवैघृतमितिघृतस्तुतिरूपाल्लिंगात् रक्ता इत्यस्य घृतसाधनांजनपरत्वं रामोजामदग्न्य इत्यादौ जा
मदग्न्यपदसंनिधानेनरामः परशुरामः अभिरूपायकन्यादेया इत्यादौ अभिरूपतरायेतिसामर्थ्या
त्प्रतीयते नैवं परशुनेत्यादौ आचित्यात् परशुनेत्यस्य छेदनार्थत्वं भातिसत्र परमेश्वर इत्यत्र राजधा
नीरूपाद्देशात्परमेश्वरपदं राजबोधकं चित्राभानुर्भातीत्यादौ रात्रावग्नौ दिवासूर्ये व्यक्तिर्लिंगं मि
त्रोभातीतिमित्रोभाति अत्राद्येसूर्योन्येसुहृत् स्थलरूपत्वामित्यादौ स्वरात् पुरुषबहुव्रीह्योर्निर्णयः
आदिनापृथक्त्वसत्वनत्वादि सुसिक्तमित्यत्रपूजार्थः सुः कर्मप्रवचनीयः सुषिक्तमित्यत्रोपसर्गत्वा
र्थः प्रणायके प्रयनक्रियाकर्तृत्वात् प्रनायके प्रगतनायक देशबोध इति पुंजराजः कश्चित्प्राक
रणिकार्थबोधोत्तरं वक्तृबोद्धव्यवैशिष्ट्यप्रतिभादिसहकारेण द्वितीयार्थबोधोपि यथाशालकारिप्र
युक्त सुरभिर्मांसमित्यादेर्द्वितीया श्लीलार्थबोधः ननुसर्वेषां सर्वार्थवाचकत्वेन लक्षणोच्छेद इति
चेन्न योगिनां सर्वार्थवाचकत्वज्ञानेप्यस्मदादीनां तदभावात् किंचान्वयाद्यनुपपत्तिज्ञानपूर्वकं
शक्यत्वेनगृहीतार्थसंबंधज्ञानेनोद्बुद्धशक्तिसंस्कारतो बोधे लक्षणेति व्यवहारात् तच्छक्तिसं
स्कारश्चेद् दृष्टोस्य लेजन्मांतरीणो पि वस्तुतस्तात्पर्यानुपपत्तिरेव तद्बीजं अन्यथागंगायां घोषइत्यादौ

घोषादिपरे एवमकारादिलक्षणापत्तिः तावताप्यन्वयानुपपत्तिपरिहारात् एवं रूढिप्रयोजनान्यतरदर्पितत्का
रणमनुभवबलात् अत इदं बोध्यं शक्यार्थोपस्थितौ तद्विषयान्वयबोधे जाते तस्मिन् रूढतात्पर्याविषयत्वेना
प्रमाण्यग्रहे सति लाक्षणिको बोधः शक्यार्थान्वयबोधं विना तत्र तात्पर्याविषयत्वग्रहासंभवात् संसर्गविष
यज्ञानस्यैवान्वयबोधत्वात् प्रसिद्धनानार्थविषयकबोधजननकत्वमेव नानार्थत्वमिति नातिप्रसक्तं ना
नार्थत्वं संबंधज्ञानं तीरसंबंधिप्रवाहबोधकमिदमिति गंगापदं शक्यप्रवाहसंबंधितीरमिति वा संबंध
एव लक्षणे त्वन्मते अत्र पक्षेपि संयोगसंयुक्तवृत्तित्वरूपसंबंधद्वयरूपा एकालक्षणा लक्षणे जातो एक
वचनं एवं च लक्षणीतावच्छेदकेपि लक्षणाभवत्येवेति बोध्यं विशेषणे संयोगारोपो वा लक्ष्यतावच्छेदके
न लक्षणा उभाभ्यामनारोपितैकसंबंधस्यासंभावात् विशेष्यगतसंबंधज्ञानस्य लक्ष्यतावच्छेदकप्रकार
कलक्ष्यबुद्धित्वकार्यतावच्छेदकमिति लक्ष्यस्यैव तस्य भानमित्यन्ये तादृशसंबंधज्ञानजन्यात् दुपस्थितिरेव
लक्षणात्वविषयसंबंधिवाचकत्वेन चेष्टापदनिष्ठवृत्तित्वं तु शाब्दबोधजनकपदपदार्थसंबंधत्वमि
तिपरे तन्मतेपि स्फुटमेव लक्ष्यतावच्छेदके लक्षणा पदादपि शाब्दबोध एव न तु स्मृतिरिति तेषामाश
यः यत्र कमलानि कमलाशादेशोरभविशिष्टकमलबोधः तत्रापि विशिष्टे लक्षणा साद्विविधा गौणी
शुद्धा स्वनिरूपितसादृश्याधिकरणत्वसंबंधेन शक्यसंबंधप्रतिपादिका गौणी तदतिरिक्तसंबंधे
न तत्प्रतिपादिका शुद्धा प्रकारांतरेणापि सा द्विविधा अजहत्स्वार्था जहत्स्वार्था च शक्यार्थपरित्यागेने

मंज़०
१३

तरार्थलक्षणमाद्यातदपरित्यागश्चशक्यार्थस्ययेनकेनापिरूपेणलक्ष्यार्थान्वयिनान्वयित्वंतेनछत्रिणो
यांतिकुंताःप्रवेशयकाकेभ्योदधिरक्ष्यतामित्यादौनदोषः अछत्रआदिसाधारणरूपेणछत्र्यादेः कुंत
वद्विशेषणतयाकुंतानांदध्युपघातकतयाकाकादेश्चलक्ष्यार्थान्वयिक्रियाविशेषणत्वात् स्वार्थप
रित्यागेनेतरार्थलक्षणमंसात्तस्परित्यागश्चशक्यार्थस्यकेनापिरूपेणलक्ष्यार्थान्वयिनानन्वयित्वं
अतोगांवाहीकंपश्येत्यादौनदोषः अत्रगोसदृशेलक्षणायामपि नगोत्वस्यदर्शनक्रियान्वयित्वं
एवंगत्साश्रमेपि प्रकाराःकुप्यात्वगादिशब्दानां त्वचाङ्गमित्यादौत्वगिंद्रियेनिरूढलक्षणा असतिप्रयो
जनेशक्यार्थबाधप्रतिसंधानपूर्वकंतत्संबंधप्रार्थबोधेनिरूढलक्षणेतिव्यवहारोन्यथारूढि
शक्तिरेवेतिबोध्यं प्रयोजनवतांतुकुंताः प्रविशंतीत्यत्रभातिपलायमानत्वाख्येकुंतानांतात्पर्यवि
षयकुंतिप्रवेशेन्वयबाधात् गंगापदेनस्वसंबंधितीरंलक्ष्यतेगंगागतशैत्यपावनत्वप्रतीतिः
प्रयोजनंगौर्वाहीक इत्यत्रगोसादृश्यंलक्ष्यतावच्छेदकंगवाभेदप्रत्ययः फलंव्यंजनाजन्यबोधेबाध
ज्ञानस्याप्रतिबंधकत्वात् एषवाहार्यः शाब्दजनभेदकधर्मोपस्थितिकालिकत्वात् गंगायांघोष
इत्यादौचगंगागतशैत्यादिप्रतीतयेमध्येतीरादौगंगाभेदप्रतीतिः उपकृतंबहुनामेत्यादौलक्ष्ये
पकारेउपकाराभेदप्रतीतिद्वारैवमाधुर्यंव्यंग्यं केचित्तुगौर्वाहिकइत्यादौसाधारणधर्मयोजडादि
र्जडत्वेनलक्ष्यस्तत्रगवाभेदप्रतीतिद्वारागोवत्साधारणजडत्वप्रतीतिः फलंनचगौर्वाहीको

जड इत्यादौ पौनरुक्त्यं लक्ष्यतावच्छेदकांतरव्युदासे तस्य तात्पर्यात् सदृशत्वेन लक्षणेति वादिनापि
सादृश्यस्य विशिष्टसाधारणधर्मप्रतीतिं विना पर्यवसानाभावेन प्रसिध्यादिना तत्पर्यवसानं वा
अभिमतमन्यथानुपपत्त्या प्रस्तुताया लक्षणायाः साधारणधर्मविशिष्ट एव बोधित्यादे तेन गौर्वाही
इत्यादौ गोशब्देन स्वशक्यगतजाड्यादिगुणसदृशजाड्यादय एव लक्ष्यंते तेषु जातिशक्तिनये व्यक्ति
लाभवत् स्वाश्रयव्यक्तिलाभ इति परास्तमित्याहुः ग्रामो दग्धः पुष्पितं मित्यादौ दुष्टपदानि अर्श
आद्यजंतानीत्यर्थवत् सूत्रे भाष्योक्तेस्तत्र लक्षणैव नेति बोध्यं इदं तु जहदजहल्लक्षणेत्यन्ये
केचित्तु ज्ञाप्यसंबंधेनोद्बुद्धशक्तिसंस्कारतो बोधे लक्षणा गंभीरायां नद्यां घोष इत्याद्यनुरोधात्
तथाहि न तावद् गंभीरपदं तीरलक्षकं नद्यामित्यनन्वयापत्तेः नहि तीरं नदी अत एव नदीपदेपि
गंभीरपदार्थान्वयात् नहि तीरं गंभीरं न च पदद्वये प्रत्येकं विशिष्टनदीतीराप्राप्तिप्रसंगात्
न च नदीपदेन गभीरनदीतीरं लक्ष्यते गभीरपदं तात्पर्यग्राहकमिति वाच्यं विनिगमनाविरहा
त् न च नदीपदेन गभीरनदीतीरं लक्ष्यते गभीरपदं तात्पर्यग्राहकमिति वाच्यं विनिगमनावि
रहात् न च नदीपदस्य द्रव्यवाचकतया साक्षात्संबंधानुरोधेन तत्रैवसेति वाच्यं गंभीरपदस्या
पि निम्नगुणवाचकतया तेनापि साक्षात्संबंधस्यैव सत्त्वात् अतः समुदाये सांगीकर्त्तव्या अत
एवार्थवादवाक्यानां प्राशस्त्ये लक्षणासिद्धिः अपभ्रंशे तु लक्षणैव अत एव लक्ष्यस्य व्यंजक

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

तायांसाहेंतीत्याद्युदाहरणंप्रकाशकारैर्दत्तं तस्यापिशक्तत्वाच्चज्ञापकत्वंचार्थबोधकतापर्या
प्त्यधिकरणत्वमितिनप्रसेकंसावर्णेषुलक्ष्यतावच्छेदकत्ववत् लक्षकतावच्छेदकत्वस्यापिगुरुत्वभ्
तायोपदघटितानुपूर्व्यास्वीकारेबाधकाभावः ज्ञापकताशरीरेज्ञानंचशाब्दबोधरूपमेवनिवि
ष्टमितिनसमवायेनघटादिपदज्ञाप्याकाशसंबंधिनोप्युपस्थितस्यशाब्दविषयत्वं अतएवछत्रि
णोयांतीत्यत्रछत्रिपदस्यैकसार्थवाहित्वेनछत्रअछत्रिसमुदायेलक्षणेतिसमासादिवृत्तौविशिष्ट
शक्तिमनंगीकुर्वतोपिवृद्धाइत्याहुः परेतुआरोपितशक्यतावच्छेदकरूपेणशक्यस्यैवतत्पदवाच्य
त्वेनप्रसिद्धान्यव्यक्तिबोधेव्यक्तिविशेषबोधेवालक्षणेतिव्यवहारः छत्रिणोयांतीत्यादौअछत्रिषुसा
हचर्याच्छत्रित्वारोपः काकेभ्योदधीत्यादावपिदध्युपघातकमात्रेकाकत्वारोपः कमलान्निकम
लीत्यादौकमलत्वेनैवव्यक्तिविशेषबोधः त्वावात्तिवन्हिरित्यादौसंबोध्यत्वादिनैवोपदेशलाघव
स्याविशिष्टतत्तद्व्यक्तिबोधोलक्षणया अत्रयोनरूत्यादिविशेषानाधायकत्वाद्वानात्पर्यानुपपत्तिः
सामान्यविशेषभावःसंबंधः अतएवपुंयोगादाख्यायामितिसूत्रेभाष्येगोपीत्यादौगोपसंबंधवत्त्री
त्वेनलक्षणायांतस्येदमितिशास्त्रेणतादृशेर्थेःएवप्रत्ययांतस्यैवतादृशवाक्यस्यैववासाधुत्वनि
यमादसाधुत्वापत्तिर्दूषणमभिधायतावत्समुदायमेवाभिसंबंधोभवतितस्येदमिति किंतूपचारमूल
कःसोयमित्यभिसंबंधोस्तीत्युक्त्वाचतुर्भिःप्रकारैःअतस्मिन्सइत्येतद्भवतितात्स्थ्यात्ताद्धर्म्यात्

तत्सामीप्यात् तत्साहचर्यात् मंचा हसंति सिंहो माणवको गंगायां घोषो यष्टीः प्रवेशयेत्युक्तं सोयमि
त्यादौ सोयमित्यादिविशेषणविशेष्यभावोस्तीत्यर्थः न च गंगायां घोष इत्यादावारोपितगंगात्वे
न बोधे पितस्य ज्ञानस्य भ्रमत्वाच्छाब्दज्ञानवतां सर्वथा भ्रमत्वेन ग्रहात्तदुत्तरं गंगागशैत्यपावन
त्वादिप्रतीतिरूपं फलं न सिध्येत् अत एव शुक्तिरजतज्ञाने भ्रमत्वज्ञानवतो न प्रवृत्तिरिति वाच्यं मध्ये
व्यंजनया मुख्यगंगापदार्थाभेदस्यापि प्रतीतेः व्यंजनाजन्यज्ञाने विवाधज्ञानेन नाप्रामाण्यग्रह इ
सदोषात् वस्तुतस्तु शब्दानुपपत्तिमूलकारोपितार्थबोधे वाधज्ञानेन नाप्रामाण्यग्रहो जन्यते अतए
व पचतीत्यादिज्ञबोधेनाप्रामाण्यग्रहः तथा सति अनुपपत्तिपरिहाराभाव इत्यग्रे निरूपयिष्यामः
कुंताः प्रविशंतीत्यादौ कुंतसंयोगविशिष्टपुरुषाणां कुंतत्वेन प्रतीतिरित्यजहत्स्वार्थत्वोपपत्तिः
केचित्तु आरोप्याह आरोप्यते तद्रूपं न तु मुख्यं वा लक्ष्येषु मंचत्वारोपात् मंचपदप्रवृत्तिर्हि हसंतीति पदांतर
प्रयोगाद्धि ज्ञायते इति शक्याद्भेदेन रूपेण ज्ञाते भवति लक्षणेति तु कस्यचित् प्रमादोक्तिः यच्छा
क्यतावच्छेदकान्येन रूपेण गृहीतेर्थे लक्षणा शक्यतावच्छेदकारोप इति तदर्थः यथा तीरत्वावच्छि
न्नस्य गंगात्वेन बोध इति अत एव गंगायां मीनघोषौ स्त इत्याद्युपपद्यते अन्यथा द्वंद्वार्थस्य एक
धर्मावच्छिन्नान्वयस्य तात्पर्यस्य द्वंद्वार्थैरन्वयस्यैवा अजां ग्रामं नयति अजाविधनौ देवदत्तय
ज्ञदत्ताविस्यादौ यथा तस्य [illegible] येन घोषस्य तीरत्वावच्छिन्नेन्वयेन द्वंद्वोः साधुः स्यात् ममतु गंगा

मंजू०
१५

त्वेनैव तीरवोधात् एकधर्मावच्छिन्नेन्वयसत्त्वेन न तत्ति युगपद्वृत्तिद्वयविरोधोप्यत एव न दोषा
यद्रूपकतावीजाभावाच्च अन्वयानुपपत्त्या युगपदेव गंगात्वेनैव तीरनीरयोरुपपत्तिः काकेभ्यो द
धीत्यादावप्येवमेव गौतमोप्याह सहचरणस्थानतादर्थ्यवृत्तमानधारणसामीप्ययोगसाधनाधि
पत्येभ्यो ब्राह्मणवालकटराजसक्तुचंदनगंगाशकटान्नपुरुषेष्वतद्भावेपि तदुपचार इति तस्य
भावस्तद्धर्मस्तदभावेपि तदुपचारस्तच्छब्दव्यवहार इत्यर्थः स च तद्धर्मारोपेण आरोपनिमित्ता
नि च सहचरणादीनि षष्ठी: प्रवेशयमंचाः क्रोशंती वीरणे ध्वास्ते यं राजा यमः प्रस्थः सक्तुः चं
दनतुला गंगायां घोषः शकटः अन्नं प्राणाः कुलराजा इत्युदाहरणानि इह त्वारोपो ब्राह्म
णो साहचर्यात् मंचत्वारोपो वालेषु तात्स्थ्यात् कटेषु वीरणत्वारोपस्तादर्थ्यात् राज्ञि यमत्वा
रोपः वृत्तात् गौर्वाहीक इत्यादावपि साधारणधर्मजडत्वादिरूपेण निमित्तवाहीकस्यारोपित
गोत्वेन बोधः ततो मंजनया मुख्यः गवाभेदप्रतीतिः प्रयोजनं तत एव चमत्कारः आद्यबो
धेन तु न चमत्कारः तस्मिन्भ्रमत्वज्ञानात् अत एव गौर्वाहीको जड इत्यादौ न पौनरुक्त्यं लक्ष्य
माणगुणैर्योगाद्वृत्तेरिष्टा तु गौणतेत्यस्य यद्गुणज्ञानपूर्वकं वाहीके गोशब्दप्रयोगः सो लक्ष्य
मानगुणैर्योगात्तद्गुणरूपात्संबंधाद्वृत्तिरित्यर्थः प्रकृत्यादित्वात्तृतीया यद्वा प्रथमत एव तत्त्वेना
मार्थयोरभेदबोधो बाधज्ञानस्यानुपपत्तिर्न तज्जन्यशाब्दबोधे प्रमाणग्रहजनकत्वस्या

भावात् लक्षोभस्यत्वारोपस्तन्मानकत्वात् चंदनेतुलात्वस्यतद्धार्यत्वात् गंगायांतीरधर्माधारत्वारोपस्तत्सा
मीप्यात् रूल्लगुणयोगाद्बवटेतद्धर्मत्कस्सत्वारोपः प्राणसाधनत्वादन्नेप्राणत्वारोपः कुलाधिपत्येन
पुरुषेराजत्वारोपइतितद्व्याख्यातारः न्यायवार्तिककारोपिसाहचर्यंनामयष्टिकयासंबंधस्तत्संबंधानुय
ष्टिकावानितिसेवस्यात्ननुयष्टिकेतियष्टिकावानितितुमुख्यएवतस्मादुपचारवीजमन्यद्वक्तव्यः मुच्यते
यष्टिकायांतावदयंयष्टिकाशब्दोयष्टिकात्वजातिनिमित्तकस्तत्रसंयुक्तसमवेतांजातिंब्राह्मणेसमवा
येनाध्यारोप्यब्राह्मणंयष्टिकाइत्याहेत्याह भावप्रधानोनिर्देशइत्यस्याप्ययमेवार्थः घटादिपदप्रवृत्ति
निमित्तस्यघटत्वादेस्तत्रैवभेदसंबंधेनाहार्यारोपात् घटत्वादिप्रकारकघटत्वादिवोधोघटादिशब्दा
ल्लक्षणयेति अन्नंप्राणाश्चंदनंतुलेत्यादावाहार्यारोपस्यैवलक्षणात्वाद्इतिवोध्यं व्रीहीन्प्रोक्षतीत्यादा
वपूर्वसाधनीभूतव्यक्तीनामेवतात्पर्यवशात् व्रीहिपदेनव्रीहित्वेनभानंएवंतत्प्रतिनिधिष्वपिव्रीहि
त्वमारोप्यव्रीहित्वेनैवतात्पर्यवशादपूर्वसाधनीभूततत्प्रतिनिधिव्यक्तीनांभानंनत्वपूर्वसाधनत्वे
नभानं अत्रसर्वत्रतत्तद्धर्मविशिष्टेशक्यतावच्छेदकधर्मारोपः अतएवकचतस्त्रस्याप्तिवदनमित्यादौ
कचत्वादिनाग्रहत्वादिविशिष्टस्यवोधात्तत्रासाध्यन्वयाद्उपपत्तिः हरिरप्याह एकमाहुरनेकार्थ
शब्दमन्येपरीक्षकाः निमित्तभेदादेकस्यसर्वार्थत्वंतस्यभिद्यते सर्वशक्तेस्तुतस्यैवशब्दस्यानेकधर्म
णः प्रसिद्धभेदाद्गौणत्वंमुख्यत्वंचोपचर्यते इतिगौणमुख्यार्थवोधकः शब्दएकएवयुगपत्सर्वा

र्थप्रकाशनंतुनप्रकरणादिरूपनिमित्तभेदात् सर्वशक्तेरित्यस्यव्याख्यानमनेकधर्मेणइतिगोशब्दोगो
जातौप्रसिद्ध इतितत्रमुख्यः वाहीकेत्वप्रसिध्यागौण इतितदर्थः नन्वेवंशब्दार्थसंबंधस्यानित्यत्वं
स्यादित्यत आह गोत्वानुषंगोवाहीके निमित्तात्कैश्चिदिष्यते अर्थमात्रंविपर्यस्तशब्दः स्वार्थेव्यवस्थित
इतिकैश्चित् शब्दार्थसंबंधनित्यत्ववादिभिः निमित्तात्जाड्यादेः शब्दस्तुगोत्वमेवाभिधत्ते गौरित्य
त्रमुख्यं गोत्वंवाहीकेतूपचरितंशब्दस्यैवप्रवृत्तिनिमित्तमितिपक्षेसकदाचित्गोजातावनुयुज्यते
कदाचिद्वाहीके इतितन्मतेपिप्रसिध्यप्रसिद्धिमूलकोगौणमुख्यविभागः अर्थोत्रविशेषभूतः स्वार्थे
प्रवृत्तिनिमित्तेनतदेवशक्यमितिशक्यार्थएवशब्द इतितद्भावः गौर्वाहीक इत्यादौलक्षणाफलंतुतादृशरूप
प्रतीतिः मुख्यार्थसाक्षात्संबंधमत्वारोपात् मुख्यार्थवृत्तिगुणसमानगुणवत्वरूपपरंपरासंबंधमत्वारो
पजधन्य इतिगौण्यामलिजघमत्वंवोध्यं एवंचगवादिशब्दानांव्यंजनायाजाड्यादिरूपगुणवोधकत्वा
द्गुणवचनत्वेपिततः प्राक्गुणवचनत्वाभावात् प्रकारेगुणवचनस्येनद्वित्वमितिनतत्सूत्रस्य
भाष्यविरोधः गंगायांघोषइत्यादौगंगादिभिर्घोषस्यात्यंतसामीप्येगंगादेरितीरधर्माधारत्वा
रोपोगौणत्वमोक्तः गंगादिनाघोषस्यव्यवहितसामीप्येतीरेगंगात्वारोपः पतंजल्युक्तः आद्योपि
स्वरितेनाधिकार इतिसूत्रेपतंजलमुक्तोयत्रतुप्रकृतिप्रत्ययोर्लोपानुशासनं तत्रेयानगर्गाद्
लाहेप्रकृतिगर्भेप्रत्ययस्यगर्गापत्येर्थेप्रवृत्तेः साधुत्वंलोपानुशासनवलात् इतिवदंतिद्विरेफपदंतु

रूढित्वात्तस्य भ्रमरबोधकमवयवार्थप्रतीतिस्तु नास्त्येव रथंतरादिवत् यद्वा पदं निरुक्तरेफद्वयस्यार्थे भ्रमरो
पात्तसंबंधित्वेनैव भ्रमरबोधः अत एव भ्रमरपर्यायेषु द्विरेफपदस्य कोशेषु पाठः बाधः प्रतिसंधानं
विनैव द्विरेफपदाद्भ्रमरबोधेन लक्षणेत्ययुक्तं किं च द्विरेफपदेन रेफद्वयसंबंधित्वेन भ्रमरपदोप
स्थितावपि भ्रमरे निरूढत्वावच्छेदकानुपूर्वीरूपेणोपस्थित्यभावात् बोधानापत्तेर्न च द्विरेफपदाल्लक्षण
यातदुपस्थितिरत एवात्र लक्षितलक्षणेति व्यवहारः प्रत्ययार्थान्वये प्रकृतिप्रयोज्योपस्थितिः कार
णमिति वाच्यं एवमपि तस्यानुच्चरितत्वेनोच्चारितस्यैव च बोधकत्वेन ततो बोधनापत्तेः उच्चारितस्यै
व बोधकत्वमित्यत्र दृष्टांते भाष्यस्थपुस्तकदर्शनस्थलेपि मानसजप इव सूक्ष्मतरताल्वादिव्यापा
रेण सूक्ष्मतरं स्योच्चारणमस्त्येवेति न दोषः जपे मंत्राणां स्वर्येणोवज्ञानस्यावश्यकतया तस्य तत्र तत्स्था
नेषु उच्चदेशाद्युपलभ्यमानत्वरूपतया सूक्ष्ममुच्चारणमावश्यकमिदमेव च स्मृतिषु मानसमुच्चा
रणमित्युच्यते तथा च भारद्वाजः सूतके मृतके कुर्यात्प्राणायाममंत्रकं तथा मार्जनमंत्रांस्तु मन
सोच्चार्य मार्जयेत् गायत्रीं सम्यगुच्चार्य सूर्यायार्घ्यं निवेदयेदिति किंच मानसजपलक्षणे धियाय
दक्षरश्रेणीं वर्णस्वरपदात्मिकां उच्चरेदर्थसंस्मृत्या स उक्तो मानसो जप इति अस्मिन्नुच्चरेदित्युक्तं
अत एव ऋग्विधुक्ते तात्पर्यवशाद्विशेषसंनिवेशाया अग्निमीळे इत्यादिकायास्ततो बोधयित
तोनार्थप्रत्ययः गामानयेत्याहेत्यादावनुकरणे नानुकार्यप्रतीतावपि न ततोर्थबोध इत्यनुभवः

मंज॰ १२ किंच अतीतानागतानां पदानां वृत्तताश्रयतयाहंसाश्रयत्वेन ज्ञानस्य दुरूपपादत्वात् पदे ध्वनीतत्वादिचो
च्चारणक्रियानाशादिना नष्टत्वमतुमन्नतं च नष्टाभिव्यक्तिकत्वमनुत्पन्नाभिव्यक्तिकत्वं वा यथा च घ्रा
णेंद्रियगृहीतस्यैव गंधस्य सुखादिजनकत्वं न स्मृतस्य यथा च महतः पटहादिशब्दस्य कर्णपीडाजनकत्वं
श्रुतस्यैव न स्मृतस्य तथा पदानां बोधजनकत्वं न स्मृतस्य यथा च महतः पटहादिशब्दस्य कर्णपीडाजन
कत्वं श्रुतस्यैव न स्मृतस्य तथा पदानां बोधजनकत्वं श्रुतानामेव न यथा कथंचित्स्मृतानां यथा तत्र
सुखादिजनकतावच्छेदकवैजात्येन तेषां नाम्यतो ग्रहः तथा प्रकृतेपि अत एव परोक्षे लिडिति सूत्रे
परोक्षेइति निधातोर्विशेषणं शब्दरूपस्य तस्य परोक्षत्वासंभवादिति भाष्यकैय्यटयोरुक्तं न च स्व
बोध्यवाच्यत्वसंबंधेन द्विरेफपदं भ्रमरं लक्षणया बोधयतीति युक्तं अनुपपत्तिप्रतिसंधानं विनापि बो
धात् गौण्यतिरिक्तस्थले साक्षात्संबंधस्यैव लक्षणाबीजत्वाच्चेति दिक् मुख्यार्थबाधग्रहनिरपेक्षबोधजनको
मुख्यार्थसंबंधासंबद्धसाधारणप्रसिद्धाप्रसिद्धार्थविषयको वक्त्रादिवैशिष्ट्यज्ञानप्रतिभाद्युद्बुद्धः सं
स्कारविशेषो व्यंजना अत एव निपातानां द्योतकत्वं च स्फुटं चित्समभिव्याहृतपदीयशक्तिव्यंजकत्वमिति
वैयाकरणानामप्यवश्यं स्वीकारश्चावश्यकः यथा च शब्दांतरार्थपदपरैकदेशवर्णरचनाचेष्टादिषु सर्व
त्र तथैवानुभावात् वक्त्रादिवैशिष्ट्यादिज्ञानं च व्यंग्यविशेषबोधे सहकारीति मंजूषायां तत्र तदपेक्षेति समस्त
विस्तरः ननु कोंशोंशस्याश्रयः शब्दः न च वर्णप्रत्येकं तथा द्वितीयादिवर्णोच्चारणवैयर्थ्यापत्तेः

नादिसंहिताः उच्चरितप्रध्वंसित्वेनयोगपद्यासंभवात् अभिव्यक्तेर्हृसतेर्वा क्षणस्थायित्वात् क्षणश
ब्देनतदाधारःकालः मुख्यक्षणस्यप्रसक्तयोग्यत्वेनतदवच्छिन्नेवर्णस्याप्यप्रसक्तत्वापत्तेः उच्चरितप्रध्व
सित्वंचोच्चारणाधिकरणकालोत्तरकालवृत्तिध्वंसप्रतियोगित्वं एवंचायंपूर्वोयंपरइतिप्रसक्तविषये
दंशर्घटिताभिलापाभिलप्यमानपौर्वापर्यज्ञानस्यैकोपलब्धीसाध्युपपन्नंयोगिनोसंभवः नह्यस्यप्रस
क्तविषयेदमापरामर्शयोगात् यदप्रसक्तसाप्येवंक्रमाचगाहिनाएवपरःसंनिकर्षइतिसत्त्वोक्तरीत्या
नाप्यक्रदनुभवसिद्धस्यानुपपत्तिः नत्वपूर्ववर्णस्थितिकाले द्वितीयवर्णोत्पत्तिः पूर्ववर्णनाशोत्तरं य
त्नांतरेणवर्णांतरोत्पत्तेः यावदकारेवाग्वर्ततेनतावदोकारेइतियेनैवयत्नेनैकोवर्णउच्चार्यते
तेनैवविच्छिन्नेतस्मिन्वर्णेउपसंहृसतंयत्नंयन्नंयत्नमुपाददाद्वितीयः प्रवर्ततेइतिचतत्रैवसू
त्रेभाष्येउक्तत्वात् नचोत्तरवर्णप्रसक्तकालेसंस्कारवशादव्यवहितोत्तरत्वसंबंधेनपूर्ववर्णवत्त्वंतदु
त्तरंवर्णेगृह्यते एवंतदुत्तरवर्णप्रसक्तकालेउपस्थितविशिष्टतदुत्तरवर्णवत्त्वंतत्तदुत्तरवर्णेगृह्यतेइतितु
ज्ञानंसुलभंसरोरसयोरादौ विशेषस्त्र्ययद्वा पूर्वपूर्वबगजाःशब्दाः शब्दजशब्दन्यायेनचरमवर्णप्रसक्त
पर्यंतंजायमानाएवसंतीतिनपदप्रसक्तानुपपत्तिरितिवाच्यं आद्येऽयंपूर्वोयंपरइत्यभिलापा
संभवात् नह्यविद्यमानयोः संबंधिनोरव्यवहितोत्तरत्वस्यसंबंधतायावद्भूमत्राक्यत्वाच्च एवंपदप्र
सक्तोपयादनेपिपरस्याविद्यमानत्वेनतत्रवृत्तसाश्रयस्यग्रहानुपपत्तेश्च अविद्यमानेऽप्याश्रयत्वा

मं.उ.०
१८

घंगीकारे नष्टो घटो जलवानित्यादेरापत्तिः अविद्यमानयोरपि जलघटयोराश्रयतानिरूपकत्वस्याश्रय
त्वस्य च त्वद्रीत्या बाधाभावात् तत्ज्ञानस्य प्रमात्वापत्तिः किं चैवं पदवाक्ययोरभावेन शब्दार्थसंबंधस्य
व्यवहानिः तदुक्तम् शाब्दो यद्वि वाक्यार्थः पदार्थोपि तथा भवेदिति पदसमुदायात्मकवाक्यस्येव वर्णसमुदा
यरूपपदस्याप्यभावात् उभयोरप्यर्थासंबंधादिति तदर्थः किं चैकं पदमिति बुद्धेस्तदेवेदं रूपपदमिति
बुद्धेश्चानुपपत्तिः पक्षद्वयेपि न चैकजातीयबुद्धिविषयत्वोपाधिका एकबुद्धिविषयत्वोपाधिका एकबुद्धि
विषयत्वोपाधिका च सेति वाच्यं तज्जातीयं पद्यमिदमिति व्यवहारस्याप्यापत्तेः तदेवेदं पद्यमिति नियमेन
व्यवहाराच्च एतेन एवं नत्वादिनाशोत्तरं पुनरुत्पन्नेन त्वादौ तदेवेदं नत्वमिति तेरावमेकेशारतिवत्
तादृशरूपेण प्रत्यभिज्ञेत्यपास्तं अवयवैरेवैकबुद्धिविषयैरेकः पद इत्यादिबुद्ध्युपपत्तावव्यविनोप्यतिरिक्तस्य
तत्सिध्यनापत्तेश्च किं चैवमुच्चारणभेदाद्भिन्नेषु शक्तिग्रहासंभवः व्यक्तिवाद इवानंत्यव्यभिचारात् व्य
भिचारश्च गृहीतशक्तिकस्यैव बोधकत्वमिति सर्वसिद्धे नियमे बोध्यः आनुपूर्वी तु तत्तत्कालघटित
त्वेनाव्यवहितोत्तरत्वाननुगमात् उच्चारणभिन्नेति तस्याः अपि शक्ततावच्छेदकत्वे सैव दुरवस्था नाद
शाव्यवहितोत्तरत्वेनानुगमोपि तादृशस्यैव दुर्गेयत्वात् पुत्र एव व्यवधानाभावे सति घज्ञानध्वंसविशि
ष्टज्ञानविषयत्वमेवानुपूर्वी तस्याः छेदकमनस्येवेति पक्षे विज्ञानव्यक्तिभेदेनानुपूर्व्यनंतैव न च
चरमवर्णज्ञानसंप्राप्ततत्सदृशत्वयोर्नंताज्ञानत्वः शक्ततावच्छेदकत्वेन कारणतावच्छेदकत्वेन च क

स्यांत इति न दोषः इति वाच्यं अनंतजातिकल्पने गौरवादुक्तरीत्या तस्याश्रयत्वासंभवाच्च पदानामसत्त्वेन
तत्र जातेरप्यसंभवाच्चेति चेदुच्यते प्रलये नियतकालपरिपाकानां सर्वप्राणिकर्मणामुपभोगेन प्र
क्षयाल्लीनसर्वजगत्का माया चेतने ईश्वरे लीयते अयश्चायमपुनः प्रादुर्भावफलको नास्तिको नाशः
उत्तरसर्गानुपपत्तेः नापि सर्वथाः अभानं प्रतिभासमात्रशरीरस्यानिधावस्तुनो न अर्थांतस्सूक्ष्मपिस
र्वः वभासे तदभावस्यैवापत्तेः किंतु सुप्तेव तिष्ठति कार्यप्रवृत्त्यभावात् स्वप्रतिष्ठेश्वरप्रकाशास्यानंत
निर्विकल्पकतया तद्वत्ताद्भासमानाप्यभातप्रायैव ततोऽपरिपक्वप्राणिकर्मभिः कालवशात्प्राप्तप
रिपाकैः स्वफलप्रदानाय भगवतो बुद्धिपूर्विका सृष्टिर्माया पुरुषौ प्रादुर्भवतः ततः परमेश्वरस्य
सिसृक्षात्मिका मायावृत्तिर्जायते ततो विंदुरूपमव्यक्तं त्रिगुणं जायते इदमेव शक्तितत्त्वं तस्य विंदो
रविंदंशो बीजं विंदा चिन्मिश्रोंशो नादः विंदुर्विंदुरिति अविच्छेदेन शब्दार्थोभयसंस्काररूपाविद्योच्यते अस्मा
द्विंदोः शब्दब्रह्मापरनामधेयं वर्णादिविशेषरहितं ज्ञानप्रधानं सृष्ट्युपयोग्यवस्थाविशेषरूपं चेतनमिश्रं
नादमात्रं उत्पद्यते एतज्जगदुपादानमेवावपरादिशब्दैर्व्यवह्रियते विंदोस्तस्माद्भिद्यमानाद्रवो व्यक्तात्म
कोऽभवत् स एव श्रुतिसंपन्नैः शब्दब्रह्मेति गीयते इत्युक्तेः एतत्सर्वगतमपि प्राणिनां मूलाधारे संस्कृतपव
नचलनेनाभिव्यज्यते ज्ञातमर्थं विवक्षोः पुंसः इच्छया जातेन मूलघनयोग एवमूलाधारस्थपवनस्य सं
स्कारः तदभिव्यक्तं शब्दब्रह्म स्वप्रतिष्ठतया निष्पंदं परा वाक् इति उच्यते तदुक्तं हरिणा अनादिनिधनं

ब्रह्मशब्दतत्त्वं यदक्षरं विवर्ततेऽर्थभावेन प्रक्रिया जगतो यत इति तदेव नाभिपर्यंतमागच्छता तेन वायुना
भिव्यक्तं मनोविषयं पश्यंतीत्युच्यते एतद्द्वयं सूक्ष्मतरं ईश्वराधिदैवं योगिनां समाधौ निर्विकल्पकसवि
कल्पज्ञानविषयमित्युच्यते ततो हृदयपर्यंतमागच्छता तेन वायुना हृदयदेशेऽभिव्यक्तं तत्तदर्थविशेष
तत्तच्छब्दविशेषोल्लेखि विज्ञानबुद्ध्या विषयीकृता हिरण्यगर्भदैवसा परश्रोत्रग्रहणायोग्यत्वेन सूक्ष्मा मध्य
मा वागित्युच्यते स्वयं तु कर्णविधाने सूक्ष्मनादाद्यभिघातेन उपांशुशब्दप्रयोगे च श्रूयमाणा सेत्याहुः
एतद्दैवास्य त्रयमपि सूक्ष्ममसूक्ष्मतरमसूक्ष्मप्रणवरूपं सैव चास्यपर्यंतं गच्छता तेन वायुना कंठदेशं
गत्वा मूर्द्धानमाहत्य परावृत्य तत्तत्स्थाने ध्वनिव्यक्ता परश्रोत्रेणापि ग्रहणयोग्या विराडधिदैवसा वैख
री वागित्युच्यते प्रणव एव व्यानोदानाभ्यां सह वैखरीरूपं प्रतिपद्यते अत एव हरिणा व्याकरणस्य त्रि
विधावाग्विषयत्वमुक्तं वैखर्या मध्यमायाश्च पश्यंत्याश्चैतदद्भुतं अनेकतीर्थभेदाया त्रय्या वाचः
परं पदमिति एतत् व्याकरणं अनेकतीर्थेति श्लेष्मव्यक्तवर्णरूपाप्राप्तसाधुभावापभ्रंशदुंदुभि
वेणुवीणादिशब्दरूपा चेत्यर्थः तत्र मध्यमायां यो नादांशस्तस्यैव स्फोटात्मनो वाचकत्वेनान्ततः
सच यद्यपि एकोऽवयवश्च एकैकवर्णेनाप्यभिव्यज्यते तथाप्यंत्यवर्णाभिव्यक्तो बोधहेतुः अतोऽनेकवर्ण
जाभिव्यक्तुतरमर्थप्रत्ययः तत्र च मंजकरूपप्रतिबिंबना तद्रूपतद्बिंबितेव तत्तदभिव्यक्तेरिसेको
पि नानात्वमिवापन्नः यथा जलचांचल्येनेंदु प्रतिबिंबस्य चलत्वेन ग्रहणं यथा च स्फटिका

देर्जपाकुसुमाद्युपाधिवशात्तद्रूपरूषितस्य भानं यथा च मुखे मालिन्यरूपाणां दर्पणाद्यभिव्यंजकवशाद्धे
र्ष्यं तु लत्वादिमानं तद्वत्स्वगतिविंवसमर्पकाश्च संस्कारास्ते च स्थिरा एवं च नैवमनेककालिकं न तद्धे रव
र्णाभिव्यक्तेऔपाधिकानानात्वात्तवाप्यमनुगमाय जातिरावश्यकी सहस्रदीपाभिव्यक्तघटस्येवअने
कजपाकुसुमाभिव्यक्तस्फटिकस्येव च नानात्वाभावात् उपाधिभिन्नव्यंजकाभावात् नकारादिवर्ण
रादिसेनतस्य सत्त्वं येन क्रमेण च वितेसंस्कारास्ते नैव क्रमेण व्यंजकरूपरूषितता तस्येति त्वीकारा
न्नसरोरसइत्येतेयोरविशेषः तत्र च तदुत्तरत्वयहमित्तिन भिन्नो दैशिक एव तदुपरागनाशकाच्चत
द्बोध्यार्थाकारवृत्तिरेव अयं चांतरत्वात्स्फोटश्च याह्यवैखरीसंस्कृतांतःकरणग्राह्य एव व्यंजकरूपरू
षितस्य तस्यैवार्थसंकेतग्रहः अतो घटकलशादिपर्यायाभिव्यक्तस्फोटैग्रहीतशक्तिकस्य पुंसोऽप्र
सिद्धपरस्य पुंसोऽप्यबलेनार्थबोधः वैखरीति वायोरूपाणां ज्ञानस्य शब्दत्वापत्तिरिष्यते कैश्चिद्दर्शन
भेदोऽत्र प्रवादेन व्यवस्थितइति हर्युक्तेः पातंजलिभाष्ये व्यासेनापि तथोक्तेश्च व्याख्यातोपयोग इति सूत्रे
पतंजलाप्युक्तेश्च वाय्वादिपरिणामरूपा वंठतात्वाद्यभिघातजन्मैवेति बोध्यं वायोप्राणादिरूपस्याप्र
णनोंशावतन्मात्र परमाणूनां अन्नाणीव प्रतीयंते शब्दाख्याः परिमाणव इति हर्युक्तेः छायातपत
मोस्यप्येवं अणवः सर्वशक्तित्वाद्भेदसंसर्गवृत्तयः छायातपतमःशब्दभावेन परिणामिन इति तदु
क्तेः ज्ञानस्य वक्तृज्ञानस्य परा शक्तिः साहितसेन च तत्परिणाम इति बोध्यं कैश्चिदस्येनेन पराशक्तेरेवम

मंजू० ध्वमावत् परिणामविशेषो येषां मते वैखरीति स्थितं तदाह प्रवादेषु शास्त्रेषु अत्र विषये दर्शनभेदः
२० सिद्धांतभेदो नवस्थित इति आत्मा बुध्या समेत्यार्थान्मनो युंक्ते विवक्षया मनः कायाग्निमाहंति स प्रेरयति
मारुतं सोदीर्णो मूर्ध्न्यभिहतो वक्त्रमापद्य मारुतः वर्णान् जनयते इति शिक्षायामपि मारुतः एवं नाभेरूर्द्ध्व
मुद्यन् मूर्ध्न्यभिहत आत्मानं तत्त्वेनाभिव्यनक्तीत्यर्थः आत्मा अंतःकरणं सत्कार्यरूपेण स्वगतार्थान् बुध्या सह
तासमेत्य विषयीकृत्य तद्बोधनेच्छायुक्तं मनोभिहतकायाग्निप्रेरितो वायुर्मूर्धपर्यंतं गतस्ततः प्रतिनि
वृत्तो वक्त्राघातेन वर्णान् जनयतीत्युत्तरार्थः तदुक्तं परः संनिकर्ष इति सूत्रे भाष्ये उच्चारितप्रध्वस्तानां
संनिकर्षः पौर्वापर्यं चानुपपन्नमित्याशंक्य बुद्धौ कृत्वा सर्वाश्चेष्टाः कर्ता धीरः तन्वन्नीतिः शब्देना
र्थान् वाच्यान् दृष्ट्वा बुद्धौ कुर्यात् पौर्वापर्यं बुद्धिविषयमेव शब्दानां पौर्वापर्यं यत एवमनुष्यः प्रत्ता एवं
कारी भवति स पश्यति अस्मिन्नर्थे अयं शब्दः प्रयोक्तव्योयं तावद्वर्णास्ततोयं ततो यमिति तन्वन्नीतिः सत
त्त्वविषयव्यापि बुद्धिः धीरः पंडितः कर्ता बुद्धौ अंतःकरणे चेष्टाः कंठाद्यभिघातव्यापारजन्यशब्दांस्त्र
तिर्विविनानकृत्वा शब्देन सहितान् तद्वाच्यानर्थान् बुद्धिरूपे देशे दृष्ट्वा तत्रैव पौर्वापर्यव्यवहारं कुर्यादि
त्यर्थः बुद्धिविषयमित्यस्य बुद्धिस्थशब्दविषयमेवेत्यर्थः तत्र बहुदेशेनैव शास्त्रप्रवृत्तेस्तस्यैव धर्मप
लश्रवणाच्च वक्तृबुद्धिस्थत्वमुपपादयति यदिति अस्मिन्नर्थे इति येतदर्थमेव बुद्धा धर्मदर्शनमप्युक्तं
श्लोके पौर्वापर्यमिमुपपन्नतमं प्रयमितिद्धुपाद इत्यमात्रस्य व्यक्तस्योच्चारणव्यंग्यशब्दपरामर्शो

स्येदमः प्रसक्तः परामर्शकत्वादेतदनुपपत्तिः शब्दः प्रयोक्तमः पराप्रसययोगपस्थूलोच्चारणरूपेण
प्रयोगेणाभिव्यक्तव्यः अस्मिन् शब्दे इत्यस्य व्यंजनीये इति शेषः यत्तु बुद्धिगतपौर्वापर्यस्य वर्णेष्वारोप
इति एतद्भाष्यार्थ इति तन्न तद्देवदत्तबुद्धौ नामयुक्तत्वविनाशितया प्रसक्तपरामर्शके द्रमादिघटिताभि
लप्यमानस्य पौर्वापर्यस्य तत्राप्यसंभवात् प्रकृतिविकृतिभावोप्यंतःकरणाध्येकारबुद्धिमपहायपका
रबुद्धिकरणानुपपद्यते इति स्थानिवत्सूत्रे भाष्ये स्पष्टं अयं च शब्दः तत्तत्प्राणिहृदयदेशावच्छिन्नाकाश
देशस्थः सर्वसमष्टेर्विराजो हृदयस्तत्पवाप्याकाशदेशस्थश्च स च नानात्वाद्येक एव विभुः यथैक एव चैत
द्वपेरूपं व्यापकं तथास्याप्याकाशदेशस्थस्य तथात्वमुचितं एकदेशे शब्दः अनुशब्दे प्रादुर्भूतो युगप
त्सर्वयागेषु गंभवतीति सरूपसूत्रे भाष्यात् प्रादुर्भूतोऽभिव्यक्तः स एव कत्वादिनाभिव्यक्तः श्रोत्रग्राह्यः
परादिरूपेणानुबुद्धिग्राह्य इत्यर इउण्सूत्रे भाष्ये स्पष्टं तत्र हि श्रोत्रोपलब्धिर्बुद्धिर्निर्ग्राह्यः प्रयोगेणाभि
ज्वलित आकाशदेशः शब्द इत्युक्तं तत्र श्रोत्रोपलब्धिर्लक्कत्वादिनाभिव्यक्तस्य परादिरूपेण तद्बुद्धिनिर्ग्राह्य
त्वं स च प्रयोगेण वैखरीरूपेणाभिज्वलितः स्वरूपरुषितः कृत इत्सर्थः अन्यथा कं डंच मुकुलादिस्था
येनानंतशब्दजशब्दानां तत्प्रागभावध्वंसानां च तत्समस्तानुपपत्या कल्पने गौरवं स्यात् तदाकिंचि
द्दूरदेशपर्यंतमुपसत्तिवत् ममाभिव्यक्तिरपि तावद्दूरपर्यंतमेवेति न दोषः अत एव कर्णशष्कुल्य
वच्छिन्ननभोरूपश्रोत्रेण तद्ग्रहः तत्समवेतशब्दस्यैव तेन ग्रहात् नन्वाकाशदेशः शब्द इत्यसंगतं

मं.न.०
२१

आकाशसत्वेमानाभावात् नचशब्दगुणितयानसिद्धिः शब्दस्याकाशगुणत्वासिद्धेः स्पर्शवत् द्रव्यविशेषगुणत्वस्यैवशब्देंगीकारात् नचयावद्द्रव्यभावितयाश्रयादन्यत्रानुपलंभापत्तिः तादृशनियमानंगीकारात् नचद्रव्ययावदेकेंद्रियग्राह्यविशेषगुणयोगित्वमेवस्पर्शवत्तामितिवाच्यं तस्यनियमस्यस्ववासनाकल्पितत्वात् अतएवभाष्येप्याकाशदेशादस्येवोक्तं नत्वाकाशगुणइतिचेन्न आधारशक्तिःप्रथमासर्वसंयोगिनामर्थं इदमत्रेतिभावानामभावानांचकल्पतेयपदेशात्तमाकाशनिमित्तंनुप्रवर्तते कालात्क्रियाविभज्यंते आकाशात्सर्वमूर्तयः एतावानेवभेदोयं अभेदोपिनिर्बंधनइतिहरिणैव समाधानात् इदंनस्तत्रचक्रमत्रतिष्ठति अत्रैतद्भावइतिनिर्दिष्टवस्तुविषये घटादेराधारत्वासंभवेनतदाधारस्यैवाकाशसंज्ञकत्वात् एवंघटादीनामपिपरमाणुद्वारा सएवाधार इतिसर्वभावानामाधारशक्तिराकाशाश्रयाः आधारशक्तिरयमितितुशक्तिशक्तिमतोरभेदादित्युक्तं एवंचाधारशक्त्यैवान्यथानुपपन्नयाकाशसद्भावावगमः इदमाकाशस्याधारत्वंसिद्धस्वभाववस्तुविषयंसाध्यस्वभावक्रियाविषयंतुकालस्याधारत्वमित्याह कालादिति जन्मस्थितिनिरोधेषुउपकुर्वन् कालःक्रियाधारइति एतच्चोपरिष्टात्स्फुटीभविष्यतिमूर्तिपदंक्रियातिरिक्तसर्वपदार्थबोधकं अयंभेदः आकाशकालइतिभेदः एतावानेवव्यावहारिकएवननुकं तर्ह्ययंनिर्निबंधनएवनेत्याह अभेदेतिभेदरहितंयत्तद्ब्रह्मतत्त्व उपनिबंधनं वस्तुभूतंयस्यसइत्यर्थः ईश्वरएवतत्तदाधारत्वविशिष्टस्सन्तत्तत्संज्ञांलभतेइतितात्पर्यं जातेः कालइतिमतेतस्यैव्यापातिरिक्त

त्वखंडनमिदं बोध्यं एवं च सर्ववस्त्वाधारदेशत्वेन शब्दस्यापि तद्देशत्वं श्रोत्रोपलब्धिगुणत्वेन भाष्ये तु कर्ण
र्णशष्कुल्यवच्छिन्ननभस एव श्रोत्रत्वेनेंद्रियाणामसंबद्धविषयाग्राहकतया तत्तद्भूतसंबद्धगुणस्यैव तत्त
दिंद्रियग्राह्यतया चाकाशदेशस्थत्वमेव शब्दस्येत्याशयात् किंचिन्नु तन्न श्रोत्रं तस्यच्छिद्रे नित्यतया रोगा
दिनाशाभावेन बाधिर्यानापत्तेः न च धर्मविशिष्टं नभः श्रोत्रं तस्य च धर्मस्य रोगादिनाभिभव श्रोत्रध्वं
न च तदुद्भव इति वाच्यं लाघवेन नभोधिष्ठानकधर्मविशेषस्यैवाहंकारिकस्य श्रोत्रत्वौचित्यात् एवम
न्यान्यपि घ्राणादीनि तदैकरूप्याय पृथ्वीजलवायुतेजोधिष्ठानकानि आहंकारिकाण्येव अतएव चक्षो
नींद्रियाणामसंतद्दूरदेशस्थविषयोपलब्धिजनकत्वं पृथ्व्यादिविकाराणां तावद्दूरगमनासंभवात्
अहंकारस्य तु अंतःकरणपरिणामत्वादंतःकरणस्य चाधुनापि बहुदूरदेशागमनानुभवात् तद्विका
राहंकारविकाराणां तत्संभवात् योगस्तु प्रतिबंधकमोनिवर्तक एवेत्यग्रे निरूपयिष्याम तत्तद्भू
तगुणाधिष्ठानानि च तानि भूतानि तेषु च ते गुणाः अनुद्भूताः तत्तद्गुणसमानाधिकरणात् पृथ्व्या
दिगतगुणग्रहणमिंद्रियैः एवं च श्रोत्रमेव चित्तवृत्तिसहकृतत्वद्वृत्तिपरंपरया शब्ददेशमागतं शब्दं गृ
ह्णाति अतएव तत्तद्देशवर्तित्वेन शब्दप्रतीतिः यद्वाणूनां सर्वशक्तीनां सर्वदेशव्यापितया तेजोन
नःआदिपरमाणूनां विषयदेशपर्यंतं तत्तदिंद्रियस्य तत्तद्विषयोन्मुख्येत तत्तदिंद्रियरूपेण परिणा
मात्तत्तद्देशे प्रसक्तमिति वदंति तन्मते श्रुतपुत्राकाशदेशत्वमेव किंचानंतश्रोत्रवृत्तिकल्पना

पेक्षयानंतपरमाणुपरिणामकल्पनापेक्षया च तस्यैकस्य कल्पने लाघवं तत्तद्देशमात्राभिव्यक्ति म
तश्च तेन ग्रहणमितिति न तद्देशवर्त्तित्वानुभवो न विरुद्धः यथा चैकस्याप्याकाशस्य घटाकाशो मठाकाश
इत्यौपाधिको भेदो यथा चैकस्यैव चेतनस्यौपाधिको जीवेश्वरभेदो जीवानां च परस्परं भेद एवमौपाधि
कं भेदं लोकसंमतमाश्रित्याकृतिग्रहणास्तिद्दमिति तत्तत्रैभाष्ये स्पष्टं किंच जातिरपि मानुरूपसामान्या
देव स्थूलकृशाल्पमहद्ह्रस्वदीर्घगोपटादिषु गौरित्यादिवत् सर्वत्रैकाकारव्यवहारः अन्यथा संस्थान
भेदादनुगतसंस्थानरूपा जातिरपि न त्वनस्यादिसादृश्येन रूपसामान्याद्वास्तिद्दमिति तत्रैव भाष्ये
उक्तं रूपसादृश्यादिति तदर्थः एतेन वर्णानां गृहीतसंकेतानां व्यंजकत्वमगृहीतसंकेतानां वा आद्ये
तेर बोधयन्नोपि किं तेन नांसः सर्वस्याप्यर्थबोधापत्तेः तदुक्तं सांख्यसूत्रे प्रतीत्यप्रतीतिभ्यां न स्फोटात्म
कः शब्द इति यदि वर्णसमुदायेन तत्प्रतीतिस्तदोक्तरीत्या न हेव्यर्थं अथ न प्रतीयते तदा ज्ञातस्यार्थ
प्रमापकत्वात् व्यर्था तत्कल्पनेति तदर्थ इति सांख्योक्तं तदनुसारेणुपवर्षोक्तं च स्फोटखंडनमपास्तं अ
गृहीतसंबंधैरपि तस्य व्यंजनमस्त्येव अत एवागृहीतार्थकेपीदमेकं पदमित्यनुभवः अत एव वा
चस्पतिमिश्रास्तत्त्वविंदौ गकारादि इतिरिच्यमानमूर्तेः ककारस्याभावादिति स्फोटवादिमतमुपन्यस्या
स्यन् इत्यलं परेत्व वर्णादीनामेकत्वं नित्यत्वं विभुत्वं च न द्वयवकपरादेरपि न त्वं कंठताल्वाद्यभिघा
ततव्यंजकः देशभेदेपि पटादीनां देशघटितसंनिवेशाभेदवत् कालभेदेपि तद्धटितानुपूर्व्याग्र

भेदः प्रसक्तप्रत्यभिज्ञानात् वर्णैकत्वं प्रतिष्ठितं वर्णात्मकं पदं तच्च तद्भेदान्न भिन्नमिष्यते इत्युक्तेः
दिनांतरानुभूते धकारानुभूयमानस्य सोयमिति प्रत्यभिज्ञया तावत्कालं स्थिरत्वसिद्धे तावत्कालं स्थिरं
चैनं कः पश्चान्नाशयिष्यति इति न्यायात् सर्वाभिमताशुविनाशित्वव्यतिरेके सिद्धे नित्यत्वपर्यवसानं स
र्वदेशेषु तदुपलंभाद्विभुत्वं लाघवाच्चैकत्वं अनुभूयते घटकमध्यवर्त्तितो नरत्वं चैतस्य त्वज्ञानाधिक
रणकालो सत्तिकज्ञानविषयत्वं तथा त्वंतराणां वतः कामिनीसाक्षात्कारस्य त्वेज्ञानधारा कल्पते गौर
त्वं तद्वत् ज्ञानानामप्येतद्विषये स्थिरत्वं शब्दबुद्धिकर्मणां त्रक्षणिकत्वमिति तु नयुक्तं इदानीं ज्ञानामित्युक्त्वा
रितं इति व्यवहारात् अन्यथा क्षणस्यातींद्रियतया इदानीमिति ज्ञानासंभवः परस्परं तत्सादीनां भेदव्या
प्यानां विरोधिनां सत्त्वेन प्रत्यभिज्ञाया व्यक्तिविषयत्वे बाधकाभावाच्च न च गकार उत्पन्न इति प्रतीति
र्बाधिका स्यामो नष्टो गकार उत्पन्न इति प्रतीतेः रूपगतोत्पत्तिविनाशारोपेण परंपरासंबंधेन बोध
यपतिवत् तद्वतिष्ठो सत्तेरारोपेण परंपरासंबंधेन वा तदुपपत्तेः वर्णोच्चारणस्य त्वेपि तत्स्यह
त्वेपि नेजिह्वाया ईषदंतरपाते वर्णानुपलब्धेर्ध्वन्युपलब्धेश्चानुभवे हसितरुदितादौ जिह्वाविघा
तवायुकंठसंयोगादेस्तज्जनकत्वावश्यकत्वेन च वर्णोत्पत्तौ तदनंगीकारे प्रतिबध्यप्रतिबंधकभा
वकल्पनागौरवेण तत्सत्वावश्यकत्वात् अतएव बहुषु श्लोकेषु उच्चारयत्सु महाध्वनिः श्रूयते इति प्रती
ति यदि तु स एवायं शंखध्वनिरित्यादि प्रत्यभिज्ञया ध्वनीनामपि नित्यत्वं तर्हि तज्जद्दज्ञानकारणीभू

मंजू० तवायुसंयोगनिष्ठंतत्रारोप्यते परंपरयाबुध्यते इतिवाबोध्यं एवमेवह्रादंकुर्वितिव्यवहार उच्चा
२२ रयेतितदर्थो वालोहितः स्फटिक इत्यादावारोपएवनतुपरंपरयान्वयप्रतीतिः उक्तेत्वसमवायिसंयु
क्तत्वंसंबंधः स्फटिकस्यलोहित्यमितित्रत्वसंयुक्तसमवेतत्वसंबंधइत्युभयोः संबंधत्वकल्पनेगौर
वात् वस्तुतः सर्वत्रारोपएवोचितः इत्सोढ्यवानिसाध्यप्रतीसापरंपरासंबंधस्यविशिष्टबुद्धिनिया
मकत्वात् एवमुदात्तत्वादिकमपितन्निष्ठमेवतत्रारोप्यते इतिनोदात्तादिगुणभेदादनेकत्वंवर्णानां
किंचप्रागसत्वेसतिसत्वरूपायाउत्पत्तेनवर्णेष्वनुभवः वर्णमुच्चारयतीत्येवप्रत्ययात् उच्चारित
त्वंचकंठताल्वाद्यभिघातजन्याभिव्यक्तिविशिष्टत्वंश्रोत्रादिकाद्यनुमापकंतज्जन्यतावच्छेदकवैजा
त्यंचध्वनिनिष्ठेवायुसंयोगनिष्ठंवावर्णेष्वारोप्यत इति तदुत्पत्तिः तारत्वाद्यपितन्निष्ठमेव अतएव
भाष्येतारत्वादिवायुनिष्ठंवर्णेष्वारोप्यते इति ध्वनिताधिकरणेऽभिहितं यद्वा तारत्वादयोगुणाः श
ब्दनिष्ठाः कस्यचित् कश्चिद्वायुसंयोगस्तारत्वव्यंजकोपरस्यतुमंदत्वव्यंजकः तयोर्विरोधव्यवहारोधर्म
वहारोविषयेनवायुसंयोगेनयंप्रतितारत्वंव्यज्यतेतंप्रतिमंदत्वाव्यंजनम् लक्षः परेत्तुकंठताल्वाद्यभिघा
ते सत्यस्यकेनचिन्मंदत्वेनग्रहणंकेनचित्तारत्वेनग्रहणमित्यत्रबीजंनिर्वक्तुमशक्यं ततदुच्चैस्त्वादा
तत्रभाष्येस्पष्टंकसारिकानववनार्या गुच्चारणव्यंग्येषु तत्तदुच्चरितत्वानुमापकानिवैजात्यान्यपि
वर्णनिष्ठानिविजातीयविजातीयवायुसंयोगव्यंग्यान्येव प्रकृतिविकारभावस्तुबुद्धिविपरिणामे

नैवउक्तरीत्यानिर्वाह्यः अन्यगतोत्पत्त्यादेरन्यत्रारोपेवीजंतुअंतःकरणस्पर्शागादिदोषएवसेयंदृष्टक
लिकेत्याभानांतरेणनाशः सिद्धेः सेयमितिसंशोभ्रमत्वंनचनित्यत्वेवायुसंयोगादेः ककारादिप्रसक्त
त्वंकार्यतावच्छेदकंवाअंममनुकल्पमेवेतिलाघवमितिवाच्यं अनंतप्रागभावध्वंसादिकल्पनापे
क्षयालघुत्वात्प्रत्यक्षत्वावच्छिन्नविषयतयावत्वस्यैवकार्यतावच्छेदकत्वाच्च नचैवंघटादावपिनित्यसंख्या
तत्कपालसंयोगादिकंचव्यंजकंभविष्यतीतिवाच्यं वर्णवस्तत्रतद्ग्रहविपरीतग्रहयोरभावेनोत्पत्ति
प्रतीतेर्विनाबाधकंभ्रमत्वायोगात् किंचैतत्कुलालव्यापारेनैतमनुभूयमानस्यततःप्रागनुभूतेनै
वाभेदप्रत्यभिज्ञेतिविशेषात् नित्यत्वंचैषांसद्ग्राह्युकालोत्पत्तिकत्वं प्रलयकालनाशप्रत्वंचेतेताव
देवअतएवौत्पत्तिकस्तुशब्देनार्थस्यसंबंधइत्युक्तं जैमिनिनाऔत्पत्तिकशब्देनेदमेवनित्यत्वंवकुश
क्यंनान्यादृशएवमत्राधिकरणेउक्तेनशब्दार्थसंबंधनित्यत्वेनवेदस्यनिरपेक्षबोधकत्वरूपंप्रामा
ण्यंसमर्थ्यशब्दार्थसंबंधनित्यत्वमयुक्तं शब्दानामनित्यत्वादितितदाक्षेपसमाधानायशब्दनित्यता
सिद्धांतकंशब्दाधिकरणमारभ्यंतत्रवाचकनित्यतासर्यंतंतात्पर्यमवगमयतिनतुवर्णानित्यता
मात्रेइतिबोध्यं अतएवानेककर्तृकोच्चारणविषयेप्येकमिदंघटपदमितिप्रत्ययः एकरंग्रशब्दो
नेकधुकृतुषुआविर्भवतीत्यादिनासरूपस्त्रैभाष्येस्फुटमेतत् नहीयतमेकत्वधीवर्णविषयाते
षामनेकत्वात्वनराद्यपाद्यप्यतिरिक्तमेव नचैकार्थबोधहेतुत्वेनैकत्वंतेनेकत्वमेकत्वेनचैकार्थ

मंजू० धीहेतुत्वेऽन्योन्याश्रयापत्तेः किंचार्थबोधाभावेपि एकं पदमित्यादेरप्रसिद्धार्थपदश्रवणे दर्शनात् एक
२५ बुद्धिविषयत्वेन तु न तत्त्वं सर्वैश्चारणविषये द्रुशब्दानामेकज्ञानविषयत्वासंभवात् न चैकजातीयबुद्धिवि
षयत्वं विषयैक्ये बुद्धीनामेकजातीयत्वं तदेकजातीयत्वेन च विषयैक्यमित्यन्योन्याश्रयात् किं चैकमेकः
पट इति व्यवहारस्यापि एकबुद्धिविषयतत्त्वमहत्त्वेनोपपत्तौ तत्राप्यतिरिक्तावयव्यसिध्यापत्तिः यदि त
त्रैक इति व्यवहारान्नसिद्धिस्तर्हि प्रकृतेपि समं न चैकं द्रुशब्द इत्यस्यैकजातीयद्रुशब्दः तावज्जन्यकल्पनं
तत्र चैकजातिकल्पनमित्यत्यानतरेकत्वस्यैवौचित्यात् घटत्वजात्येवानेकेषु घटेषु एको घट इति प्र
तीत्यापत्तेश्च एकजातीयद्रुशब्द इत्यव्यवहाराच्च तस्येदं पदं प्रकृतिप्रत्ययविभागवत् प्रकृत्यादिकम
पि निमित्तमेव यद्वा खंडमेव तत् अन्यथा वर्णानामपि तस्यादित इति शास्त्रबलात् रूकादिषु चरेफलका
राकारेकारोकारादिभागानामनुभवसिद्धत्वाच्च भागत्वे भागानामपि तुल्यमायात् अवयवकल्पनायां
परमाणुतुल्यानामवशेषः स्यादिति यैव घटादीनामवयवसमुदायरूपत्वेन दुरवस्था सैवात्रापि ए
वं च पदपदार्थव्यवस्थारहितं निरीहमेव जगत्स्यात् किंच सावयवत्वे अनित्यतापत्तिः वाक्यमपि पदविभा
गादिरहितमखंडमेव वाक्यपदयोरुभयस्य परापरान्वाख्यायंते इति भाष्यात् तत्र कश्चिद्वाक्यस्यैव विभाज्यान्वाख्या
नं कश्चित्पदस्यैवेति तस्यानुरोधेन व्यवस्थानं च वर्णेषु नावयवात्स इव भावस्तु तत्तदुच्चारणविशेषव्यंग्य
नत्तद्वर्णसमानाकारक्रमिकध्वनिविशेषोपरागोपाधिरिति वाच्यं पदे वर्णावभासस्य वाक्ये पदाभा

तस्याप्येवमेवोपपत्तेः आस्त्रंतुरेखागवयन्यायेनेत्याहुः तत्रानेकवर्णध्वनिकल्पनेकवर्णध्वनिकल्प
नेमानाभावात् अवर्णानामैक्यमवर्णककारादीनां चानेकमिति ईजरतीयन्यायत्वात् तस्मादुक्त
रीत्या काशातिरेकः स्फोट एव श्रोत्रग्राह्यः अत एवैकैकगकारप्रत्ययः कत्वाधिकं च व्यंजकवायुनिष्ठंत
त्स्थानाभिघातव्यंगकत्वादिवैजात्याः क्रांते स्वरूपरूपितस्य भानं तदनाक्रांते तु ध्वनिरूपेण काकार
उत्पन्न इत्यादिप्रत्ययस्तु प्रागवदेव ज्ञानविषयो समारोपेण न च वायुनिष्ठकत्वादेः श्रोत्रेण ग्रहे येन यस्य
धर्मो गृह्यते तेन तद्व्यक्तिन्यायेन वायूनामपि श्रोत्रेण ग्रहणापत्तिरिति वाच्यं यद्व्यक्तिनया धर्मग्रहणं त
स्यैव धर्मिणस्तेन ग्रहणस्य चक्षुरादौ क्लृप्तत्वात् स्फोटव्यक्तितया च तस्य श्रोत्रेण ग्रहणं न वायुव्यक्ति तया
रसनादौ रसादिमात्रग्राहकताया दृष्टत्वाच्च व्यंजकगतवैजात्यमादायैव ककारहकारयोर्भेदव्यवहा
रः अद्वैतसिद्धांते विषयसंबंधजन्यवृत्तिवैचित्र्येण व्यंग्ये स्वरूपसुखे भेदव्यवहारवत् विशेष्यांशमा
त्राय ते देवि तत्प्रतीतिर्नायाप्याउपाधिनालिंगितत्वस्यासंभावात् देशकालभेदप्रत्ययो प्योपाधि
क एव स एव च यदवदेवजिमाः तदुक्तमाद्यंताविस्त्रभाष्ये निमेषु शब्देषु कूटस्थे रविवालिभि
र्वर्णैर्भवितव्यमिति वर्णशब्देन प्रकृतिप्रत्ययागमादयः यद्वा सर्वं उन्मेव पदानि वाक्यानि च रेखाग
वयन्यायेन तदन्वाख्यार्थं कल्पते पदादौ प्रकृत्यादिविभागकल्पना पदविभागकल्पना च इदम
प्याद्यंताविस्त्रभाष्ये स्फोटकत्वादिना व्यज्यते इत्येवोऽ‌िति सूत्रे भाष्ये ध्वनितं तत्र नरसिंहवर्ज्या

मं०न०
२५

संतरत्वाद्वर्णैकदेशानां वर्णग्रहणेनाग्रहणमितिपक्षे लृ ऋ इत्यत्र ऋलृयोरोल इति लत्वाप्राप्तिमाशं
कायम्बोभयतः स्फोटमात्रं निर्दिश्यते स्फुतेर्लृप्लुतिर्भवतीमुक्तं तस्यायंभावः वस्तुतो रत्वादिमान् न
कश्चित् किंत्वन्यगतं तत्तद्रूपेण स्फोटस्यावभासमात्रमेवं च कल्पतइत्यादावप्यस्याप्रवृत्तिः स्यात् अ
तो रेफावभासिस्फोटप्रसंगे लकारावभासः स्फोट इत्यर्थः एवं वसर्वत्र सिद्धं अपाव पिरेफावभासस
त्वात् आकारादौ तु नैवं ह्रस्वावभास इति न तत्र ह्रस्वावभासप्रयुक्तकार्यं यत्तु कैय्यटेनांतर्भूतानंत
र्भूतसाधारणी जातिर्निर्दिश्यते इति व्याख्यातं तन्न तादृश्यजातिसत्वे मानाभावात् नरसिंहवद्वर्णांत
रमिति स्वोक्तविरोधात् यस्मादृश्यपानुप्रसभिन्नेस्यादिस्वोक्तसंगतेश्च ख्यतिपदाख्यारस्याश्च ऋजाते
र्जातिरिमुनुक्तेश्च तादृशजातिसत्वे वर्णैकदेशानामपि तज्जातिसत्वेन वर्णग्रहणेन ग्रहणमिति
पत्तस्यैव सिध्या ग्रहणपत्तमुक्ताग्रथवानग्रंथे इति पक्षे तत्समाधानपरभाष्यासंगतेश्च अत ए
वाष्टमेरवाभ्यामितिसूत्रे कैय्यटः यथा च नरसिंहावयवानां नरत्वसिंहत्वजातियोगाभावात् पुरुष
मृगराजाभ्यामेकाकृतियोगाभावएवं वर्णैकदेशयोरपीति स्फोटपदस्य च तद्वर्णपदादिरूपेण तात्पर्याद्यभि
धानात् ज्ञानविषयो मध्यमावस्थो धर्मस्तल किं चैवं द्रुतविलंबितमध्यासु प्रयत्नभेदेन चिराचिरकालो
च्चारणजन्यत्वाद्भिन्नकालत्वेन ह्रस्वयोरापत्तौ ह्रस्वाकारस्यापि भेदे भिन्नकालत्वभेदयोरापत्तौ ह्रस्वाका
रस्यापि भेदे भिन्नकालत्वे चाप्यतमहत्तौ तपरकरणेऽप्यतमः इत्तावतो भिस्टऐ स्यौनापत्तेः स्फोटांगीका

रेतुनदोषः तदभिव्यक्त्यनंतरंजायमानेनचिरकालेनवैकृतिध्वनिनातस्यचिरकालव्याप्यपिस्फोटैका
लभेदाभावात् तमेवायद्रुतमुच्चारितवानमोविलंबितमितिप्रत्यभिज्ञासत्वात् ह्रस्वदीर्घादेतुनैवमभे
दप्रत्यभिज्ञा एतेनह्रस्वदीर्घप्लुतैरभिव्यक्तस्फोटेतदुपरागवशाद्यथातावत्कालत्वारोपस्तथात्रापिस्या
दितिपरास्तंह्रस्वदीर्घादीनांपरस्परमैक्यप्रत्यभिज्ञाभावेनतत्कालत्वारोपेमानाभावात् आरोपेसतिनिमि
त्तानुसरणंनतुनिमित्तमस्तीत्यारोपइतिन्यायात् अतएवतिस्रोपिह्रस्वयमिकारइत्यादिरनुभवः नन्व
त्वेतुवर्णानांसत्यस्यापिस्वाभ्युपगमात्कस्यचिरमुपलब्धिःस्यादितिबोध्यं तदुक्तं तपरसूत्रेभाष्यकृ
ताद्वसंतरेएषोनापत्तिः तत्तद्ध्वनिजनकयत्नभेदेवर्णानांभिन्नकालत्वस्यैवोचितत्वादित्याशंक्यैवंतर्हिस्फो
टःशब्दोध्वनिःशब्दगुणः कथंयथाभेर्याघातंभेरीमाहत्यकश्चिद्विंशतिपदानिगच्छतिकश्चित्त्रिंशत्
चत्वारिंशत्स्फोटस्तावानेवभवतिध्वनिकृतावृद्धिः ध्वनिःस्फोटश्चशब्दानांध्वनिस्तुखलुलक्ष्यतेअल्पोम
हांश्चकेषांचित्उभयंतत्स्वभावतइतिस्फोटः शब्दइतिश्रोत्रेंद्रियग्राह्यःस्फोटनामापदार्थः शब्दः ध्वनिस्तु
तदभिव्यक्त्युत्तरजायमानोवैकृतिध्वनिरूपः शब्दस्यचिराचिरोपलब्धिः कत्वागुणउपकारकः भेरीमाहु
त्येतस्यतंशब्दःध्वनिरूपावैकृतध्वनिकृताः ध्वनिःस्फोटश्चत्तइतिशेषः शब्दानांसंबंधीध्वनिर्वैकृत
ध्वनिस्तुकेषांचित्अल्पोऽल्पकालमुपलब्धिजनकः केषांचिन्महान्बहुकालमुपलब्धिजनकोलस्य
तेतत्रप्रमाणमाह उभयंतत्स्वभावतः सिद्धमितिशेषः तदुक्तं हरिणास्फोटस्याभिन्नकालस्यध्वनि

कालानुपातिनःस्वभावतस्तुनिमित्ताद्ध्रस्वदीर्घप्लुतादिषुप्राकृतस्यध्वनेःकालःशब्दस्येत्युपचर्यते
अभिव्यक्तिकालत्वोपपादकंस्वभावतस्तुनिमित्तात् इतिप्राकृतध्वनिशब्देनस्फोटव्यंजकमत्रोच्यतेस्फोटस्य
ग्रहणेहेतुःप्राकृतोध्वनिरिष्यतेग्रहणेऽभिव्यक्तौस्थितिभेदेनिमित्तत्वंवैकृतःप्रतिपद्यतेस्थितिभेदे
चिराचिरोपलब्धिविशेषेशब्दस्योर्ध्वमभिव्यक्तेर्वृत्तिभेदेतुवैकृताःध्वनयःसमुपोहंतेस्फोटात्मातैर्न
भिद्यतेइतिशब्दस्याभिव्यक्तेरूर्ध्वंवैकृताध्वनयोजायंतेइतिशेषः तेनवृत्तिभेदेद्रुतादिवृत्तिभेदेसमुपो
हंतेतत्रकारणंभवंतिस्फोटस्तुतैर्नभिद्यतेइतितदर्थःवैकृतत्वंचैषांमालस्यादिकृतत्वात् कैय्यटेव्यंज
व्यंजकशब्दवैकृतिध्वनिपरःतस्याप्युपलब्धिजनकत्वेनव्यंजकत्वव्यवहारादितिदिक् एवंचपदादिस्
पेक्षांतरःस्फोटोवाचकइतिसिद्धं एवंशक्तोऽर्थोविभुद्धिस्थत्वासमाविष्टएवनतुबाह्यसत्ताविशिष्टःघट
इत्यतःएवसत्त्वावगमेनघटोस्तीतिप्रयोगतार्थ्यन्नास्तीतिप्रयोगानापत्तेः सत्तयाविरोधात् घटोना
स्तीत्यस्यानापत्तेश्चममतुबुद्धिस्थतोबाह्यसत्वातरभावबोधनायास्तिनास्तीतिप्रयोगः किंचशश
शृंगंनास्ति अंकुरोजायतेइत्यतोबोधनापत्तिःममतुबुद्धिस्थअंकुरोबाह्यरूपेणजायतेइत्यर्थःसासत्ता
विशब्दवाच्यतितद्भावःकिंचेच्छादीनामंतःकरणनिष्ठतयातत्रविषयस्यासामानाधिकरण्येनैवका
रणत्वोक्त्विसेनवोद्धसत्तावश्यकीयत्तुवैशेषिकाद्यनुसारिणोविषयतासंबंधेनज्ञानंप्रतितादात्म्येनावि
षयःकारणमितिवदंति तन्नतदीयतादात्म्यवृत्तिनियामकतासामानाधिकरण्यानिर्वाहकत्वात् अत्र

दृशानादृशाशब्दाभ्यां तत्त्वेन प्रत्यभिज्ञाविषयत्वमुपलक्ष्यत इति बोध्यं घटादिसामग्र्या ऽपि अवच्छेद्य वच्छे
दकभावसमानाधिकरणदैशिकविशेषणतया देशविशेषसामानाधिकरण्यपरं स्पष्टमन्यत्र । अस्ति वेदनाऽत्र घट
इत्यादिव्यवहारादाधारतानियामकत्वं अवच्छेदकत्वं सप्रमाणं इति तु चिंत्यमेव अनुशासनाभावात् मुदि
मत्कौस्तुभलक्षणाभावस्य भवदीयसंमतत्वाच्च द्रव्यमत्यादीनामपि द्रव्यदेशाणवदेश इति बोध्यं भ्रमेऽधिष्ठानत्व
मपि वौद्धस्यैव न वाह्यस्येति सर्वं समंजसम् अत एवोपदेशो ऽनुनासिक इति सूत्रे भाष्ये उक्तं को देवदत्ताद
प्रसे ऽङ्गदी कुण्डली मुकुटी तको ऽयं त्वया दृष्टो देवदत्त इति न वस्त्वेकस्य कौ भेदाभावादीदृशस्य सांग
तिः मन्यते शब्दे योऽर्थो बुद्धौ प्रतिभासते तादृशो ऽत्रार्थः हेतुमति चेति पंक्तिविंशतीतिसूत्रे
ऽनुपसूत्रे च भाष्यकैय्यटयोः स्पष्टमिदं गौतमोपि अत एव उत्पत्तिकर्तृत्वं कथमिति शंकासत्त्वेत
वान् बुद्धिसिद्धं तत्सदिति तत्कार्यमुत्पत्तेः प्राक्नाशोत्तरं चासदपि बुद्धिविषयतया सिद्धमिति तदर्थः
जन्मादिसूत्रे वाचस्पतिरप्याह चेतनो हि नामरूपे बुद्धावालिख्य घट इति नाम्ना कंबुग्रीवादिना रूपेण च
वाह्यं घटं निष्पादयति निर्वृत्तस्यापि घटस्यांतः संकल्पात्मना सिद्धस्य कर्मकारकत्वं घटं करोतीत्यादौ
यदाहुः बुद्धिसिद्धं तु तदसदिति तथा हि चित्तस्य द्रव्यरूपो ऽहंतारव्यः परिणाम इंद्रियप्रणाल्या निर्गत्य वि
षयेण संयुज्यमानस्तदाकारवृत्त्या रूपविषयवासनावशात् तद्विषयाकारेण परिणमते न तु तस्यां संयुक्त
वाह्यविषयप्रतिबिंबः तत्प्रादेशवाह्यविषयासंयोगे तत्प्रतिबिंबासंभवात् तथा च स्मृतिः विषय

मंज० घ्यादिचित्तस्थेन बहिष्ठं कदाचन स्वप्नभ्रममरीच्यादिषु सर्वैरेवानुभूयते इति भ्रमे ज्ञानाकारस्यैव विषयेऽस्या
२१ तेप इति सिद्धांतात् सनिकृष्टज्ञानाकारं विहायासंनिकृष्टरूप्यरजताद्यारोपे मानाभावात् तदाहमथ
नानास्तीति स्वरूपतीवाध्यानुभवस्यानुपपत्तेश्च चाकचिक्यादिविषयदोषवशाच्च चित्तवृत्तेस्तथापरि
णामः एतेन ज्ञानलक्षणासंनिकर्षेण तद्धेतुभूतरजतप्राकारिकाशुक्तिप्रतीतिरित्यपास्तं भ्रमस्योपप
त्तेः ततरनुयोगिताविशिष्टसंबंधस्य कदाप्यनुभवाभावाच्च संबंधस्य द्विष्ठत्वस्वरूपतया ततरनुयोगि
कत्वादिरहितसंबंधज्ञानस्यायुक्तत्वात् ततरनुयोगिकत्वादिवैशिष्ट्येन ज्ञातस्यैव प्रहसाधुपयोगि
त्वाच्च वस्तुतो ज्ञानलक्षणाप्रत्यासत्तिरेव नास्ति विद्यमानस्य प्रत्यासत्तित्वायोगात् न च ज्ञानविषयत्वं
प्रत्यासत्तिः ज्ञानविषयोभयस्वरूपाविषयतेन हि मज्ञानताशेतस्या वक्तुमशक्यत्वात् तस्मात्स्म
ताविव संस्कार एव प्रत्यासत्तिरेवं च मदुक्तपर्यवसानं सुरभिचंदनसोयमित्यादि च संस्कारचक्षुः
सन्निकर्षाद्युभयजन्यं ज्ञानांतरमेवेति न स्मृतित्वानुभवत्वयोस्तत्र संकर इत्याद्यमत्र विस्तरः अत
एव त्रियामितिसत्त्वैरेव ब्रह्मदोसनके शाधरर्शनेन लिंगाभावाद्यवनुपपत्तिमाशंक्यासत्सुमृगतृष्णा
वत् गंधर्वनगरं यथा असत्सु खङ्गाहत्तयोर्लिंगं दृष्टमंकथं पुनरसल्लिंगं शक्यं द्रष्टुं मृगतृष्णावत् य
थामृगतृष्णिका अपांधाराः पश्यंति न च ताः संति तथा गंधर्वनगराणि दूरतो दृश्यंते उपसृत्य नोप
लभ्यते इति भाष्ये उक्तं अनेन हि दृष्टमेव भ्रमेव हि स्तृ इ शोऽसत एव भाउक्तं हरिणाप्युक्तं यथा सलि

लानिर्भासोमृगतृष्णासुजायते जलोपलब्ध्यनुगुणा हीनास्त्वधिजलेसतीति बीजंपूर्वपूर्वमिथ्याज्ञानजन्यवा
सनेतिलव्याख्यातारः व्यवहारदशायांक्वचिदविकेनापितन्मात्रेबाधानानुभावात्सतोलिंगस्याभानमिसेत
न्निराकृतमिसन्मत् भ्रमेयावद्विशेषदर्शनबहिः सत्वेनप्रतीतिस्तुतत्राधिष्ठानगतसत्वारोपात् अतएव
सदसत्वाभ्यांनिर्वाधावाधाभ्यामिति सांख्यसूत्रेउक्तं यावद्विशेषदर्शनमबाधतदुत्तरंबोधोत्तिप्रपंचोप्येव
मेवमृगतृष्णादिदृष्टांतेनप्रपंचस्यशास्त्रेवर्णनात् तदुक्तं परमार्थसारेशेषनागेन मृगतृष्णायामुदकं
शुक्तौरजतंभुजंगमोरज्ज्वांतैरभिकचंद्रयुगवत् भ्रांतमखिलंजगद्रूपमितिभ्रांतभ्रमविषयइत्यर्थः व्यासो
ऽपिमायामात्रंतुकार्त्स्न्येनानभिव्यक्तेरितिस्वप्नस्यमायामात्रत्वंनतुवाधस्वर्गानुस्मत्वमाह तत्रैवयथा
पिज्ञायत्स्वप्नप्रपंचस्यापितदनन्यत्वमारंभणशब्दादिभ्यइतिसूत्रेणमायामात्रत्वमुक्तं तथापिप्राक्
ब्रह्मात्मदर्शनाद्वियदादिप्रपंचोव्यवस्थितः स्वप्नस्तुप्रतिदिनंवाध्यते इतिविशेषइतिभाष्येउक्तं तस्यप्र
पंचस्यावस्तुत्वाभावः वाचारंभणंविकारोनामधेयं इतिश्रुतेरितिसूत्रार्थः वाचैवकेवलमारभ्यते
यतोनाममात्रंनतुवस्तुतइतिश्रुत्यर्थः अतएवचानन्यत्वेपिकार्यस्यकारणात्मत्वंनतुकारणस्यकार्या
त्मत्वमिति नतुदृष्टांतभावादितिसूत्रेभाष्येकार्यस्यवस्तुत्वाभावादितितदाशयः मायामात्रमितिमा
त्रपदेनानिर्वचनीयोसत्तिवार्यमितिनिराकरोति नचनतत्ररथानरथयोगानपंथानोभवंति अथ
रथान्रथयोगान्पथःसृजते इतिस्वप्नविषयश्रुतेःस्वप्नस्यसत्यत्वंसंगतिरितिवाच्यं उपक्रमेरथाद्यभावश्र

सोक्तइतिसृष्टिवचनंभाक्तमितिभाष्येलोकसमाधानात् किंचनास्यरथादिग्रहणायचक्षुरादीनिसंति
रथादिनिर्वर्तनेवाकुतोनिमिषमात्रेणसामर्थ्यंदारूणिचनसंतितस्मात्स्वप्नमात्रंस्वप्नदर्शनंतादृशम
पीहानष्टत्वकमितिचभाष्येस्पष्टंतत्रांतःकरणपर्यंतंनष्टमितिकत्वाच्चक्षुरादीनिनसंतीमुक्तत्वावशिष्ट
ज्ञानाध्यासोदर्शितःसामग्रीव्यतिरेकाच्चानुपपत्तिंवरतांशुक्तिरजतादिष्वपिलेपानुसक्तिःसूचितातथाच
तुर्येपिभाष्यंमृत्पिंडादिदृष्टांतैर्हिसतोब्रह्मणएकस्यसत्त्वंविकारस्यचानृतत्वंप्रतिपादयतिशास्त्रमतः
स्वप्नवाक्यानिनोसत्यादिपराणिकिंत्वैकात्म्यावगमपराणीतिसदृस्याद्यंतयोःसत्त्वेनमध्येपिसत्त्वा
नुमानात्कालत्रयाबाधत्वरूपंसत्त्वंप्रपंचस्यस्याद्यंतयोरसत्त्वेनमध्येप्यसत्त्वानुमानेनकालत्रय
बाधत्वरूपमनृतत्वमित्यर्थः मध्येकदाचित्सत्त्वेनप्रतीतिस्तुभ्रमएवेतितदाशयः ऊषरादीनां
भ्रमविषयाणामेवतत्रानुदर्शितिविकारत्वादिप्रतीतिरपिभ्रमएवेतितत्रास्यर्थेमृत्पिंडादिदृष्टांतस्य
चायमर्थः एकेनमृत्पिंडेनपरमार्थतोमृदात्मनाविज्ञातेनसर्वंमृन्मयंघटशरावादिमृदात्मकमिति
ज्ञातंभवतीतियथाचततोभयथेतिसूत्रेपिभाष्येस्वाश्रयोविकारोवाचनामधेयएवनतुपारमार्थिको
स्तीतियथातंत्रांतरेघटादिप्रपंचस्यपारमार्थिकत्वंतथातत्रापिनस्यादित्यर्थः अस्माकंतुयावद्व्यवहा
रिकोपिप्रपंचोदीर्घस्वप्नएवेतिबोध्यं तदनन्यत्वमितिसूत्रेपिभाष्यंयथाचमृगतृष्णिकादीनामूषरा
दिभ्योनन्यत्वंदृष्टनष्टस्वरूपत्वात्एवमस्यप्रपंचस्यब्रह्मव्यतिरेकेणाभावइतिसर्वव्यवहारस्यप्रा

कब्रह्मात्मकविज्ञानात्सत्त्वं तत्र व्यवहारस्यैव प्राक् प्रबोधादिति च अविभागोपि परमात्मनि मिथ्या
ज्ञानप्रतिबद्धो विभागव्यवहारः स्वप्नवदव्याहत इति चामत्र भाष्ये एव अनिर्वचनीयं सदसद्विलक्षणं ज
ज्ञादिमिगतत्वादावुपपद्यते एवं ब्रह्मसत्तात्रयं चोपमादोषघटादित्वात्प्रपञ्चेति तन्त्वानिर्वचनीयस्य प्रतिष्ठा
तदिदं तस्य वक्तुमशक्यत्वात् किंच तस्य सद्भिन्नत्वादसत्त्वं असद्भिन्नत्वात्सत्त्वमापततीति उभयरूपत्वमेवा
यातितत्र सत्वमारोपितमिति भेदाभेदयोरिव तयोर्न विरोधः धर्मद्वयानाक्रान्तस्य लोकव्यवहारेऽभावाच्च
तदुक्तं सांख्यसूत्रे नासतः ख्यातिर्नृशृंगवत् नानिर्वचनीयस्य तदभावादिति असतः ख्यातौ नरशृंगवत्
शुक्तिरजतादेरप्यभानापत्तिः न च नरशृंगमित्यादिशब्दतो बोधत्वद्वासनावलकत्वेन तत्र तेषामपि स
त्त्वेन प्रसञ्ज्ञापत्तिः तद्वासनायाः फलबलेन शाब्दबोधमात्रजनकत्वेन तदापरोक्षभावात् नानिर्वच
नीयस्येत्यसार्थस्तु उक्त एव यथाप्यन्यथाख्यातिः सोऽशांतिकस्य वा ग्रहेपुरस्थादौ ज्ञानधर्मरजतादेरध्या
सस्थितेनांगीकारात् तथापि हट्टस्थरजतादेरारोप इति रामांवैशेषिके स्वकीयैः साहतानुभय
मपि न तत्र तत्र सत्वेन तद्रूपस्य संनिकर्षाभावेनासन्नभासते संनिकर्षाभावादिति स्वसिद्धांतव्या
घातः किंच विशेष्यविशेषणानुयोगिकत्वप्रतियोगिकत्वविशिष्टसंबंधस्य त्वयाप्यसत एव भानां
गीकारात् तद्ग्रहे संसर्गाग्रह एवं पर्यवसानमिति विशिष्टभ्रमवाचकस्यान्यथाख्यातिरिति वचसो
व्याघातात् किंच ज्ञानस्यार्थव्यभिचारत्वे ज्ञानेनाव्यवस्थितिरिति सर्वव्यवस्थाघातादिति हि किं परमार्थे

मं.म.० सारेपि त्रिगुणा चेतस्मात्मनि सर्वगतेवस्थिता चिताधारे कुरुते सूक्ष्ममविद्या सर्वैस्तास्तद्रूपेनेतयानात्मा
२९ स्वहितं तत्र भ्रममिति सर्ग: तदप्युक्तं तत्रैव रज्ज्वां भुजंगहेतौ प्रभवविनाशौ यथानत्त: जगदुत्पत्तिविनाशेन
चकारणमस्ति तद्वरिहेति भुजंगहेतौ भुजंगभ्रमहेतौ न च कारणमस्तीति किं त्वन्यथाभानात्मिः विधैवसे
सर्ग: किंचानिर्वचनीयो सत्तौ घटादिनामरूपादेरिव ब्रह्मणो विकारित्वापत्तिभ्रमविषयेण तु विकारित्वं
कामुकस्तुते: कांताविषये: सुप्ताविंतु किमनसि मेलीना विलीनानु किमिति विस्मे: कांताया विकारि
त्वाभावात् वस्तुतो मरीचिकादि विकारो भ्रममात्र न तु कोपि पदार्थ इति तदनन्यत्वमिति सूत्रेणोक्तं किंच
प्रसिद्धसामग्रीव्यतिरेके विपर्यासामग्र्याभुत्वा रौरजताद्युत्पत्तिस्तयासाम्याविषयासत्वेपि तदृसं
निकर्षे विज्ञानांगीकारे न बाधकं किंचानिर्वचनीयो न्यतौ न तस्य तस्यतादात्म्यरजतत्वाद्याश्रयत्वेन तत्
ज्ञानस्य भ्रमत्वानापत्ति: तस्य तद्वृत्तिधर्मप्रकारकत्वाभावात् न रजतत्वमेवानिर्वचनीयमाश्रयस
त्क्रिरेवेति न दोष: त्वयापि जातेर्वारंवारमुत्पत्तमंगीकारात् किंच जातेरिव तदाश्रयत्वस्यापि तादृशस्यमु
त्वौसत्वेन पूर्वोक्तदोषतावदवस्थं तदुक्तं योगसूत्रे विपर्ययो मिथ्याज्ञानमतद्रूपप्रतिष्ठमिति विपर्यय इति
लक्ष्यं मिथ्याज्ञानमिति लक्षणं तद्विवरणमतद्रूपेति तद्रूपप्रतिष्ठत्वाभाववत् यत्ज्ञानप्रतिभासिरूपं रज
तत्वादि तदाश्रयत्वाभाववद्विशेष्यकमिसर्ग इति मिश्रा: यात्मस्यादिदरमेव मिथ्याज्ञानमभिप्रेतं ते
नान्यत्र लक्षणानुक्ते: मान्यद्रूविनानिर्वचनीयख्यातेरपि तत्सूत्रानारूढत्वाच्चतेन सांख्योक्तसदस

तत्ख्यातेरेवतदभिप्रेतत्वं नसते किंच मुक्तिर्जगत्स्थतेः धिष्ठानज्ञानेनतन्नाशो वाच्यः नचज्ञानस्यव
स्तुनाशकत्वादृष्टा अतएवगौतमादिभिन्दसतिज्ञत्वनोक्ता अन्यथाख्यात्यादिवत्तत्रापिउत्पत्तिमेववदेयुः
अस्मादिसमवायकारणं वाभिव्यक्त्यादिअसमवायिकारणं दोषो निमित्तकारणमिति वक्तुं शक्यत्वात् अ
न्यथाख्यातिरित्येव चतदीयैरुक्तं अन्यथाख्यातिरित्यनेनप्रकारस्यान्यत्रसत्वं सूचितं नतु संबंधोप्येवमे
वतदनुयोगिकत्वमप्येवमेवेति सूचितं संयोगसमवाययोः संबंधत्वस्यानुयोगित्वादिभाननियतत्वा
त् बुद्धिसद्भावात् भ्रमप्रकारमेवमिथ्यात्वं रजतं पश्यामीत्यनुव्यवसायो विरोधवशाच्चासत्वादौ भ्रम
एव नहीदमस्य रजतत्वानस्यंतथा कार्यतावच्छेदकं वाच्यं तद्वद्रजतत्वमेवलाघवात् योचितमितिवा
च्यं उत्पत्तिनाशकल्पनावैयर्थ्यात्प्रमाण्यनेन नभ्रमस्यतस्यैवतत्वावधिसात् तदुक्तं परमार्थकारे जलना
दधमोहनिमित्तविभ्रमकृतिरंबरेयथाभातितद्वत् द्विधो दृष्टिमाययाद्वैतविस्तराभातीतिप्रतिभातीत्ये
वोक्तं नतूत्पद्यतेइति आकाशेजलरेखावत् शिलायाशंकरवत् विविधाकृतेः स्वरूपाज्ञोपस्येनासंभ
वात् स्वमाययावासनारूपया आश्रीहर्षेणाप्युक्तं परकीयापरीक्षेरमुक्तं अनिर्वचनीयत्वं विश्वस्यवर्यं वे
दयतीतिवस्तुतस्तुवयं सर्वप्रपंचसत्वासत्वव्यवस्थापननिह्नुताः स्वतः स्वरूपेचिदात्मनि ब्रह्मसत्वेकेव
लेभारमलं समचरितार्थाः पुरुषमात्मरहेये पुरुषपरिकल्पितसाधकदूषणमवस्थयाविचारमवता
र्यतत्वं निर्णेतुमिच्छंतितान् प्रतिक्रमोनसाधीयं भवतांविचारमवधिताभवत्कल्पितमपरस्य येव

आहतत्वात् इति सत्वासत्वमवस्थेतिनिरस्यतरमवस्थे सर्पः भारंभातिभासिकप्रपंचभारं अनिर्वच
नीयत्वं निर्धार्य सत्वासत्वाभ्यां निरूपेणानिर्वचनीयत्वं नतु सदसद्विलक्षणत्वमिति तद्व्याख्यातारः
अतएव भागवते उक्तं ऋतेर्थं यत्प्रतीयेत न प्रतीयेत चात्मनि तद्विद्यादात्मनो मायां यथाभासो यथात
मः इति विनाप्यर्थमात्मन्यधिष्ठाने प्रतीयेत सच्चात्मरूपं न प्रतीयेत न तस्य सयाप्रस्य यद्रूपमात्मनो मा
यां विद्यात् यथाभासो द्विचंद्रादिः यथा च तमो राहुर्ग्रहनमंडले सन्नपि न दृश्यते इति रर्थः असदर्थप्रका
शतस्यैवमायात्वादेवमेव उक्तं यदुक्तं बृहन्नारदीये नासद्रूपा न सद्रूपा माया नैवोभयात्मिका अनि
र्वाच्या ततो ज्ञेया मिथ्याभूता सनातनी इति तस्या यमर्थः व्यवहारकाले सत्वं न प्रतीतेर्न केवलसद्रूपा
प्रतिक्षणं परिणामप्रतीतेर्बोधदर्शनाद्विशेषदर्शनबाधत्वाच्च न केवलं चासत्त्व सद्रूपा अतएव वा
त्वबोभयरूपापि न विरोधाच्च अतएवानिर्वाच्या सत्वेवासत्वे वेति निर्धार्य वक्तुमशक्यात् तर्हि किन्तु
भयविलक्षणा नेत्याह मिथ्याभूता प्रतिभासमात्रविषयत्वात् सनातनी भ्रमपरंपराजनकपरं
पराकवासनारूपेणेति तस्मादारोपितं सत्वं परमार्थतत्वं सत्वमिसेवमुक्तं तदुक्तमव्यक्तकारणं य
त्तन्नित्यं सदसदात्मकमिति ईश्वरस्यात्मभूते इत्याविद्याकल्पितेनामरूपे तत्वान्यत्वाभ्यां अनिर्वच
नीये इति भाष्यस्याप्ययमेवार्थः अविद्यात्रवासनारूपा प्रवृत्तेतावत्वं हि प्रतिबेधतीति सूत्रे अ
यातः आदेशो नेति नेतीति श्रुतिव्याख्यावसरे एवं प्रतिषेधो भूतराशिं प्रतिषेधति उत्तरो वासनारा

त्मितिभाष्योक्ते ईश्वरस्यात्मभूते इवेत्यनेनारोपितसत्वे इत्युक्तं अविद्याकल्पिते इत्यनेनासत्व
मुक्तं एवमेवाविद्याकल्पितेन नामरूपलक्षणेन भेदेन व्याकृताव्याकृतात्मकेन तत्वान्यत्वाभ्यां
अनिर्वचनीयेन ब्रह्मपरिणामादिसर्वव्यवहारास्पदं पारमार्थिकेन रूपेण सर्वव्यवहारातीतमि
तिभाष्यमपि व्याख्येयं तत्राविद्याप्रवर्तनसंस्काररूपा व्याकृतं स्थूलं अध्यात्मकं सूक्ष्मं तदंतरप्र
तिपत्तौ रंहति संपरिष्वक्त इति सूत्रे भाष्यं जीवो मुख्यप्राणसचिवः सेंद्रियः समनस्कोऽविद्याकर्म
पूर्वप्रज्ञापरिग्रहः पूर्वदेहं विहाय देहांतरं प्रतिपद्यत इति तत्र पूर्वप्रज्ञाशब्देन प्रतिपत्तव्यदेहविष
यत्वदृढः संस्कारः तदुत्पत्तिस्तत्रैव कर्मोपस्थापित प्रतिपत्तव्यदेहविषयभावनादीर्घीभावमात्रं
जलौकयोपमीयत इति कर्मोपस्थापितः सुदृढो दृढ संस्कारेण बुद्धिविषयकृत इत्यर्थः एवमेव
एवंजातीयकं भ्रमदृष्टिभाष्यं व्याख्येयं कोर्मेपि विप्रकृष्टत्वादि स्वितस्यं न बहिष्करांचन स्वप्नश्च
ममदायेषु सर्वैरेवानुभूयत इति अत्र न कदाचनेत्युक्ता व्यवहारदशायामपि तथात्वमेवोक्तं चित्
शब्देन ईश्वरोपाधिरपि नेह नानास्ति किंचनेत्याद्या श्रुतिरपि वहिः सर्वप्रकारसत्तामनारोपितां
निषेधति परमार्थसारेपि समस्तमिदं जगदसत्संमतं प्रकृतेरिदं स्कृतेयं न तं प्रजल्पति पुरो पंरूप
सेपरमार्थसार निरमितिप्राणाद्यनंतभेदैरात्मानं संवित संविसेंद्र जालमिव संहरति वासुदे
वः स्वविभवमात्रक्रीडमान इवेति च स्फुतामिमस्पदर्शितमित्यर्थः संवित सेत्यस्पदर्शापित्वे इत्यर्थः

मंजू० अन्यथात्मनो विकारित्वापत्तेः स्वविभक्तावासनारूपयासत्समिवेस्तेननतस्यारोपितत्वं स्पष्टमेवो
३१ क्तं यद्यपि पूर्वपूर्ववासनावशात्तत्वेनादि प्रतीतिः व्यवहारकालमात्रेतत्प्रतीतेः सत्समिवेसुक्तं
एवेनासन्नोभाने बौद्धमतप्रवेशाद्यसमपात्तेतेनन आरोपितसत्त्वस्यापि अनंगीकारात् आत्मनस्तेन
नित्यत्वांगीकारात् च परमार्थसारे प्यमलः सहजुद्धिभातस्यैतमात्मा ववव्यापी सर्वविकल्पनहीनः
शुद्धोप्युद्धोजरोमाः शांतः स्वात्मस्वरूपमुक्तं श्रुतिषु च स्पष्टमेव तथोक्तं विकल्पनं नामरूपे ईश्वरमुप
लक्षणं उत्पत्ति विनाशावद्दिष्टत्वादिकमपि सत्सत्वेनारोपितमीश्वरेण तस्य सत्यसंकल्पत्वात्
सृष्ट्याद्यकाले चैष संकल्पस्तस्य यद्यानन्तसामग्री भ्रमस्तत्त्वविषय भ्रमे कारणमितित कृतकार्यका
रणभावस्य तद्विषयेनादिवासनावशादारोपिता वेवोस्पत्तिभाजो आरोपितत्वमपलक्ष्यकरणाद्या
ख्याभ्यामुक्तो तत्र सांख्यस्यापि तत्तन्मात्रेभ्यः परमाणवादिक्रमेणैव स्थूलभूतोत्पत्तिरभिप्रेते
ति योगभूत्तौ स्पष्टं निरूपितं तस्माद्भ्रमरूपाख्यल विद्यावासनारूपा चा अरूपरवा आत्मस्माविद्या
व्यवहारकालेष्वनाविद्यायासाकारणमिति तस्मात्एव कारणत्वेन निर्देशोस्मत्कं कारणमित्यादौ एतद्
ध्येतज्जन्मानुपलंभात्तस्य नित्यत्वोक्तिर्नैया उपनिषद्भाष्ये आमितिश्रुता वनामि सस्य यौगिकत्वेन ज
न्माभावपरतया व्याख्यानमप्येवमेव नेयं सत्कारणामपि त्रिगुणत्वात् लोहितशुक्लकृष्णत्वं न
स्याः सम्हत्य प्रायेण चैकवचनं बोध्यं वासनारूपैव चसमल प्रकृतिरित्युच्यते अनिर्वचनी

योऽसत्तिवादिभिरपि स्वसमानाधिकरणस्यावच्छिन्नवृत्तिकाभावस्य प्रतियोगित्वरूपं मिथ्यात्वं
वदद्भिः स्वीकृतमेव वस्तुनोऽसत्त्वं अन्यथाऽभावपदे विरोधार्थकत्वान्नञः प्रतियोगिसामानाधिकरण्य
तस्य वक्तुमशक्यं प्रतियोगिसामानाधिकरण्यस्यैतत्र अविरोधपदार्थत्वात् ममतु स्वप्रतिभाससमनाधिक
रणेऽस्याद्युक्तमेव भ्रमविषयत्वं मिथ्यात्वं ध्वनितं चेदं देवताधिकरणे कल्पतरुणा भ्रमासंस्कारतोऽप्यभ्रमं
दृष्टान्तमुदाहृते: अविद्यानादिभावात्मा मतावाचस्पतेरिहेत्यनेन अत्र वाचस्पतेर्मतेऽस्मिन्नेनसूत्रभाष्य
कृतोऽन्यमतत्संस्कारूपैर्वाविद्येतिमतं सूचितं इह देवताधिकरणे अनेनवाचस्पतेरपि अनृतसत्ता
भिनिवेशः सूचितः मनुतोयथामंदूकमदोभिः सरंतीमुदाहरणमपि वासनासमहस्याविद्यात्वेनस
महादेकैकस्यनिः सरणेनोपपन्नं सनत्सुजातीयभाष्ये भगवत्पादैरप्युक्तं मोहोमृत्युरितिपद्ये मोहोमि
थ्याज्ञानमनात्मन्यात्माभिमानः अनेनाग्रहणान्यथाग्रहणात्मिकाऽविद्यासूचितेति अग्रहणमात्म
स्वरूपाग्रहणं तन्मूलकमिथ्याज्ञानात्मिके सर्वः योगसूत्रेऽप्युक्तं अनित्याशुचिदुःखानात्मसुनित्यसु
चिसुखात्मताख्यातिरविद्येतिव्यासस्त्रेपि एतद्विलक्षणाविद्यानुक्तेस्तस्यापीदमेव संमतमितिलक्ष
ते अतएव मंचवृत्तिर्मनोवाद्यपरिक्षिपते इति सूत्रे परमतमप्रतिसिद्धमनुमतं भवतीतिन्यायेन योग
शास्त्रप्रसिद्धाप्रमाणविपर्ययविकल्पनिद्रास्मृतिरूपापंचवृत्तयः परिगृह्यंते इति भाष्ये उक्तं प
रमार्थसारेपि रज्ज्वांनास्तिभुजंगः सर्पभयं भवतिहेतुनाकेन तद्वत् द्वैतविकल्पभ्रांतिरविद्यानसत्

मं०न्न० ३२ मिदं एतत्तदंधकारं इदनात्मन्यात्मताभ्रांता न विरंतिवासुदेवं सर्वात्मानं जनाम्रढा इति एतद्भ्रांतिरू
पं उत्तरार्धेन न विरंस्म न येति अविद्या परुषनिदर्शिता एवं च सिद्धं भ्रमजन्त संस्काररूपा चाविद्या इति
सा च जन्मैवेति नैकविज्ञानेन सर्वविज्ञान प्रतिज्ञाभंगः परमार्थसारेणुक्तं भ्रमजन्त संस्काररूपा चावि
द्या इति सा च जन्मैवेति नैकविज्ञानेन सर्वविज्ञान प्रतिज्ञाभंगः परमार्थसारेणुक्तं हिमफेनबुद्बुदा इव
न तस्य च मोक्षमोक्षयावन्हेः नद्वत् स्वभावभूतामायैषा कीर्तिता विष्णोः एनां द्वैतविकल्पभ्रमरूपां विमोहिनीं मा
यां इति स्वभावभूतात् जननस्वभावत्वात् सजलादेः फेनादिजनकत्वस्वभाववत् अध्यासितसंबंधेन तस्यास्तिमसं बं
धत्वात् विष्णोः तत्स्वभावारोप इति बोध्यं विमोहिनीं उपाधितस्य तत्स्वरूपत्वात् दुक्तं तत्रैव मोहयंती स्वचात्मानं स्वमायया
द्वैतरूपया देव इति वास्तवमोहाभावादिति तेन तत्रारोपित एव मोह इति बोध्यं अत एव तत्तीयेसामान्यात्तिनिस्त्र
त्रैभगवत्पादैः उक्तं नहि ब्रह्मणोतिरिक्तं किंचिदजं संभवति सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयमित्यवधार
णादेकविज्ञानेन सर्वविज्ञानाप्रतिज्ञानाच्चेति अत एव न वियदश्रुतेरिति अधिकरणे वियदादीनामजन्यत्वे
प्रतिज्ञाहानिरव्यतिरेकाच्छब्देभ्य इति सूत्रेणैकविज्ञानेन सर्वविज्ञानप्रतिज्ञाभंग आपादितः मृत्पिंडादि दृष्टां
तेन कारणज्ञानेन कार्यस्यासत्त्वज्ञानमिति निहिततो लभ्यते तदुक्तं अव्यतिरेकाच्छब्देभ्य इति शब्दाच्च प्रकृ
तिविकृत्यन्यायेनाव्यतिरेकात् प्रतिज्ञासिद्धिरवगम्यते इति तदर्थः एतेनाकाशस्य जन्यत्वे एकविज्ञानेन
सर्वविज्ञानप्रतिज्ञासिद्धिरवगम्यते इति तदर्थः एतेनाकाशस्य जन्यत्वे एकविज्ञानेन सर्वविज्ञानप्रतिज्ञा

भंगाभंगापादानमभ्युच्चयः अविद्यानुरोधेनसर्वपदसंकोचस्यावश्यकत्वेनाकाशातिरिक्तपरत्वेनापितत्संको
चस्त्वित्यास्तां किंचतत्रैवयावद्विकारंतुविभागोलोकवदितिसूत्रेणकार्यत्वस्यभेदव्यापकत्वबोधकेनाकाशस्ये
वाविद्यायाअपितत्वबोधनात् विकारःकार्यंविभागोभेदः अस्तिघटाकाशोमठआदिभेदः एवमविद्यायां
शुद्धब्रह्मभेदव्यापकत्वबोधकेनाकाशस्येवाविद्यायांशुद्धब्रह्मभेदसत्त्वात्कार्यत्वमापतितब्रह्मणितुनकिं
चिन्निरूपितोभेदः अधर्मकत्वेनवैधर्म्यसंभावनाभावात् एवमेवहिभेदोभेदहेतुर्वायद्वैधर्म्यमितिप्रका
शकाराद्युक्तेः नवाजन्मसंबंधद्विनाशित्वस्यत्वरूपमत्रकार्यत्वंसाध्यं अविद्याअजन्यत्वेपिब्रह्मणएवध्वस्तत्वे
नपराधीनसत्ताकत्वरूपंवाकार्यत्वंसाध्यं अविद्याअजन्यत्वेपिब्रह्मणएवध्वस्तत्वेनपराधीनसत्ताकत्वं
विनाशित्वाद्यावश्यमपितत्रेतिवाच्यं सामान्यशब्दस्यसंकोचेनव्याख्यानेमानाभावात् अविद्यायाः
अजन्यत्वबोधकसूत्रांतराभावाच्च आकाशस्याध्वस्तत्वेनांतेतत्रापिजन्यत्वंनसिध्येत् अजामेकामिति
श्रुतिरविद्यायाअनादित्वबोधिका अनादिमाययासुप्तोयदाजीवःप्रबुध्यते अजमनिद्रमस्वप्नमद्वैतं
बुध्यतेतदाइतिभाष्योक्तसंप्रदायविदुक्तिश्चतस्याअजन्यत्वेनमानं आद्यायारूपकेणोपपत्तेः अ
नएवाजामेकामितिश्रुतौतेजोबन्नानामरूपाप्रागवस्थाजारूपकेणनिर्दिष्टेतिभाष्यउक्तं अनादि
त्वमपियरंपरानादित्वेनेतिवक्ष्यामः अक्षरात्परतःपरइतिश्रुत्वापिविद्यायाअक्षरत्वश्रुतेश्चतद
दियथाकथंचित्तत्वपानात् अश्रित्वेतेतर्हिअनादित्वमपितथैवानुमानचनतस्याजन्यत्वेमलकार

मजू
३३

लेतवस्थापत्तिः ब्रह्मणस्तु उपाधिमहंकारं विनाऽजनकत्वं अत एव परमाणवादीनां निरस्तत्वपरैः स्वीकृ
तमित्तिवाच्यं वासनारूपा विद्या महंकारेणास्थूलाविधायामन्धकारेणच सदृशाविद्याया ब्रह्मजन्यत्वेतानव
स्थापसंभवात् अत एव प्रकाशादिवन्नैवंपर इति सत्रेणाक्षेपो मूलप्रकृत्यनभ्युपगमे तदवस्थाप्रसंगाद्या मूल
प्रकृतिरभ्युपगम्यते तदेव नाब्रह्मेत्युक्तं तव त्वजन्याविद्यायामपि तत्सत्वान्न तदेवोनो ब्रह्मेत्यस्याः संगतिरस्त्ये
वः अत्र कार्यत्वमात्रं साध्यं न तु पङ्केदस्तत्वकार्यत्वं तेन घटशंतांपरस्पर कार्यत्वाभावेपि परस्परं भेदव्यवहारोपप
त्तिः आरोपितं धर्मवति भेदो विकारत्वं चात्मेव रज्जूरगस्य ले आरोपितेत्यत्वे नैव रज्जुविकारत्वव्यवहारान्
किंच सर्वशक्तिमयो ह्यात्मा शक्तिमंडलताद्वैः संसारं स्निग्धतिं च करोत्यविरतोद्यमितिस्मृतौ शक्तिमंडलत्वेन
मायोक्ता मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरं अस्यावयवभूतैस्तु व्याप्तं सर्वमिदं जगत् इति श्रुतौ चाविद्यायाः
सावयवत्वमुक्तं तेन जन्यत्वमावश्यकं घटादिवत् अस्यावयवेस्त्वत्र संधिकर्षः यद्वा अस्य महेश्वरस्य मा
यावयवानामेव च तदवयवत्वं तदधिष्ठस्यैव महेश्वरत्वात् किंच सत्तास्फूर्त्यनुरोधेन तस्या ब्रह्मकार्यत्व
मरूपकं वासनासमूहरूपा विद्याया अपि योगिनां सत्वे तत्स्फूर्तिमत्वात् चतुर्थपादस्याधिकरणे तद्धेदं तर्हि
अव्याकृतमायामासीदिति श्रुते इदं व्याकृतनामरूपं विशिष्टं जगत् प्रागवस्थायां परिस्पष्टं अव्याकृतनाम
रूपं बीजशक्त्यवस्थमिति सर्वं दर्शयित्वा परमेश्वराधीनात्वियं अस्माभिः प्रागवस्था जगतोभ्युपगम्यते अर्थ
वती च सा न तया विना परमेश्वरस्य स्रष्टृत्वं संभवति शक्तिहीनस्य प्रवृत्त्यनुपपत्ते अविद्यात्मिका हि सा बीजा ३३

शक्तिः परमेश्वराश्रयेति तत्कार्यबीजशक्तीनामावस्थेपि शक्तिरित्येकवचनं जात्यभिप्रायेण अनेन हि वासना-
नामेवाविद्यात्वं स्पष्टमेवोक्तं प्रतिबिंबविक्षेपस्याविद्यांशत्वे विद्यायाः सर्वशक्तियोगः सर्वज्ञं सर्वशक्तिमहामायं ना-
हूक्षे त्यन्यत्रोक्तं अत्राविद्याये समष्टेर्वैतद्विधमिथ्याज्ञानजन्मवासनाये समर्थः शक्तिसमूह एव च महामायेत्यवो-
ध्यं एतेनाविद्याया जन्याकस्मिञ्ज्ञानपदार्थो वासनाया आश्रय इत्यपास्तं अतिरिक्ते तत्कल्पने मानाभावात् अत एव
प्रपंचस्येव कारणत्वप्रवादनिर्वाहः स्वजन्यातिरिक्तसहकार्यनपेक्षत्वात् अत एव विष्णुपुराणे प्रजापतिप-
तिविष्णुं अनंतमपराजितं प्रधानपुंसोरजयोः कारणं कार्यभूतयोरितिसामर्थ्ये अजयोरितिरूपकं स्यानंत्य-
निराशाय न सूक्ष्मत्वनाशाय च कारणं कार्यभूतयोरित्युक्तं यद्वा एतत्स्थूलो तज्जन्मानुपलंभात् अजत्वं पूर्वकल्पातेज-
न्यत्वमादाय कार्यभूतयोरित्युक्तं यत्तत्सूक्ष्ममविज्ञेयमिति प्रकृत्य तस्मादव्यक्तमुत्पन्नं त्रिगुणं द्विजसत्तमः अ-
व्यक्तं पुरुषे ब्रह्मन्निर्गुणे संप्रलीयते इति भाष्योदाहृतस्मृतेः तत्र विरोधः स्यात् तदुपष्टंभ एव नसूत्र स्वरसेन चोक्त-
जातीयस्य क्रतोनं यदुक्तमात्मेवोचितात उक्तं चरके पतंजलिनाख्यादिनोस्यात्मनः क्षेत्रपारंपर्यमनादिकमि-
ति प्रकृतिं पुरुषं चैव क्षेत्रं क्षेत्रज्ञमेव चेति प्रश्नटीकेगीतायां वासनासमूहरूपाविद्यायाः क्षेत्रत्वोक्तेः किंच ब्रह्मांडपु-
राणे तस्माद्ब्रह्मणि लयउक्तः स्थूलं विलाप्यककरणे करणं करणवर्जिते च इत्थं विलाप्य यमिनः प्रविशंतिया-
वतं त्वा हरिं विमलबोधघनं नमामीति करणं महदादिनिदानं प्रकृतिः करणकारणवर्जिते ब्रह्मणि अनो-

नृ० २४

नापि तदतिरिक्तस्य करणकारणसाहित्यस्य चितं विलाप्येतनेन समूलमुन्मूलनमुक्तं नतु प्रलयेऽवाविभागे।
नावस्थानं अत्र ब्रह्मणि लयो यस्य तस्य तदुपादानत्वमुक्तं उपादानकारणएैव लयस्य यतो वा इमानि भूतानि ज।
यन्ते येन जातानि जीवन्ति यत्प्रयन्त्यभिसंविशन्तीति श्रुत्यावबोधनात् यस्य हि यत्र स्थितिः तस्य तत्र लयो
न्याय्यो मृदीव घटस्य नच मनसो वागुत्पद्यते इति शांकरभाष्यात् किंचानुत्पत्तिकत्वे तस्या नाशानावृत्तिः।
तदुक्तं न्यायभाष्ये वात्स्यायनेन चानुत्पत्तिधर्मकं किंचिदनपधर्मकं प्रतिज्ञातुं शक्यं इति प्रागभावस्याविना।
नाशः तस्य स्वतन्त्रं तत्प्राकृतकार्भावेन तद्व्यवहाराभावोपपत्ते एवं जीवानामप्युपधिवैशिष्ट्येन जन्यत्वमा
वश्यकं एत एव श्रुतौ लोहस्याग्नेर्विस्फुलिंगा इव जीवा इत्युक्तं तेनोत्पत्तिरेव तदुत्पत्तिरिति न्यायास्तारः
विशेषाभ्यां शमादाद्यनेवांतिमत्वोक्तिरपि किंबहुना घटादेरप्येवमेव जन्यत्वं तत्तदाकारविशिष्टब्रह्मण एवा।
घटादित्वात् तदुक्तं परमार्थसारे यद्वत् दिनकर एकोपि भाति समलेलाश्रयेषु सर्वेषु तद्वत्सकलोपाधिष्व
स्थितो भाति परमात्मेति भातिविशेषतयेत्यर्थः अत एव द्रव्यं नित्यमिति महाभाष्ये उक्तमित्युपरिष्टाद्वक्ष्यामः
उपाधिसंनिवेशादिशिष्टस्य ब्रह्मणो वस्त्वर्शवेवासनावशात् परमात्मन एवोपाध्यादित्वेन तद्विशिष्टे भानात्
अत एव सर्वशब्दानां ब्रह्मैव वाच्यं वाचकं चेति हरिणा सिद्धान्तितं संगच्छते अत एव हिरण्यगर्भस्य कार्यब्रह्मे
ति व्यवहारः तथा च सामीप्यात्तु तद्व्यपदेश इति सूत्रे ब्रह्मसामीप्यात्परब्रह्मण्यपि ब्रह्मशब्दः कार्यमेव हि ब्रह्म २४

विशुद्धोपाधिसंबद्धं कञ्चित्सूक्ष्मश्चिदादिकारधर्मैर्मनोमयत्वादिनिरूपासनायोपदिश्यमानमपरमिति स्थितिरितिभाष्ये
उक्तं अविद्यायाजन्यत्वादेव सर्वं खल्विदं ब्रह्म तज्जलानिति श्रुतिहृदयंगमो ब्रह्मातिरिक्ता सर्वत्वावच्छिन्नविषये एवा-
रूपा भवति विष्णुपुराणे विज्ञानमेव परं ब्रह्म ज्ञानं बंधाय चेष्यते ज्ञानात्मकमिदं विश्वं न ज्ञानाद्विद्यते परं विद्याऽविद्ये
च मैत्रेय ज्ञानमेवोपधारयेति नरूपाधि ब्रह्मैव विद्या सोपाधिर्न दृश्यते अविद्येति निःतरर्थः तदुक्तं आचार्यैः द्विरूपं हि
ब्रह्मावगम्यते नामरूपविकारभेदोपाधिविशिष्टं तद्विपरीतं च सर्वोपाधिविवर्जितमिति अत्रावगम्यत इति व्यव-
हारमात्रे ब्रह्मणो विशेषत्वमुक्तं असंतु योगिभिः समाधावेवगम्यत इति बोध्यं परमार्थसारेऽपि विज्ञानांतर्यामिप्राण-
विराट्देहजातिपिंडांताः व्यवहारस्य स्यात्मनोऽनेतेवस्थाविशेषाः स्युरिति यद्यपि विज्ञानं ब्रह्मैव तथापि नामवैचि-
त्र्यात्तावस्थात्वमुक्तं विपरीतं मायापि विज्ञानमत्र विज्ञानाश्रयात्मनो भ्रमरूपाः प्रतिभासमात्रविषया अवस्थाः
स्युः अनेन सर्वोपाधीनां तद्विशेषाणां च ब्रह्मरूपत्वमुक्तं तदप्युक्तं तत्रैव रज्जां नास्ति भुजंगः सर्पभयं भवति हे-
तुना केन तद्वत्तु द्वैतविकल्पभ्रांतिरविद्यानमस्यमिदमिति तदुत्तरार्धे या इदं विज्ञानादि अविद्यावासनारूपाऽवि-
द्यामूलकं वासनारूपसूक्ष्मोपाधिवैशिष्ट्येनापि ब्रह्मज्ञानं भवनादिपरिपाकवतामस्त्येव अविद्याया ब्रह्माध्यासि-
कसंबंधेन परमात्मैव आश्रयस्तवाश्रयस्तद्व्यतिरिक्ताविद्यायाऽयवतदप्युक्तं तत्रैव त्रिगुणा चैतन्यात्मनीति सर्वो
त्कार्ययात्र माधिष्ठानत्वमेव तद्विशेष्यत्वरूपं विवर्तोपादानत्वं अत एव रज्जौ भुजंगो जात इत्यप्रत्ययः रज्जुभुजं-

मं०जू०
३५

गात्रमोजातइत्येवच प्रत्यय अनादिनिधनंब्रह्मेत्याद्यश्लोकेहरिग्रंथेपिस्पष्टमेतत्तु गतत्वादप्रच्युतस्यवस्तुनो।
भेदानुकारिणाऽसत्याविभक्तास्वरूपोपग्राहिणाविवर्त्तः स्वप्नविषयप्रतिभासवदित्यादिनातत्वात्स्वस्वरूपात् अप्र
त्स्यंवस्तुनोवदिरसत्वात् अविभक्तमधिष्ठानेन अन्यत्वेधर्मोपलंभात् तादृशस्वरूपोपग्राहितातद्रूपप्रकारकत्ता
नविशेषणतावगाह स्वप्नविषयेनांतितद्याख्यातरः पयसोदधिवन्नविवर्त्तः तत्वात्प्रच्युतेः स्वर्णादिकुंडलादिवत्।
विवर्त्तएवतदुक्तं परमार्थसतोयद्देहोवयवामृदेवपार्थोविकारजातयश्च तद्वत्स्थावरजंगममद्वैतंद्वैतवत् मा
तीति अवयवातिरिक्तोवयवीयथाऽसन्मृद्विकाराश्चयथासंतोनांतितथानामरूपवत्वमसदेवनातितित तदु
ष्टेः द्वैतनष्टेनचद्वास्यांप्रकारास्यांइतंज्ञातंधीतंतस्यभावोद्वैतंइतिव्युत्पत्त्यानामरूपंप्रत्येतेनरहितंचाद्वैतनष्टे।
न एवंचद्वैतनष्टेनप्रपंचस्योक्तिरेवनाम्नःप्रकारत्वेमात्रमित्यपिवोध्यं श्रुतिरपिविकारोनामधेयंमृत्तिकेत्ये
वसत्यमितिनाममात्रंव्यवहारमात्रंनतुतत्वांतंतरेष्वितत्वमस्तीतितदर्थः चेतनसंनिधानमात्रेणवर्त्तकत्वेसं।
निधिनित्यत्वात् प्रवृत्तिनित्यत्वापत्तिरितिवाच्यं संनिधिनित्यत्वेपिमायिकत्वेनपरिहारादिति नतुदृष्टांतेनवादि
तिष्ठते यथास्वयंप्रसारितमायया मायावीकदाचिन्नसंस्पृश्यतेऽवस्तुतत्वात् एवंपरमात्मापिनसंसारमायया
स्पृश्यते मायामात्रंह्येतत्परमात्मनोवस्थात्रयात्मनावभासनंरज्जाइव सर्पादिभावेनेति अत्रावस्थात्रये।
त्युलक्षणं अनेनहिसर्वस्यजनकत्वादेवरजास एवनवस्तुकिंचिदस्तीतिस्पष्टमेवोक्तं अनादिवासनावशान् ३५

त्रमविषयमेवतन्मूयतोवेत्यादिश्रुतयोनुवदंतियतोवेतिश्रुत्यासर्वजनकत्वलयस्थानत्वैस्तादृशैरेवब्रह्मलक्ष
णटस्थलक्षणंबोध्यते सत्यंज्ञानमानंदमित्यादिश्रुतयोपिशुद्धचिन्मंप्रतिनेहनानास्तीत्यादिश्रुतिरिहकारणब्र
ह्मत्यागेनाद्वैतंशुद्धंब्रह्मबोधयंतिकणादादयोपिमायिकत्वेनमिथ्याभूतत्वेब्रह्मरूपत्वेनसज्ञानस्यबोधनीयात्रि
व्याधिकारानुसारेणमायिकत्वाद्युपलभ्यब्रह्मरूपत्वेनसज्ज्ञानपरमाणवादिस्थःसृष्टिसमवायादीनांपरमार्थत्वंच।
तीन्द्रियदृष्ट्याज्ञात्वोक्तवंतस्तत्रउक्तपदार्थानांशुष्कतर्कबलेनान्यथाकरणंतेषांखंडनंचायुक्तमेवअसत्सुज्ञास्य
मानेषुअर्थेषुरूपानुभवानुसारेणैवकल्पनायाऔचित्यात् तदुक्तंपरमार्थसारेयद्यत् सिद्धांतागमतर्कादि
षुत्रमंतिरागांधाःअनुमोदाःमतस्तेषांसर्वोत्मवादविधियेति सिद्धांतप्रतिपादकेषुपांचरात्रागमादिषुचेति अथ
मेवसिद्धांत समीचीनस्याग्रहंकुर्वीतित्यर्थःइत्यलमतिप्रसंगेनप्रकृतमनसरामःचित्तस्यविषयकारणपा
रिणामश्चेंद्रियेणसहैव अतएवरसनेंद्रियगतपित्तान्वयेनगुडःकटुरितिनयनगतपित्तान्वयेनशंखःपीत
इत्याद्युपपद्यतेसाचचरमचरमोऽन्यरूपापुरुषेप्रतिबिंबःतिपुंसोविद्यमानवृत्तियाहकत्वंप्रतिबिंबोत्रबुद्धेःपरि
णामविशेषएवनत्वादर्शादाविवप्रतिबिंबःउभयोरपिनिरूपत्वात्वात्इत्यत्रविस्तरःपुरुषोपिवृत्तिसंबंधात
तविषयाकारतानाक्रवृत्तिस्तत्संबद्धातत्स्वरूपप्रकाशनाक्रवृत्तिजन्यफलंचवृत्तिद्वाराशुद्धचैतन्येनतस्यप्र
तिबिंबनमेतदेवप्रकटतात्संवन्धाद्वपरसमवेताक्रियाफलाश्रयत्वाद्विषयस्यकर्मत्वंअंततःकारणब्र

तापुरुषस्य वृत्त्याश्रयत्वानुकूलत्वं जानाति स्म वृत्तिविशेष एव शक्तिः तत्र दंडीति ज्ञाने वृत्तिस्य दंडाकारेणाथः पुरुष
स्य संबंधः साप्रकारता दंडत्वनिष्ठस्य सोऽयं वेदत्वा स्वाप्रकारता संयोगनिष्ठः सांसर्गिकविषयता पुरुषनिष्ठो विशेष्य
ता तासां परस्परमवच्छेद्यावच्छेदकभावश्च परेषामिवास्माकमपि विषयत्वात्वं च वृत्तिनुयोगिकच्चे तन संबंधविशेष
निष्ठं संबंधविशेषत्वं अखंडस्य तत्संप्रतिपन्नं तदेव न्यायनये तु तद्विषयविशिष्टज्ञानं विशेष्यतादिरूपं विषयता
त्वं तु त्रिषित्रितयसाधारणमतिरिक्तं स्वीकार्यं तत्र वृत्त्यारूढाकारस्य बाह्यघटाकारविनाशेनैव ज्ञानविषयता
तादृशाकारत्वमेव ज्ञानेऽत्रादौ च विषयिता एवं पुरुषोपिवृत्त्यारूढः पुरुषे प्रतिबिंबतऽस्महमिति ज्ञानोप
पत्ति आत्मानमात्मना जानामीत्याद्युपपत्तिश्च अहमिति जानामीत्याद्युपपत्तिश्च बिंबप्रतिबिंबयो वस्तिव भेदा
नावात् स्वातिरिक्ताप्रकाशत्वस्त्वं स्वप्रकाशत्वं पुरुषस्योपपन्नं एतस्सर्वं सादिनास्य मितिवन्निष्ठप्रकारत्वा
छिन्नतद्विशेष्यकत्वरूपं प्रामाण्यमपि ज्ञानस्य स्वतो ग्राह्यमेवोत्तरकालिकबाधे तु तदंशो भ्रमत्वकल्पनं यथा च प्र
दीपो रूपादि प्रकाशयन्नात्मानमपि प्रकाशयति एवं ज्ञानमर्थं प्रकाशयदात्मानमपि प्रकाशयति एवं शब्दोपि ज्ञा
न शब्दप्रदीपानां त्रयाणामपि स्वप्रकाशत्वात् अत एव ज्ञाने सति जानामि न वेति संशयस्य न जानामीति विपर्यय
स्य चाननुभवः अनुव्यवसायस्य ज्ञानग्राहकत्वेऽनवस्था घटं जानामीतिवत् ज्ञानं जानामीति अनुभवाभावाच्च
अभेदेपि कर्मकर्तृभावस्य विषयविषयिभावस्य च स्वप्रकाशस्यादिव्यवहारानुरोधेन स्वीकारे बाधकाभावो

दिस्यान्यत्रविस्तरः एवंआप्याकारवृत्तिप्रतिबिंबरूपमाप्यज्ञानोत्तरंशाब्दाकारवृत्तिप्रतिबिंबशाब्दरूपशाब्दज्ञानोत्तरंजा
यमानबोधव्यापकंशाब्दार्थरूपतत्वदर्थाकारवृत्तिप्रतिबिंबनवमेवानुमितिः शाब्दबोधस्य शब्दास्यंगालीकादिशब्दा
नांप्रातिपदिकत्वसिद्धिरविबोधार्थकत्वेनैवोपपद्यते परःसन्निकर्षेति सूत्रेस्याभिवत्त्वं तत्रभाष्येस्पष्टमेतत् इदज्ञा
नामव्यंत करणेवासनासत्वेशाब्दोद्बोधएवमनेश्वर्यबोधैर्वासनाजननाच्च अनादित्वाच्च व्यवहारस्यनदोषःतदुक्तं
हरिणाघोवार्थोबुद्धिविषयोवाह्यवस्तुनिबंधनःसवाह्यंवस्त्वितिज्ञानःशाब्दार्थःसम्यगिष्यतेइति अबहीरूपो।
विबहीरूपतयाच्छन्नइतिपुंजराजःआध्यासेबीजंचांतःकरणस्यरागादिदोषएव अतएववाह्याथानयनमुपप
न्नं अत्रह्यास्यंतरार्थस्यबाह्यार्थेनसंवादःसशाब्दःप्रमाणविसंवादेत्वप्रमाणमितिव्यवस्थाएवमेवायंशाब्दःप्र
माणंनवेतिआदेरिदंज्ञानंप्रमाणंनवेत्यादेश्चापपत्तिःनत्वादिपदेस्योपिबोद्धाकारविषयकएवबोधःसचबोद्ध
आकारःसामान्यरूपएवावयवसंस्थानगतविशेषस्याग्रहात् तेषांशक्तियहोपिवक्तमुखात्तदीयगुणसमभ्या
दिश्रवणानंतरंदृष्टगुणसमभ्यादिविशिष्टेसामान्यतोबुध्यागृहीतआकारेएवहेतुमतिचेतिसूत्रेभाष्येकंसां।
घातयतीत्येतद्युत्पादनावसरेतेषामुत्पत्तिप्रभृत्याविनाशाद्देहदंडीओचत्वालःसतोबुद्धिविषयान्प्रकाशयंतीत्युक्ते
तदुक्तंहरिणाशब्दोपहितरूपांश्च बुद्धेर्विषयतांगतान् प्रत्यक्षमिवकंसादीन्साधनत्वेनमन्यते बुद्धिप्रवृत्तंरूपंचसमा
रोप्याभिधातृभिःअर्थेषुशक्तिभेदानांक्रियतेपरिकल्पनेति प्रत्यक्षमितिअननक्रियाविशेषणं इंद्रियजज्ञाना।

मंजू०
३१

ज्ञावादिवेति अर्थेषुवाच्येषुवेष्ठमेवैकस्यशक्तिनानात्वंवाच्यधर्मस्यतद्रूपज्ञानविषययोरन्योन्याध्यासात् अतएवदेशांतरा
स्थंदेवदत्तकारूपंश्रुएवतःतंचतत्रवद्रूपतोपिदेवदत्तोत्रनास्तीसतोधीःसामान्यरूपोविवोद्ध्याकारोविशेषरूपेण
विवर्त्ततएवेनातीतनत्वादिसाविवेत्रादिवर्त्तमानप्रसिद्धासंनिकृष्टवस्तुगोचराःसंस्काराअनादयोधारारूपेणविशि
ष्टवोधान्यथानुपपत्त्याकल्प्यंतेतैःस्मृतेष्वर्थेषुशक्तिग्रहोवोधश्चेतिनैयायिकनव्योक्तमपास्तंविशिष्टवोधरूपहेत्व
सिद्धेःविशिष्टग्रहीतसंगतिकानामिवतदर्शनेपदस्मरणायत्तेश्चपदप्रकारवोधस्यैवानुभवाच्च अतएवाज्ञाता
र्थकेषुइदमेकंपदमितिज्ञातेषुनलचैत्रगवयादिपदेषुश्रुतेषुकएतदर्थइतिप्रश्नेउपमानतल्लक्षणकथनादिना
प्रतिवचनंचद्रूपते अतएवसादृश्याद्युपायेनशक्तिवोधकत्वयोपमानस्यप्रसिद्धपदसामानाधिकरण्यात् तद्वोधक
तयाकाशस्यप्रामाण्यंवक्ष्यति नत्वादिनावोधस्तुतेनरूपेणशक्तिग्रहासंभवात् असंभवी एतेनप्रमेयत्व।
दिरूपेणसर्वानुभवसत्वात्तत्प्रमेयत्वांशस्यानुद्बुद्धसंस्कारत्वेनमोक्षेप्रथमतत्तज्ज्ञानादिविषयंनिर्विकल्पकंस्म
रणंततोज्ञानलक्षणयाविशिष्टतत्तत्पदार्थोपस्थितौतत्रशक्तिग्रहोवोधश्च ज्ञानलक्षणाचमनःसंयुक्तात्म
वृत्तिसंस्कारविषयत्वंफलवलकल्प्योवोधकवशात्स्मृतेःक्वचित्कत्वकादाचित्कत्वनियमत्वयमेवनसावेक्ष्यापत्तिरि।
त्यास्तंअनुभवविरुद्धत्वात्दृश्यस्मरणकल्पनेमानाभावाच्च सर्वत्रस्मरणेऽनुभवसामानाकारत्वस्यैवदर्शनात् किं
चतद्दशामोक्षेपिकदाचित्काचिद्विशिष्टजानातुनुभावानामेवतथात्वानंतवत्तुनतुकदाचिदपितथानत्त्वनूनानां। ३१

तथा ज्ञानं ज्ञानलक्षणासहकारेणाप्यनुभवविरोधात् अन्यथा ब्रह्मणोपि तथास्मरणे ज्ञानलक्षणया तथानुभवे
च कृतकृत्यतापत्तिरिति सत्यं यत्र तु न गुणमध्यादि श्रवणं तत्र पदमात्रविषयकमेव ज्ञानं अत एव पदं तु श्रुतं तदर्थो
न जानामीति व्यवहारात् तत्र गुणादि श्रवणोत्तरं तु श्रुतोस्ति मन दृष्ट इति व्यवहार अस्य कश्चिदर्थो भविष्यतीति प
दत्वहेतुकमनुमानमेव बौद्धार्थस्य बौद्धे न शाब्देनाविनाभावात् तन्मूलाज्ञाने दोष्यवसायेन शाब्दाद्यर्थाकारस्तत्तो जायमा
नायां स्वाकारस्यापि समर्पणमिति शाब्दस्यापि विषयता अत एव शाब्दे ग्राह्यत्वग्राहकत्वरूपशक्तिद्वयस्वीकारः त
त्र तात्पर्यवशाद् ऊर्ध्व शाब्दप्रकारको बोधः अर्थे बाधे तु गौरित्ययमाह तादावनुवादे शाब्दविशेष्यकः अनुकरणे तु शा
ब्दमात्रविषयकः एवमर्थेनापि स्वाकारसमर्पणे तत एव शाब्दाकारस्यापि समर्पणमिति सर्वं ज्ञानं शाब्दानुविद्धं तदुक्तं न
सोस्ति प्रत्ययो लोके यः शब्दानुगमादृते अनुविद्धमिव ज्ञानं सर्वं शब्देन भासते इति उत्तरार्धे नानुव्यवसायः प्रमाह
णादृष्टिं तं अत एव चक्षुषा दृश्यमानमप्यज्ञातबोधकशब्दं पदार्थे किमिदमिति न जानामीति व्यवहरन्ति तदुपदेशो
च ज्ञातमिदमिति व्यवहरन्ति एतेन मणिमन्त्रादिन्यायेन तत्तत्पदवाच्यत्वग्रहो विशेषधर्मप्रकारेण ज्ञाने तथा व्यवहारे तु व्य
वसाये च हेतुरिति नैयायिकनव्योक्तमपास्तं मणिमन्त्रादिन्यायेन कारणत्वकल्पनापेक्षया स्मदुक्तस्यैवौचित्यात् त
दुहेसति स्मृतस्य तस्य नाने बाधकाभावात् तदर्थे प्रतिबंधकत्वेन गौरवमनुभवविरोधश्च किंच पिकपदशक्तिग्र
हवतोयं कोकिल इति अनुव्यवसायापत्तिः तव पिकत्वकोकिलत्वयोर्भेदात् मम तु तत्पदज्ञानान्न दोषः अत एव क

मं.जू.० णाद सूत्रे वृत्तिकृद्भिः कीर्तितं दिङ्गादिभिर्नामसंसर्गविषयकत्वं सविकल्पलक्षणमुक्तं पातंजलानामपीत्थमेव सविक
३८ ल्पकलक्षणं संमतं तेन ज्ञानं शाब्दं न तु लैङ्गिकमेव अर्थज्ञानस्य वाचकशब्दाभावादर्थवाचकेनेतिकरणयुक्तेन घट
इति जानामीति तद्व्यवहार इत्यपास्तं इंद्रियार्थसन्निकर्षोत्पन्नं ज्ञानमव्यपदेश्यमव्यभिचारि व्यवसायात्मकं प्रत्यक्ष मि
ति प्रत्यक्षलक्षणे ऽव्यपदेश्यत्वं विशेषणं वदता गौतमेन शाब्दज्ञाने शाब्दज्ञानस्यांगीकाराच्च अव्यपदिश्यमानत्वं
व्यपदेश्या विषयकत्वं व्यपदेशश्चार्थवाचकः शब्द इति भाष्ये स्पष्टमेवोचास्य तत्रनंदभानाग्रहीमुधेति पातंजला
नामाशयः शाब्दविषयकत्वेन प्रत्यक्षस्य शाब्दत्वापत्तिरिति वदतां वात्स्यायनेन शाब्दजबोधस्य शाब्दविषयका।
त्वप्राप्यमेव वैशाब्दविशायकत्वमेव शाब्दत्वं न तु शब्दजन्यत्वमिति तत्रैव वाचस्पतिमिश्रैरुक्तं स्वरूपमिति सूत्रे
भाष्ये स्पष्टमेतत्. तत्र हि नवाणतन्दक्तमं किंकारणं शब्दपूर्वको ह्यर्थे संप्रत्ययश्चात स्य शब्दपूर्वकः यो नि यसौ ना।
म्ना हूयते नाम च यदा तेन नोपलभ्यं भवति तदा हृष्टवति किं भवानों हेति शब्दपूर्वकस्यार्थस्य प्रत्ययः इह ज्ञाने ऽशब्दे
संभवादर्थे ऽसंभवादर्थस्य निवृत्तिरित्युक्तं शब्दपूर्वको हीत्यस्यायं तु शब्दज्ञानपूर्वको ऽप्रत्ययः इति लोके प्रसिद्ध मि
त्यर्थः अन्वयमुक्त्वा व्यतिरेकमाह नाम चेति प्रकारांतरमाह शब्दपूर्वकश्चेति शब्दविशेषणक इत्यर्थः तेनार्थे ऽसंभ
वे कारणत्वे न विशेषणत्वेन चोपस्थिते शब्दे कार्यमिति भावः चकारेण चास्य युक्त्यंतरत्वमोचितं मंत्रेय जुषीति च या।
ऽच्यते तत्र मंत्रशब्दादौ कार्ये संभवेन मंत्रादिसहचरितेर्थे न विध्यतीति प्रतीके केयटेन स्पष्टमेवोक्तं साहचर्येक्षणा। २८

ष्टानुविद्धस्यैवार्थस्यावगमात् इति किंच घटत्वादावपि विषयताज्ञाननियमनिर्वाहाय स्वज्ञानमात्रव्यापके यत्तु ज्ञानं यत्
पदादिविषयं तत्तज्जन्यबोधीयविषयतासमानविषयताकमिति नियमात् सन्निकर्षादिनिरुक्तमेव स्याद्घटो रूपवानि।
ज्ञानवत् घटस्य रूपमिति रूपविशेष्यकज्ञानस्यापि तेन संनिकर्षेण जननात् घटरूपोभयविषयकज्ञानस्य तत्संस्का।
रस्य चापूर्वं सत्त्वे न यदा यत् ज्ञानं पूर्वं तदा तस्य विशेषणतेति अप्युक्तं विशेषणज्ञानस्यैव विशेष्यतावच्छेदकरूपेण वि।
शेष्यग्रहहेतुतायां तदनुसरस्य विशेष्यज्ञानस्यापि विशिष्टबुद्धिकारणत्वात् अन्यथा किंचिद्रूपवदित्येवस्यात् ननु घ
ट इत्यादि किंच यथा विशिष्टस्य वैशिष्ट्यमिति बुद्धौ विशेषणतावच्छेदकप्रकारकनिश्चयस्य कारणत्वं तथा विलाघवाद्विशि।
ष्टज्ञानं प्रति विशेषणज्ञानं कारणमिति कल्प्यते अत एव निर्विकल्पकसिद्धिः तथा विशिष्टवैशिष्ट्यमिति विषयतावगाहि
बुद्धौ विशेष्यतावच्छेदकप्रकारकविशेष्यज्ञानस्य कारणतायाः सर्वेषामावश्यकत्वे न विशिष्टबुद्धित्वमेव विशेष्यज्ञाना।
स्य लाघवात् कार्यतावच्छेदकमुचितं घट इत्यादिविशिष्टबुद्धावपि विशेषणज्ञानवत् निर्विकल्पकं विशेष्यज्ञानस्य
मपि तुल्यत्वमत एव घटघटत्वे इति निर्विकल्पकाकारमाहुः ये तु निर्विकल्पकं नेच्छन्ति विशेषणज्ञानादिकारणत्वं च।
नेच्छन्ति संनिकर्षेणैव विशिष्टज्ञानमिच्छन्ति तेषां त्वनुपपत्तिरेव घटादिपदजबोधे विषयताज्ञाने तु घटादिपदज्ञानां घटत्व
विशिष्टे शक्तिरिति शक्तिग्रहो नियामकः घटत्वनिष्ठप्रकारतानिरूपितविशेष्यत्वावच्छिन्ने शक्तिरिति तदर्थः अत
एव विषयकोऽनुव्यवसायः स्वस्यतो विषये विद्यमानपदार्थस्यानुव्यवसाये ज्ञाने त्वाम्रफलादिविषयकज्ञानानु

मं०जु०　अत एवास्ये माधुर्यादीनामपि विषयतापत्तिः कुब्जत्वं जः खंजकुब्जः इत्यादौ विषयतानां न विना बोधविशेषस्योपपादयि
२९　तुमशक्यत्वात् संबंधस्य स्वरूपसंबंधे नैव व नानवत् विषयतानां स्वरूपत एव मानं कथा विविषयतये त्तिनानवस्था
न च विषयतानां कार्यकारणबलादेव बोधः तद्बोधकारणतानियमकत्वेन शक्तिकल्पनावश्यकत्वात् समर्थसूत्रे भाष्ये
च जहत्स्वार्थावृत्तिमुत्पादनावसरे राजपुरुषः राज इत्यादौ वाक्ये राजपदार्थे विद्यमानविशेष्यरूपत्वार्थस्य त्यागइ
त्युक्तं एवं च स्वरूप्यन्तु नव सिद्धं विषयतानानंतत्वं च्यत्वं च अत एव व्यक्त्याकृतिजातयस्तु पदार्थ इति सूत्रे न्यायवा
र्त्तिककृतोक्तं तु शब्दे विशेषणार्थः किं विशेष्यते प्रधानोपसर्जनभावस्यानियमेन पदार्थत्वमिति प्रतिज्ञापनी
यधर्मविशिष्टो धर्मी साध्या इति प्रत्ययवैपि न्यायवार्त्तिककृतोक्तं अनित्यः शब्दः कृतकत्वादित्यनुमानेन शब्दस्यसि
द्धत्वेन साध्यत्वं न भवतीति प्रतिज्ञापनीयेत्यादि नापि शब्दोऽनित्यत्वं साध्यं कृतकत्वेन हेतुना साध्यस्य योगाभावात्
अनेन परंपरासंबंधानां असंबंध दर्शयति न चानित्यत्वमपि घटादौ सिद्धं तस्मात् न धर्मत्वेन प्रज्ञातस्यानित्यत्वस्य धर्मि
णा शब्देन यो विशेष्यविशेषणभावः स साध्यः स चोभयाश्रयः धर्मो विशेष्यो धर्मो विशेषणमिति अनेन ज्ञाने विषय
तानानं स्पष्टमेवोक्तमित्यन्यत्र विस्तरेण निरूपितं सर्वस्त्र शब्दज्ञानमित्यय न च्यो प्रयोगो वितत्रकः शब्द इत्यनेनापि सू
चितमित्यग्रे निरूपयिष्यते शब्दार्थयोरविनाभावादेव यस्य शायामत्वगोरित्यत्रकः शब्द इति प्रश्नः किंच न च घट　२९
कृत्यादीनां शब्दत्वमाशंकितं तद्विवक्षशब्दत्वाज्ञानात् न चैवमपि गुणादिनां गो शब्दत्वाशंकाकथं तेन शब्दे न।

तेषां भेदाभेदाभावादिति वाच्यं निरंतरस्वरूपायुतसिद्धत्ववदवयवविशेषानुगतसामान्यविशेषरूपगुणसमूहस्यै
वद्रव्यत्वात् क्रियाभिति सूत्रेऽङ्गे च भवतः कः पुनस्य यो गुणसमुदायोऽयमिति भाष्यात् किंच प्रत्यवयवो गुणः स
मुदायं प्रतीतसंख्यायाश्चावयववमिति सूत्रभाष्याच्च अयुतसिद्धावयवविशेषानुगतः समूहो द्रव्यमिति पतंजलिरिति।
पातंजलभाष्याच्च गुणपदेनावयवा धर्माश्च अत एव व्रीहिषु प्रोक्षणजन्यसंस्कारस्यांशात्वावयवत्वादिनाक्षवहा
र मन्वयेसूत्रे भामस्यां समुदायसमुदायिनिः परस्परं भेदाभेदाभ्युपगमः अत एव मृद्घटो मृद्धटऽस्या
युपपद्यते गुणगुण्याद्योरिव अत एव घटः शुक्लः घटे रूपं गंधः स्पर्श इत्याद्युपपद्यते अत एव गुणाश्रे।
योऽयमिति परे वदंति अयुतसिद्धावयवविशेषानुगतऽस्युक्तेर्वनादीनां नातिरिक्तद्रव्यत्वं निरंतरावयवत्त्व
रूपयुतसिद्धत्वाभावात् विजातीयावयवविभाग एव नत्वाश्रकः न्यूयोवयवावत्वे भवन्तः संयोगश्चतत्त्व
स्य हेत्वकारणं तद्दिति शिक्षोवयवी चक्षुनोपलभ्यते गावः समुदायस्यलएव किंच तस्यातिरिक्तत्वे रूपगुरुत्वादेरै
गुणस्योपलंभापत्ति अवयविनो रूपराहित्ये प्रत्यक्षत्वापत्ति न च अंत्यावयवपरमाणूनामतींद्रियत्वेन त
त्समवेतगुणाप्रत्यक्षत्वापत्तिरिति वाच्यं रथांगानां प्रत्येकं कार्यासामर्थ्येपि वलक्षणसमुदायभावे का
र्यकरत्ववदुपपत्तेः एवं च यागोऽश्वः तत्समूहाभेदे तत्समूहाभेदे पि सिद्धएवेति भावे न गुणादीनां गो
राष्ट्रत्वाशंका लिंगसंख्याद्यन्वयापि सर्वनाम परामर्शयोग्यं द्रव्यमिति तुल्यशास्त्रव्यवहारोपयोगानिवो

यो०
५०

ध्वंगुलोनाममदइत्युत्तराग्रायस्तुगोशाष्टेनानुस्मृतत्वेनावयवानुगतसमूहेनैवतादात्म्यंनतुतदवयवैरपी॥
ति तत्रभेदःप्रतिभासमात्रकल्पितत्वेनध्वस्तोराहोःशिरइतिवत् अभेदस्तुव्यावहारिकइतिवाचस्पतिमिश्रा
अन्येतुनाविद्याव्यावहारिकोऽपिस्वर्णकुंडलंस्वर्णस्यकुंडलमितिचव्यवहारात् एतद्व्यवहारान्यथानुपपत्त्यैवता॥
योःक्वचिदविरोधस्याभ्युपगमात् अन्यथानुपपत्तिश्चेदृशीवस्तुप्रसाधिकापिनष्टिदृष्टिवैमत्यंसर्ववाल्पा
धिक्येतिश्रीहर्षोक्तिः किंचस्वर्णत्वरूपेणाभेदस्यकुंडलत्वरूपेणभेदस्यास्थितिरित्यविरोधः सामानाधिक
रण्यंचैकार्थबोधकत्वमेव स्वर्णत्वादिप्रकारविशेषानपेक्षोऽभेदस्तुतेनविरुद्धः प्रतिभासकल्पितत्वेपि
याव्यवहारंब्रह्मज्ञानतःप्राक्शुक्तिरजतवद्व्यवहारानपगमेनव्यर्थपरिश्रमत्वात् राहोःशिरइत्या॥
त्रानेकावस्थायुक्तशिरसोऽवयवत्वेनतत्रापिव्यावहारिकभेदएव वस्तुतस्तत्रविकल्पात्मकमेवज्ञानंशा॥
ब्दज्ञानानुपातीवस्तुशून्योविकल्पइतिवल्लक्षणंपतंजल्युक्तं शाब्दज्ञानजन्योविकल्पइतितदर्थः किंच
शाब्दप्रयोगंतंअन्यज्ञानंवानुपततिजन्यकोवाह्यवस्तुशून्योवृत्तिविशेषोवाधावाह्यकालाविशेषेणसदै
वजायमानोविकल्पइत्यर्थः अनेवकुःशाब्दप्रयोगजनकमानसज्ञानस्यापिविकल्पत्वमुक्तं विपर्यये
तुवाधोत्तरंशाब्दप्रत्यययोरभावान्नतेनगतार्थता हरिणाप्युक्तं असंतामस्मतिपिहार्थज्ञानंशाब्दःकरो
तिहीतिअसंतेत्यस्यवहिरित्यादिज्ञानमवष्टंनशाब्दःस्यप्रयोगंकरोतीति अपितदर्थः अतएवपुरुषस्यचै ५०

चैतन्यमिति तदुदाहरणं पातंजलभाष्ये दृष्टं नहि तस्मादस्य कश्चिद्विशेषः अपदेशिवदिस्समायमर्थः मुख्य
व्यवहारविषये यथा श्राद्धीयं कार्यं तथा मुख्यसंबंधाद्यभावेपि कार्यमिति स्वर्णकुंडलस्य तद्देशकालैक्येपि
नृताधिकमूल्यदर्शने न व्यावहारिकत्वे दोषवद्रूपं स्वीकार्यः नहि प्रातिभासिकेऽपि तदुपपत्तिः शुक्तौ प्रति।
भासिकरजतत्वे सर्वथामूल्याभावात् रस्यापि कश्चिन्नु राहोः शिर इत्यादौ अवस्थाकल्पितावयवावयविभा
व इति नयुक्तं बौद्धानामनेकावस्थाविशिष्टस्य तत्त्वेन राहुपदादवबोधात् अत एव यायेसादाविकारस्य प्रथ।
मावयवत्वं कथमिति साशंक्य लोकविज्ञानासिद्धमित्युक्तं भाष्ये लोकवदेशास्त्रेऽविचारितरमणीयो व्यवहार
इति तदाशय इत्याहु केचित्तु तदभिन्नाभिन्नस्य तदभिन्नत्वमित्याशयेन शंका अयं च न्यायो मूलकारणो
पादानककार्योपादानके कार्ये मूलकारणोपादानकत्वस्यापि व्यवहारेण सिद्धः यथा तन्मात्राद्युपादान।
केपि प्रकृत्याद्युपादानकत्वं गुणानाममस इत्युनराशयस्तु यः अस्याभिन्नत्वस्तु धारकः स्वस्वरूपानुगमस्तद्विषय
एवोक्तन्यायः स्वर्गनरकयोस्तु नैवं यदंतःकरणावयवपरिणामः सुखं तदतिरिक्तावयवपरिणाम एव दुः।
खमित्यंगीकारात् येनोच्चारितेन सास्नाखुरककुद्विषाणिनां संप्रत्ययो भवति स शब्द इति भाष्यं शब्दा।
स्तु यथा चिज्जडयोरुत्पादात्स्वरूपनाशोपि चित एव नाशकत्वं जडस्याविनाशत्वमेव स्वभावात् तथा स्वभा
ववादेव शब्दस्य नाशकत्वं अर्थस्यावनाश्यत्वे तिवदंति तस्मादुध्यवाच्छिन्नाकाशधर्मो विभान्तरः स्फोटोर्थे

मं॰ जू॰ ४१ श्चबोध एव ज्ञानादिविषयः शक्तिग्रहविषयश्च ज्ञानं च वृत्तिरूपबुद्धिधर्म एवेति एकदेशस्थत्वात् तेषामितरे
तराध्यासः शब्दार्थप्रत्ययानामितरेतराध्यासात्संकरस्संयमात्सर्वभूतरुतज्ञानमिति योगसूत्रोक्तेरुपप
त्तेः स चानादिवासनावशादिनादिरेव एवं शब्दार्थधर्मयोरिति न कुतकावसरः अत एव निकारोग्रेपश्चाद्
न महहनोमदिनिधनं रामेति च्छत्तरं नाम मानसंगः पिनाकिनः गर्वसंगो नागीवस्य शौर्यसंगश्च वालिनः
हिरण्यपूर्वं कशिपुं प्रचक्षते ऽस्मादिसंगच्छते अंते हिरण्यकशिपुनामानमिति प्रतीतेरनुभवसिद्धत्वात् अत ए
कथितयद्वत्त्वं दोषो पि कश्चिन्न दोषः उदेति सविता ताम्रस्ताम्र एवास्तमेति च संपत्तौ च विपत्तौ च महतामेक
रूपते स्यत्र ताम्रपदं विना न तादृशो बोधः पदप्रकाशत्वबोधानुप्रतिप्रकाशकृतः तदुक्तं हरिणा यायदंतः श
ब्दतत्त्वं तु नादैरेकं प्रकाशितं तदाहुरपरे शब्दं तस्य वाक्ये तथैकता अर्थभागेस्तथा तेषां मान्तरोर्थः प्रकाश्य
ते इति एकस्यैवात्मनो भेदौ शब्दार्थावपृथक्स्थिताविति च अंतस्थ्यथास्थितावपि बहिर्भेदेन नाशिते तस्यै
व शक्तिभेदात् अक्रमे तस्मिन् क्रमभासोपि तच्छक्तिवशात् देवेसपि तत्रैव स्पष्टं किं च बौद्धपदार्थानगीका
रे सर्वेषां तु स नामानि कर्माणि पृथक् पृथक् वेदशब्देभ्य एवादौ पृथक्संस्थाश्च निर्ममे इति स्मृते सम
रिति मा हरत समरूमिमसृजे तिश्रुतेश्च सृष्टेः प्राक् तु शब्दादिस्मरणदर्थज्ञानपूर्वकं सृष्टिरिति लाभेन तदा
वात्पत्रबोधाभावात् न शब्दस्य शक्तिग्रहपूर्वकं कस्यापि स्वबोधः स्यात् न च जातेति सत्त्वात् शक्तिग्रह इति ४१

वाच्यं अद्वैति नाजातेरप्यनित्यत्वात्तस्यापि केनचिद्भेदकत्वाद्दृष्टे नैव ज्ञानस्वरूपं ब्रह्मणो निर्मलेन त्राणस्याएवउरव
स्यायाः सत्तायां तु निराश्रयजातिसत्वे भानाभाववत्तत्तच्छक्त्यवच्छिन्नब्रह्मसत्तायाजातित्वेपि अवच्छेदकाभावात्
तस्मात्सदा जातित्वाभावात् तस्मात्सर्वज्ञत्वात् गवदनुग्रहाच्च वेदलाभवत् तद्देवरवबुद्धिवर्त्तिपदार्थस्य स्फू
रूपेण भानं तत्र संबंधग्रहीबोधश्च हिरण्यगर्भस्य । इति बोध्यं सर्वायं स्फोटश्चानन्तरप्रणवरूप एव उंकारएव सर्ववा
क्सैवास्य त्रैविध्यानित्यत्वमानावच्छीनानारूपाः भवतीति श्रुतेः वर्णवाक्यपदादिरूपाणां नानारूपा घटपदा
दिरूपाश्च अकारएवेति श्रुतं तत्रैवापवर्गस्त्रापि अवयवधारात्प्रणवोपलक्षणत्वं शब्दब्रह्मस्कंधे भागवते प्रणवस्या
स्फोटत्वं स्फुटमेवोक्तं तत्र हि समाहितात्मनो ब्रह्मन् ब्रह्मणः परमेष्ठिनः हृदाकाशादभून्नादोवृत्तिरोधाद्विभाव्य
ते हृताकाशादित्यर्थः यः कर्णपुटपिधानेन श्रोत्रवृत्तिनिरोधात्स्मात्निरपि विभाव्यते श्रूयते ततोऽभूत्त्रिवृदों
कारो योऽव्यक्तप्रभवः स्वराट् यल्लिङ्गं भगवतो ब्रह्मणः परमात्मनः त्रिवृत् त्रिमात्रः अव्यक्तः ईश्वरः प्रभवो य
स्य सः अतएव वा हृद्भगवतो लिङ्ग गमकः एकासौ परमात्मा तत्राह शृणोतीय इमं स्फोटं सुप्ते श्रोत्रे च शून्यदृक
येन वाक् व्यज्यते यस्य अभिव्यक्तिराकाश आत्मनः सुप्ते श्रोत्रे कर्णपिधानादिना ऽवृत्तिके इमं प्रणवरूपं स्फोटं स्थू
लरूपेणावर्णेन तमपि यः शृणोति स परमात्मा जीवस्य कारणाधीनज्ञानत्वात् करणस्य चावृत्तिकत्वात् न तदा श्रो
तृत्वं ईश्वरस्तु यतः अस्मोपीन्द्रियवर्गैः कृतज्ञानं यस्य नादपादि इति श्रोत्रैव जीवस्य तदुपलब्धिस्तु ईश्वरद्वारिकैव

यथानिद्राकाले लीनेंद्रियमपि जीवं परमात्मैव ज्ञाष्ठं कृत्वा प्रबोधयति तद्वनूयेन प्रणवेन वाकुरूर हतीअस्मतेयस्य च
हृदयाकाशे आत्मनः सकाशाद्यक्तिः स्वधाम्नो ब्रह्मणः साक्षाद्वाचकः परमात्मनः स सर्वमंत्रोपनिषद्वेद वीजं
सनातनः ४ स्वधाम्नः स्वकारणस्य किं वलनदंश्चानूतमममत्त देवतावाचकोपीत्याह स प्रणवः सर्वमंत्राणां उपनिष
द्रहस्यं मह स्त्रं रूपं पतो वेद् कारणं तत्कारणत्वेपि निर्विकारित्वं यतः सनातनं सदैवरूपं ध तस्य ह्यासन्त्रयो वर्णाकार।
द्याख्यः गूहह धार्यंते यैस्त्रयो नावा गुणनामार्थवृत्तयः अकाराद्यं अकारोकारमकाराः तस्य सवयवावयविनामेषष्ठी
येकाराद्यैस्त्रयस्त्रि संख्यागुणा नावाधार्यंते तत्कारणत्वात् गुणास्सत्वरजस्तमांसि नामानि ऋग्यजुःसामलक्षणा
नि अर्थानूर्भुवःस्वर्लोकाः वृत्तयो जाग्रत्स्वप्नसुषुप्तयः अनेन तस्यैव सर्वप्रपंचकारणत्वमुक्तं ततोक्षरसमाम्नायम
सृजद्भगवानजः अंतस्थोष्मस्वरस्पर्शदीर्घह्रस्वादिलक्षणं ६ ननु आकारादिभ्यः अंतस्थादयो लक्षणं यस्य तं हृदये
नासौ चतुरो वेदान्नूचतुर्भिर्वदनैर्विभुः सव्याहृतिका ॥ नूसोंकारानूयान् तु होत्रे विवक्षया १ अस्मजदि स चतुषज्यते चत्वा
रो होतु पलक्षितानृत्विजः तु होतारस्तेरतुरेयं । होत्राध्वर्यवादिके कर्मचातुर्देत्रि तद्दिव क्षयेत्स्यर्थकमुक्तमि
ति निरुक्तं नाप्येवि उक्तरोस्यापद सत्वानावाशंको नरनूतं ख्यासिमत्वात्तु ज्ञाष्टस्येति प्रतिकमाद्दायोक्तमभिधानाभि
धेयरूपावृष्णि हृदयाकाशप्रतिष्ठितापरवोधनेत्रया पुरुषेणो दीर्घमालाकं टादिषु वर्णनावमापदवाह्याका
ज्ञस्यं ज्ञास्व स्वरूपं कृत्वाश्रोत्रद्वारेण तत्रस्थितां श्रोतुर्बुद्धिमनुप्रविश्य सर्वार्थसर्वाभिधानरूपां तद्बुद्धिं प्राप्तो

तिपुरुषपर्यन्तजावक्रोधान्तः परं न ज्ञप्तिनशब्दः स च तदनुरक्तो ऽर्थप्रत्ययं जनयतीति तत्प्रत्ययदत्वादिकं वक्रोद्भूतेध्वा
रोपयंति तत्र तनाशादिकं च तस्मिन्नुपलब्धवस्थस्यैवचार्यस्य प्रत्ययमादधातीति शब्दस्तेनैव तस्य संबंधादि सच शा
स्त्रैव स्तुत एकोपि नानावर्णसंस्कारैः प्रतिबिंबं तत्र तद्रूपो नानापदरूपतामिवापन्न इति सर्वपदरूपः सर्वार्थाभिधा
नशक्तिः सा शक्तिश्च योगप्रत्यक्षगम्या नास्मदादिज्ञानगम्या यदेवव्यवहारादिना तदनुज्ञानं तस्यैवास्माकं बोध इति
मर्यादा एवमेकैकवर्णोपि सहकारिवर्णांतरसंबंधात् अनंतपदरूपः इति सोपि तच्छक्तिरिति गकारौकारवि
सर्जनीया गो वाचकाः इति लोकस्यापि वाचितरमलीये तत्समूहे वाचकत्वग्रहस्तादृशस्यैव वचस्याद्धेणान्वाख्यानं
तदृष्ट्या बोध्यं तदुक्तं भाष्ये अथवा प्रतीतपदार्थको लोके ध्वनिः शब्द इति लोकेऽर्थबोधकत्वेन गृहीतो ध्वनिर्वी
णात्मकस्तत्समूहः शब्द इति तदर्थः अथ गौरित्यत्र कः शब्द इति प्रश्नेऽपि दर्शनान्तरस्य खंडेऽपि स्फोटो गकारादिव
स्यान्योभिन्नो ऽभिन्नश्च चरमावस्थाविसर्जनीयादिरूपया पदादिरूपेणाभिव्यज्यते इति वर्णेषु तत्त्वव्यवहारो
पपत्तिर्लोकस्येति बोध्यं एवं सर्वपदेषु पदांतरसहकारेण नानावाक्यजनकशक्तिमत्त्वं तत्तद्वाक्यार्थबोधजन
नशक्तिमत्वं च यद्यपि परस्परानुस्यूतार्थपदसाय नाय शब्दप्रयोगः परस्य च प्रवृत्त्यादिविषय एव प्रायेणानुस्यू
त्सितः स च वाक्यार्थ एवेति सर्वशब्दानां स्वरा एव यत्रापि केवलं वृक्षः इति प्रयुज्यते तत्राप्याकांक्षानामयोदि
वसादस्ति च लतीतिविधेयं तेनावाइति पदांतराणां अध्याहारः क्रियाविशेषणानां पर्यनवधारणे प्रसक्तीस्याद्

हारः बुद्धिस्तु याथावोधविषयौद्धपदार्थेनायनि यारान् लोकेस्यर्थे विनाप्युद्धपदार्थानवगतेश्च एवं क्रियापदाति
मात्रप्रयोगे सर्वकारकाद्यध्याहारः चैत्रोग्निनातंडुलान्पचतीत्यादि प्रयोगस्तु कारकांतरनिवृत्यर्थः क्रियांतरनिवृत्त्य
र्थो नियमायेतिस्पष्टमथवल्लत्रेनाष्ये तथापि ग्रन्थारम्भानलाघवायपदानि नत्रप्रकृतिप्रयत्नागास्तत्तदर्थे विनागा
श्रकल्प्यंते तद्द्वारा पदार्थवोधनं वाक्यार्थवोधनंच प्रयोजनफलं केवलशद्धेषु तु वर्णस्फोटाद्यादिस्यादिनावयवकल्पनं।
स्पष्टं चेदं निरुक्तेयत्र तु वाकास्ये बुद्धा सेण संस्कारस्तत्रैव पदार्थस्यदार्थः वोधः यथाब्रह्मत्संतद्गस्यादौ अत एव तुःसां
स्यसूत्रे नाष्ये धुडादयस्वोत एवकिंनक्रियं तेऽस्मात्पूर्वांकस्तेषु त्वापादनेन समाहितं अन्यथा तकारविशिष्ट
स्यसदाद्यर्थे वोधकत्वायपराद्वित्वमेवाव्रूपकमिति तिन्हिचारासंगति निर्दलत्वात् ममतु वाक्यार्थवोधेनेदा
नावात् न दोषः एतेनपदास्पदार्थे ज्ञानपूर्वकएव वाक्यार्थवोधऽस्यपास्तं वस्तुतः सर्ववाक्यमखंडमेव यदास्यसस 1
न्येवपदास्यदार्थवोधऽस्यंगांकारे चैत्रादिपदानां सकलक्रियासाधारणे र्थे गृहीतशक्तिकानां तत्तदर्थोन्वितवि
शेषवोधायलक्षणाप्रत्तौ शक्त्या वोधकत्वभंगः सामान्यरूपेण विशेषवोधेपि लक्षणेतिस्पष्टं काव्यप्रकाशे किंच
पदानां सत्त्वे राजा राजानं राज्ञा राजानीत्यादौ राजरूपार्थप्रत्यायकस्यानियतत्वं नस्मात् सत्त्वस्यानियतत्वात्
हे राजपुरुषे सत्रराजेति क्रियापदापदार्थप्रतीत्यापत्तेश्च अत एव नाष्येन लक्षणेन पदकाराभुवत्याद्याद्दिना
शितः कर्त्तैस्यादौ पदानामसत्त्वं दर्शितं तं सत्त्वे तु लक्षणेन तदनुवर्त्तनासंगतिः पदप्रवृत्तिः संहितेत्यत्र तु

षष्ठीसमासः तथा च तैर्वैकैष्पटः संहिते वा पौरुषेयी पदानि पौरुषेयाणीति किंच तेषां समस्तत्वे ऽश्वकर्णादिवच्चा
द्यर्थप्रतीत्यापत्तिः इदंशैदं इत्यौगिकमिदं योगरूढमित्याद्यपि शास्त्रकृत्कस्यनैव विशिष्टार्थबोधार्था बुद्धचत्तस्मि
न्नुप्रयोजनसंपन्ने रूपायपरित्यागः अत एव व्याकरणे देवनोपायाः अनियताः तदुक्तं उपादाया पि ये हेयास्तानुपाय।
न्प्रचक्षते उपायांश्च नियमो नावश्यमवतिष्ठते इति ननु पदानाम सत्यत्वे श्रुतिनिर्धुच्छेदः तथा हि व्रीहिभिर्यजेते त्यादौ
यागेन समकल्पद्रव्यात्वे पे व्रीहिश्रुतिर्नियमार्था व्रीहिभिरेव नान्यैरिति तत्र व्रीह्यभावे निसकर्मणः प्रारब्धकाम्यस्य
चलोपोमाभूदिति प्रतिनिधिरुपादीयते तत्र व्रीहित्वस्य शक्युपलक्षणत्वात्प्रतिनिधेरपि स्योतत्वमित्यत्र निरूप
यिष्यामात्र प्रतिनिधुपादानेपि तद्वाक्या खंडार्थस्यानुष्ठानान्निस्यादेर्विलयः नीवारकणकंक्रियायाःअ।
न्यत्वात् एवं च क्रिया न प्रतिनिधीयते द्रव्यं तु प्रतिनिधीयते एवेति न्यायोच्छेदः किंच वनामिकआनीयतामित्युक्ते
कः पिकइति प्रश्नानुपपत्तिः अपि च श्वेतं छागमालभेत इत्यादौ क्रियायाश्छागः द्रव्येण श्रौतः संबंधः द्वितीयाश्रु
त्या साक्षात्प्रापितत्वात् श्वेतगुणस्य तु तत्सामानाधिकरण्यद्वाक्यीयः निर्गुणद्रव्यस्य निरधिकरणगुणस्य चाभा
वात् तस्यच्छागेन संबंधः श्वेतमेव क्रियया संबंधात् तत्र श्रुतिप्रापितद्रव्यात् वाक्यप्राप्तगुणस्य दुर्बलत्वात् श्वे
तच्छागाभावे न्यवर्णच्छाग आलभ्यते न तु श्वेतगुणयुक्तो मेषः श्रुतिबाधापत्तेरिति सिद्धांतः अखंडार्थत्वे सर्वस्ये
करूपत्वात्केन कस्य बाधः अपि च पदार्थनिबंधः नवार्क्य सकलमीमांसान्याया सिद्धिरिति चेन्न अखंडादेवा।

मं.जू.
४४

वाक्यात्तदर्थाच्चकल्पनया शास्त्रे पदपदार्थयोरुद्धारेणान्तमासाद्य सकलेष्टसिद्धिः एवं च कल्पितपदपदार्थौ अथैमीमां
सान्यायैस्तादृशाखंडार्थबोधनं किं च पदैः पदार्थबोधे हरेरध्यायेन स्मादौ संहितया पदस्वरूपनाशादर्थबोधनापत्तिः
किं च राजपुरुषादौ पृथगुपस्थित्यसत्पृथगुपस्थिती विरुद्धे आपद्येतां पदानां पृथगुपस्थापकत्वस्याभावत्वात् वृत्तेस्तद्वि
परीतत्वात् वृत्तौ जहत्स्वार्थत्वादिविकल्पापि वाक्यादेव वृत्तिनिष्पत्तिरितिमन्यमानानवबुधान्प्रतिकल्पनैव एवमुक्त
पदार्थबाधान्याद्यपि स्वेतौ धावतीत्यादावखंडमेव वाक्यं तंत्रेणोन्नयार्थबोधकं एवं च सकलशास्त्रव्यवहारस्तद्व
सारिलोकव्यवहारश्च वाक्यद्वारा प्रयत्नेवबोधः प्रकृतिप्रत्ययविभागोप्येवमेव तदुक्तं धात्वादीनां विशुद्धानां लौ
किकोर्थो न विद्यते कल्पितानामर्थश्च केवलानामलौकिकः प्राग्विभक्तेस्तदं तस्य तथैवानविद्य इति अतए
व प्रकृतिप्रत्ययोरन्यार्थं क्वचिदन्यतर एवाभिधत्ते यथेयानिति अहनिच्च तथा क्वचित्प्रत्ययद्वयेन कर्त्राद्यर्थबोधो
यथा पचतीति क्वचिदेकेनैव यथाऽत्तीति किं चैकस्मिंश्च प्रक्रियाकरणप्रत्ययार्थत्वे नोक्तास्तेन्यप्रकृत्यर्थत्वे नो।
क्तास्तस्मात्पदपदार्थाद्यसत्यमेव तदुक्तं शास्त्रेषु प्रक्रियाभेदैरविद्यैवोपवर्ण्यते उपायाः शिक्षमाणानां बालाना
मुपलालनाः असत्ये वर्त्मनि स्थित्वा ततः सत्यं समीहते इति अनादिमिथ्याभूतशास्त्राभ्यासानुसारेणैव शास्त्र
स्कन्ने लोके नार्थप्रत्यायकत्वग्राह्यते केनचित् यथा घटादिकं परित्यिल्लं दृष्ट्वा सर्वोपि विभ्रमप्रपंचः ररमारं तदुक्तिः
किं च तत्वं या समस्तः अन्योगच्छति अजापयः शान्तनुअजापयः पिवेत्यादौ नामाख्यातमाकृपे वाक्यार्थादेवप्रथा। ४४

स्यद्वपदार्थो निर्णय इत्यखंडमेव वाक्यं बोधकमखंडार्थस्येत्युचितं तदुक्तं यथैवानर्थकैर्वर्णैर्विशिष्टार्थोभिधीयते
पदैरनर्थकैरेवं विशिष्टोर्थोभिधीयते नहि किंचित्पदं नाम रूपेण नियतं क्वचित् पदानामर्थरूपं च वाक्यादेवतु जा
यते इति वाक्योऽखंडत्वं चात्र पृथगुपस्थितिजनकत्वं अपृथगुपस्थितिविषयत्वं चार्थेऽखंडत्वं पदानां केवलानां पृ
थगुपस्थापकत्वं वृत्तिघटकानामपृथगुपस्थापकत्वमिति तु शास्त्रकल्पनैव यदि विकेवलं पदमसदित्यादिश्रु
त्यलेतत्पूर्वं ततोस्ति क्रियाघटितार्थबोधकमिति तदपि वाक्यमेव साधनस्य साध्यक्रियाकांक्षत्वात् साध्यक्रिया
याश्च साधनाकांक्षत्वात् एवमर्थेपि येवादिनां नानापत्ता स्तेपि तत्तच्छास्त्रवासनावशात्कल्पिता एव यथाभिहि
तान्वयोभिमन्निधानमिति संसर्गो वाक्यार्थः प्रसृष्टाः पदार्था इति जातिः पदार्थो व्यक्तिर्वेत्यादि अत एव घट इ
ति प्रयुक्ते वैशेषिको तिरिक्तमवयविनं बुध्यते सांख्यो गुणसमूहं बौद्धादिः परमाणुसमूहं यद्यपि रूक्षीणां दर्शनं
न तद्विषयं भवति तथापि न तत्पूर्ते न वस्तुना व्यवहारासंभवात् व्यवहारकाले तेपि अदृष्टतत्त्वसदृशा नानाप्रकारं
व्यवहरंतीति न तद्वच्च सापि पदार्थमसत्यमंतत्वं अत्र वाक्यार्थस्यापेक्षिकं सत्यत्वं दृष्टं सर्वव्यवहारस्यास्य विषय
त्वात् वाक्यार्थश्च प्रतिभामात्रविषयः प्रतिभा च जन्मांतरसंस्कारजापि यथा मधोपि कस्य पंचमस्वराविरावबोध
जन्मांतरसंस्कारः अत एव वक्तृज्ञानमागमस्तीत्यादितोपि सा प्रतिभाविषयत्वाच्च प्रतिभा वाक्यार्थ इति व्यवहार
इत्सलं ननु परपदार्थकल्पनायामपि देवदत्त गाममभ्याज शुक्लां दंडेनेत्यादौ क्रियाकारकभावसंबंधस्य विभक्तौ वो

कृत्वेनकोवार्थः संबंधसंबंधस्तु नानेनमानमनवस्था चेचिन्नपदार्थानां परस्परविशेष्यविशेषणभावरूपान्व
यस्य वाक्यार्थत्वात् ननु यद्यपि विभक्तिप्रकृत्यर्थगतविशेषणत्वमपि विभक्तिशक्यमेव तथापि विशेष्यनिष्ठमितर
पदार्थनिष्ठविशेषणतानिरूपितविशेष्यत्वं वाक्यशक्यमिति बोध्यं तच्चोपपादयिष्यते ननु क्लृप्तान्वयरूपवाक्यार्थ
स्यैतन्नघटकपदानुपस्थितत्वेनाशब्दत्वात् तत्र शक्तिग्रहासंभवः तथोपस्थिततद्विषयकशक्तिग्रहे च तस्याशब्दत्वा
हानिरितिचेन्न वृद्धव्यवहारदर्शनसहकृतमनसोपस्थितविशिष्टे तद्ग्रहसंभवात् क्वचिदुपदेशेन तद्ग्रहसंभवाच्च क्व
चिदाकांक्षावशात्तदेव तत्र शक्तिग्रहो बोधस्य पश्चात्त्वात्तत्कल्पितान्वयव्यतिरेकाभ्यां जन्यपदार्थे तस्य दृशक्तौव्य
वस्थितायामर्थाद्वाक्ये उक्तान्वयविषयाशक्तिरवतिष्ठते सर्वथाऽज्ञातस्य संबंधस्य नानत्वं तु न च विरुद्धं इदं वार्थ
वत्सूत्रे भाष्ये स्पष्टं तथा प्रातिपदिकार्थसूत्रे षष्ठी शेषे इति सूत्रे च भाष्ये तत्र हि वीरः पुरुष इत्यादौ विशेषणविशेष्या
भावरूपं पदाधिक्यमवाक्यार्थ इत्युक्तं तत्राधिक्यमिति स्वार्थेष्यन् तत्र नाम्नां प्रवृत्तिनिमित्तं तदुक्तं वाक्यरूपस्य
वाक्यार्थे वृत्तिरिष्यतां पेत्तये इति नन्वाकांक्षादिसहकारेण पदैरेवोक्तसंसर्गस्याविना नोपपत्तौ तत्र वाक्यस्य शक्तिक
ल्पने मानाभावो गौरवं चाकांक्षा च वक्तव्य ते इति चेन्न तत्तत्समभिव्याहारेऽर्थासंबद्धे बोधजनकत्वानुपपत्त्या सं
बंधावरूपकत्वात् पदेषु तत्तदर्थसंबंधवत् तदुक्तं नदृपादैः नविमुंचंति सामर्थ्यं वाक्यार्थेपि पदानि नः वाक्या
र्थोलक्ष्यमाणे हि सर्वं त्रैवचइत्यपते इति हि पतः सर्वत्रैव एकपदप्रयोगे प्रविशांपिंडीमित्यादौ एतदर्थस्यायेव स्यते ।

एवंच वाक्यार्थत्वं स्पष्टमेवोक्तं तत्र प्रथमे कं पदस्य सामर्थ्यमिति न युक्तं विनिगमनाविरहात् पदानां तद्विषयसामर्थ्या।
स्यागे युक्तत्वं तदप्युक्तं तैः साहाय्यमपि कुर्वंतीति पदार्थप्रतिपादनं वर्णानां यथा नैतस्मिन्नर्थेव इष्यंति निष्फलत्वे वाक्यार्थ
मित्तये तेषां प्रवृत्तानां तदीकं पाके ज्वालेव काष्ठानां पदार्थप्रतिपादनमिति एवंच पदतात्पर्यविषयता वाक्यसंबंधत्वं च स्प
ष्टमेव एवंच पदवृत्तिः केवलपदार्थबोधिका वाक्यवृत्तिस्तु विशिष्टार्थस्यैव बोधिकेति बोध्यं यत्तु पदैः पदार्थोपस्थितौ
पदार्थानां परस्पराकांक्षादिवशादन्वयबोधो न तु स वाक्यसंबंध वाक्यार्थ इत्यस्य च वाक्यप्रयोजन इमि समर्थ इति तन्न
अन्वयस्य शाब्दसंबंधत्वे तद्विषयकबोधस्य शाब्दयामीत्यनुव्यवसायानापत्तेः धूमपदोपस्थितधूमेन जातवन्हिव्याप्यनुमि
तेरपि शाब्दत्वापत्तेश्च किंच शाब्दानामर्थद्वारकसंबंधस्यैवांगीकारेण वाक्यानां वततद्भावात् परस्परमिमे वाक्ये संब
द्धे इत्यादिव्यवहारानापत्तिः न च प्रयोजनमत्तबोधविषयद्वारक एव तयोः संबंध इति बोध्यं इह शास्त्रापि संबंधत्वव्यव
हारप्रयोजकत्वे मधुरापाटलिपुत्रयोरपि संबंधत्वव्यवहारापत्तेः स्वसंयुक्तावयवकदेशसंबंधत्वादित्यलं यत्तु बोधनक
त्वानुपपत्त्या न संबंधकल्पना किंतु स्मृतिरूपपदार्थोपस्थित्यनुपपत्त्या सा ह्येकसंबंधिज्ञानादपरसंबंधिस्मर।
ण विधयेति तत्कल्पना बालोपि वाक्यार्थज्ञानकरणत्वेन पदार्थस्मृतिं कल्पयित्वा तदनुपपत्त्या एव शक्तिं कल्पय
तीति तन्न पदार्थस्मृत्यनुपपत्त्या कल्प्यमानशक्तेः पदेष्वेव कल्पनौचित्येन प्राथमिकशक्तिग्रहस्यैव पदविषय
त्वसिद्धावन्वयव्यतिरेकाभ्यां पश्चात्तत्तत्पदशक्तिग्रह इति सर्वतंत्रसिद्धांतविलयापत्तेः किंचैवमितरान्विते शक्ति

मंजू० ५६

रित्यादिप्रज्ञानां विलय एव किंच पदार्थोपस्थितेर्न स्मृतित्वं तत्ताया अज्ञानात् तच्च सर्वानुभूतमेव अत एवानुभव
विषयासंप्रमोषः स्मृतिरिति पातंजलिसूत्रं अनुभवस्य यौ विषयौ वृत्तितदारूढविषयरूपौ तयोरसंप्रमोषोऽनप
हरणं यत्र वृत्तिस्मृतिरित्यर्थः तदुक्तं पातंजलिभाष्ये वृत्तिर्ग्राह्यविषयं ज्ञानं ग्राह्यविषयग्रहणवृत्त्युभयाकारप्रति
निवं चैतत्स्वरूपं स्वविंग्राह्ये तज्जातीयमेव संस्कारमारभते तस्य च संस्कारस्याभिव्यंजककालाद्युद्बुद्धस्य समान
कारग्राह्यग्रहणोभयविषयकस्मृतिजनकत्वमिति अनुभवसंस्कारस्मृतीनां समानाकारत्वेनैव कार्यकारण
भावात् एवमेव युक्तं न च तत्तांशे उद्बोधकासमवधानात् तदनानंदत्वपत्तेर्हि समूहालंबनात्मकनानापदार्थानुभवे
ऽपि कस्यचिदेव स्मरणमिति वाच्यं तद्विषयऽज्ञोद्बोधकस्यैव नियमेन तद्विषयकज्ञानांशोद्बोधकत्वेन तदंशे प्रमोषा
संभवात् किंतु ग्राह्यांश एव सः तत्तद्देशकालवृत्तित्वरूपतत्तायास्तु न ज्ञानं स्मृतावुचितं कालादेरननुभवेऽज्ञा
नात् न च दोषवशात्तत्प्रमोषः नियमतस्तादृशदोषकल्पने गौरवात् क्वचित्तस्य भ्रमजनकदोषस्य तत्प्रमोषत्वे तु
विरहजनस्य रागांधस्य स्वयुवत्यादिदर्शने तज्जनत्वविशिष्टमिदं जलमिति तत्तांशोल्लेखि भ्रमानापत्तिर्दोष
स्य विद्यमानत्वात् किंच पदजन्यपदार्थज्ञाने उद्बुद्धशक्तिग्रहजसंस्कारस्य हेतुत्वं फलबलात् यथा तत्र वाक्यार्थबो
धजनकत्वग्रहजसंस्कारस्योद्बुद्धस्य वाक्यार्थबोधहेतुत्वं किंच पदार्थानुभवस्य शक्तिग्रहात्मकतत्तच्छक्तिविशेष
णतयैव तज्ज्ञानेन तद्विशेषणकस्मृतिरेवस्यात् न हि तद्विशेष्यिकात्वटत्रिमता किंपदार्थोपस्थितिर्निशाष्टेकार

रणं किं तु पदज्ञानोद्बुद्धः पदार्थविषयसंस्कार एव तत्र कारणं सन्न शक्तिविषयोपीत्यन्यत्र वाक्यशक्तिसत्त्वादेव समासग्रहणं
वाक्ये प्रातिपदिकसंज्ञातिव्याप्तिवारणार्थमिति भाष्यं संगच्छते तत्र केषांचित्तु विशिष्टैव तत्तद्वाक्यस्य तत्तद्वाक्यार्थे श
क्तिग्रहः अत एव समुदायतो विशिष्टबोधेपि घटादिविभागसामर्थ्याभावोप्यते तेषां एतेन विशिष्टशक्तिग्रहे यदशक्तिग्रा
हः कारणमित्यपास्तं कस्यचित्कारकत्वादिज्ञानं तत्कारकपदधातुघटितपादयोर्विशिष्टयोः कारकविशिष्टक्रियाशक्त
त्वमिति सामान्यत एव ततः पदविशेषसमभिव्याहारज्ञाने सति तात्पर्यवशात्तत्पदार्थविशेषविशिष्टक्रियाबोधः सामा
न्यशक्तिग्रहोपि तत्तत्पदार्थनिष्ठप्रकारतानिरूपिता तत्तत्संसर्गनिरूपिताया तत्तत्पदार्थनिष्ठविशेष्यतानदसर्थेस
मुदायः शक्त इत्येवं विशेषणविशेष्यभावापन्नेर्थे एवेति न विपरीतो विशेष्यविशेषणभावः यत्तु सर्वस्य सामान्यतः
शक्तिग्रह एव बोधक इति तन्न कारकधातुत्वाद्यज्ञाने तत्तथाशक्तिग्रहासंभवात् एतेन प्रातिपदिकार्थप्रकारक
शाब्दबोधे तदर्थकपदोत्तरसार्थकप्रत्ययतदर्थबोधकपदनिपातान्यतमजन्योपस्थितिर्हेतुरित्याद्यपास्तं कर्म
त्वं घट अमु घट इत्येतत्समभिव्याहारव्युत्पन्नानां तत्तथाबोधेव्यभिचाराच्च तत्र सत्याव्यवहितोत्तरोत्पत्तिकत्वस्य सा
माधिधिकरण्येनयसंबंधेन तद्युत्पत्तिविशिष्टबोधे तद्युत्पत्तिः कारणमिति न दोष इति वाच्यं अनंतकार्यकारण
भावापत्तेः यत्तु वाक्यशक्त्यंगीकारे पदार्थानामिव वाक्यार्थस्यापि स्मरणमेव स्यात् न त्वनुभवः संबंधज्ञानतयैव
पदज्ञानवत् तदुपयोगादिति तन्न पदार्थानामपि स्मरणाभावस्योपपादनात् किंच वाक्यार्थप्रतीतेर्नानुभवत्वं स्या

मं०सू० ४७

नेरकादिकं स्यादेवं तस्मादनुभवगामी सततिस्तस्मात्साक्षात्त्वं ज्ञानत्वव्याप्यजातिविशेष एव नानुभवत्वव्याप्यमिति स्पष्टं त
त्र संबंधस्य संबंधिद्वयनिरूपितत्वेनैव बोधो वाक्यतो न पृथक् तद्बोधः तदुक्तं हरिणा नाभिधानं स्वधर्मेण संबंधस्यास्ति
वाचकं अत्यंतपरतंत्रत्वात् षष्ठ्यो वास्य तु वाचिकेति षष्ठ्यो व संबंधस्य वाचिका न तु संबंधशब्दादीति तदर्थः अभिधा
नं पदसंबंधिनोः संघटनस्वभावत्वेन नित्यपरतंत्रत्वात् षष्ठीपदं विभक्तानां वाक्यस्योपलक्षणं पदानां तु पृथक्।
स्वार्थबोधकमपि यत्तु मीमांसकैकदेशिनः वाक्यार्थो वाक्यस्य लक्षणेति तन्न वाक्यबोध्यान्वयस्य संबंधरूपत्वेन।
तत्र वाक्यबोध्यसंबंधस्य पदार्थस्य वा संबंधग्रहाननुभवेन वाक्यबोध्यनिरूपितसंबंधमूलिकाया लक्षणाया तस्य।
असंभवात् अनुपपत्तिप्रतिसंधानं विनापि तद्बोधेन तदप्रसराच्च तत्र तात्पर्यविषयीभूतवाक्यार्थानुपपत्तिस्तद्बी
जं नियमतः पूर्वं तात्पर्यज्ञानस्यापि कल्पनापेक्षया शक्तिकल्पनस्यैवौचित्यात् न विमुंचति सामर्थ्यं वाक्यार्थेऽपि
यदानिमइति शब्दार्थोक्तेऽर्थे हेतुत्वेनोपन्यस्तायां वाक्यार्थो लक्ष्यमाणो हि सर्वत्रैवव दृश्यते इति भट्टकारिकायां ल
क्ष्यमाणोऽन्यस्य प्रतीयमानोऽस्यर्थः दृश्यतेऽन्यस्य प्रतीतविषयत्वेनानुभूयतेऽस्यर्थः सर्वत्रैव हि वाक्यार्थो लक्ष्य
एवेति च स्थितिरिति पाठे लक्ष्योऽन्यस्य प्रतीतविषयोऽस्यर्थः स्यान्नीति शेषः सर्वत्रैव वाक्यार्थः प्रतीयमानो लक्ष्य एवे
ति स्थितिर्वक्ष्यमाणरीत्या वाक्यैकदेशन्यायेनेत्यर्थः अतएव लपदप्रयोगेपीत्यर्थकं सर्वत्रैवेति सार्थकं स्याऊः
यत्तु पदानामेवान्विते शक्तिः पदैरेव नर्थप्रतीत्युपपत्तौ वाक्येपि शक्तिकल्पने मानाभावात् तदुक्तं एवं हि संबंध ४७

ग्रहणमयमर्थोनेनान्वितोनेनाकांक्षितसंनिहितयोगेतरान्वितः सन्निधीयतेइतिपदानांसामान्यतइतरान्वितेश
क्तावपिविशेषाविषयसामान्यबुद्धिजनकात्समभिव्याहारविशेषकारणत्वरूपाकांक्षाज्ञानबलात्तत्तत्पदार्थवि
शेषनिरूपितान्वयविशेषबोधसिद्धिः अतएवपदप्रयोगेऽन्वयविशेषजिज्ञासोपपत्तिः तस्याअन्वयसामान्यज्ञा
नपूर्वकत्वनियमात्विशेषतः पदार्थानिरघटितस्यतदन्वयविशेषरूपवाक्यार्थप्रागनुपस्थितावप्यन्वितत्वा
दिसामान्यधर्मप्रकारेणोपस्थितेशक्तिग्रहः सुलभः इतरान्वितेशक्तिरितितुनयुक्तं इतरस्यपदान्तरलभ्यत्वात्
पदान्तरसमभिव्याहारेएवतल्लब्धबोधइतिघटइत्येतन्मात्राल्लाभान्वयधीः ततोघटमात्रबोधस्तु शक्तिक्रमात्
विशिष्टविषयायाःशक्तेरन्यमात्रविषयत्वमपीतिचेन्न यथापदैकदेशस्यायेनविशिष्टेएकदेशेचपदानांशक्तिग्र
हइत्यदोदोषः एतेनकार्यान्वितेशक्तिः पदानामित्यपास्तं कार्यस्यापिलिङादिपदलभ्यत्वात् लिङादिसमभिव्या।
हारेएवतद्बोधानुभवात् आनयनाद्यर्थकपदसमभिव्याहारएवानयनादिबोधवदिति तत्र अन्वयेशक्तिस्वी
कारेपिविशेषबोधायसमभिव्याहारस्यतद्बोधकारणत्वस्वीकारेतथाकारणत्वग्रहवशतोबोधवारणायतद्
ग्रहस्यपिकारणत्वस्वीकारसमभिव्याहारेतदसंबद्धतद्बोधजनकत्वानुपपत्त्यासमभिव्याहारेपितत्संबंधांगीकारे
विपरीतगौरवापत्तेः अस्मन्मतेत्वन्यलभ्यतर्केणकार्यत्वाद्यंशस्यागवदेतस्यागस्याप्योचितत्वाच्च नचोपजीव्यविरो
ध उपजीव्यत्वेमानाभावात्दैवाधिप्रथमं तद्वृत्तं ननुपदशक्तिग्रहेतस्यहेतुत्वंमातापित्रादिभिश्चशंगेगोरित्या

सं॰जू॰ ४८ दिङ्नाश्चैवं शाब्दमिति मुखांगुलीदर्शनस्यैव कमुत्वायेमाणेषु बालस्याप्यशक्तिग्रहे व्यभिचारात् यत्तु अन्वयव्या
सिद्धतयोपजीव्यत्वं सिद्धं यथा यागस्य स्वर्गजनकतानिर्वाहायकल्पितेऽपूर्वे तत्रैव कारणमस्तु नयाग इति सं
कायां सद्रूपणं तत्रैवं वक्तुं तेन च प्राथमिकत्वेन बलवत्त्वात्तेन पश्चात्तनस्य बाधः यथा दर्पणे चैत्रमुखं नास्तीति श
वणस्यैवेत्यनैवचैत्रमुखसन्निधानं नरस्याविनो दर्पणे चैत्रमुखप्रत्यक्षस्य भ्रमत्वकल्पनमिति वाच्यं इदं रजतमिति
ग्रहस्य पश्चात्तने नेदं रजतमिति ग्रहेण बाधात् न च सर्वे प्रथमं प्रतीयमानत्वेन बलवत्त्वं सर्वेषां शरीरात्मप्रत्य
ये वेंद्रनारात्स्यत्वप्रत्यये च व्यभिचारात् अकैमात्रादिनर्दिष्टे चैवं शब्दो बालीयाद्यशक्तिग्रहे व्यभिचाराच्च तस्माल्लोके
प्रवृत्तिसंवादादिना च दैत्त स्थैर्यनिर्णायकन्यायेन यद्बलवत्तद्बाधकमितरद्बाध्यं इति व्यवस्थानत्र परेण शर्वस्य भ्रमा
त्वप्रत्यायनमेव बाधः शर्वेण तु परस्य सोपाधिकज्ञानस्थले भ्रमत्वप्रत्यायनं क्वचित्तस्य तु प्रतिबंधः यथा श्रौत
विनियोगेन लैंगिकस्य तस्य बाधः जिज्ञासापि फलविशेषदर्शिनः सविशेषजिज्ञासा वक्तुपपन्ना ननु तद्देवत
र्ह्यज्ञापिति ज्ञासा तियमो नस्यादिति चेश्चापत्तेः न चानयोः संसर्गविशेषज्ञानमेवेति तीक्ष्यां तादृशज्ञानधर्मिके ष्टा
साधनताज्ञानस्य हेतुत्वेन तद्घटकतया विशेषज्ञानस्यापि सिध्याजिज्ञासोच्छेद इति वाच्यं विशेषधर्मत्वेन ज्ञानेति
त्तद्रूपेण जिज्ञासोपपत्तेः किंच सिद्धिर्न स्वरूपतः प्रतिबंधिका किंतु सिद्धत्वप्रकारकज्ञानमेव तथा च अत एव तत्त्व
सिद्धावपि तत्सिद्धत्वज्ञाने नेछानिवृत्तिर्वस्तुतः पदज्ञानेनादृशजिज्ञासैव असिद्धाः किंत्वन्वयिजिज्ञासैवेत्युक्तं क्वचित्तु ४८

पदैरितरान्वितस्वार्थबोधनमस्त्येव यथा प्रविश पिण्डीमित्यादौ तथाहि यष्टीमादय इत्येकदेशाः पदस्यार्थे प्रयुज्यं
ते विशिष्टशक्तिग्रहकाले तु निष्कृष्टावयवानामपि तत्र शक्तिग्रहात् भीमसेनपदं स्थके प्रयुज्यमानं तदवयवपदं
व भीमसेने शक्तमिति शक्तिग्रहः न च सेनपदादपि तद्बोधापत्तिः तस्य दस्यतत्रार्थे शिष्टप्रयोगाभावेन शक्तिग्रहे त
द्विषयकत्वाच्छेषभ्रमप्रमाणाकल्पनेन ततो बोधानुदयात् अप्रामाण्यज्ञानानास्कन्दितशक्तिग्रहस्यैव बोधजनक
त्वात् शक्तिभ्रमाद्बोधो विभ्रमत्वेन ज्ञातादेव एवं वाक्यस्यापि तत्तत्पदार्थैर्लिङ्गितविशेष्यविशेषणभावशक्तिग्रा
हकाले तदवयवानां प्रविश पिण्डीमित्यादीनामपि तत्तद्वाक्यार्थे शक्तिग्रहे ण प्रविशेत्यादिपदादेव तत्तद्वाक्यार्थबो
धः अनेककारकाणां क्रियाणां च समन्वयेऽपि योग्यतावशात्तास्य यथेवशाब्दत्वं तदर्थबोधस्त्वेव तत्तत्पदाध्याहारवत् तदु
क्तं समर्थः पदविधिरित्यत्र भाष्ये निष्कौशाम्ब्यादौ क्रान्तादिपदाभावेनासामर्थ्यात्समासाभावमाशंक्य तदर्थगतेः सिद्धं सोऽर्थः स्मर
र्थः तद्गतेः यो र्थः कौशाम्ब्या समर्थः स निःसोऽयमते इति उक्ती स्याद्विशिष्टोऽर्थो निसोच्यते इति तदाशयः अत एव लुपि
युक्तवद्व्यक्तिवचने इति सूत्रे एकवचनाद्यवयववचनशब्दः पारिभाषिकस्तु क्तं तदुक्तं वाक्यं तदपि मन्यन्ते यस्य द्वंद्वचरितक्रियं आ
ख्यातशब्दे नियते साधनं यत्र गम्यते तदप्येकं समानार्थैर्वाक्यमित्यभिधीयते इति ग्राम प्रविश पिण्डी त्वये त्यादिनु श
ब्दं तदाल्पेव तान्यपि लौकिके प्रयोगे लाघवानादरात् प्रयुज्यन्त एव यन्नु पदापवेन पदस्मरणं एवं वाक्यैकदेशेनापि
वाक्यस्मरणमयमेवाध्याहार इति तन्न भीमादिपदात्तत्स्मरणानुनवान् किं चेवं मत्सुखार्ति तस्य पदस्य वृत्त्यार्थ

मं.दू.
४९

बोधकत्वाभावेनाप्रातिपदिकत्वात् उत्तरं किंतस्तु समस्यनापत्तिः किंचैकदेशोन विशिष्टसमरूपस्य संघातस्य कथं
स्मरणं सादृश्याभावात् स्मृतस्यानुच्चरितत्वेन ततो बोधानापत्तेश्च तदुक्तं एकदेशस्यविशिष्टत्वे संघाते जायते क-
थं कथं प्रतीयमानः स्यान्न दीर्घस्याभिधायक इति तदेव देवा नित्यस्मोस्तु मद इग्यणः संप्रसारणमिति सूत्रे भाष्ये दृश्य-
ते हि वाक्येषु वाक्यैकदेशान् प्रयुंजानाः पदेषु पदैकदेशान् अविश पिंडीं प्रविश तर्पणं देवदत्तो दत्तः सत्या भामा सत्य-
भामेति वाक्येषु स्यादेवाक्यार्थी बिस्मादिरर्थः न च पदैकदेशस्य तत्र सदृशार्थे लक्षणा बाधप्रतिसंधानाभावेऽपि स्य-
संबंधज्ञानाभावेऽपि बोधानुभावात् अणुदित्सूत्रे भाष्ये बोधयितृत्वस्यैव शब्दस्य प्रत्यायकत्वमुक्तं अन्यथा ज्ञानमात्रे
शब्दत्वाभावात् शब्दधारापत्तिः तत्र तन्निवृत्ते प्रतिबंधककल्पने गौरवं न लिपिस्मृतिशब्दार्थबोधानापत्तिरनुच्चारणा-
दिति वाच्यं तत्र चेष्टावल्लिपेरेवार्थबोधकत्वेनाङ्गतेः अतएव लिपौ शब्दत्वभ्रमो बालानां न तु शक्तिग्रहस्य शब्दसा-
केतग्रहाधीनत्वस्य न तु लिपौ शब्दत्वभ्रमवतां तत्स्मरणानुपयोगात् च अतएव लिपावयं ककार इत्यादिव्यवहारः
पंडितानां लिपौ शब्दत्वबाधज्ञानवतामपि भ्रमनादिमिथ्यारोपात् अतःकरणाद्यावात्मप्रत्यये भ्रमत्वज्ञानवतां पंडिता-
नां व्यवहारनिर्वाहस्यैवमेवोपपाद्यत्वात् यद्वा तत्रापि सूक्ष्मतरतात्वोष्ठपुटव्यापारात् सूक्ष्मतरमुच्चारणमस्त्येव
मानसजपस्थले इव निरूपितं चैतत् प्राक् तस्मात् उच्चरिताज्ञानं शब्दबोधकारणं अतएव नान्यस्मिन्नुच्चारिते शब्दे उच्चारि-
ते तत्राप्यशब्दत्वभ्रमदशायां तदर्थबोधानुभव उच्चारितः शब्दः स्पष्टोच्चारितत्वेन गृहीतः समर्थो बोधः एते ४९

प्रविश्य पिंडीमित्यादौ कारकक्रियाशब्दमनुमाय ततो बोध इति परास्तं किंच किंशब्देन शब्दस्यैवास्यात्तेप उतार्थेना
नायं स्वार्थप्रतिपादनसमर्थेण तेनास्यानाक्षेपात् नांशः तस्यार्थस्य शब्दांतरेण संबंधाभावात् एतेन शब्देनार्थाक्षेपा
इत्यपास्तं अस्य शब्दस्य शब्दांतरार्थेन संबंधाभावात् यथा च कथंचित् परंपरासंबंधसत्त्वेपि तस्य नानुमितिप्रयोजक
त्वं लक्षणाप्रयोजकत्वाभाववत् अर्थेनार्थानुमानेपि तस्य शब्दत्वं न स्यात् तस्मादर्थेनार्थांतरस्यैतद्व्याप्यत्वानुमा
नमेवोचितं नच पिंडीमित्यत्र नाम सिद्धार्थकं कथं साध्यक्रियाबोधकमिति वाच्यं नाम सरूपं निजमेवेदमिति सदो
षात् नामसारूप्यादेव द्वितीयादि न तावद्व्यहारः न चाख्यातलक्षणस्यात्रातिव्याप्तिः शास्त्रे बोधितक्रियार्थकघटितत्वे
सतीति विशेषणदानेनादोषात् पिंडीमित्यादेरनेकार्थत्वेपि प्रकरणान्निर्णयः पदानामानर्थक्येपि क्रियाप्रधान
माख्यातं सत्त्वप्रधानानि नामानि चत्वारि पदजातानि इत्यादि शास्त्रकृतं कस्य नामात्वमेव यथा ऽसमसेनापर्थेनमरी
चिकाजले नेदं जलमानयेत्यादिव्यवहारो लोकानां दृश्यते तद्वत्सर्वत्रापि यदेऽर्थव्यवहार इति स्पष्टं न लोके प्रतिवि
त्रणामर्थयोग्यान् प्रसिद्धय इत्यादिनाहरिग्रंथे प्रसिद्धयः शास्त्र इति शेषः एतेनोच्चारितं पदमनुकार्यान्वयित्वे तस्या
र्थबोधे छायाबकुच्चारितमिति तात्पर्यं गृहे कस्यचित्स्यदाध्याहारेण कस्यचिदर्थाध्याहारेण बोध इति यथा तुभवंत्य
वस्था शब्दं विनापि गुडादिशब्दैर्माधुर्यादिरूपस्यार्थस्याप्ति निकोचादिना चार्थबोधस्य दर्शनादिति स्पष्टमन्नेन
भंजनमिति सत्त्वेनाख्येयस्यापि तत्तत्पदविशिष्टस्याध्याहारः एतेनार्थाध्याहारे चैत्रगोदनमित्यत्र तृतीयापत्तिः

मं०न्०
५०
प्रत्यप्रत्ययेन कर्त्तुरभिधानात् शाब्दानुविद्धं सर्वं ज्ञानमिति नियमभंगश्चेन्निपरास्तं अनभिहित इत्यत्र कर्त्तरीशवनभिहि
तत्वस्य समभिव्याहृतेन पदेन समभिव्याहृतिज्ञानविषयीभूतार्थविशेषणीभूतपदे न वाभिधानयोग्यत्वाभावरू
पस्य विवक्षणेनादोषात् उपस्थितपदार्थस्य तदर्थबोधनांगीकारेणार्थाध्याहारस्य व्यवहारो बोध्यः अध्याहारस्य मानसं
ज्ञानमित्यपास्तं क्रियार्थोपपदस्य च कर्मणि स्थानिनः इत्यत्र तदुदाहरणे फलेभ्यो यातीत्यादौ तुमुन्नंताप्रयोगे तादृ
शवाक्यैकदेशप्रयोग एव चतुर्थी साधुर्नतु तत्प्रयोगे स्यादिति तदुक्तेः स्पृहेरीप्सित इत्युदाहरणे पुष्पेभ्यः स्पृहय
तीति संपूर्णवाक्यप्रयोगे तदेकदेशप्रयोगे च तु र्थी साधुत्वं स्यच्चूलोपे इत्यादि चत्यवं तर्हि तत्वाक्यैकदेशप्रयोग एव प्र
वर्त्तते शास्त्रवलाल्लोकव्यवहाराच्छास्यपंचम्यंतघटितवाक्यैकपदे शस्यैव विशिष्टेर्थे शक्तिकल्पनमिति बोध्यं युष्मद्यु
पपदे इति सूत्रे स्थानिन्यपीत्तिनूपपदग्रहणात् समदस न्यायाएव निमित्तत्वचसमवारणाय स्थानिनीत्युक्तेः तत्पद
प्रयोगे न स्यादत्रापीति उपपदे इति तु वैचित्र्यायैव आचार्यः कृत्वा न निवर्त्तते इति न्यायात् एतेनैतत्फलात् स्थानि
पदं अज्ञायमानार्थकं तेन युष्मदाद्यर्थाध्याहारेपि नापदोच्चारणे तदध्याहारे च मध्यमादि फलेभ्यो यातीत्यादि चार्था
ध्याहारे एव साधु न पदाध्याहारे पुष्पेभ्य इत्यादि पदाध्याहारे एव साधु नार्थाध्याहारे इत्यपास्तं एकस्यैव पदस्य भेदेन
साधुत्वासाधुत्वयोर्नवेत्ति सूत्रे भाष्यकृता तिरस्कारात् किंचैतस्य शाब्दज्ञानं पदज्ञानं च वक्तृनिष्ठ साधुत्वनियामकं श्रो ५०
तृनिष्ठं वा नाद्यः अर्थस्य बुद्धिस्थत्वेन वाचकपदस्यापि तद्बुद्धिस्थतायाः आवश्यकत्वात् नांत्यः इग्यण इति सूत्रभाष्ये।

कल्प्यतेतुपुंस्येवइत्येकदेशस्थापितादृष्टवाक्यार्थेशक्तिग्रहसत्त्वेनततःपदज्ञानंविनापिबोधेतत्रपदज्ञानस्यदुर्लभत्वात्
यदानांलिंगितार्थाध्याहारासंभवेनफलेसोप्यातीत्यावपिश्रोतुःयदाज्ञानस्यदुर्लभत्वाच्च परःसंनिकर्षइतिसूत्रेभाष्यो
क्तरीत्यावक्तृज्ञानस्यैवसाधुत्वनियामकत्वाच्चवाक्यत्वंकारकाद्यन्वितक्रियाबोधकत्वमेवेतिवक्ष्यते तत्रप्रकृतिप्र
त्ययनिपातानामेकवर्णानामर्थवत्त्वदर्शनादित्यादिनाप्रत्याहाराह्निकेभाष्येउक्तःप्रकृतिप्रत्यययोर्वाचकत्वमि
त्येवंरूपोवर्णस्फोटःशास्त्रीयप्रक्रियोपयोग्येवनवास्तवःवस्तुतस्त्वेविकल्पायोगेनप्रातिपदिकार्थविषयेएकंद्वि
कंत्रिकंचतुष्कंपंचकमित्यादिवादिविकल्पानुपपत्तेःकालनिकेतुयथेच्छमितितत्संभवःअतएवातिशायनेतमा
वितिसूत्रेशुक्लादयोगुणाएकेनचशुक्लतरइतिप्रकर्षप्रत्ययानुपपत्तिःतेषांसावयवत्वेनाल्पत्वमहत्त्वकृतविशेष
णतदुपपत्तेःअथवाएकेनिरवयवानैर्मल्यादिगुणांतरमिश्रणात्तुप्रकर्षःयथाजात्युत्पलादिवासितायांमल्लिका
यांगंधप्रकर्षःअथवानानाशौक्ल्यादिइतिभाष्येउक्तं अनेनह्येकत्रवस्तुनिअनेकपदार्थोपस्थापनेनव्यवहारोपपा
दकपदार्थानामवास्तवत्वंसूचितंकिंचास्येववास्तवत्वेकर्त्रीरिक्तादित्स्यास्मदादीन्प्रतिअबोधकापत्तिःकर्त्तृपद
स्यावयवशस्यैवबाधकत्वेनतद्वाक्यार्थबोधात्प्राक्तत्रशक्तिग्रहासंभवेनात्माश्रयापत्तेःयदितस्यमानांतरे
णशक्तिग्रहस्तदान्येषामपितेनैवशक्तिग्रहसंभवेनात्माश्रयापत्तेःयदितस्यमानांतरेणशक्तिग्रहस्तदान्येषा
मपितेनस्यैवव्यर्थापत्तिःशक्तिग्रहाभावेशास्त्रसंबंधरूपात्तन्मूलिकावालक्षणापिवक्तुमशक्यत्वात्एवंचेदंशो

मंजू०
५१

विशाये समुदायशक्तौ वबोधकत्वमस्मदादीनां स्यावश्यकं गौतमोपि प्रकृतिप्रत्ययार्थस्या वाचकत्वं ध्वनियन्ते वि।
भक्त्यंताः पदमिति पदपदार्थमुक्त्वा व्यक्त्याकृतिजातयस्तु पदार्थ इत्याह विभक्तिपदेन सुप्तिङाविति तद्वार्त्तिका
रमत्र जातिः प्रवृत्तिनिमित्तोपलक्षणं आकृतिपदेन रूपक्रियादिविशिष्टमवयवसंस्थानं जातिलिंगमेव वा अ
त एव गां लिखेत्यादौ लेखनकर्मत्वोपपत्तिः व्यक्तिपदेन संख्यादिविशिष्टा व्यक्तिः अत एव गौरिति विज्ञाने प्रति
भासमानेषु वस्तुषु कः शब्द इति प्रश्ने सास्नादिविशिष्टस्यार्थस्य क्रियाया जातेश्च शब्दत्वं कियन्तः सास्नालांगूल
ककुद्खुरविषाण्यर्थरूपं स शब्दः यत्तर्हि तदिंगितं चेष्टितं निमिषितं स शब्दः यत्तर्हि तत्र शुक्लो नीलः कपिलः
कपोत इति स शब्दः यत्तर्हि भिन्नेष्वभिन्नं छिन्नेष्वछिन्नं सामान्यभूतं स शब्द इत्येतत्तु ग्रंथेनेति शब्दबलात् तदि
ति नपुंसकवशात् स्वशब्देऽप्युस्यादिविशेषशब्दे व्यवन्हियमाणं वस्तु रूपगंधस्पर्शादिकलिंगसंख्यादिकं च श
ब्द इत्याद्यर्थनाशंकनेत्याह वक्ष्यमाण गुण अयं इयं नाम तत् क्रिया नाम सा तत्कृद्ध्ययवृत्तिगुणो नाम स आकृति
नाम सा इत्येवं तेषां तत्वाभावमुपपादयेन उच्चारितेन सास्नालांगूलखुरककुद्विषाणिनां संप्रत्ययो भवति स श
ब्द इत्युच्चरितं पतंजलिना अत एव कैयटेनाप्युक्तं गौरित्यत्र कः शब्द इति प्रश्नस्य गौरिति विज्ञाने प्रतिभासमानेषु व
स्तुषु कः शब्द इत्याशयमुक्त्वा तान्येव वस्तूनि क्रमेण निर्दिशति किं यत्सास्नेत्यादिनाप्यमवतारितं ये नोत्यादि ५१
सिद्धांतनाथ्ये विषाणस्योपलक्षणत्वात् गुणक्रियाजातिग्रहणं अत एवाप्रफला दौश्रुतेरसविशेषादिजिज्ञासा

विशेषजिज्ञासायाः सामान्यज्ञानपूर्वकत्वात् चक्षुरादिभिरपि सामान्यतो रूपादिग्रहणं तं वत्स्येव विशेषस्तु रसना-
दितत् तदिंद्रियग्राह्य एव अत एवाम्रफलदृष्टेरस्य विशेषादिजिज्ञासा अथ गौरित्यत्र गौरित्यनेना विशेषात् ज्ञानमात्र
ग्रहणेन ज्ञानमात्रे शाब्दगुणक्रियादिसामान्यज्ञानस्य नाप्यकृताध्ययनात् अत एव कंबुग्रीवादिमान्नास्तीत्या-
दितो घटत्वावच्छिन्नानाव प्रतीतिरुक्तान्यायविद्भिः जातेरपि शवि तत्पदार्थत्वात् आकृते घटपदार्थत्ववत् तत्र
जातिरनुगताकारेनुगताकारप्रतीत्या स्वरूपत एकत्वेन च सिद्धा अत एव स्वरूपसूत्रे भाष्ये कथं पुनर्ज्ञायते एकाकृ-
तिरिति प्रख्यानविशेषात् न हि गौरित्युक्ते विशेषः प्रख्यायते शुक्ला नीलेत्यादि प्रख्या बुद्धिः तस्या अविशेष एकरूपता
तेन तद्विषयस्यार्थस्यैक्यं प्रतीयत इति कैयटः इयमेवानुगताकारप्रतीतिशब्देनोच्यते एकाकारप्रतीतिशब्देन च।
अत एव प्राणप्रदत्वं जातेरुक्तं प्रकाशे यावत्स्थितिसंबंधित्वं च तत्त्वमिति तद्व्याख्यातारः यावत्स्थित्येकाकारप्रती-
तिर्हि प्राणः तत्प्रदत्वं हि जातेरेव न पाचकतादेरिति स्पष्टमेव पाकक्रियाणामाश्रयभेदेन भेदात्स्वगताजात्यैव तास।
मेकाकारप्रतीतिजनकत्वमित्यस्त्वे अत एव कणादेनापि सामान्यं विशेष इति बुद्ध्यपेक्षमित्युक्तं अनुवृत्तिबुद्धिजनका-
त्वं सामान्यलक्षणं व्यावृत्तिबुद्धिमात्रेषु वस्तुषु कः शब्दः इत्याशयमुक्त्वा तान्येव वस्तूनि क्रमेण निर्दिशति किं यत्सास्त्रेस्या
दिशेष्वमव मौरि जनकत्वं विशेषलक्षणं इति व्याख्यातारः तथा सदिति यतो द्रव्यगुणकर्मसु सा सतेत्युक्तं इतीत्यस्या-
व्यवहारप्रत्ययवितिशेषः अनेनेदमेव सर्वजातिषु मानमिति सूचितं तथा ज्ञावो नुवृत्तेरेव हेतुरिति सामान्यमेव मा

मं सू० वः सन्नानुवृत्तेरेवहेतुरिति सामान्यमेव इत्यादि तु अनुवृत्तेरिति रिव्यावृत्तिबुद्धेश्च हेतुरिति सामान्यं विशेषश्च यावत्स्थि
५२ तिरेकाकारप्रतीतिरनुवृत्तिरिति तद्व्याख्यातारः यावत्स्थितीत्यस्य भावे पाचकत्वादेरपि जातित्वापत्तिः कादाचित्कैका
रप्रत्ययहेतुत्वादु भिन्नेष्वभिन्नं छिन्नेष्वछिन्नमित्यनेनोपलक्षितनित्यत्वेनापीदृस्यचितं गोत्वमोपि समानप्रसवात्मि
काजातिरित्याह यावत्स्थितीति एकाकारबुद्धिजननस्वभावेत्यर्थः आकृतिर्जातिलिंगार्थेख्येतिचाह जातिलिंगमिति
आख्यायस्याइत्यर्थः रूपादिष्वपि रूपत्वादिजातित्वव्यंजकं यत्साकृतिरिति तद्भावः व्यक्तिस्तु आकृतिविशेषस
मवायकारणमेव मत्कया विदाक्रसायुक्ता पिंडो भवति स्वर्णकया चिदाक्रसायुक्तं पिंडो भवतीति यस्य द्योपनं जा
त्यु तत्राकृतेरनित्यत्वाद्विशिष्टे अनित्यत्वं विशेष्या अमाद्रायनित्यत्वमपि तमाद्रायगोत्वमीये व्यक्ति पृथकृत्य हीतेति
चरकेप्युक्तं सामान्यमेकत्वकरं विशेषस्तु पृथकत्वकृदिति एकत्वकरत्वमेवत्वबुद्धिकरत्वं पटुने कासुगवादि व्यक्ति
षु अयं गौरयं गौरित्येवमाद्येकाकारबुद्धिरेकं सामान्यं विना नाधांता भवति एवं च तदेकत्वालंबनासत्यपि व्यक्तिभे
देएवत्वबुद्धियुक्तेवतदेवगोत्वमश्वादिभ्योव्यावृत्तिबुद्धिजनकतया विशेषइतितदर्थः एतद्बीजमप्युक्तं तत्रैवतुल्य ।
ताहि सामान्यमतस्तदेकत्वकरं यथसकलगवांगोत्वं विपर्ययस्तु अतुल्यार्थता अनेकाकारप्रतीतिजनको धर्मः स
यतोविशेषोनः पृथकत्वकृत्सः यथा गवाश्वयोर्गोत्वाश्वत्वे इति तदर्थः इति तद्व्याख्यारः एवं च पाचकत्वमपि सामा
न्यं भवत्येव जातित्वं तु यथा न तथोक्तं प्रतिज्ञायनेइतितत्रैव माष्ये अनन्येनप्राप्यते साजातिरित्युक्तं अनेनापि न्ता ५२

स्यां नित्यत्वं बोधितं एतच्च लक्षणमद्वैतमते ब्रह्मातिरिक्तस्य सर्वस्य तन्मते जन्यत्वात् अविद्यादेरपि जन्यत्वं वदन्ते जीवा
नामप्युपाधीनां जन्यत्वे न विशिष्टानां जन्यत्वमेव ब्रह्मस्तु निर्धर्मकत्वात्तत्र जातिर्नैव एवमन्यथा न्यायादिनये परमाण्वा
दीनामजन्यत्वे न परमाणुत्वादिजातेर्व्यापकत्वमस्य लक्षणस्य स्यात् सरूपत्वेनाशेषु भिन्नेषु भिन्नाभिधानप्रसंग।
निमित्तं जातिरित्युक्तं तन्निष्कर्षस्तु उक्तं एतेन कारणतावच्छेदकत्वादिनैव जातिसिद्धिरित्यपास्तं सखण्डोपाधावपि ता।
त्तद्योगनाशस्यादौ न तत्पूर्णत्वादौ च तस्य सत्वेन कारणतावच्छेदकत्वादिना जातेरन्वयव्यतिरेकयोः तन्मयोरपि अनिचा
रेण कारणतावच्छेदकत्वादिना जातित्वसाधनासंभवात् बाधकाभावे इत्यादिविशेषणदाने तु गोत्वाकिंचघटत्वद्यारा
वत्वाद्यनेकधर्मपुरस्कारेण निकार्यकारणभावस्वीकारापेक्षया सर्वानुगतं एकं किंचित्सखण्डं धर्ममवच्छेदकीकृत्यैका।
कार्यकारणभावे लाघवेन कार्यतावच्छेदकत्वादिना न जातिसिद्धिरिति लक्षणतश्चोपि गोरित्युक्ते शुक्लत्वादिविशे
षानवगमपूर्वकं सामान्यस्य शाब्दिनो वगतेः सास्नादिमत्या द्रव्यस्यैव शक्यत्वे तु तस्य गुणसमूहरूपत्वेन शुक्लत्वा
दिविशेषावगतिप्रसंगः अतिरिक्तद्रव्यवादेऽपि द्रव्यस्य विशेषानालिंगितस्यैव बोधाभावेन स एव दोषः उक्ताकृतेरपि
शब्दवाच्यत्वाच्च तत्तद्रूपक्रियादिसामान्यरूपेणैव नाम सत्येयद्यपि प्राथमिकशक्तिग्रहो विशेषालिंगितव्यक्तिविशे
ण एवं तथाप्यावापोद्वापन्यायेन पुरुषांतरात् गामानयेत्येतद्वचनोत्तरमेवाश्वं नरीत्या नयतो दृष्ट्वा विशे
षे गृहीतामपि शक्तिं तज्ज्ञाः सामान्यमात्रे व्यवस्थापयन्ति कारणत्वादिरूपस्थलेऽपि एवमेवेति विवक्षितसामान्यलक्षणो

मं०भू० ५३

प्रयोगः यथा गोशब्दो गवय इति शक्तिग्रहेन व्यक्तिविशेषज्ञानं तद्वत् तदुक्तं स्वरूपरूत्वेनाख्येऽख्ययवर्गगतेष्व मन्या
महे आकृतिरभिधीयते न हि गौरित्युक्ते अपसर्गो गम्यते शुक्लो नील इत्यादीनि अपसर्गो विशेषः तस्याशक्तिरप्रतीति
रित्यर्थः ननु विशेषा अपसर्गपक्षोः को विशेष इति चेत् शृणु अनभिधीयमानापि जातिः सन्निधिमात्रेण प्रख्याया अ
विशेषे निमित्तं भवति प्रख्याया अविशेषस्तदेवेदं ज्ञानमिति प्रत्यभिज्ञाविषयत्वं तेनैकत्वे जातिपदार्थे च सिद्धे व्यभि
धानासिद्धेः तथा वनमिति सर्वविशेषाभ्यः तरोकरणे नाम अपवर्गगतावपि प्रख्याया अविशेषो नास्ति भिन्नवृत्ता
लंबनत्वाद्वनमिति प्रत्ययस्य यथा आम्रवनं पलाशवनमित्यादिज्ञानेषु तदेवेदं ज्ञानमिति प्रत्यभिज्ञानाबाधितेति।
कैयटे नैव समाधानं अत एव सामान्यशक्तात् शब्दात् विशेषव्यक्तिबोधे लक्षणेति वृद्धाः साच शब्दतन्मात्रस्यैव प
रिणामविशेषः आकाशवत् विभुः सर्वत्र आकाशजातिसमवायादेश्यो पाधिकानेकत्वात् तदुक्तं हरिणा संयो
गिद्रव्यभेदेन देशे च परिकल्प्यते तेषु देशेषु सामान्यमाकाशस्यापि विद्यते इति आकाशे सलक्षणं अर्थजा सन्नि
धानेपि सर्वे जातसन्निधायिनः आपारलक्षणा यस्मात्स्वार्थाः समवस्थिता इति च जातसन्निधायिनः जातविशिष्टवा
चकाः आपाललक्षणाः प्रयोजनशाप्याः शब्दस्यान्वयिरूपमनवच्छेदकीकृत्य प्रसापकत्वात् एवं च निःसामान्या
नि इत्यनादेयं सामान्यानीत्यस्य शब्दस्य बोधकत्वात् किंच ब्रह्मण एव प्रमाणसिद्धतया सर्वज्ञाता ब्रह्मणः।
शक्तिभूता ननु ततो भिन्नाः तत्र यथा व्यवहारं शक्तिकल्पने हि सर्वजातिद्रव्यविभागः आकाशत्वं घटत्वमित्या ५३

व्यवहारस्य तुल्यत्वात् तत्तत्कर्णशष्कुल्यवच्छिन्ननभस एव तत्तच्छ्रोत्रत्वमिति मते श्रोत्रत्वजातिवत् सा च जातिरस
त्येः प्राकृतात्मेच सूक्ष्मरूपेण आश्रयेषु अवतिष्ठते इति नित्यत्वं तस्याः अनुगताकारज्ञानकथ्यक्तीनां यत्किंचिद्रूपं तता
त्स्वं जातिरेवं च जातिरूपाधिरिपर्यायाविति हेलाराजः स्वकजातीनां व्यापकत्वे विपदार्थानां विचित्रशक्तिकत्वा
त् कांचिदेव जातिं कश्चित्पदार्थोऽभिव्यनक्ति न सर्वो सर्वं सा च कदाचित् स्त्रीत्वयुक्ते न विंडेनभ्यज्यते कदाचित् पुंस्त्व
युक्ते न कदाचिदेकाधारस्था कदाचिदनेकाधारस्थेति बोध्यं तस्याः प्रधान्येविवक्षाश्रयसमेतत्वे न संख्यादेस्त त्रवोधात्
न लिंगवचनश्चनोपपत्तिः गुणवचनशब्दवत् इति स्वरूपस्त्वेनाश्रेस्पष्टं सा च नित्येत्युक्तं अत एव नाश्रेसिद्धे शब्दार्थसं
बंधे इति वार्त्तिके सिद्धे शब्दे अर्थे चेति विग्रहः कं पदार्थं मत्वेति प्रश्ने आकृतिमित्याह आकृतिर्हि नित्या इदमत्र नित्यं त्र
आकृतिपदेन जातिः संस्थानं चोभयमपि नित्यमनयोर्य्यथा नित्यत्वं तत्तथा वक्ष्यते अथ वा द्रव्य एव पदार्थ एष वि
ग्रहः द्रव्यं नित्यमाकृतिरनित्या एवं हि दृश्यते लोके मृत्कयाचिदाकृत्या युक्ता पिंडः पिंडाकृतिमुपमृद्य घटि
का इत्यादि अत्र कैयटः तत्तदाकारं तत्सघंग्यं जातिरूपं चासत्यमुपाधिमात्रत्वात् तदवच्छिन्नं ब्रह्मैव द्रव्यम् एतेन
मृदो प्यनित्यत्वादद्रव्यमूनित्यमित्युक्तमित्यपास्तं मृदोप्याकारत्वात् तथा ब्रह्मण्येव पर्यवसानात् वाचा
रंभणं विकारो नामधेयं मृत्तिकेत्येव सत्यमिति श्रुतेः वत् आकृतेः संस्थानं तस्यानित्यत्वेतद्व्यंग्य जातिरप्य
नित्येति एतत्तात्पर्यं यद्वा आकृतौ पदार्थे एष विग्रहः नित्याकृतिः कथं न क्वचिदुपरतेति सर्वत्रोपरतान भवतीद्व्यां

मंजू० तरस्यानुपलम्भ इति अत्राकृतिपदेन जातिः उपरमो नष्टिर्व्यक्तिः आविद्यकः पदार्थो एवात्र जातिः यावद्व्यवहारं अ-
५४ वस्थानात् कूटस्थत्वात् विचालित्वात् नपायोपजनविकारित्वाद्वारंवारमुत्पत्त्याद्यभावेनानुत्पत्त्यादिरूपयोगित्वान्नि-
त्येति एतद्भावः एतदभिप्रायेणैव नित्येव नित्यं छित्ते छिद्यते छिन्नं इति सामान्यलक्षणमुक्तं अथावयवसंस्थानरूपाया
आकृतेः कृत्स्नहेत्वभावेन प्रकारान्तरेण नित्यत्वमाह यद्यप्यस्मिंस्तत्त्वं न विहन्यते तदपि नित्यं तस्याभावस्तत्त्वं आकृतावपि
तत्त्वं न विहन्यत इति अवयवसंस्थानरूपाया आकृतेः प्रवाहाविच्छेदात्तद्धर्मस्याविद्यात इत्याशयेनानेन प्रवाह
नित्यतोक्ता प्रवाहनित्यतां न्यायवार्त्तिककारोप्याह नित्या वर्णा नित्या वेदा इति वेदा इति च संप्रदायाविच्छेदात् इत्या-
दि धीनित्याः पर्वताः इति वत् तान्येव वेदवाक्यानि मन्वंतरचतुर्युगान्तरेष्वपि संप्रदायाविच्छेदेन प्रवर्त्तन्ते एता-
न्मन्वादिवाक्येष्वपि तुल्यमिति व्याससूत्रमपि समाननामरूपत्वाच्चावृत्तावप्यविरोध इति वेदस्य तदर्थानां चाम-
रूपप्रवाहानुच्छेद एव नित्यत्वमिति तदर्थः उपाधिसंनिवेशादिरूपत्वेष्टोपाधीनामपि तदात्मकत्वात् ब्रह्मैव वाच्यम्-
यत्तु अखिलाशब्देनाभिविच्छिन्नप्रकाशं ब्रह्मैव विच्छेदोषितद्रूप एवेति तादृशेनहानिरिति अवदंति विच्छेदस्य ब्रह्मरूप-
त्वेन तत्त्वेन तत्त्वज्ञाननिवर्त्त्येन नानापत्तिरिति वस्तुतस्तु विच्छेदोसत्य एव रज्जूरगवत् सर्वोपि प्रपंच एवमेव तन्न स्योगा-
प्रापकश्रमाल्पदृष्टेश्च ब्रह्मण्यस्याविवर्त्त एवं च तन्नाशोपतोपपन्नेति परमार्थसारविवरणे प्रपंचितमस्माभिः
यथा स्वप्ने एकस्यैवांतःकरणस्य विरुद्धानेकपदार्थरूपत्वं तथा जागरे मायासहकारेण ब्रह्मणस्तथात्वं यथा च- ५४

च जागरेऽप्रतीयमानत्वात् स्वाप्नस्य मिथ्यात्वं तथा तुरीयदशायां अननुवृत्तेरस्य प्रपंचस्य मिथ्यात्वं संविदश्च सत्यत्वमु
पाधिवैशिष्ट्येन तद्देवव्यवहारास्पदं निरूपाधिकं तु सर्वव्यवहाराविषयः इति हेलाराजः आकृतिस्तु यत्र संभवति तत्रैव।
गौतमीये जात्याकृतिव्यक्तयः पदार्थ इति सूत्रे व्यक्तिपदेन द्रव्यसंख्यादिविशिष्टा व्यक्तिः पिष्टकमय्यो गाव इत्यासां वाकृतिरेव व
स्तुतस्तु पतञ्जलिजातिः प्राण्याश्रितत्वेनाभिव्यक्तानु पुण्यपापयोरिति चित्रादीत्यादिना प्रतिमाः प्राण्याश्रिता इति प्राणि
पदं तत्स देवतावाहनप्रतिमोपलक्षणं विसर्जने तु तत्र तान पुण्यपापसाधनं ब्राह्मणत्वादयो भावाः सर्वत्रैव वर्तते स्थिताः
अभिव्यक्ताः स्वकार्याणां साधका इति च स्मृतिरिति रिति यत्रैवोपदेशादिनाभिव्यक्तास्तत्रैव स्वकार्यसाधकाः प्रतिनियत
व्यंजकव्यंग्यत्वादिति भावः सरूपसूत्रे भाष्ये ध्वनितं सर्वमेतत् स्वर्गापूर्वदेवताशब्दानां कृतिर्बोधादर्शनात् आसा।
महकारेणैव तद्बोधात् नव्यनैयायिकग्रंथे प्रकृतिप्रत्ययार्थविचारस्तु व्याकरणवासनावासितांतःकरणतया तत्रैव वा
स्तवत्वक्रमेणेति बोध्यं अनंतावर्णानुस्यात् इविनाशाशालिनस्तत्समूहश्च पदं बोधकमिति पक्षे तु पदानामानंत्यात् शक्तिग्रहा
संभवेनानुगताकारप्रतीत्यानिर्वाह्यास्तस्य घटपदत्वादिजातेर्वाचकत्वं अर्थगतजातेः शक्यत्ववत् यथा च भ्रमण
त्वादिजातिश्चरमक्रियाप्रसक्तव्यंग्या एवमेषा विचरमवर्णप्रसक्तव्यंग्या क्रियासमुदाये वौद्धे भ्रमणत्वं देवापि तादृ
शे वर्णसमुदाये भासमानवृत्तिः तदुक्तमनेकव्यक्त्यभिव्यंग्या जातिः स्फोट इति स्मृतेतिय द्वाशक्यतावच्छेदके शक्तेरिव
शक्तितावच्छेदकेपि तत्स्याः सत्वमिति तस्याः स्फोटत्वव्यवहारः इति जातिस्फोटनिष्कर्षः परे तु यथाऽर्हं तनामात्मभेद

औपाधिको मायाकृतः चेतनस्यैकत्वेप्यस्यैव तत्रानुगमार्थं जातिकल्पना चेद्दृश्यते तथैकस्यैव तत्तत्कालतत्तद्वर्णा-
नुरागरूपोपाधिभेदेनानंत्यात् तत्तत्स्फोटेष्वनुगतशक्तिग्रहाय जातिरावश्यकी यतस्तेषां तत्तदुपाध्यवच्छिन्नस्फोटव्यक्ति-
पदवाच्यत्वं तत्तदुपाध्युपलक्षितस्य जातिपदवाच्यत्वं पूर्वमते तु जातिः पदार्थांतरं यत्तु सर्वत्र व्यक्तिरनित्या तदनुपहितं ब्रह्मै-
व जातिरिति तन्न आविद्यकानंतव्यक्तिकल्पनापेक्षया जात्यादेरेव तत्त्वकल्पने लाघवात् अत एवाग्नेरग्नित्वमप्यागमा-
दित्यादिग्रंथेनौ धर्मस्यैव नाशानुक्तः अत एव सिद्धे सिद्धार्थे इति वार्त्तिके आविद्यकः पदार्थो जातिर्व्यवहारनित्या
प्रवाहात्मनित्या वेति द्वेधा वाकृतेर्नित्यत्वमुक्तं भाष्योपपादितं स्यात् इति वाचकवाच्यशक्तानां निर्णयः वाक्यसमन्वय ।
हि काचाकांक्षामात्रैकपदार्थज्ञानेन तदर्थान्वययोग्यर्थस्य तु ज्ञाने तद्विषयेच्छा अस्यान्वय्यर्थः कइत्येवंरूपा पुरुषनि-
ष्ठैव तथापि तस्या आकांक्षाविषयेच्छा अस्यान्वय्यर्थः कइत्येवंरूपा पुरुषनिष्ठेव तथापि तस्या आकांक्षाविषये र्थे आरो-
पः एतदेवाभिधानापर्यवसानमित्युच्यते अयमर्थोर्थांतरमाकांक्षते इति व्यवहारात् पदे तु नारोपः मानाभावात् अर्थ-
बोधोत्तरमेव जिज्ञासोदयाच्च परं साकांक्षमिति तु साकांक्षार्थबोधकमित्यर्थकं तदुक्तं समर्थसूत्रे भाष्ये परस्परव्यपेक्षां
सामर्थ्यमेके का पुनः शब्दयोर्व्यपेक्षा न ब्रूमः शब्दयोरिति किं तर्हि अर्थयोः इह राज्ञः पुरुष इत्युक्ते राजा पुरुषम-
पेक्षते ममायमिति पुरुषो राजानमपेक्षते अहमस्येतीति इदं च जिज्ञासोत्थापकं चैकपदार्थे परपदार्थव्यतिरेकप्रयुक्त-
स्यान्वयबोधाजनकत्वस्य ज्ञानमिति तद्विषये तादृश्यान्वयबोधाजनकत्वे ख्याकांक्षेति व्यवहारः एतज्ज्ञानस्य बोधहे-

तुत्वादेकवारमन्वयबोधे जाते तद्जनकत्वज्ञानाभावात्पुनरन्वयबोधः कार्यसहवर्त्तित्वेनैव तस्य हेतुत्वात्तत्सर्व
त्रबोधद्वयं अन्यथा प्रथमबोधहेतोस्तन्नूज्ञानस्य द्वितीयबोधात्पूर्वमपि सत्वेन तत्रनुद्धारं स्यात् अन्वयबोधश्च तदाकांक्षि
तसकलक्रियाकारकादिविषयो विवक्षितः एतेन तस्य हेतुत्वे खंडवाक्यार्थबोधोत्तरं महावाक्यार्थबोधो न स्यादिस्यपास्तं खं
डबोधस्य क्रियातद्विशेषणकारकतद्विशेषणेतदन्यतरमात्रविषयत्वात् अत एव सुरतक्रिडाविकीनां रवः कंकणका॥
णः प्रेम तनोतु वो नववयो लास्यायवेणुस्वनः इत्यादौ समभिव्याहारे पुनरात्तस्य दोषतो तालंकारकैः क्रियाकारकभावेनान्व॥
यबोधकत्वपदोत्त्यनंतरं तत् घटकयत्किंचिदन्वयिविशेषणलोपाद्यानर्हे समभिव्याहारे पुनरात्तं यद्यपि सतितात्पर्ये आ
वृत्या बोधद्वयमिष्टमेव तथापि सैवात्र दूषकताबीजं एतन्मूलिका एवं सकृदुच्चरितः सकृदर्थं गमयतीति व्यु
त्पत्तिः किंच उक्तस्यान्वयबोधाजनकत्वज्ञानस्य वक्ष्यमाणसमभिव्याहारकारणतात्ज्ञानमूलकत्वात्तस्याकांक्षाः
अतः समभिव्याहारे तादृशतादृशान्वयबोधजनक इति ज्ञानं कारणं तद्ज्ञानं तत्र बोधात् अत एव यस्य यादृ
शसमभिव्याहारे यादृशान्वयबोधकत्वग्रहस्तस्य तादृशान्वयबोधस्य अनुभवसिद्धं समभिव्याहारस्य तदन्व॥
यबोधजनकत्वस्य यमेव वाक्यविषयेते अर्थयच समयस्तस्य रिपालिका च मीमांसा अत एव घटः कर्मत्वमानयनं कृ
तिरित्यतो विपरीतव्युत्पन्नस्य बोधः संव्युत्पन्नस्य चाबोधः उपपद्यते समव्युत्पन्नत्वं च व्याकरणशास्त्रोक्तप्रकृतिप्रत्य
यविभागतत्तदर्थविभागतत्तदन्वयबोधविषयकज्ञानवत्वं अन्यथानुभवश्च त्वरूपसततत्समभिव्याहारजन्वयबोधां

मं जू०
५६

जनकत्वज्ञानमविरोधाद्धेतुरितितन्मूलिकैवमद्दुक्तिरित्यतिव्युत्पत्तिः तादृशबोधेच्छयोच्चरितत्वरूपतात्पर्यज्ञानेसत्य
पितत्तत्समभिव्याहारेतज्जनकत्वज्ञानाभावेबोधादर्शनात्तात्पर्यज्ञानस्यान्वयासिद्धिः सत्यप्यस्यतात्पर्येऽबोधकमिति
व्यवहार तत्रायंविस्तुतत्वस्यक्रियाकारकादिपदघटितः सामान्यतएवेत्युक्तंव्युत्पन्नस्याश्रुतवाक्यादपिबोधदर्शना
त् प्रतिवाक्यंतथाग्रहस्यासंभवाच्च पदभेदेनव्युत्पत्तिभेदइत्यस्यचनामपदद्वय नामाख्यात नाख्यातनिपात निपातभेदे
नतत्तत्पदसमुदायेव्युत्पत्तिभेदे इत्येवार्थः भवाग्रेतत्रतत्रवक्ष्यतोउत्थापकताविषयतान्यतरसंबंधेनोभयसंबं
धेनवाजिज्ञासाविशिष्टः साकांक्षइत्युच्यते तत्रात्वंपचतितंडुलंदेवदत्तइतिक्रियाकारकयोर्द्वयोरपिपरस्परंतदु
त्थापकत्वात् तद्विषयत्वाच्च आद्यंपश्यमृगोधावतीति अस्यपश्यार्थस्यकारकधावनाकांक्षइतिसत्रनाख्येस्मा
स्मिन्नाकांक्षेतिचसाकाक्षमितिउक्तं अस्मिन्नितिविषयसप्तमीत्यलं यत्तु अर्थनिश्चयोग्यताविज्ञाश्चबोधेकारणं
साचतात्पर्यविषयीभूतसंसर्गवृत्तिधर्मसंसर्गतावच्छेदकाख्यसंबंधतिष्ठासंतानावप्रतियोग्यतावच्छेदकत्वाभावः
तेनविशिष्टज्ञानादिकमादायनदोषः ननूज्ञानंकारणंसंसर्गज्ञानंतुतात्पर्यविषयतयाकांक्षाज्ञानविज्ञायतया
वासुलभंयद्वाप्रतियोगितावच्छेदकत्वरूपायाऽयोग्यतानिश्चयोबोधप्रतिबंधकइतितन्न शब्दप्रयोज्यबोधेबाधज्ञा
नस्याप्रतिबंधकत्वात् तदभावज्ञानस्याकारणत्वाच्च सत्यपिबाधनिश्चयेअयस्योलिपत्तेः पराद्धपरयालक्ष्मी
कृताः संख्ययाएववंव्याख्यातोयातीत्यादितोबोधदर्शनात् किंचैवंवह्निनासिंचतीत्यतोबोधजावेतद्वाक्यप्रयो ५६

कुरङ्गवेणवह्निनाकथं सेकंन्नवीबीसुपहासःश्रोतव्निःक्रियमाणोसंगतःस्यात् एतदर्थकइतिविडम्बनावाक्य
वलोन्नरंवाक्यस्यैवमूकतानस्यस्यात् किंचैवंसतिवादप्रतिवादिशाब्दस्याबोधकत्वेनतत्खंडनकथोच्छेदः
नचैतादृशेषुनान्वयबोधःकिंतुपदार्थबोधमात्रमितिवाच्यंसर्वत्रैवमेवापत्तेःनचप्रवृत्तिंप्रतिविशिष्टज्ञानस्य
हेतुत्वात्तदनुरोधेनशाब्दविशिष्टज्ञानसिद्धिरितिवाच्यंदुःखद्वेषेच्छासुखाद्यपितुल्यरीत्यातद्धेतुत्वेनसस्यापिवाध
निश्चयोमिथ्यात्वनिश्चायगालिदानरूपकादिकाव्यजदुःखसुखाद्यनुरोधेनतत्रापितदावश्यकत्वात् अन्यथा
सुत्पन्नानामुखत्वमाश्रयप्रदत्वमाश्रयदत्तोपिसुखंचंद्रत्वादितइवचमत्कारापत्तिःविनत्यस्यार्थस्यैवा
न्वयतयातद्बोधेनैतस्यासत्तासंगतत्वाच्चादैववशात्संपन्नत्कलहादिसदृशशाब्दान्तुनदुःखंतादृशकरतास्य
योनावज्ञानात् नेदंरजतमितिभ्रमवतस्ततोनिवृत्तावपिनेदंरजतमेवेतिप्रयुक्तेवाधज्ञानकालएवततोवो
धात्प्रवृत्तिदर्शनाच्च एतेनासंसर्गाग्रहमात्रेणतत्सिद्धिरिसपास्तं किंचासंसर्गाग्रहीनामसंसर्गाभावग्रहाभा
वःतथाप्रतिवाधज्ञानाभावेनविशिष्टबुद्धेरापत्त्या एवंक्रमतोपिस्यात् किंचयेनदोषेणविद्यमानस्यासंस
र्गस्याग्रहस्तेनाविद्यमानसंसर्गाग्रहस्यैववक्तुंशक्यत्वात् किंचविशिष्टज्ञानस्यकारणत्वेसंभवतिअभावरू
पस्यासंसर्गाग्रहस्यतत्कारणत्वकल्पनेगौरवं यत्तुकाव्यादौविनावादीनांसहृदयतासहकृतभव्यंजनयासं
नवंधिविशेषीयत्वेनाप्रतीतौप्रतितिरूपामाधारत्वेनप्रतीतिस्तत्रविशिष्टज्ञानस्यानुभवविरुद्धतयात्वीयत्वा

मं॰जू॰ संसर्गाग्रहमात्रेणद्वितीयत्वंसंसर्गाग्रहप्रयोजनंस्वनिष्ठस्याप्यनिश्चितत्वादिति मन्तव्यं नचवह्निनासिंचेत्यादिनःप्रवृत्ति
५१ रपिस्यात् बाधज्ञानेनजायमानज्ञानेऽप्रामाण्यशंकायाजननात् तत्कुत्रज्ञानस्यैवप्रवृत्त्युपयोगित्वेनाज्ञा
तेःबौद्धस्यैवसर्वत्रबोधविषयत्वेनबोधस्यैवाज्ञातत्वात् तदुक्तं असंतमसत्यापि ह्यर्थे ज्ञानं शब्दःकरोतीति हांति वस्तु
तोबाधज्ञानंनक्वापिज्ञानेप्रतिबंधकंतत्कालेविसंवादिसामग्र्यां जायतएवज्ञानंतत्रस्वस्वसामग्रीवशात् द्वयोरपि
ज्ञानयोर्जातयोर्यत्रज्ञानेसदोषसामग्रीजन्यत्वग्रहणसत्राप्रामाण्यग्रहइत्येवमर्यादान्यायसीयथागेहेघटोस्ति
गेहेघटोनास्तीतिपरस्परविरुद्धवाक्याभ्यां प्रयुक्तेकिंचाप्रसंचारादप्रतावक्तं प्रत्यक्षेणदृश्यते अनेकदिक्कस्य रू
पसहचारिणश्चास्याग्रस्ययुगपद्ग्रहणाद्धेतोरनुमानांशक्यतेलैनस्त्तीति अनन्यथासिद्धानुमानत्वं तदज्ञाव
ज्ञानेतेनपूर्वज्ञानस्यभ्रमत्वंकल्प्यतेइति घटःशाशांतिसूत्रेभाष्यकैरप्यटयोरुक्तं एवंचबाधज्ञानकालेप्यनुमितिः
सीकृताअत्रग्रहणस्यापेगम्यतेइति वर्तमाननिर्देशाभ्यामुभयोरेककालिकत्वंसूचितं अनेकदिक्कस्यस्पर्शो
स्ययुगपद्ग्रहणरूपहेतोर्भ्रमत्वस्यवत्तस्मिन्नसंभवाद्बाधप्रमस्तस्यप्रबलत्वेनुग्रनुमितोभ्रमत्वकल्प्यतं एवंचबा
धस्यहेत्वाभासत्वमप्युपपन्नमनुमितोतेनाप्रामाण्यग्रहस्यजननात् वस्तुतःसाध्यवोनहेत्वाभासःसर्वसाधा
रणबाधबुद्धिप्रतिबंधकतयैवनिर्दोहेतोर्व्यविशिष्टहेत्वाभासेपुग्रहणात्तेसिद्धसात्किंतुहेबाधज्ञानस्यैवत
त्वमुचितंतदुक्तंन्यायभाष्यवार्तिककाराभ्यां तथैवकिंचेदंरजतंइति भ्रमोत्तरंजायमानस्यनेदंरजतमितिबाध ५१

ज्ञानस्य रजतज्ञाननिष्ठाप्रामाण्यज्ञानं प्रतिकारणतावत्त्वं वाच्या एवं स्फटिके रक्तत्वाभावज्ञानस्य सोपाधिकल
द्रक्तत्वज्ञानेन तत्कारणतावच्छेदः वाच्या एवं च सर्वत्र न येवास्तु किंद्वयकल्पनेन यत्र तु लोकप्रसिद्धार्थस्य वाधा
तत्र ज्ञानं तत्र तेनैव जायमानज्ञाने ऽप्रमाण्यग्रहो यथा वह्निर्नास्मि वृतीत्यादौ न च गालिदानादिस्थलेपि वाधज्ञा
नेन तत्राप्रामाण्यग्रहे ऽः स्वीद्यनुपपत्तिरिति वाच्यं ततो ऽः खाभावेपि च्छं जनया जायमाने न तद्दुष्टत्वादिज्ञाने
न तदुःपपत्ते अंजनाजन्यज्ञाने तु न वाधज्ञाने नाप्रामाण्यज्ञानमिति स्पष्टं काव्यप्रकाशादौ यद्वा तत्र तमडद्धे
केण प्राथमिकवोधेपि नाप्रामाण्यग्रहः एवं च योग्यताज्ञानं प्रकृत्याद्युपयोगियोग्यतामंदेहादिना प्रमत्काप्रा
माण्यज्ञानाभावविशिष्टवोधजनकविशेषणीभूताभावप्रतियोगिप्रतिवंधकतयेतिवोध्यं लक्षणामूलमपिश
क्याद्यैवोधे विषयवाधज्ञानजन्यमप्रामाण्यज्ञानमेवेत्यलं परेत्वन्वयप्रयोजकंममभिव्याहृतकार्यशक्तिम
त्वं योग्यता सा च शाब्दवोधे ज्ञामते ऽत एव घटेन जलमाहरेत्यादौ सच्छिद्रेतरस्यैव जलाहरणशक्तिमत्वे न सच्छि
द्रेतरत्वप्रकारको वोधश्चत एव प्रातिनिधेः श्रौतत्वोपपत्तिः यथा खादिरे वध्नातीत्यादौ वधातं त्वफलकसंयोग
विशेषरूपं वंधनसमर्थैः खादिरालाभे न्यः प्रतिनिधिरुपादीयते ऽतस्तत्र तादृशवंधनसामर्थ्यवलेन खादिरवो
धो वश्यमनुपेयः एवं च खादिरवाधेपि तत्सामर्थ्यतागे ऽप्यसान्निध्यान्मानाभावेन तदुपपत्तिः अन्यथा खादि
रस्यासामर्थ्ये वंधनलोपः एवमस्मात् सर्वत्र प्रवृत्तिनिमित्तं स्वाश्रयनिष्ठसमभिव्याहृतकार्यशक्त्येरप्युपलक्षणं।

सू० मितितस्या अपि उवृत्तिनिमित्तसामानाधिकरण्यनबोधेनानमेवं चोपलक्षकजात्यवच्छिन्नस्य शक्तं तया सामे
५८ पि उपलक्षस्य शक्तित्यागस्यानौचित्यादन्यगतासागृह्यते सादृश्येन तत्रापि तत्वबुद्धेः किं च घटत्वेन सच्छिद्रेत्र
रव्यक्तिविशेषस्यैव नानमित्यंगीकारे लक्षणापत्तिः सामान्यरूपेण विशेषबोधेपि लक्षणो स्वर्थस्य त्वामस्मिवा।
स्मिरस्मुदाहरणे काव्यप्रकाशकृतस्पष्टमुक्तत्वात् तदुक्तं हरिणा केशांचित्साहचर्येण जातिः शक्त्युपलक्षणं
खादिरादिषु शक्तेषु जातिः प्रतिनिधीयते अस्यार्थः अफलो बंधः प्रमाणादौ चशिष्यते अतो जातसन्निधानेपि
शक्तिहीनं च गृह्यते इति केषांचित् जातिशक्तिवादिनां प्रमाणं हि सा उभयव्यक्तिशक्तिवादेपि वस्तुगत्या जातिश।
क्तिविशिष्टा केवलाव्यक्तिः शक्तेति न दोष इति बोध्यं इस्याद्भः आसत्तिरपि मंदस्याविलंबेन शाब्दबोधे कारणं सा।
चान्वयप्रतियोगिपदार्थानां तद्बोधकपदानां चाव्यवधानेन प्राथमिकोपस्थितिरूपा काव्ये यत्र च सर्वान्प्रति प्रा।
येण तादृशबुद्धेरेव उत्पादकत्वात् अनासन्नस्य तु योजनावाक्यान्मंदस्य बोधेपि विलंबोस्त्येव अथास्मास्पदा।
दयमर्थो बुद्धः स्मनुभवो विलंबेनेति वाच्यं योजनावाक्यसंपादनद्वारा तस्यापि बोधे उपयोगेनादोषत्वात् अमंदस्य तु आ
सत्यभावेपि पदार्थोपस्थितौ आकांक्षाज्ञानवतो बोधोविलंबेनैवमनवतीति तद्बोधे तस्याः कारणत्वं ध्वनितेचेदं तं
पदांतेति सूत्रे भाष्ये वस्तुतो योजनावाक्यकल्पनायामर्थात् कल्पकाकांक्षादिनाप्यर्थयोजनाकल्पनस्यैवोचि
त्वात् परं तु मंदस्य साविलंबेनामंदस्य तु आशीघ्रमित्येवोचितं यत्तु तत्र तत्र वाक्ये घटमानयेत्यादौ घटकर्मकानय। ५८

नन्वबोधेऽन्वयोच्चारितत्वान्नवज्ञानेऽस्य बोधनेऽन्वयाच्चारितत्वज्ञाने वा तथा बोधानुदयात् तयोः प्रतिबंधकत्वकल्पने
गौरवेण लाघवात् तथा बोधे इदं वाक्यमेतदर्थप्रतीतीच्छया वक्त्रोच्चारितमित्याकारस्तात्पर्यग्रहो हेतुः नानार्थप
दस्थले पदविषयोऽपि तथा तद्ग्रहकं च प्रकरणादिकमत एव प्रकरणज्ञानाभावे इदमेतदर्थकं एतदर्थकं चेति संदि
ह्यंते मौनिलिखितवाक्यस्थलेऽपि तस्य सत्त्वमुच्चारणस्य स्यवेति तन्न शुकादिवाक्यादिदेवताप्रसादेन पूर्वजन्म
संस्कारेण वा मूले ऽर्वबालकस्ततोऽतमकामाद्युक्ततात्पर्यव्यतिरेकनिश्चयेऽपि बोधोदयेन तस्याबोधे हेतुत्वासंभवा।
त् तद्व्यतिरेकनिश्चयवाक्यात्तस्मदर्थबोधात् नन्वेवं तत्र तात्पर्यं अत एव वेदवाक्यतो बोध इति चन्न तस्य कृ
लैकोन्नयत्वे न शाकद्गौगैयत्वात् लाघवाद्विन्यायगृहीततदर्थबोधकत्वज्ञानस्य वेदजन्यबोधे तत्र प्रामा
ण्यनिश्चये वहितुत्वान्मीमांसोपयोगः किंचास्मादर्थद्वयविषयको बोधो जायतेतीत्पर्यं तु कृते तिनजातीतिम
इति सर्वजनानुभवविरोधात् न तस्य हेतुत्वमत एव पयग्रानयेसुत्क्रेऽप्रकरणज्ञस्य दुग्धं जलं वानेयमिप्रत्यः
संगच्छते स्पष्टं वेदं सर्वैसंख्यासंज्ञासूत्रे ऽनाश्ये तत्र पदार्थोपस्थितिरेव साधुकारीत्याख्ये इनीयं तात्पर्यं नि
र्णयोपयोगस्तु तजज्ञाने प्रामाण्यनिश्चयद्वारा प्रवृत्तौ क्वचिदनेकपदार्थस्यान्वययोग्यत्वे कस्याध्याहार इत्यत्र
चेति बोध्यं न वाच्यं तात्पर्यं कृत्वे नतिर्णीता ऽगृहे सैंधवमस्तीति वाक्याद्देहे लवणमस्ति न वेति संशयायोल्लेखापत्ति।
वाच्यं एकत्वविषयकज्ञाने प्रामाण्यबुद्ध्युदयेन तदनुच्छेदात् तस्यस्त्वाभावज्ञानतदंश्यपरत्वज्ञानयोरविनश्वो

मंजू०
५९

र्थेऽप्रामाण्यग्राहकजनकत्वेन तथात्वात् तद्वाक्यार्थप्रामाण्यग्राहकत्वे तद्वाक्ये आप्तोक्तत्वज्ञानं हेतुः आप्तत्वं च भ्रम
प्रमादविप्रलिप्साशून्यत्वं तज्ज्ञानं चायं प्रकृतिविषये दृष्टाप्तत्ववान् आप्तत्वविरोधिधर्मानधिकरणत्वादिसमनु
मानेन तत्र भ्रमो वाक्यार्थे भ्रमः प्रमादो मार्थकशाब्दभ्रमः विप्रलिप्सा प्रतारणा प्रतीतविपरीतप्रतिपिपादयिषा वे।
दस्याकर्तृकत्वे तु अनाप्तोक्तत्वाभावज्ञानं हेतु तत्त्वाप्तोक्तत्वज्ञानात् अनक्तृत्वनिर्णयाद्वेत्यन्यत् वस्तुतः सर्वैः
शाब्दः प्रमाणमेव अनाप्तोक्तत्वज्ञानं तु तज्जन्यज्ञानेऽप्रामाण्यग्राहकम् अत्रोत्ततावपदार्थज्ञानानां आकांक्षा
दिज्ञानानां च नष्टत्वेपि तेषां समूहालंबनस्मरणात्तत्संस्काराद्वान्वयबोधः अयमेव खलेकपोतन्यायेन बोधः
यदा तु क्रमेणैव बोधकसमवधानात्स्वस्वाकांक्षार्थबोधोत्तरं पूर्वपूर्वस्मरणात्तत्संस्काराद्वा महावाक्यार्थबो
धः तदा राजपुरप्रवेशन्यायेन बोध इत्यन्यत्र विस्तरः॥ ॥इत्याकांक्षादिविचारः॥ अथ सकलशाब्दमूलभूत
धात्वर्थो निरूप्यते तत्र फलानुकूलो यत्नसहितो व्यापारो धात्वर्थ इति सिद्धांतः यत्तु फलं धात्वर्थो व्यापारः प्रत्य
यार्थ इति तन्न बैन्तः लः कर्मणि चेत्यादिसूत्रविरोधात् नहि तेन व्यापारस्य प्रत्ययार्थता लभ्यते किंच पचति पक्ष्यति
पक्ववानित्यादौ फूत्कारादीनां प्रतीतये तत्र तत्र प्रत्ययानां शक्तिकल्पनापेक्षया एकस्य धातोरेव शक्तिकल्पनतो।
चिता किंच फूत्कारादेः प्रत्ययार्थत्वे गच्छतीत्यादावपि तत्प्रतीतिवारणाय तद्बोधे पचिसमभिव्याहारस्यापि का
रणत्वकल्पने गौरवं किंच सकर्मकाकर्मकव्यवहारोच्छेदः नच प्रत्ययार्थव्यापाराधिकरणफलवाचकत्वं सक

र्मकत्वं तत्समानाधिकरणफलवाचकत्वं चाकर्मकत्वं ज्ञानातावपि व्यापारतावच्छेदकसमवायसंबंधेन व्यापारा-
नधिकरणवृत्तित्वरूपवैयधिकरण्यस्य विषयतया फलेसत्वेन नक्षतिः अन्यथा यत्किंचित्संबंधेन सर्वेषामेव व्यापा-
रसमानाधिकरणफलवाचित्वेन बहुपप्लवापत्तिः प्रत्ययार्थव्यापाराश्रयत्वं च कर्तृत्वं घटं ज्ञापयतीत्यादौ णिजर्थव्या-
पारव्यधिकरणफलाश्रयत्वेन घटादेः कर्मत्वमिति वाच्यं अभिधानानभिधानव्यवस्थोच्छेदापत्तेः नच व्यापारेण
स्याश्रयत्वेपात् कर्तुरभिधानं कर्माख्याते प्रधानेन फलेन तस्याश्रयत्वेपात् कर्मत्वेभिधानमिति वाच्यं ज्ञानस्याद्विष
स्य स्फोरियाश्रयस्य बाधाभावापत्तेः क्रियाप्रधानमाख्यातमिति यास्कविरोधापत्तेः किंच फलस्य धातुनात्तदाश्रयस्य
चाख्यातेपलेवलान्नसंभवेन लः कर्मणीत्यस्य वैयर्थ्योपपत्तिः कर्मकर्तृकृतांकारज्ञापनोनयवाचकत्वे गौरवाच्च किं-
च ज्ञाव विहितघञादीनां व्यापारवाचकत्वे ग्रामो गमनवानित्याद्यापत्तिः तद्वाचकत्वेन्नेनापि स्वाश्रयत्वाद्धेपे कर्तु-
रभिधानापत्तिः किंच गुरुः शिष्यात्रं पाचयतीत्यादौ हेतुमतिचेति सूत्रबलात् प्रयोजकव्यापारस्य णिजर्थत्वे स्थि-
ते प्रयोज्यव्यापारस्याख्यातवाच्य एवं च संख्यायाः स्ववाचकाख्यातार्थव्यापारेन्वयित्वे तस्यान्वयात् शिष्याभ्यामि-
ति द्विवचनानापत्तिः पाचयतीत्येकवचनानापत्तिश्च गुरोरनभिधानेन तत्र प्रथमाया अनापत्तेश्च शिष्यतृतीयाद्यापत्तेश्च-
पत्तेश्चेत्यलमत्र विस्तरः यदि विधातोः केवलव्यापारे एव शक्तिः फलं तु कर्मप्रत्ययार्थ इति तन्न ग्रामं गच्छतीत्यत्र विभा-
गस्य त्यजतीत्यत्र संयोगस्य बोधापत्तेः संयोगजनने गमादिसमभिव्याहारस्य विभागजनने त्यजादिसमभिव्याहारस्य

नू०
६०
कारणत्वकल्पने तु गौरवं त्यागो गमनमित्यापत्तेश्च तत्र फलावच्छिन्नव्यापारवाचित्वे सर्वत्र तथैवोचितं किंच गम्यर्थ
कर्मणि द्वितीया चतुर्थ्यौ ल्यब्लोपे कर्मणि पंचम्याः ल्यबन्तस्य विषयस्य कर्मणि सप्तम्या विधानेनानेकेषां सुपां तिङा
च फले शक्तिकल्पनापेक्षया फलविशेषबोधे तत्तद्धातुसमभिव्याहारस्य कारणत्वकल्पनापेक्षया च धातोरेव फ
लेपि शक्तिकल्पनोचिता कर्मकर्तृप्रयोगे फलस्य तत्रापि धातुवाच्यत्वावश्यकत्वाच्च स्वजनि गच्छतोः पयोपि ताम्रमद
शायां ताभ्यामविलक्षणबोधोस्त्यस्याभावात् तत्तत्समभिव्याहारस्य फलविशेषबोधनियामकत्वासंभवाच्च कार्यतावच्छे
दककोटौ पुरुषविशेषीयत्वनिवेशे तु गौरवं यत्त्वीदृशोस्थले सामग्रीप्रतिबध्यप्रतिबंधकभावेन लाघवगौरवविचा
रकरणं तत्तु तादृशसामग्रीप्रतिबंधकताज्ञानस्यानुपयोगेनानुमितिपरामर्शकार्यकारणभावादिना लाघवगौरव
विचारकरणवत् काकदंतविचारकरणं किंच शाब्दानुमितिसामग्र्यौ ज्ञानघटितत्वेन युगपज्ज्ञानानुत्पत्तेर्मनो
लिंगतया च तयोरांजस्येनानुभवसिद्धः समावेशाद् घटं पश्यति बोध्यं किंच तत्त्वयाकर्मत्वं धात्वर्थान्वितप्रत्ययार्थफला
श्रयत्वं प्रत्ययार्थफलाधिकरणव्यापारवाचित्वं च सकर्मकत्वं वाच्यं ० तत्र नाद्यः स्पंदाश्रयत्वादित्यापत्तेः सकर्मकेषु
तत्कर्मणि चाव्याप्तेः तत्र फलस्य धात्वर्थत्वेनान्यलभ्यतया प्रत्ययार्थत्वासंभवादिति स्पष्टविस्तरः अत्र फलव्यापा
रयोः पृथक् शक्तिः एकपदोपस्थाप्ययोरपि परस्परमन्वयोत्पत्तिर्वैचित्र्यात् परेषां कृतीष्टसाधनत्वयोरिव
अन्यथा कर्मप्रत्ययसमभिव्याहारे व्यापारावच्छिन्नफलबोधेन तथा शक्तेरपि व्यावर्तकत्वेन गुरुशक्यता ६०

वच्छेदककशक्तिद्वयकल्पनापत्तिः तत्र फलव्यापारयोर्वंतरंगत्वात्परस्परविशेषणतामनुभूयैवार्थांतरान्वयिनोऽप्रत
एवगमनं व्यापार इतिन फलांशेऽसंसर्गतो व्यापारविशेषणं जन्यजनकभावः संसर्गः किंचित्तु विषयत्वं संसर्गः यथास्मा
देवसूर्यकाध्यवसायाद्बौद्धिकोपस्थितेशे तेव्याप्तेरसाद्वौपस्तुदेरूपकत्रयनाद्यध्यवसतीत्यर्थः फलत्वं च कर्तृप्रत्ययसम
भिव्याहारे तत्स्वार्थजन्यत्वे सति तद्धात्वर्थनिष्ठविशेष्यतानिरूपितप्रकारतावत्त्वं जन्यतावारोवितावेसत्यन् विभागजन्य
संयोगादिरूपे यतस्माद्धात्वर्थविभागसंयोगयोः फलत्ववारणायोजनयं कर्मप्रत्ययसमभिव्याहारे तु फलस्य विशेष्यता परे।
तु तयोः पृथक्शक्तौ फलव्यापारयोरुद्देश्यविधेयभावेनान्वयापत्तिः पृथगुपस्थिततयोस्तथान्वयस्योत्सर्गिकत्वात्
तथान्वये धातुजन्यबोधस्य प्रतिबंधकत्वकल्पने गौरवं तस्मात्फलावच्छिन्ने व्यापारे व्यापारावच्छिन्ने फले च धातूनां
शक्तिः कर्तृकर्मार्थकतत्तत्प्रत्ययसमभिव्याहारस्य तत्तद्बोधे नियामकत्वं गौरवं च प्रामाणिकत्वान्न दोषावहं किंचै
कपदे युगपत्तिद्वयकल्पनेति गौरवं तथाहि फलविशेषणकव्यापारबोधे कर्तृप्रत्ययसमभिव्याहृतधातुजन्योपस्थि
तिः कारणं व्यापारविशेषणकफलबोधे कर्मप्रत्ययसमभिव्याहृतधातुजन्योपस्थितिः कारणं इति कार्यकारणभाव
द्वयकल्पनं धातोरर्थद्वये शक्तिद्वयकल्पनं बोधजनकत्वस्य विषयासंबंधेनुपपत्त्या तत्तत्समभिव्याहारविशिष्टधा।
तौ विशिष्टनिरूपितसंबंधद्वयकल्पना चेत्यतिगौरवमन्यथापदशक्तेरुच्छेदः एवमन्यत्रापि पृथक्शक्तिकल्पनानि।
रसनीयेत्याहुः सर्वकारकाणां धात्वर्थेन्वयः अयमेव च क्रिया यावत्सिद्धमसिद्धं वा साध्यत्वेनाभिधीयते आश्रितक्रम

मं०भू० रूपत्वात्तस्याः क्रियेत्यभिधीयते गुणभूतैरवयवैः समूहः क्रमजन्मनां बुद्ध्या प्रकल्पिताभेदः क्रियेति व्यपदिश्यते इति
६१ भूवादिसूत्रस्थ भाष्यार्थप्रतिपादकहरिग्रंथात् क्रमजन्मनामेषां व्यापाराणां समूहं प्रतिगुणभूतैस्तत्तद्रूपेण ज्ञा
समानैरवयवैर्युक्तः संकलनात्मिकयैकत्वबुद्ध्या प्रकल्पिताभेदरूपः समूहः क्रियेति व्यवह्रियत इति द्वितीयका
रिकार्थः अत्रावयवानामयं पौर्वापर्ये समुदायाश्रयमेकत्वं एतेन पूर्वापरीभूतक्षणसमूहस्य युगपदसंनिधानादे
कक्रियेति नाख्या संगतिरिति परास्तं क्षणेन स्मरणमवयवानां वस्तुभूतसमुदायाभावात् बुद्ध्युक्तं पौर्वितिपक्षवतीस।
दावसिद्धमपात्ती दिस्यादौ सिद्धं वा साध्यत्वेन तन्त्रकारेण निधीयमानं क्रियाऽऽश्रितेति योगप्रदर्शनं क्रियत इति अवय
वानां क्रमेण समस्ता अत एवाश्रितक्रमरूपा क्रियेत्याद्यार्थः एकैकावयवे समूहरूपारोपादधिश्रयणकालेऽपि पचती
ति व्यवहारः आरोपे च प्रतीतिरेव वलं अध्यासगृहीतयैव क्रियया स्वाश्रयस्य संबंधग्रहो बोध्यः न चैवं धात्वर्थस्य गौ
णत्वापत्तिः तदतिरिक्तमुख्यार्थाप्रसिद्ध्या तस्य गौणत्वाभावात् यस्य हि मुख्योन्योर्थो भिन्नस्तत्रैवेदृशस्य गौणत्वा
त् यद्वा तादृशानेकव्यक्तिवृत्तिजातिरेव क्रिया व्यक्तिद्वारकं च तस्याः साध्यत्वं स्फोटवादस्थाः क्रमवद्भिरपि क्रियात्वे
रभिव्यक्तिः फलस्यापि स्वजनकव्यापारगतपौर्वापर्यारोपेण तथैव भानं अत एव तन्मात्रवाचकस्य धातुत्वसि
द्धिः अत्र केचित् सिद्धत्वं क्रियाकांक्षोत्थापकतावच्छेदकं यद्वैजात्यं तद्रूपं साध्यत्वं च पूर्वापरीभूतावयवत्वसमा
नाधिकरणं कारकान्वयादियोग्यतावच्छेदकं क्रियांतराकांक्षोत्थापकतावच्छेदकं च यद्वैजात्यं तद्रूपं हि रू ६१

गाद्यर्थानां क्रियाप्रधानत्वव्यवहारस्तु क्रियामात्रविशेषणत्वात् स्वरादीनां हि स्वः पतिरित्यादौ नामार्थेष्वन्वयः
अत एव न हि रुगाद्यर्थे कारकाणामन्वयः तेषां क्रियान्तराकांक्षामत्त्वाच्च तत्र सिद्धत्वं पाक इत्यादौ घञादिबोध्यं साध्य
त्वं तु सर्वत्रैव धातुप्रतिपाद्यं न च धातुतः क्रियान्तराकांक्षानुत्थापकतावच्छेदकवैजात्येनोपस्थितौ कृत्स्नं न मेऽत्र त्वं तु स्व
यायादित्यादावाकांक्षाभावेनान्वयो न स्यादिति वाच्यं चेच्छष्ठसमभिव्याहारेणाकांक्षोत्थानान्नूइताऊः वस्तुतः सा
ध्यत्वं निष्पाद्यत्वमेव तद्रूपेणैव बोध्यः स्पष्टं चेदमुपपदमतिङ् सुबुत्कान् पूर्वं इत्यादौ भाष्ये इति उपसर्गवादे निरू
पयिष्यामः यद्यपि घटं करोतीत्यादौ घटस्यापि साध्यमानत्वं प्रतीयते तथापि पदान्तरसमभिव्याहारात्तथा स्वतस्तु
घटादिपदात् इयं सिद्धत्वेनैव प्रतीयते सिद्धत्वं च सत्त्वरूपेण बोध्यं यद्यपि क्रियापि तथा तथापि शाब्दशक्तिसा
भावात् स्थूलरूपेण साध्यत्वेनैव तस्याः प्रतीतिः इयं तु सत्त्वरूपेण सिद्धत्वेनैवेति न दोषः पचति भवतीत्युक्ते
स्यादौ भवतीत्युक्ते स्यादीनां क्रियाकांक्षादर्शनेन तादृशवैजात्येनाभानात् कारकाद्यन्वयानापत्तिः धात्वर्थत्वानाप
त्तिश्च एवं कृत्स्नं न मेऽत्र इत्यादौ चेत्यादे नापि तथाकांक्षायां तद्वैजात्येनाभानाद्दोषः एवं हि रुगित्यादेश्च न साध्यत्वेन भा
नमिति न कारकान्वय इति दिक् तत्र फलानुकूलः फूत्कारादिर्व्यापारः समूहघटकः फूत्कारत्वाधःसंतापनत्वा
दि तत्तद्रूपेणैव वाच्यः प्रागुक्तहरिकारिकाभ्यां तत्तद्रूपेणैव बोधकत्वाभावात् अत एव देवदत्तः पचतीत्युक्ते स फूत्का ।
रादिमात्रं वेति संदेहो न नानार्थत्वमिष्टमेव तत्र पदार्थो वक्तुर्बुद्धिस्थस्तदा स वाच्यः अत एव काष्ठानि पचतीति

मंजू॰
६२

सिद्धं तद्व्यापारस्य धात्वर्थत्वाद्विक्लित्त्यां काष्ठैः पचतीति क्रियातावच्छेदकं तु पचित्वादि धातुत्वं तु नातिप्रसक्तत्वात् धातु
त्वाग्रज्ञानतोपि बोधश्च एतेन धातुत्वेन धातुमात्रस्य क्रियात्ववति शक्तिः नतु रूपेण नतु तद्रूपावच्छिन्नबोधकत्वा
मित्यपास्तं गौरवात् तादृशशक्तिग्रहस्यादृष्टमात्रार्थत्वाच्च फूत्कारे एव गृहीतशक्तिकस्य प्रयोजनेन वह्निप्रज्वालनरू
पायां पचतीति नेष्टमेव फूत्कारातिरिक्ते विक्लित्त्यनुकूलत्वाग्रहे तत्रापि तन्नेष्टमेव यागः इच्छा ज्ञानं वेति वादिविप्रति
पत्तिरपि तत्तत्पुरुषीयतादृशबोधानुसारादेवोपपन्ना धातूनामनेकार्थत्वात् कदाचित्क्रियात्वेन बोधोपि फूत्कारस्या
नीतत्वमात्रेणापादीप्तिप्रतिरनुभूतत्वादेः समुदाये एवान्वयात् अस्ति भवति विद्यतीनामर्थः सत्ता नैककालस्था
यिनीति कालगतपौर्वापर्येण क्रमवतीति तस्याः क्रियात्वं तदुक्तं हरिणा आत्मभूतः क्रमोप्यस्या यत्रेदं कालदर्शनं
पौर्वापर्यादिरूपेण प्रविभक्तमिव स्थितमिति अस्याः क्रियायाः यत्र क्रियायां कालदर्शनं कालगतपौर्वापर्यस्य
तत्रारोपवृत्तिहेतोरात्मेत्यर्थः यद्वा सत्ताविषयव्यापारार्थकत्वेन क्रियावाचकत्वनिबंधनधातुत्वसिद्धिः सत्ता चाषड्भाववि
कारादनुभूतं यद्रूपं सदिति प्रत्ययवेद्यं तत् तद्विषयव्यापारश्चात्मभरणस्वरूपधारणपर्यायमुच्यते आत्मस्वरूपेणस
त्तैव साधारणस्थूलस्वरूपात्मिका ग्रियते तेन सागानुकूलव्यापारस्येवात एव परीक्षेत्यत्र धारणानुकूलव्यापारस्येवो
त्पत्तेरवरोपेत्यत्र रक्षणानुकूलव्यापारस्य प्रतीतेः स्पष्टं चेदं भूवादिसूत्रे भाष्ये तदुक्तं निरुक्ते षड्भावविकारा भवं
तीति वार्ष्यायणिः जायतेऽस्ति विपरिणमते वर्द्धतेऽपक्षीयते विनश्यतीति जायत इति पूर्वभावस्यादिमाचष्टे नापरं नावमाचष्टे

न प्रतिषेधति। अस्तीत्युत्पन्नस्य सत्त्वस्यावधारणमिति भावस्य निरूपपदभावव्याख्यावाच्यस्य जगत्कारणस्य सत्तारूप
ब्रह्मणो निष्क्रियस्यापि षड्ते ते विकारा इव विकाराः मायासहकारेण क्रियारूपा विवर्ताः अन्यत्र प्रधानादिषु प्रधानभावे ऽस्या
द्विरोस्यासोपपदं पदभावव्याख्या प्रयोगः इत्यपि ते च भारतेया ज्ञवल्क्यं प्रति शिवविवाक्ये प्रयोगः कृत्स्नं ज्ञानपथं चैतत्त्वं प्रणेष्यतीवे
द्विज तस्यां ते च पुनर्न वृद्धिस्तव न विष्यति इति जायते ऽस्ति च षड्भावेषु पूर्वस्य जन्मनेरादिमिस्तुपलक्षणमुपक्रमप्रभृत्यप
वर्गपर्यन्तं जात इति व्यवहारं यावन्नु भावमाचष्टे तदापरं भावमस्याख्यम सतो जन्मायोगादिद्यमानमपि नाचष्टे ज्ञाख्या कि
स्वनावात् नापि प्रतिषेधति निर्णलं वनं जायते ऽस्य भावते: अस्तीति चोत्पन्नस्य सत्त्वस्य सत्तावत: तादृशास्यस्थूलरूपस्याव
धारणमाचष्टे इति तज्ज्ञाख्यकृत: भावनाफलयोरेकनिष्ठत्वाच्च गच्छतीत्यादाविव न स्पष्टं प्रतीति: आसन्नविनाशं किंचि
दुद्दिश्य किं करोतीति तत्र प्रश्ने ऽस्तीत्युत्तरं न स्य व्यापारवाचकत्वं अन्यत्र तु सुस्थतया निश्चिते किं करोतीति प्रश्न: पाकादिगो
चर एवेति निर्णयात् अस्तीति नोत्तरं किं च व्यत्यमनुष्यते ऽन्यत्र कर्तरि कर्मव्यतिहारे ऽस्यात्मनेपदस्य दर्शनात्तस्य क्रियावाचकत्वं क
र्मव्यतिहारश्च तत्तत्क्रियाव्यतिहार इति भ्रमर्गश्रुत्यो मितिमत्त्वे भाष्ये स्पष्टं घटो भवतीत्यादावुत्पत्त्यनुकूलव्यापारो।
र्थः स व्यापारस्य साध्यत्वेनाभिधीयमानानाम प्रयत्नैव पातंजलनये सर्वपदार्थानामवस्थादिरूपेण प्रतिक्षण परिणा।
मित्वया तत्तस्य परिणामविशिष्टोस्त्विति निरूपिताना नामाप्रयतानामनेकतया पूर्वापरीभूतावयवकत्वात्तते: सत्तायामि
वकालगतत्वेर्वापर्यशेषेण वायथाम त्कार्यवादे कारणात्मनासदेव यावत्स्थूलं रूपं न प्रतिपद्यते तावज्जा[illegible]ते ऽस्त्युच्य

मं.जू.० नेतव्यतिपत्तौत्वस्तीतितत्रतत्पापकव्यापारस्यारोपात्तस्याः क्रियात्वंअस्तीत्यस्यचसत्तांनावयतीत्यर्थइतिबोध्यंज्ञा
६२ नंब्रह्मेत्यादौज्ञानातेर्नावेत्युक्तनचतस्यास्वंउक्तेननित्यत्वेनचपूर्वापरीभूतावयवकत्वेननानारूपत्वंतत्कृतेर्ज्ञानातेर्धा
तुत्वमितिवाच्यंवृत्तज्ञिअस्केज्ञानेवृत्तिधर्मारोपेणतत्प्रतीत्याज्ञावितदारोपान्नतत्त्वोपपत्तेः ब्रह्मणो निर्विकारत्वा।
निर्धर्मकत्वादिश्रुतिविरुद्धतत्स्यारोपितत्वमेवोचितंशुद्धंचितस्यत्वमत्रैवाज्ञाविनिषेधवाक्यसहकारेणाखंडार्थो।
बोधःनिषेधवाक्यैरेववासः एकमेवब्रह्मेत्यादौनवुंसकत्वाद्युपपत्तिरित्यन्यत्रविस्तरः सकर्मकत्वंचव्यापारव्यधिक।
रणफलवाचकत्वंतत्समानाधिकरणफलवाचकत्वमकर्मकत्वंयद्वाव्यापारव्यधिकरणफलवाचकत्वाभावोऽ।
कर्मकत्वंसचक्कचित्सामानाधिकरण्यात् यथोत्तिष्ठतीत्यादौअस्यचोर्ध्वदेशसंयोगस्यविद्यमानत्वेउत्थितत्त्व
तिप्रयोगानापत्तिः ममनुतत्समानाधिकरणस्यतदनुकूलव्यापारस्यातीतत्वात् तस्यविद्यमानत्वेपितदुप
पत्तिः अतएवपरिवंथंचतिष्ठतीत्यादौक्रियाविशेषणत्वात्कर्मत्वेनद्वितीयांतत्वमितिसंगच्छते क्वचित्फलांश
भावात्तत्वंएवंवास्त्यादौकेवलसत्ताद्येवार्थः निरुक्तेउत्पन्नस्यसत्वइत्यस्यत्वरूपधारणरूपासत्तामात्र
श्चेइत्यर्थःतस्यापिक्रियात्वंउपपादितमेव यद्वातत्त्वारणेकर्मकोत्तानियतासमकर्मकइतितुनयु।
क्तं गच्छत्यादिषुतदाकांक्षाभावात् क्वेत्येवहितत्राकांक्षा अकर्मकभिन्नत्वंसकर्मकत्वमित्यपिनस।
कर्मकाणामव्यर्थांतरेऽकर्मकत्वेनासंभवापत्तेः एतेनसकर्मकधात्वस्यतमत्वंसकर्मकत्व[illegible]मपा। ६२

त्त्वं वस्तुतस्त्वेतत्सूत्रीयकर्मसंज्ञकार्थान्वय्यर्थकत्वं सकर्मकत्वं तदनन्वय्यर्थकत्वमकर्मकत्वं तेनाध्यासितान्नमयः
स्यादित्यादिसिद्धिः अत्राधिशीङ्स्थासामित्यनेनाधारस्य कर्मत्वं अन्वयश्च पृथक्बुद्धेन संसर्गरूपः अन्वयपदस्य तत्रैव मुख्य
त्तेः तेन जीवसादिषु न दोषः तत्र प्राणादिरूपकर्मणो धात्वर्थस्य पृथगबोधात् स्पष्टं चेदं सुपत्म्यात्मनेऽस्य तत्र भाष्ये पूर्वसक
र्मकलक्षणेऽत्वे तदर्थफलाश्रयावाचकत्वेमनीतिविशेषणदाने गौरवं अत्र सकर्मकलक्षण एवतास्यर्थमकर्मकलक्षा
णं त्वर्थलभ्यं यत्तु पूर्वसकर्मकलक्षणे फलेऽविवक्षाविरहविशिष्टेति विशेषणादविवक्षितकर्मसु नातिव्याप्तिः न च ता
तस्यर्थकानि ण्णाएव धातवऽइति अविवक्षितकर्मसु फलवाचकत्वाभावादेव नातिव्याप्तिरिति वाच्यं सकर्मकपदे धातूना
मन्यपदार्थत्वेन कचिदपि कर्मसंबंधदर्शनेन मारूप्यात् एवैतेऽइति तत्वत्र स्यविषयाणामेकत्वेनाविवक्षितकर्मणां
धातूनामकर्मकव्यपदेशासंभवात् स्पष्टं चेदं गतिबुद्धीति सूत्रे केचिदेऽइति तत्र मातुः स्मर्यतेऽस्य त्राविवक्षितकर्मतया
भावेलऽस्य धीगर्थेति सूत्रस्य भाष्यविरोधापत्तेः तत्र फलांशस्य सत्त्वे एव संबंधसामान्येनान्वयो ननु तदविवक्षाधातो
रर्थान्तरे वृत्तेर्धात्वर्थेनोपसंग्रहात् प्रसिद्धेरविवक्षातः कर्मणोकर्मिकाक्रियेत्यभियुक्तोक्ताकर्मकसंग्रहकारिकायां
अविवक्षातऽस्यस्य पृथगुपादानवैयर्थ्यापत्तेश्च नवडीस्याफलस्य धात्वर्थविवक्षायां धातोरर्थान्तरे वृत्तेरेव संप
त्ते किंच विशेषणदानेपि कचिदविवक्षाविरहविशिष्टफलवाचकत्वेन तत्त्वप्रसक्तिस्तयातिव्याप्तिरितिवारेवयदित्वर्थ
नेदा व्युत्पत्तेरऽइतिमधातुर्भिन्नाएवेसुच्यते तदोक्तरीत्याविशेषणदानं व्यर्थमेव किंच कर्मणा सहेत्यर्थकसकर्मकपदा।

स्यनेदं प्रवृत्तिनिमित्तं ततः शास्त्रमर्यादयाऽलाभात् लक्षणत्वेपि तेन रूपेण लः कर्मणि त्यादौ सकर्मकपदाद्बोधानाप
त्तिः शास्त्रग्रहात्तु तथा बोधानुभवेन तत्करणानुपयोगाच्च तस्माच्छास्त्रमर्यादया लब्धं सकर्मकत्वमेवोचितं कारिकायाम।
विवक्षानामयेन रूपेणान्वयविवक्षा यस्य कर्मसंज्ञा तेन रूपेणान्वयविवक्षाभावः स च क्वचिद्विशेष्याभावकृतो यथा।
नेह पच्यतेऽस्मादौ क्वचिद्विशेषणाभावकृतो यथा मातुः स्मर्यतेऽस्मादौ कार्यप्रवृत्तिवेलायामविवक्षा पश्चाद्विवक्षेत्य
पि क्वचित् यथा कृतपूर्वी कटमित्यादौ कृतपूर्वीत्यादिवृत्तिविषये एवेदं नान्यत्र धातोरर्थान्तरे वृत्त्या यथा नदी स्यन्दतेऽस्त्य
र्थक नदी वहतीत्यादौ प्रसिद्धेरित्यस्य प्रसिद्ध्या रूढिरित्यस्य आहारेण तद्वाभात् तत्प्रयोगाभाव इत्यर्थः ननु तत्राकर्मकत्व
प्रयुक्तं कार्यं नाप्नोत्यनुक्तत्वात् अत आहाऽकर्मकपदस्य कर्मपदेन कालभावाध्वदेशभिन्नानामेव ग्रहणं गतिबुद्धीति सू
त्रे सजातीयापेक्षसकर्मकविषयनियमेन सिद्धेऽकर्मकग्रहणसामर्थ्यादिति गतिबुद्धि कालाध्वनोरित्यत्राप्येतत्स्पष्टम्
तेन मासमास्यते इति भावे लादिसिद्धिः पचेर्विक्लित्त्यनुकूलव्यापारोऽर्थः स चानेकविध इत्युक्तं नश्यतेरदर्शनानुकूल।
व्यापारोऽर्थः स च ध्वंससामग्रीरूपोऽवधानाद्यनुकूलव्यापाररूपश्च उत्पत्तिरोकाके नष्टं तज्जन्यं भवतीति निष्ठेति।
सत्त्वेनाप्येव प्रयोगात् हतं नष्टं च लभ्यते इति स्मार्तप्रयोगाच्च तत्र व्यापारे कालात्ययः एतेन नाशस्य नित्यत्वे सर्वदा न
श्यतीत्यापत्तिरित्यपास्तं ध्वंसस्यातिरोभावावस्थाकारणेन शक्तिरूपेणावस्थानं च प्रागभावः ततः प्रच्युतानिव्यक्तिल
क्षणं धर्मम प्राप्ताव्यक्तिर्जायतेऽस्तु अनेतिरोभावावस्थैव लब्धकर्मानश्यतीत्यनेनोच्यतेऽस्मन्ये ज्ञानातेर्विषय।

तथाज्ञानंफलंआत्ममनःसंयोगोव्यापारःअतएवमनोजानातीत्युपपद्यतेआत्मात्वांतःकरणंमनोवित्तइतिविशेष
रूपंतत्रोभयोरपिसावयवत्वात् अवच्छेदकांशासंभवेनसंयोगउपपद्यतेमनोनिरवयवंआत्मापिज्ञानाश्रयोनिरवयवइति
नयेवच्छेदकांशासंभवेनसंयोगानुपपत्तेःतदभ्युपगमेपिउपपन्नपयन्धर्मोविकरोतीतिहिधर्मिणमितिन्यायेनज्ञानाश्रयत्व
स्यसंयोगस्यचात्मनाशएवपर्यवसानात्तन्नित्यत्वमनुपपन्नंएवमाकाशस्यापिसावयवत्वंतदुक्तंखंडनकृतासंयोगो
व्याप्यवृत्तित्वादेकदेशोस्तिसंमतःतदेकदेशस्यप्रश्नेसंयोगएवकःतस्मादणौनिरंशोनितरांकल्पितेकल्पितंजगदिति
निरंशोव्यणौसंयोगकल्पनायांसर्वथाजगतःकल्पितत्वमेवेतितद्भावःकणादःपारिमांडल्यसंयोगाद्यणुककमा
नुजगदुत्पत्तिमनुमायावादस्मादरमानमस्मइतिप्रघट्टकांतरेतदुक्तेःयत्वावरणभंगोविषयतावाफलंविषयताया
यथाफलत्वंतथाकारकोनिरूपयिष्यामःव्यापारस्तुज्ञानमेवेतितन्नकर्मस्थक्रियकत्वापत्तेःतथात्वस्याचेत्यमुक्तं।
हरिणाविशेषदर्शनंयत्रक्रियातत्रव्यवस्थिताक्रियाव्यवस्थात्वन्येषांशास्त्रेइवप्रकल्पितेतिअस्यार्थःयत्रकर्मणि
कर्तरिवाक्रियाकृतोविशेषःकश्चिदुपलभ्यतेतत्रक्रियाव्यवस्थितेस्यात्अन्यत्रइतिशेषःनन्वेवंपच्यादिकर्तर्यपिप्रमादि
रूपविशेषदर्शनादिदमयुक्तंकिंचिच्चितयतिपश्यस्यादीनांकर्तृस्थभावकत्वानुपपत्तिःकर्तरिक्रियाकृतविशेषाभा
वात् अतोत्वेषामितिमतेइतिशेषःयत्रकर्तृकर्मसाधारणमर्थरूपंफलंशब्देनप्रतिपाद्यतेसकर्तृस्थभावकःय
थाव्रजतिघटंग्रामंगच्छतिहसतीस्यादौतत्रविषयतासमवायाभ्यांज्ञानमुभयनिष्ठंसंयोगश्चोभयनिष्ठःएवंहा।

सोपिनचविषयतावरणभंगाद्वेवंयत्रानुकर्तृवृत्तिधर्मरूपंफलंसकर्मस्थभावकः यथाभिनत्तीत्यादौनहिद्विधाभवना
दिकथमपिकर्तृनिष्ठंप्रतियंतिइति हेलाराजः अतएवकर्मवद्वितिसूत्रेभाष्येउक्तंनचकर्तृस्थभावकानांकर्मणिक्रिया
याः प्रवृत्तिरस्तीतितेषांधातूनांवाच्यायाः फलरूपक्रियायाः कर्ममात्रेप्रवृत्तिर्नास्तीत्यर्थः कारिकाशब्दोक्तार्थपरत्वे
जानात्यादिकर्तृयविक्रियाकृतविशेषानुपलंभेनचिंतयतिगच्छतीत्याद्युपक्रमस्यकर्तृस्थभावकानामित्युक्तासंगतेः ए
वमिच्छतेरिच्छानुकूलंज्ञानमर्थः अतीतानागतयोरपिबुद्ध्यारोहात्फलत्र्यालित्वंआत्मानंजानातीत्यादावंतःक
रणावच्छिन्नः कर्त्ता शरीरावच्छिन्नः कर्मेतिकर्मवत्सूत्रेभाष्येस्पष्टं ब्रह्मज्ञानातिभवितात्रकाशतेइत्यादौविषयो
पहितज्ञानस्यतदुपहितप्रकाशस्यचजन्यत्वात्कर्तृत्वंब्रह्मणविज्ञोः पतिर्गमिवत्सकर्मकोनरकंयतितइत्य।
दिप्रयोगात्विभागजन्यसंयोगमात्रपरत्वेऽकर्मकत्वंबोध्यं रुजन्नस्यतिअधिकरणस्तदनुकूलव्यापारोर्थः यत्न
मात्रार्थकत्वेऽकर्मकत्वापत्तिः यतिवत् किंचकर्मस्थभावकत्वाभावात्कर्मकर्तरिकर्मवद्भावानापत्त्यायगाद्य
नापत्तिः कृतिरित्यादौधातूनामनेकार्थत्वात्यत्नमात्रेपिवृत्तिः यद्वायत्नकृतिशब्दयोरपिव्यापारसामा
न्यवाचितैवातएवस्थालीस्थेपलेकथ्यमानेइतिकारकेइतिसूत्रेभाष्येप्रयुक्तमित्यलं अनुभूयतेसुखंमा
त्राक्रियतेगुरुरित्यादौनिपातानांद्योतकत्वेनानुभवसाक्षात्काररूपफलयोर्धात्वर्थत्वेनसकर्मकत्वंएते
ननिपातस्यैवतदर्थकत्वमित्यपास्तंकर्मसंज्ञकार्थान्वय्यर्थकत्वंसकर्मकत्वमितिमतेपिफलाश्रयत

याकर्मसंज्ञकस्य धात्वर्थफलेऽवान्वयोपि सेन द्योतकत्वमेवावरूपकं द्योतकत्वं च समभिव्याहृतगतवृत्तबो-
धकत्वं प्रायेण क्वचित्तु क्रियाविशेषद्योतकत्वं तद्यथा प्रादेशं विलिखतीत्यादौ विविर्मानक्रियाक्षेपकः प्रादेशं
विमाय लिखतीत्यर्थावगमात् क्वचित्तु संबंधपरिच्छेदकत्वं यथा कर्मप्रवचनीयानां अथ शब्दस्तु शासनमित्यत्रा-
थ शब्दस्य प्रारंभक्रियाक्षेपकः कैयटादावुक्तं एवमस्मदुक्त्यां विशिष्टस्य तु न धातुत्वं अपाठात् अडाद्यभावस्यापा-
तेश्च एतेनोपसर्गाणां द्योतकत्वं तदितरनिपातानां वाचकत्वं मानाभावात् पक्षद्वयतुल्ययोरिति कोशात् नमः पदे नमः-
स्कारार्थत्वस्य लोकप्रसिद्धत्वाच्च सकर्मकत्वं च स्वस्वसंयुक्तनिपातान्यतरार्थफलव्यधिकरणव्यापारवाचकत्वं
कर्मत्वमपि एतादृशफलाश्रयत्वमेवेति नकर्मेति लकारानुपपत्तिरित्यपास्तं वैषम्ये बीजाभावात् अनुभूयते
ऽस्य समासात् क्रियतेऽस्मैनेन समत्वात् कर्मसंज्ञकार्थत्वस्य पर्थकत्वं तत्त्वमिति निष्कर्षमते उक्तरीत्या द्योतकतां वि-
भागस्याभावाच्च लः कर्मणीत्यादौ तेन रूपेण बोधस्य दुर्लभत्वाच्च प्रमनरत्वस्यापि गुरुत्वात् उक्तेयत्वाच्च यत्तु उप-
सर्गो द्योतक उपसर्गादिस्तु मानेन परे लोपसर्गाणां तत्त्वसाधने शक्तिसंबंधे न निपातपदत्वं तत्त्वरूपं अखंडं वा निपा-
तत्वं पदतावच्छेदकीकृत्य निपातत्वेनैव हेतुना वाचकत्वानावसाधनं युक्तं प्रमाणानां सामान्येपक्षपातादिति तत्त्व-
ततोऽपि सामान्यधर्मोपपत्त्यावच्छेदेनैव तत्सिद्ध्यापत्तेः निपातत्वं द्योतकतायहेवच्छेदकमिति तु न युक्तं तत्ता-
दृश्यैनिरूपितद्योतकत्वस्य तत्तन्निपातवृत्तितया तद्व्यसाधारणधर्मस्यावच्छेदकत्वावश्यकतया सामान्य-

मंजू० ६६

धर्मस्यावच्छेदकत्वे मानाभावात् निपातत्वाद्यज्ञानेऽपि बोधाच्च यद्यपि निपातानां वाचकत्वे चोऽनेन समुच्चय
इति वक्तुं शक्येत तस्यापत्तिः घटस्य समुच्चयः स्यस्यस्यानेघटस्य चेतस्या व्याप्तिरिति तल्लाघवाच्छक्तिस्वाभा
व्येन निरूपकत्वं च तथा निपातैः स्वार्थस्य परविशेषणत्वेनैव बोधे न विशेषणान्वयाप्रसंगात् षष्ठ्याद्यापत्तेः किंच घटं प
टं चेत्यादौ घटमित्यस्य क्रियायामेवान्वयः अतएव ततो द्वितीया घटं समुच्चयवंतं पटं पश्येति बोधः नत्र समुच्चयस्य प्र
तियोग्याकांक्षायां संनिहितत्वात्तु घटस्य प्रतियोगित्वं पटे तु समुच्चयस्य भेदेनान्वयो न तु परस्य समुच्चये इति क्व षष्ठ्या ।
पादनं नामार्थयोरभेदान्वयव्युत्पत्तिस्तु निपातातिरिक्तविषया वस्तुतोऽव्ययेषु नामत्वमेव नेत्यग्रे वक्ष्यामः अतए
व समुच्चित्यानंतरं चादिप्रयोग इति वृद्धाः यद्वा समुच्चितस्यार्थः स्वभावात् क्वाप्युपस्थाति तस्मात्तच्छक्तत्वं न उक्तं
समुच्चिताभिधाने च व्यतिरेको न विद्यते इति धर्म्यंशे शक्तिकल्पना गौरवं प्रामाणिकत्वान्न दोषाय । निपातानाम
र्थवत्त्वमपि द्योत्यार्थमादायैव शक्तिलक्षणाद्योतकतान्यतमसंबंधेन बोधकत्वस्यैवार्थवत्त्वात् नञ्समासे
उत्तरपदार्थप्राधान्यमपि द्योत्यार्थापेक्षयैव प्रतिष्ठते इत्यत्र तिष्ठतिरेव धातूनामनेकार्थत्वात् गतिवाची प्रशब्द
स्तु तदर्थकत्वस्य तत्कृतादित्वस्य च बोधक इति भूवादिसूत्रे भाष्ये स्पष्टं यद्यपि लोके विशिष्टादेव विशिष्टबोध इ
ति विशिष्ट एव क्रियावाची तथाप्यहादिष्ववस्यार्थे धातूपसर्गयोः शक्तिः पृथक्कल्पने एवं चांतरंगत्वादुपसर्गयोगो
तएवोपाध्यते गुरुरिति कर्मणि लकारः एतन्मूलक एव सर्वो धातुः सोपसर्गेण युज्यते इति प्रवादः वाद्यस्य साध ६६

नयोगः अत एव चस्कारे स्याद्दौ श्रुर्वेसुट् ननु तः साधनप्रयुक्तकार्यः अध्ययनमिस्यादौ प्रत्यय इत्यादि निर्देशो नकृति
प्रत्ययनिमित्तकार्यात्प्रागुपसर्गनिमित्तकार्यो प्रवृत्तेर्ज्ञापनेनादोषः एतन्मूलकमेव पव्युते श्रुर्वे धातुः साधनेन प्रयुज्य
ते पश्चात्स्यश्चादुपसर्गेणेतीति न व्याः वस्तुतस्तु सुट्कात्पूर्वोगतिर्गताविसत्र भाष्ये उक्तं धातूपसर्गयोः कार्यमंतरंगं
कृतमेतत् पूर्वं हि धातुरुपसर्गेण युज्यते पश्चात्साधनेनेति उपसर्गेण तत्संज्ञके न साधनेन तत्प्रयुक्तकार्येणेति तद
र्थः इतरस्त्वाह नैतत्सारं पूर्वं हि धातुः साधनेन युज्यते पश्चादुपसर्गेण साधनं हि क्रियां निर्वर्त्तयति तामुपसर्गो विशिन
ष्टि इति साधनेन तत्प्रयुक्तकार्येण हि यतः साधनं क्रियां निर्वर्त्तयति साध्यत्वे वैशिष्ट्येन बोधयति अतः पूर्वं तत्प्रयु
क्तं कार्यमिति भावः तदुक्तं न वाहिस्त्रे कैयटे न साधनसंबंधेनाध्यवसीयमानसाध्यरूपेति निश्चीयमानसाध्यत्वे
नार्थः तां तेन रूपेण बुद्ध्वा उपसर्गः तत्संज्ञकशब्दो विशिनष्टि स्वद्योत्यविशेषणवैशिष्ट्येन बोधयति साध्यत्वेन ज्ञा
नं विना क्रियायोगे विहितोपसर्गसंज्ञकशब्दयोगत्वानादिति तदर्थः क्रियायोगश्च क्रियाविशेषणीभूतार्थद्योतकत्व
मेव इतरस्त्वाह सत्यमेवमेतत् यत्वसौ धातूपसर्गयोरभिसंबंधस्तमभ्यंतरं कृत्वा धातुः साधनेन युज्यते योहि मन्व
ते पूर्वं धातुः श्रोत्रवो धार्थमिति शेषः यद्यप्युदारादीनां व्यवस्थार्थश्च यत्वेन प्रकल्पनं धातूपसर्गयोः शास्त्रे धातुरे
व तु तादृशा इति तादृशा एव विशिष्ट एव तु धातुः क्रियावाची स्पर्थः क्रियाविशेषाः संघातैः प्रकल्प्यंते तथाविधाः कार्या
णामंतरंगत्वमेव धातूपसर्गयोः साधनेयीति संबंधं तथा भूतेव सा क्रियेत्युक्तं हरिणा तथापि भाष्यसंमतत्वाद्

ध्यमेवयुक्तंधातूपसर्गकार्यस्यांतरंगत्वंतच्छब्दोपस्थितांतर्भूतार्थकनिमित्तकत्वात्बाह्यसाधनकार्यप्रत्ययनि
मित्तंतुछित्वाद्विवहिरंगमितिभावः इदमेवाभिप्रेत्यसंप्रसारणाच्चेतिसूत्रेभाष्येअद्यआऊढाअद्योढेत्यत्रधातूप
सर्गकार्यत्वेनांतरंगत्वाद्गुणेप्राप्तेअस्यपररूपंकथं तत्कार्यमंतरंगपूर्वमुपसर्गस्यहिधातुसाधनेनयुज्यतेपश्चादुप
सर्गेणेति तस्मात्स्पतेगुरुरित्यकर्मकः उपास्यतेगुरुरितिकेनसकर्मकःस्यादिति एवमेतत्धातुःपूर्वंसाधनेन
युज्यतेइतियदुक्तंतत्स्यमेवतत्संबंधंविनासाध्यत्वेनापर्यवसानात् कथंतर्ह्युपसर्गकार्यस्यांतरंगत्वंतत्राह
यस्त्वसाविति यस्तवधातूपसर्गसंबंधकृतत्वेनाभिमतोर्थस्तमुपसर्गसंज्ञकसंबंधमंतरेणापिधातुरस्यांतरंकृ
त्वाऽर्थेनांगीकृत्यसाधनेनयुज्यतइत्यर्थः अयंभावः वक्ताधातोरेवविशिष्टमर्थंबुद्धौकृत्वासाधनसंबंधका
र्यप्रत्यययोगेततःसाध्यत्वावगतौप्रोत्तरवोधायक्रियायोगनिमित्तोपसर्गसंज्ञकशब्दंकरोति अन्यथाकेवल
धातुतःसर्वत्राप्रतीयमानतयाप्योत्तुमुत्तद्वोधोनस्यादितितदुक्तंभूवादयइतिसूत्रेकैयटेनानेकार्थत्वाद्धातू
नांविशिष्टोर्थोधातोरेवोपसर्गस्तुवोधारंप्रतितदर्थद्योतकइति एवंचपूर्वमुपसर्गेणयोगोनामतदर्थसंबंधः
ततउपसर्गशब्दयोगात्पूर्वंसाधनकार्ययोगःततउपसर्गशब्दयोगइतिपरिभाषार्थइत्यार्थः तदुक्तंहरिणा धा
तोःसाधनयोगस्यभाविनःप्रक्रमाद्यथाधातुत्वंकर्मभावश्चतथान्यदपिदृश्यतां बुद्धिस्थादपिसंबंधात्तथाधा
तूपसर्गयोः अभ्यंतरीकृतोभेदःपदकालेप्रकाशतइति अस्यार्थःयथाभाविसाधनसंबंधाश्रयणेनक्रिया ६७

वाचित्वमाश्रित्यधातुसंज्ञोच्यते यथाचन्नाविषिकर्मत्वमाश्रित्योपक्रमेएवषिकर्मत्वमुक्तं तथानाम्युपसर्गसंबंधा
दुपक्रमेएवंविशिष्टक्रियावचनत्वंदृश्यतांधात्वुपसर्गयोः संबंधबुद्धिविषयीकृत्योपसर्गार्थेकृतोविशेषोधातुनैवाभ्यं
तरीकृतपदप्रयोगकालेउपसर्गसंबंधेमतिप्रकाश्यतेश्रोतॄणामतिशेषः तथाप्रयोगार्हेसुसिद्धः सत्यन्नेदस्यार्थोवि
शेषणैः प्राक्तत्वसाधनसंबंधात्क्रियात्वेवोपजायतइतिचप्रयोगार्हत्वंचप्रत्ययोस्यनैतरंतेषुशब्देषुसुसिद्धः सन्ने
वविशेषणैर्भेदव्यः विशेष्यः नायोगोभवतिधातोस्तदर्थीनभविष्यबोधजनकत्वस्यतत्संबंधंविनाअभावात् अच्छ
शब्देनतुनाशेयोगः धात्वर्थक्रियाप्रसत्वादाधारस्यकिमर्थंतर्हिअच्छशब्दः प्रयुज्यतेआङएवविशिष्टस्याप्यधातु
त्वेनानन्वयात् अच्छशब्दस्यापिसमुदायेनयोगोभवतिआङोद्योतकत्वेनविशिष्टस्यधात्वर्थत्वादित्युक्तं तेनै
तद्बोधपतिष्ठ्वीधातोःसाधनकार्ययोगस्ततउपसर्गसंज्ञकशब्दसंबंधस्ततोभिन्नपदवाच्यकारकसंबंधइतिएवं
चसाध्यत्वंनिष्पादिस्वरूपमेवनामतेइतिभाष्यसंमतंकिंचोपसर्गाणांद्योतकत्वमेवभाष्यसंमतंअतएवोपपदमा
तिङितिसूत्रेधातूपसर्गयोः समासमाशंक्यपूर्वंधातुः साधनेनयुज्यतेइतिश्लोकेतिङिविशिष्टेनैवसमासः स्यादजाति
ङितिनिषेधान्नतिङंतेनैकार्थीभावसमाहितंपूर्वंधातोरुपसर्गसंबंधेउपसर्गस्यवाचकत्वेचनतत्रसमासोवारयितुम
शक्यएव नचलकारमात्रोस्यापिसाधनसंबंधोजातएवेतितदासमासोदुर्वारः नचतस्यकाल्पनिकमर्थवत्वं
विभक्तीनामपितादृशार्थकत्वस्यार्थवत्सूत्रेभाष्यादिमत्रेचभाष्येकैयटयोः स्पष्टत्वादितिवाच्यं साधनस्यसंख्या

ं: ६०स्लो० वैशिष्ट्यनियमेन संसृष्टेतदाकांक्षानिवर्त्तकतिङमुपस्थापयेत् तदाकांक्षानिवृत्तेः तिङ्पदे न तिङन्ताविनोपि ग्रहणाद्य न
६८ चैवं परमगार्ग्यस्यायस्य मिश्रपदे परमगार्ग्यायण इत्यादौ परमसंसृष्टस्यापि गार्ग्यस्य केवलस्याप्यतस्ये नैकार्थीभावाङ्गीकारो
ऽस्त्यादेव फक अत एव प्रकाराकारस्य न वृद्धिरिति येन विधिस्तदन्तस्येति सूत्रे भाष्ये स्पष्टं तदीसा अपि समासोऽवरा
त्तिङर्थे हि तेनापि सामर्थ्यस्य सुवचत्वादिवाक्ये वस्यमानादिस्यातिङा कर्त्रादिद्योतकत्वेन विशिष्टस्य धात्वर्थत्वात्
तस्य च क्रमप्राप्तत्वात् तत्राप्युपसर्गार्थोत्तरंगतद्विशिष्टस्य साधनाकांक्षत्वान्नद्योत्यपि कर्त्रादिर्बहिरंगः प्रपिपठिषति
स्यादौ समानकर्तृकादिसुक्तेः सनर्थसाधनतेनैव प्रकृतेरपि तदाकांक्षाशान्तेः सनैकार्थीभावान्नद्विशेषणत्वाच्च
प्रकृत्यर्थस्य तदुत्तरं प्रादियोग इति न समासः इतोप्युपसर्गाणां वाचकत्वं निरस्तं विशिष्टायाएव क्रियाया इषिकर्मत्व
स्य प्रतिपाद्यतया सापेक्षत्वेनासामर्थ्यात् सनुरस्य नापत्तेः नेर्विशाइत्यादि: नेःपरत्वयोग्याद्विशिरित्यर्थः संप्रचेति
स्यादेरपि संसृष्टत्वयोग्यासच्चेरित्यादि क्रमेणार्थः गोसंदायइत्यादावपि संघोत्यार्थविशिष्टाधातोः कर्मण्युपपदे वुद्धि
स्येऽणि ततः समायोगे गतिसमासे उपपदसमासो वो बाधः यद्यप्युपसर्गमुपसर्गमुपक्रम्य सवाचको विशेषाणां संख्या
द्योतकोपि वेत्युक्तं हरिणा यथा प्रतिष्ठते इत्यत्र गतिनिवृत्तिवाचको धातुः उपसर्गो गतिवाचक इति पुंजराजस्तथा
पि तिष्ठतेर्धातुत्वेन यत्स्यादिवदनेकार्थत्वाद्धातोरेव गतिरर्थः प्रशाष्टस्तु द्योतक एवोपसर्गत्वात् प्रपचन्तीत्यादिस्या
प्रशास्त्रवदित्यर्थिकयास्यादिति: केवलैर्यच्चागमनादिगम्यते तत्रानुमानादिविधात्तरुमपिप्राविरुध्यते इति कारि ६८

कयाचित्संज्ञविनोभेदाः केवलैरनिदर्शिताः उपसर्गेणसंबंधे अजंतेऽपरादिनेस्तनयाचद्योतकत्वमेवोपस
र्गाणां सिद्धांतितं तद्वद्धर्मीद्योतकत्वधर्मी क्वचित्तूपचरादौ यत्तु भावेप्रत्ययस्तत्राप्यंतरंगत्वाज्झित्वपदोपात्तकर्त्रा
दिनासाध्यतां शोभितरोकां हत्ते उपसर्गयोगइति तत्रापि न समासः अतएव ल्लेरप्ययते इत्यादिसंगच्छते अध्यागच्छ
तीर्थयागच्छती साध्वागच्छती स्यस्मादेवागमनस्यावगस्ता लौकिके शाब्दव्यवहारे लाघवानादरात्स्पष्टार्थमेवाधि
पर्योः प्रयोगइति संभूयार्थबोधकत्वात्समुदायएव विशिष्टार्थबोधकइत्युपसर्गस्यानर्थकत्वमर्थांतराबोधक
त्वादितिबोध्यं क्वचित्तु क्रियागतविशेषबोधकातिरिक्तनिपातानां वाचकत्वमपि अतएव नेत्यतोऽभावबोधःक
स्येतिजिज्ञासा चटद्रूपते भावा शाब्दइव किंचपर्वतादाइत्यादौ पर्वतादवोगिरत्याद्यर्थप्रतीतेस्तत्रवाचकत्वमेवेतिनि
रुक्तेस्पष्टं द्योतकत्वे हि पंचमी न स्यात् तस्य विशेषणताच स्यात् अतएव स्त्रियामितिसूत्रे स्त्रीत्वस्य प्राधान्येववचना
नुपपत्तिमाशंक्य द्योतकतापक्षेण समाहितं अतएव हेतुमति चेति सूत्रे भाष्ये द्योतकतापक्षे हेतुसमीप्स्य स्यप्रकृ
त्यर्थविशेषणत्वमुक्तं स्त्रियामितिसूत्रे च स्त्रियाः प्रकृतिविशेषणत्वादि स्यनेन स्त्रीशब्दार्थस्यप्रकृत्यर्थविशेष
णत्वादिस्वर्थके न द्योतकलापक्षउक्तः तदुक्तं हरिणा निपाताद्योतकाः केचित्पृथगर्थाभिधायिनः आगमाइव
केपिस्युः संभूयार्थस्य वाचकाइति केचिदित्सुनत्यान्चयि केचित् पृथगर्थाभिधायिनो वाचकाः केचिदनर्थकाए
वेत्याह आगमाइवेति तदर्थः प्रातिमारव्येपिनामाख्यातमुपसर्गो निपातश्चेत्याचार्याः पदजातानिशाष्टः तन्नाम

मं०नू०
६९

येनानिद्र्धतिमत्त्वं तद्व्याख्यातं येन नामत्वं सधातुः उपसर्गा विंशतिरितरेऽर्थवाचकाः सहेतराभ्यां क्रियावाचकमाख्या-
तमुपसर्गो विशेषकृत्सत्त्वाभिधायकं नाम निपाताः पादपूरणा इति सधातुरित्यत्र तृतीयार्थे प्रथमा इतरे निपाता
इतराभ्यां नामाख्याताभ्यां सह वाचका इत्यर्थः उपसर्गो विशेषकृदित्यनेन तेषां द्योतकत्वं दर्शयति पादपूरणाः
पादपूरणा अपीत्यर्थः इति तद्भाष्यव्याख्यानजातीयटीकनोक्तं तत्स्वार्थिकाः न तु तत्प्रकृते प्रकारवद्वृत्तित्वद्यो-
तकाः प्रत्ययं विनापि यो हरिः सहरः सहरः सिंहो माणवक इत्यादौ प्रकृतिमात्रात्तद्बोधनात् अत एवैषां नि-
त्यत्वं नोक्तं भाष्यकारेण तेन तत्र द्योत्यार्थस्य विशेष्यतास्त्येवेति द्योत्यत्वे विशेषणत्वापत्तिरित्ययुक्तमित्यपास्तं ज्ञा-
त्सं ताख्यं वंधुनीतिलुप्त्युत्त्याश्रयरूपं वंधुवाचक एव प्रागिव्या इत्यारम्भस्य स्वार्थिकत्वं प्रायेणेति बोध्यं एवं देवतांता-
त्तादर्थ्ये यदित्यादेरपि तत्प्रकृतवचने मयडित्यत्राकरे स्पष्टमिदं शारैरुत्सेरिवोद्रीच्या अनुरिष्यतृस्यानिवेस्या-
दौ नु द्योतकता असमर्थोत्त्र सह शास्यकरणत्वेपि तत्त्रस्या करणत्वाद् उत्तरपदोत्तरतृतीयायानैरर्थ्येकं असाधु-
त्वं चस्मात् इवशब्दात्तृतीयाभावे चत्शास्यकरणत्वाला नवस्यात् इवशब्दोत्तरं सर्वविभक्तिलुक् सत्वेपि न सा-
मार्थ्यिकाः भाष्यकृतो पियस्य ज्ञायां अधिपरी अनर्थकाविति सूत्रे तत्त्र तेअध्ययं विभक्तीतिसूत्रे च द्योतकत्वं वाच-
कत्वं चेत्येव स्वरसः अत एव निमित्तिकमित्यादौ पूर्वपदार्थप्राधान्यं भाष्योक्तं संगच्छते इत एव संकर मुद्धा-
सम इत्यादौ उत्तसमादे रुत्तसंगतस्यक्रियाविशिष्टसाधनवाचकतोक्ता भाष्ये न नु शारैरुत्सेरिवेत्यादौ द्यो ६९

तकत्वेऽपि गम्यसादृश्ययोः शब्दैरिस्पर्येऽत्र पदोत्तरं तृतीयानुपपत्तिस्तद्वस्योस्त्राणां करणत्वाभावात् उपमानोपमे
ययोः समानविभक्तिकत्वमिति वचनाभावात् यद्यप्यत्र सदृशरूपोऽत्र पदार्थस्य करणत्वस्य शब्दैरभेदान्वयात्सा
सुलभा तथापि सदृशस्योक्तरीत्याविशेषणत्वानापत्तिरिति चेद्दिशापत्तेः तथाहि इवादीनां स्वसमभिव्याहृते उपमा
नताद्योतकत्वं उपमानत्वेन प्रतीतेस्तादृशधर्मवदुपमेयप्रतीतिं विनानुपपत्त्योनयत्रापि साधारणधर्मसंबंधबोधे
नास्यर्थग्राहकत्वं अनुपमानत्वं च साधारणधर्मवत्वेनेषदितरपरिच्छेदकत्वं तद्धर्मवत्तयापरिच्छेद्यत्वं चोपमेयत्वं इदम्
पमानातीति सूत्रे भाष्ये स्पष्टं इदमत्र निरूपितम् नयत्रापि साधारणधर्मो त्वयइति लिंगभेदाद्युपमादूषणनिरूप
णावसरे दृशमशेषे काव्यप्रकाशादौ स्फुटं एवं च चंद्र इव मुखम् मुखमाल्हादकमित्यादावाल्हादकोपमेतचंद्रा
भिन्नमाल्हादकं मुखमित्यादिरीत्याबोधः एवं चोपमानस्योपमेयेन समानविभक्तिकत्वं तेनाभेदान्वयात् साधार
णधर्मसंबंधस्याविशेषतया क्वचिद्यथोदाहृतस्थले क्वचिद्विशेष्यतया यथा चंद्र इव मुखमाल्हादयतीत्यादौ अत्र
द्युपमानचंद्रकर्तृकाल्हादाभिन्नो मुखकर्तृकाल्हाद इति बोधः यत्वत्र चंद्रसादृश्यप्रयोजको मुखकर्तृक आल्हा
द इति अर्थं वदंति तेषां तयोः समानविभक्तिकत्वं तुल्येऽभेदवचनं तु तादृशं न व्याकरणे उपलभ्यते तत्र यद्यपि चंद्रमुख
योस्तुल्ये न भेदस्तथापि विशेषणतया प्रतीतसाधारणधर्मनिमित्तोऽभेदोपचारेणाभेदः अत एव भेदाभेदप्रधानो
पमेति वृद्धाः चंद्रमुखयोः सादृश्यप्रतीतिस्त्वार्थ्येवेति बोध्यं इदमेव युक्तं घनश्याम इत्यादौ विग्रहे समासे च घनश्या

मं०न्या० ष्टस्य तस्य हृशब्दत्वे उपमानानि सामान्यवचनैरित्यनेनोपमानत्वेन बोधकानि सामान्यधर्मविशिष्टोपमेयवचनैः
१० समानाधिकरणैः समस्यन्ते इत्यर्थके न समासानापत्तिः घनपदस्याप्युपमेयपरत्वेनोपमानवाचकत्वाभावात् न च
भूतपूर्वगत्या तत्र वृत्तौ तद्विग्रहवाक्ये चोपमानवाचकत्वस्य ग्रहणौचित्यात् तस्य तद्विग्रहत्वे मृगचपलेत्यादौ पुं
वत्त्वानापत्तिः वृत्तौ विग्रहे च सामानाधिकरण्ये च तत्र वृत्तौ एतेन पूर्वावस्थाश्रयेण शस्त्र्युपमानवाचित्वमि
ति कैय्यटः परास्तः केवलशस्त्रीपदप्रयोगे तु सर्वथोपमानवाचित्वं उक्तमुपपादं एवं मृग्यादेः सादृश्यसंबंधेनान्व
येपि तदनुपपत्तिः किं च श्यामशब्दस्योपमेयपरतया घने तदन्वयाभावेन तस्य साधारणधर्मविशिष्टोपमेयपरिच्छे
दकत्वरूपोपमानत्वाभावः तदुक्तं भाष्ये यदि शस्त्रीव श्यामा देवदत्तेति विग्रहस्तदा शस्त्रीश्यामेत्येतद्रूपं संस्या
दिति कैय्यटोपि न च शब्दस्यावृत्तिरस्ति येनोभयगतं श्यामत्वं प्रतिपादयेदिति एको हि श्यामाशब्द एकगतगुणस्यैव
प्रतिपादकः तर्हि तस्य शब्दान्वयं विनोक्तमुपमानत्वमिति तद्भावः श्यामेत्यस्योपमेयपरत्वाभावे तु साधारणध
र्मविशिष्टोपमेयपरत्वरूपसामान्यवचनत्वाभावात् समासो न स्यात् अत एव भाष्ये शब्दः शस्त्रीमेव श्यामाशब्दो
देवदत्तायामेवेति पक्षे समानाधिकरण्याभावात् समासपुंवद्भावौ न प्राप्नुत इत्युक्त्वा एवं तर्हि तस्यामेवोभयं वर्तते
इत्युक्तं तत्र तस्यामेव तस्योपमेयायामेवेत्यर्थः उपमानशब्दोपि सादृश्यमूलादन्यत्राध्यवसायात् तत्रेति तद्भावः त
त्र सादृश्यनिर्वाहायास्येव तत्रादिनोपमानेपि संबंधोवश्यं वाच्यं तदुक्तं कैय्यटेन यदा देवदत्तायां शस्त्रीत्वमारोप्यते सा १०

दृश्यपात्तदाकं गुणमाश्रित्य तयोः सादृश्यमिस्याश्रं क्वयदाचं इमुखीस्याद्दैत्वं इदे नेकगुणस्सत्वेपि तात्पर्यवशात्प्रियदर्शिना।
त्वमनिर्दिष्टेपि गुणे वृद्धव्यवहारादुपमानिमित्तं तदीयमेयेष्वतः संनिधात्कथं उपमानं नस्यस्यतीतिश्चत एवैतदुत्तरं शा।
स्त्रीशब्दे नानिसंबंधमानत्वात् उपमाशब्दस्य सामान्यवचनत्वानावश्यश्रा किं तत्र स्त्रीशब्देनाप्यभिसंबध्यमानत्वादिति
तदर्थः बहूनां यः सामान्यमाह स एव सामान्यवचनस्तदस्याशयेन शंका ततः सिद्धांतिनोक्तं उपमानत्वस्योभयत्र शस्त्रादेवदत्ता
यां च भावात्तु उभयगतगुणवाचकत्वाच्चश्यामाशब्दस्य सामान्यवचनत्वं नावश्यं स एव सामान्यवचनो यो बहूनां सामान्यमा।
ह द्वयोरपि यः साम्यमाह सोपि सामान्यवचन इति अत्रोभयगतगुणवाचकत्वादित्यनेनोभयोः साधारणधर्मसंबंधः शब्द इति
सूचितं अत एव सामान्यैरिति नोक्तं सामान्यवचनैरिति चोक्तं तत्रोभयान्वयित्वेनोभयगतधर्मवाचकत्वबोधनार्थं श्यामश
ब्दस्य द्विगतधर्मवाचकत्वेनैव सामान्यवाचकत्वं बोध्यं एवं चोपमानश्यामघनाभिन्नः श्यामो देवदत्त इति बोध इति भाष्य
स्वरसः काव्यप्रकाशस्वरसोप्येवमेव तत्र ह्येवमुक्तं यथैववाशब्दाद्यस्य तस्यैवोपमानताप्रतीतिरिति यद्यपि उपमानवि
शेषणानि नेत्यपि शब्दशक्तिमहिम्नाप्यस्यैव षष्ठीवत्संबंधं प्रतिपादयंतीति तत्स्वभावेप्यौती उपमानेन तुल्यमित्यादौ
प्रतीततुल्यतोपपत्तये स्वाधर्म्यस्यार्थत्वादार्थीति यस्य तादृशस्य यदनंतरमुपादानं स्यात्तदुपमानताप्रतीतिश्च शाब्दी
व तेषां शब्दानामुपमानविशेषणत्वेप्रतिपादकत्वस्य तेनहेतुत्वेनोपादानाद् उपमानविशेषणानांतिचेत् व्रीहिरि
ति तत्र युक्तं पुंस्त्वापत्तेः उपमानविशेषणा एते इति वाग्रस्तु प्रदीपादिविरुद्धस्य मत्रविस्तरः नचैवं पुरुषो व्याघ्र इव शूरः।

मं॰न्०
७१ साद्दो नवद्रुक्तरीत्या वोधे विशेषणत्वेनासामर्थ्यात्समासो नस्यादिति वाच्यं उपमानत्वेन वोधकस्य तस्य साधारणधर्मविशे
निस्यसापेक्षत्वेनासत्तेः साधारणधर्मवत्त्वेन परिच्छेदत्वं हि तत्त्वं तच्च तत्त्वेन ज्ञानस्यैव यद्यपि उपमेयत्वं तत्तद्धत्वेन परिच्छेद्य
त्वमेव तस्य च तत्त्वं विधेयमिति न तन्निस्यसापेक्षत्वं तथापि प्रधानस्य सापेक्षत्वे न दोषः एव समासः प्रधानेनैकविशेषणसं
बंधसंभवात् देवदत्तो धनी सुंदरश्चेतिवत् अत एव सामान्यप्रयोगे इति चरितार्थं अस्तु वोपमेयस्यापि निस्यसापेक्षत्वं पर
वृतत्वं न समासप्रयोजकं किंतु गमकत्वमेति समासवादे वत्ततेतस्य तच्च वरुणोदृष्टमिस्यत्रापि समासः स्यादिति तद्वार
णाय सामान्यप्रयोग इति इदमेव तत्र गमकत्ववोधकमिति वोध्यं एवं चैवादियोगे साधारणधर्मसंबंधरूपोपमानतावा
च्या सादृश्यप्रतीतिरार्थी सिद्ध ज्ञानादिपदस्य ज्ञानत्वावच्छेदकतया सिद्धं सदृशादर्शनेन संस्कारोवोधकत्वस्य सर्वसंमतत्वे न तत्का
रणतावच्छेदकतया च सिद्धमखंडमिति अतिरिक्तः पदार्थः न चातिरिक्तपदार्थत्वे गौतमकणादोक्तपदार्थसंख्याविरोध इ
ति वाच्यं प्रमेयपदार्थे गौतमोक्तितन्त्रीवात् किं च पदार्थसंख्या[illegible]स्या सिद्धिः कारणस्य धनमुपलक्षणमेव तदुक्तं गौतमे
न संख्यैकांतासिद्धिः कारणानुपपत्त्युपपत्तिभ्यामिति पदार्थगतसंख्यानियमस्यासिद्धिः कारणस्य प्रमाणस्यानुपपत्तेः उ
पपत्तौ न तन्नियमः साधनस्य साध्यातिरेकादिति तदर्थः तद्व्याख्यानावसरे आहुः किं वा कर्त्तरिकारके इति सूत्रे भाष्ये नञिवयुक्त
मन्यसदृशाधिकरणे तथा ह्यर्थगतिर्नञ्युक्तमिवयुक्तं चान्यस्मिन् तत्सदृशे कार्यं विज्ञायते तथा ह्यर्थो गम्यते तद्यथा।
अब्राह्मणमानयेत्युक्ते ब्राह्मणसदृशं पुरुषमानयति नासौ लोष्टमानीय कृती भवति एवमिहाप्यकर्त्तरीति कर्त्तृसदृशे धा ७१

न्‌ अन्यस्मिन्नुक्तेऽतिरिक्ते सदृशो कार्यो विज्ञायते किं वान्यत् कर्तृकर्तृसदृशं कारकमिति एवं च कारकग्रहणं सूत्रेऽस्याख्या
नं कर्तृप्रषेधादिस्यारोपितकर्तृबोधादिस्यर्थः अनेन हि भाष्येणान्नेदे पि सादृश्यमिति सूचितं अन्यथान्यस्मिन्निसस्यैवेय।
व्याप्तिरित्थेवयोगेपि तेदसादृश्येन तु तद्वाच्येयोऽस्मैवेति प्रतीयते स्वयुक्तोदाहरणमिवे प्रतिकृताविसंधिकारेसाखाधिपो
येसोम्यइत्यादितत्रसोमसदृशात्मकाङ्क्षिणः प्रतीयते न तु सोम एव एतेन भेदनियतं सादृश्यमित्यपास्तं अस्यामुखसदृश्यमा।
स्यामुखमित्यादावनेदेपि सादृश्यप्रतीतेश्च न चानेदे साधारणधर्माभावात्कथं तत्प्रयोज्यं सादृश्यमिति वाच्यं अनेकवृ।
त्तिधर्मस्यैव साधारणधर्मत्वेन तत्रावृत्याएकस्याप्यनेकत्वात् अतएवागुणसूत्रे भाष्ये एकांकपिलांसहस्रेऋषयएकैकशो
दत्वा तया सर्वे ते सहस्रदक्षिणाः संपन्ना इति श्यो तेन स्मार्त्तेन वा व्यवहारेणैकस्याप्यावृत्यानेकत्वं सूचितमतएव
वससदृशामामिधेन्योऽन्वंतीति श्रुतौ पवित्रयोदृशमामिधेनीमंत्राणां प्रथमांत्यमंत्रयोस्त्रिरावृत्या समदृशात्वमुक्तं श्रौ
तसूत्रे अतएवैकएवाकारइतिपक्षे घटिकइत्यादावावृत्तिकृतत्वोनेनौ ह्यचः इति तिदनुक्तो भाष्ये एतेनायं व्यवहा
रो गौण इति परास्तं मुख्ये बाधि चारितार्थेनात्रा प्रवृत्त्या फलेः उत्तरसंख्यया श्वेसंख्याबाधात् घटेनेत्यादौ सावेकाच इति
स्वरोनेति चोक्तमेवं चैकस्यैव ब्राह्मणस्यावृत्यानोजनदाने दशादि ब्राह्मणभोजन संकल्पः सिध्यतीति बोध्यं एवं प्रकृ।
तेपि मुखस्यानेकत्वेनैकस्यापि धर्मस्य साधारणधर्मत्वं नचैकस्यैवानेकत्ववत् कालादिभेदेन भेदं प्रकल्प्य मुखमि।
वमुखमित्यादावुपमैवास्त्विति वाच्यं तस्य भेदस्य शाब्देनासंस्पर्शात् अतएवोपमानानीति सूत्रे भाष्ये यद्यिदेवोपमा।

मं.जू. ७२ नं तद्देवोपमेयं कइहोपमार्थः स्यात् गौरिव गौरिति उपमानोपमेयभावद्योतके शब्दप्रयोगे किं प्रयोजनं कर्मकरणरूपोपमा
नोपमेयभावस्यैकत्राभिन्नत्वात् इवस्यार्थानाभावात् नच द्वितीयसदृशव्यवच्छेदप्रतीतिः फलं गोसदृशो गौरित्यतोपि तत्संभ
वात् अभेदेपि सादृश्यांगीकारेण तस्य बोधकत्वात् बोधकेन तत्प्रयोगो न स्यात् एवं चोपमालंकारस्यास्य स्वत्रस्य चोक्तिसंभवाभा
वइत्याशयकमुक्ताः तस्माद्यत्र किंचित् सामान्यं कश्चिच्च विशेषस्तत्रोपमानोपमेयभाव इति सिद्धांतितं तत्र भिन्नगोव्यक्त्योस्त
द्बोधनार्थं आरोपितभेदवतोस्तद्बोधनार्थो वा तत्रैव शब्दप्रयोगः स्यात् शंक्यते यदेनोक्तं तस्य भेदस्य शब्देनासंस्पर्शात् सामा
न्यमुखेन ज्ञानवसायादिति भाव इति अत्र पक्षे घनइवश्यामइत्यादेः संभवेनोपमालंकारस्य स्वत्रस्य चोक्तिसंभवः गौरिव।
गौरित्यादौ तूपमानत्वाद्यप्रतीत्या नन्वयालंकार एवेति बोध्यं तस्मादभेदेपि साधारणधर्मसंबंधस्तयोरयं सादृश्यं
चावश्यं स्वीकार्यं काव्यप्रकाशकृतापि भेदे साधर्म्यमुपमेति वदता अभेदे साधारणधर्मसंबंधस्यांगीकारात् यत्र साधा
रणधर्मेण सामान्यरूपताप्रतीतिः प्रत्येकरूपेण शब्दतो विशेषरूपताप्रतीतिस्तत्रोपमानत्वादिप्रतीतिरिति सिद्धांतार्थो
भाष्ये एतेन रामरावणयोर्युद्धं रामरावणयोरिवेत्यादौ कल्पभेदेन भिन्नयोर्युद्धयो रूपमेवेति परास्तं तस्य भेदस्य शब्दे
नासंस्पर्शात् मुखसदृशं मुखमित्यादावप्यार्थी गौरिव गौरित्यादौ शाब्दी उपमाया अप्रतीतेरार्थः शाब्दश्चानन्व
उपमासंबंधाभाव एवानन्वयः तत्रैव तीर्थमर्यादाभेदे सदृशादिशब्दप्रयोगे आर्थी उपमा गम्यस्योपमानोपमेयभावस्य
प्रतीते अभेदे तत्प्रयोगे अनन्वयः सर्वथा तदप्रतीते तत्र भेदसमानाधिकरणसादृश्यमुपमाव्यंजकमिति बोध्यं अ ७२

तन्वयालंकारे एकस्यैवोपमानोपमेयत्वमिति व्यवहारस्तु तत्सादृश्यात् अत एवोकालइति सूत्रे भाष्ये जित्येवसामर्थ्या
दुकारसदृशो जित्सवर्णे नसिद्धेकालग्रहणं श्रूयमाणेनैवोकारेणकालं विशेषयितुमिति द्विमात्रादीनां न ह्रस्वसंज्ञेत्यु
क्तं भेदएवसादृश्यमितिवदतांमतेतूकारस्य ह्रस्वसंज्ञा दुर्लभास्यात् भेदाभावादिसत्वं सादृश्यातिरिक्तत्वादेवायं अने
नसदृशइत्युक्तेकेनधर्मेणानयोः सादृश्यमित्येवजिज्ञासा न तु कोधर्मोनयोः सादृश्यमिति अत एवत्वमयाष्टधीसदृशो
धर्मतः सादृश्यमित्याद्याकांक्षायां जस्येनैवोपपद्यते तत्र व्यंजकधर्मभेदादाश्रयभेदाल्लिङ्गरूपकभेदाद्वाभिन्नं अत एवोभयोरन्य
पदर्तते सादृश्यमूलकभेदाध्यवसायेनोपमानस्योपमेयेऽभेदान्वयइतिसिद्धांतपक्षे एवमपि सादृश्यनिमित्तं गुणोना
निर्दिष्टइति शंकासंनिधानात् रूपात्मत्वमेवगुणइति समाधानं च भाष्येसंगच्छते साधारणधर्मसंबंधस्यैवसादृश्यरूपत्वे
तदसंगतिः स्पष्टैवममतुप्रतीयमानं सादृश्यं किंचिद्धर्ममूलकमिति तच्च प्रतियोगिष्वेतादात्म्यरूपानन्तधर्ममूलकमेवेत्युक्तरीमे
तिनदोषइत्यलंमानेवहितकारलीमित्यादौ त्विवशब्दसादृश्यवाचकताऽवशब्दार्थसादृश्ये च मातुरन्वयइति प्रातिपदि
कार्थेप्रथमैव न तु षष्ठ्यापत्तिः प्रतियोगिविशिष्टसादृश्ये च तद्वाच्यत्वेन तदेकदेशे प्रतियोगिनि मातुरभेदेनान्वयास्य
व्युत्पत्तेरिति कश्चित् असाधुर्वेदं क्रियान्वय एव प्रथमायाः साधुत्वात् अत एव तिङ्समानाधिकरणे प्रथमा अभिहि
ते प्रथमेति वार्तिकं प्रथमायाः कारकविभक्तित्वपरं भाष्ये च संगच्छते इत्यस्य लक्षणमकमत्वेद्योतकतान्यथा वाचका
नैव वृत्तिद्वयकल्पना गौरवात् न च तस्या वाचकत्वेऽवास्तीत्याद्युपि सादृश्यमस्तीत्यादिवत्स्यादिति वाच्यं तथात्वेऽपि

योगाभावेनोपमानादिपदे विसंधाने नैव प्रयोगे तेषामसाधुत्वांगीकारात् घटो नास्तीत्यादावभावस्य विशेष्यतयो बो
धात् नञो वाचकत्वं नानुयाजेष्वित्यादौ समस्याः साधुत्वार्थं द्योतकत्वमपि आरोपितानुयाजेषु यजतिष्विति तदर्थः
भेदे प्रतियोगित्वेनान्वयो नानुयाजभिन्नेष्विति अर्थे समासानुपपत्तिः आरोपितविषयत्वं तत्र नञ् द्योत्यं अत एवाघटइत्या
दौ नञ्तत्पुरुषस्योत्तरपदार्थप्राधान्यं संगच्छते अभावस्य तु प्रतियोगिरूपितविशेष्यतयैव भानस्य सर्वसिद्धत्वात्
तदनुपपत्तिः स्पष्टैव अत एवासर्वइत्यादौ सर्वनामकार्याणि अन्यथा गौणत्वान्न स्यात् इतरविशेषणत्वेनोपस्थितिविषय
त्वस्यैव गौणत्वात् यद्वा नञ्समभिव्याहृतघटादिशब्दानां आरोपितप्रवृत्तिनिमित्तबोधकत्वे न तात्पर्यग्राहकः यथा
सिंहो माणवक इत्यादौ माणवकादिपदानि सिंहादिपदस्यारोपितसिंहत्वबोधकत्वे अनुदराकन्येत्यादावप्यल्प
त्वादिनोदराभावमारोप्य नञ्समभिव्याहारे आरोपितोदरबुद्धौ तन्मूलाल्पत्वादौ विश्रामः अद्विजइत्यादौ च तद्भेद
मूलकमारोपितप्रवृत्तिनिमित्तकत्वमिति भेदे विश्रान्तिः अधर्मइत्यादौ च विरोधिनि आरोपितत्वस्य नञ्वाच्यत्वे तु त
स्य ब्राह्मणादिपदशक्येनारोपितब्राह्मण्येन वृत्तिसंबंधोऽनुपपादः तत्र प्रसिद्धार्थपरित्यागोऽप्रसिद्धार्थपरिग्रहइत्युभ
यं द्योतकत्वमिति तत्त्वं शाब्देऽस्पष्टं इदमेव नञो द्योतकत्वं नाम एतावतैव तत्रैकार्थीभावव्यवहारः विशिष्टानुपू
र्व्या द्योत्यार्थं तन्नीवेदमग्रत्वावच्छेदकत्वाद्विशिष्टस्यार्थवत्त्वं समानमविधायकशास्त्रबलादत एवमेवकल्पनो।
चित्राप्रजपतीत्यादौ तु नैवमशादिश्रवस्यापत्तिरन्यथा तत्रकस्य नात् लोकस्य तु न तत्रापि विशिष्टशक्त्यैव बोधः अ ७३

वयवशक्तिबोधनदशायां विशिष्टस्य विशिष्टे शक्तिबोधकमेव व्याकरणमिति दिक् असंदेहे ह इत्यादौ चारोपितः संदे
ह इति बोधः नेदसंबंधेनारोपितत्वज्ञानस्य न तदसंताभावप्रतीतिः अममत्स्येत्वभावो न अर्थः सद्विधा असंताभा
वो नेदश्चात्र तादात्म्येतरसंबंधाभावश्चाद्यः तादात्म्याभावोंत्यः तादात्म्यमतिरिक्तं तच्च स्वसाधारणधर्मरूपं वेसम
तु ममनियताभावस्थले एकस्यानेकप्रतियोगिकत्ववदनयोर्घटादिप्रतियोगिकत्वमपि तत्राद्यस्तिङंतार्थक्रि
यान्वय्येव अममत्सनञर्थासंताभावविशेष्यकबोधे इति ममनिपातहृतधातुजन्योपस्थितेर्हेतुत्वात् अतए
वाह नास्ति घटोस्मिन् इत्यादौ पुरुषव्यवस्था घटो न ते घटान्संतीत्यादौ वचननियमश्चोपपद्यते युष्मदादेस्तिङ्स
मानाधिकरण्याभावमतद्भावोस्तीत्याद्यन्वये च न स्यात् आख्यातार्थसंख्यान्वयित्वस्य तु न सामानाधिकरण्य
पदार्थत्वं किंच निवादिविधिनाद्येकयोरित्यस्यैकवाक्यतयैकत्वेति वित्यादिवाक्यैकस्यैकत्वे इत्याद्याकांक्षाया
प्रस्तामस्यानिवायद्यर्थोत्वयि न इत्यस्यैवलाभेनाभावप्रतियोगित्वनन्वयात् घटसत्ताभावबोधे ममनैयत्या
देव नियमेन घटाभावबोधापीति न तद्विषयसंदेहादि एवं ममनियताभावयोरपि एकज्ञाने निपमे नापर
ज्ञानं बोध्यम् अतएव घटज्ञाने तत्स्वभावसंदेहादिनः ममनियताभावमैक्यमेव न च प्रतीतिर्भेदे जाग्रति ए
वं कथं नत्र न कश्चिदुपयोगः लाघवात् सदर्थ एक एव धर्मभेदात्यतीतिभेद इत्यस्यव कुंराक्यतात् घट
त्वाभावघटभेदयोश्च घटत्वघटभेदाभावयोरेव चमतिसमनैपत्यभावयोरपि तत्त्वमुचितमेव हेतो

मंजू॰ समत्वात् इति केचित् तन्न एकत्व धर्मी तत्रैव धर्मभेदकल्पने न व्यवहारभेदउपपत्तौ धर्मिभेदस्य न्यायादिनये
१५ ति विलयापत्तेः तद्रूपतदभावादेरप्यैक्यापत्तेश्च तत्र नासमानतावच्छेदकरूपत्वादिना न समभेदयस्यं तद्रूपं नासते
ऽस्मादेरूपत्वादिना व्यक्तिविशेषो नामत इत्येवार्थः क्रियायाः कारके विशेषणतालिंगितायाऽभावस्य च प्रतियोगि
विशेषणतालिंगितस्या नाना तत्रैवं च कुंत्राक्वमिति केचित् एतेनाधिकरणतालिंगितताभावबुद्धेरभावादिह
घटो नास्तीत्यादौ एतदधिकरणकाभावप्रतियोगि घटकर्तृकासत्तेति बोध इत्यपास्तं वक्ष्यमाणरीत्या प्रतियोग्यधि
करणस्यैवाभावाधिकरणत्वेन तस्य पृथगधिकरणकांक्षाभावात् अधिकरणकारकस्य क्रियान्वयिकत्वक्रमीत्व
येवासाधुत्वे नासाधुतापत्तेश्च असंताभावार्थक नञः प्रतियोगिन्न तत्क्रियान्वयनियमाच्च एतेन नञ्तलेन घटइ-
त्यादौ तात्पर्यवशात्कदाचित् भूतलादौ घटाद्यभावः कदाचिच्च घटादौ भूतलवृत्तित्वाभावः प्रतीयते अन्यथाऽइह घटो
नास्तीत्यादितो बोधानुपपत्तिस्तथाहि पदार्थानां क्रमेणान्वयेन घटत्ताद्रूपोर्थः अथ संबुद्धौ न ज्ञातिवर्त्तयितुमश-
क्यः सतो विषेधायोगात् असतश्च सत्त्वादेव निवृत्तेः मिथ्यात्वज्ञानोदयैवयर्थ्यं तदुक्तं सतां च न निषेधोस्ति सोऽसत्सु च न वि-
द्यते जगत्यनेन न्यायेन नञर्थः प्रलयं गत इति न च घटास्तिपदाभ्यां या घटविषयास्तिबुद्धि जाता सा नञा नि-
वर्त्तत इति वाच्यं बुद्धेः शब्दबाध्यत्वेन नञा तन्निषेधायोगात् एतेन तस्या बुद्धेर्मिथ्यात्वं नञा क्रियत इत्यपास्तं
घटाभावाद्यनवगतिप्रसंगाद्युक्तमादमत्रैवि घटो गेहे नास्तीत्यत्र तो घटस्य गेहसंसर्गप्रतिषेध इत्युक्तं यतः सते १५

ननु तस्य एवं च घटकत्वे कथमन्ताभावो बोधयितुमशक्य इति विशेषणीभूतगेहसंसर्गाभावप्रतीतिरिति तदर्थः
नचाभयीभावस्य नित्यत्वात् नञ्तत्वेन घट इति वाक्यं दुर्लभमिति वाच्यं अर्थाभावशब्दे नञो घटकतयास्तत्त्वराही।
ताभयत्वेन नञा अभयीभावाभावात् अतएव पूर्वपदार्थप्रधानो नञ्तत्पुरुष इति परिहतस्तु रूपेणाभयीभावा।
स्य बाधमाप्यात् अभयीभावसिद्धिरूपं दूषणं भाष्येनोपन्यस्तं अतएव तत्पुरुषेऽवर्षा हेमंत इत्यादौ लिंगसंख्यायोगो।
तस्यात् पूर्वपदार्थस्याभयार्थत्वेनासत्वभूतत्वादित्याशंक्य शब्दशक्तिस्वभावेन परिहृत्य अत्र तु पक्षेऽनेकमित।
दोषाक ववना सिद्धिमनसि निधायोत्तरपदार्थप्रधानत्वं सिद्धांतितं असंहितमिति तु संधानरूपसंहितापरपर्याय
भावसाध्वनत्काांतनपुंसकसंहितशब्देन नञ्तत्पुरुषे बोध्यं सूत्रवार्तिकप्रामाण्यादुभयलिंगः संहिताशब्दः
अतएव जास्यवृत्तान्ताथावांतात्विति प्रातिशाख्यव्याख्याने संहितवदिति तद्भाष्ये प्रयुक्तमिसम्यत्रप्रपंचितमिस
पात्तं सत्वेन निषिद्ध तस्य निषेधाभावेपि त्वे नअसंभाविततस्य निषेधसंभवाच्च नञ्समभिव्याहार एवचतत्त्वे प्रयोजकः
कणादसूत्रे तु समनियताभावानामैक्यं बोधयितुं तथोक्तिः गेहसंसर्गस्यापि प्रतिषेध इत्यर्थोदितिदिक् पृथिव्यां।
गंधो न जलेऽस्यादौ प्रतीते रेकविशेष्यकत्वानुभवस्तु स्ववासनाकल्पित इति दिक् नेदेनादिसमुच्चयं तमिस्यादौ ब्र
ह्मचारिणो व्रतमिस्यनुष्ठेयवाचि व्रतशब्दोपक्रमादभावस्य चाननुष्ठेयत्वादीक्षतेन नञ्समभिव्याहारादीक्षणाभाव
संकल्पबोधकतेति बोध्यं यत्वत्रपर्युदासमत्रभावस्याननुष्ठेयत्वाद्व्रतशब्दोपक्रमाद्व्रतद्भिन्नक्रियायाः सामा।

ंजू० ७५ स्यतः शाब्दायनीक्षणसंकल्पे लक्षणेति तन्न ईक्षणभिन्नसंकल्पे तात्पर्याभावात् तथा शिष्टाचाराभावाच्च
नेक्षिष्यामीति ईक्षणाभावसंकल्पस्यैव सर्वैराचरणाच्च किंच यत्र नञ्समभिव्याहारे पदार्थस्य भेदेनान्वये आकां ।
क्षा तत्रैव नञ्समभिव्याहारे भेदप्रतीतिर्नान्यत्र न च प्रकृते तथा अत एव न पचति तिष्ठतीत्यादौ न भेदबोधः अत ए-
व तिङ्समभिव्याहृतनञो संताभावार्थकत्वमेव अयमेव प्रसज्यप्रतिषेध इत्युच्यते प्रसज्य विधाय विहितस्य प्र-
तिषेध इति तदर्थः नञ्सूत्रे भाष्ये तु प्रसज्य क्रियागुणौ ततः पश्चान्निवृत्तिं करोतीत्युक्तं तेन गुणाभावबोधेऽपि प्रसज्य
प्रतिषेध इति लभ्यते नास्माकमेकं प्रियमित्युदाहरणं अत्र ह्येकप्रियप्रतिषेधे बहुप्रियप्रतीतिर्न संदेह इत्यादौ च
संदेहाभावप्रतीतिः संदेहस्य गुणत्वात् सर्वत्र क्रियाप्रतिषेधो हि गुणपदोपादानं भाष्ये नर्थकं स्यात् प्रसज्यप्रति-
षेधोसौ क्रियया सह यत्र नञित्यत्र क्रियाग्रहणं गुणस्याप्युपलक्षणमिति विवहः अयं सो घटः पटो नेत्यादौ यत्वत्र
भेदो नञर्थस्तत्र प्रतियोगितासंबंधेन पटस्यान्वयः अन्यथा गृहस्योद्वैरित्यादावविवक्षापत्तिः एवं तर्हि घटपदं घटा-
प्रतियोगिकपरं तस्य भेदेऽभेदान्वयः भेदस्याश्रयतया घटेन्वयः अभेदान्वयव्युत्पत्तिस्तु निपातातिरिक्तविषया
यद्वा भेदवान्नञर्थो भेदवति लक्षणेति तु न युक्तं निपातानामनेकार्थत्वे लक्षणानवसरात् केवलभेदस्यैका-
प्यबोधाच्चेति तन्न नब्राह्मणैरेतैः पटुत्वमित्यादौ भेदाश्रयभेदप्रतियोगिनोः समानविभक्तित्वस्योपपादनात्वा-
त् समासवाक्ययोस्तुल्यार्थत्वौचित्यात् तस्माद्व्यारोपितपटाभिन्नो घट इति बोधः नञ्द्योतक एव एवं च स ७५

मानविभक्तिकत्वं सिद्धं घटभेदबोधस्त्वार्थः तत्समनियतत्वात् घटत्वाभाववोधोपि तत्रार्थः यद्यपि भेदो निरू
पयितुमशक्यः तथाहि घटः पटाद्भिन्न इति भेदज्ञानं भिन्नत्वेन गृहीतधर्मिप्रतियोगिज्ञानपूर्वकं तत्रसभेदोपमेक्वे
दात्माश्रयः भेदांतरं चेत्तदपि भिन्नयोरेव धर्मिप्रतियोगिनोर्ज्ञातत्वं सच तत्पूर्वभेद एव तदान्योन्याश्रयः तृतीयो भे
दो निश्चेच्चक्रकापत्तिः भेदपरंपरास्वीकारे नवस्थाप्रतिमभेदासिद्ध्या मूलक्षतभूतभेदपर्यंतं असिद्धेर्मूलक्षयात् अतए
व भेदस्यासत्त्वाभावमभ्युपगच्छन्ते कैश्चिद्घटादौ व्यवहारः असत्त्वमुक्तरीत्या सामान्यत्वं केवलान्वयित्वात् तथापि अविचारित
रमणीये नैवमायिके भेदेन व्यवहारात् व्यावहारिकस्यैव सत्त्वेनाङ्गते ः घटाद्यर्थस्य घटादिपदवाच्यत्ववत् अन्यथा
घटत्वाश्रयत्वे नायं घटः घटवृत्तित्वेन चेदं घटत्वमिति अन्योन्याश्रयात् स्पदार्थमात्रस्याविचारितरमणीयस्यानि
र्वचनीयस्यैव व्यवहारप्रयोजकत्वात् अतएवोक्तं श्रीहर्षेण समस्तलोकशास्त्रैकमत्यमाश्रित्य नत्वतोः कातवा
स्तुगतिस्तर्कैर्वस्तुधीव्यवहारयोः उपपादयितुं नैस्तैर्नैतैरशंकनीययोः अनिर्वक्तव्यतावादस्यादस्यैवागतिस्तयोः
यथासतो जनिर्नैवमसतोपि जनिर्न हि जन्यत्वमेव जन्यस्यानिर्वाच्यत्वसमर्पकमिति तथा भेदस्य सपरस्तर्कोभेदमा
यापरोपरः भेदस्य सपरस्तर्कोद्यसन् वेदविरोधतः एकविज्ञानविगमात् नेह नानेति च श्रुतेरिति स्थलं एवमघटस्य दर्श
नमिस्यादौ सर्ववाक्यं सावधारणमिति न्यायेन घटभिन्नस्यैव दर्शनमित्यर्थात् घटस्य दर्शनाभावोऽप्यर्थः प्रतीयते घ
घटदर्शनमिसुक्ते तु न तद्भिन्नस्य दर्शनेपि तद्दर्शनाभावाभावेन तयोः समनेपस्याभावात् एवकारांतर्भावेण वृत्तो

तुनमानं एतच्चतस्याभावो नञो गुणप्रतिषेध इत्यादि सूत्रे भाष्यकारैः स्पष्टं नञ्द्योत्यो भेदो विशेषणं भेदप्रतियोगी घटइ-
त्यर्थ इति तन्नयुक्तं अघटमानयेत्युक्ते यत्किंचिन्निष्ठभेदप्रतियोगिनो यत्किंचित्प्रतियोगिकभेदवतो वा घटस्यैवानयना-
पत्तेः अत एवोत्तरपदार्थप्राधान्यत्वेन नञ्तत्पुरुषस्य अब्राह्मणइत्युक्ते ब्राह्मणमात्रस्यानयनं प्राप्नोतीत्याशंक्य नञः प्र-
योगात्तन्नञर्थविशिष्टस्यानयनं भविष्यतीत्युक्त्वा कः पुनरसौ नञर्थविशिष्ट इति प्रश्ने निवृत्तपदार्थ इति भाष्ये उक्तं निवृ-
त्तः पदार्थो मुख्यं ब्राह्मण्यं यस्मिन्सत्त्रियादिरित्यर्थः सादृश्यादिनाध्यारोपितब्राह्मण्यो नञ्द्योत्य इति तदर्थस्य इत्यर्थ
इति कैयटः यत्तु निवृत्तस्येति भावे क्तः निवृत्तमभावः पदार्थो यस्य सेतन्नञ्भाष्यार्थ इति तन्न भाष्ये वेति स्पष्टं नाध्यवसितं किंच प्रति-
योग्यभावौ तुल्ययोगक्षेमाविति तांत्रिकोक्तेर्न ज्ञाने भेदस्य विशेषणतानयुक्ता यत्र प्रतियोगिनः प्रकारता तत्रैव तद-
भावस्यापि सा यत्र तस्य विशेष्यता तत्र न तदाविस्यापि सेति तदर्थः बाधबुद्धिप्रतिबंधकतापि यथानुभवं कल्प्य इति न त-
दनुरोधेन रूप्य नुभवसिद्धबोधाभ्यधाभाव उचितो नेत्यायेन प्रतियोग्यधिकरणमेवाभावाधिकरणमिति दिक् य-
तु नानुयाजेष्वित्यादौ पर्युदास एव न प्रसज्यप्रतिषेधः शास्त्रीयविहितप्रतिषिद्धत्वाद्विकल्पापत्तेः वाक्यभेदापत्तेश्च
तथा हि क्रियायाः कारकाकांक्षत्वेन विनिगमनाविरहात्सकलकारकविशिष्टं भावनां प्रतियोगिनं तामादायाभा-
वस्य विधित्सत्र वाच्यः एवं चोद्देश्यस्य प्रतियोगिनः प्रसिद्ध्यर्थं प्राप्तसापेक्षता प्रतिषेधस्य प्राप्तिश्च क्वचिद्रागतो यथा न
कलंजं भक्षयेदिति तत्र हि रागेण कलंजभक्षणादेरिष्टसाधनत्वावगत्या प्राप्तत्वात् कलंजभक्षणभावनाया निषेध ७६

धशास्त्रेण निवृत्तिविषयत्वेव गतेऽर्थात्तद्विषयकत्वं जननदण्डादेरनिष्टसाधनत्वाद्वेपात्तुनिसंततो निवृत्तिः प्रकृते
चयेयजामहाशास्त्रत एव सामान्यप्रमाणरूपोपजिव्येति च तस्याः प्रसंतवाधायोगाद्विकल्प एव प्राप्नोतीति विकल्पे च प्रथ
मं व्रीह्यनुष्ठाने यवशास्त्रस्य प्रामाण्यस्वीकारात्प्राप्तप्रामाण्यपरित्यागो वेदे विपर्यासरूपाप्रमितिजनकत्वासंभवा
त् ततः प्रयोगांतरे यवोपादाने यवशास्त्रस्य स्वीकृतप्रामाण्यपरित्यागरूपोऽप्रतीतप्रामाण्यस्वीकारः पुनस्तृतीयप्रयो
गे व्रीह्युपादाने व्रीहिशास्त्रस्य स्वीकृतप्रामाण्यपरित्यागात्मा स्वकप्रामाण्यस्वीकार इति चत्वारो दोषाः यथाकथंचिद्वे।
दारोवेणाष्टौ वा दोषा इति तन्न निषेधशास्त्रानालोचने सामान्यशास्त्रालोचनमात्रेण भ्रमात्मकप्रमित्याऽभाववोधसं
भवे न विकल्पप्राप्तेः ननु निषेधशास्त्रस्यैव प्रथमालोचने विशेषदर्शनसत्वे न सामान्यशास्त्रतो भ्रमानुपपत्त्या तादृ
शप्रतियोगिनोऽप्रसिद्धेस्तदुद्देश्यकप्रमानुपपत्तिरिति चेन्न निषेधशास्त्रस्य प्रथमालोचनं नाम तद्वाक्यज्ञानमुत तद।
र्थज्ञानं नाद्यः तावन्मात्रेण विशेषदर्शनासंभवात् नांत्यः प्रतियोग्यप्रसिद्ध्या तदसंभवात् किंच निषेधस्य प्रथमालोच।
ने वाधवुद्धेः सत्वे न विधिवाक्यतः प्रमाद्युत्पादेति विकल्पाप्रसक्तिसंभवः यद्वा तादृशे विषयेप्याहार्यभ्रमात्मिका प्रति
योगिप्रसिद्धिरस्तु एवमेव हि नांतरिक्षे जुहोति ह्रदे वह्निर्नास्तीत्यादौ प्रतियोगिप्रसिद्धिः सर्वैरुपपाद्याः प्रतियोगिज्ञान।
स्याभावधीहेतुत्वेपि तत्कारणतावच्छेदककोटौ प्रनाहार्यत्वनिवेशे मानाभावात् ससंबंधिकपदार्थज्ञाने संबंधि
तावच्छेदकप्रकारकज्ञानकारणतैव विशेषणतावच्छेदकप्रकारकज्ञानकारणतैव वा प्रतियोगिज्ञानकारणतेति पक्षे १

मं॰जू॰ ११

ऽनाहार्यसाधारणज्ञानवत्त्वे नैव हेतुता आहार्ये तज्ज्ञानादर्शनात् एवमस्य नेनैवातिप्रसंगभंगात् आहार्यः शाब्दबोधो ना-
स्तीति तत्त्वम् अध्येयमेव ह्येतदृष्टनित्वानाख्यो बोधो वन्हाविस्मादितु अधिकरणकारकस्य कर्तृकर्मद्वारक्रियान्वयनियमाद्यु
क्तं प्रमकं निषिध्यते ऽस्य स्याप्रसंजनाद्धि मिस्यर्थः यदि निषिध्यते ऽस्य प्रसंजनाद्धि मिसर्थः यदि निषेधो न स्यात्तादे
वसामान्येन प्रवृत्तिरिति बोध्यं किंच विध्युपमर्दकत्वे नोपजीव्यादपि तस्मात् निषेधो बलवान् एतदेवाभिप्रेत्य निषेधाश्च
बलीयांस इति भाष्ये उक्तं किंचोपजीव्यविरोधो विकल्पवादिनो ऽपि तथा हि यागपत्वावच्छेदेन येयजामहकर्मकभावना
रूपवाक्यार्थो निषेधस्योपजीव्यः तस्य च यजातियाजेन तत्कारणं तदंशे विरोधो ऽवच्छेदकावच्छेदेन प्रतीतेः प्रामाण्यं च प्र
नृयाजवाक्ये त्वेकवाक्यतालाभेन पर्युदास इति तत्त्वं अत एव द्वंद्वे च विभाषा जसीत्यादीनां चारितार्थ्यं अत एव पुर
नपुंसकस्येत्यादौ भाष्ये पर्युदास प्रसज्यप्रतिषेधयोः फलाविशेष उक्तं संगच्छते एतदेव सकलमभिसंधायोक्तं नवे
तिसूत्रे भाष्ये नवेत्यखंडनिपातार्थस्य निषेधस्य विभाषा संज्ञितेयद्यप्यप्राप्तविभाषा विषये निषेधकाल्पितविधेश्चा
रितार्थ्येन विकल्पः सिध्यति तथापि प्राप्तविभाषायां कृतसामर्थ्यो विधिरिति प्रतिषेध एव स्यान्न विकल्प इति अपि
तु वाक्यभेदापत्तेरितरपर्युदासः स्यात् प्रतिषेधे विकल्पः स्यादिति जैमिनिसूत्रे प्रतिषेधो विकल्पः स्यादित्युक्त्वयः
युक्तिश्च पतंजलिवाक्यविरोधात् वाक्यभेदप्रसक्त्यादिस्यैकवाक्यत्वलाभादित्यर्थः ननु तत्तच्छास्त्रैः साधुत्वविकल्पे
एकस्यैव शब्दस्य साधुत्वेन धर्मजनकता असाधुत्वेन त्वधर्मजनकतेति विरुद्धमापद्यतेति न तद्विकल्प इति नवेतिसू

त्रेताब्वेमिद्धांतितमेवंचातिरात्रेषोडशिनंगृह्णातिइतिग्रहणस्यवाक्येनतस्यधर्मजनकतावोध्यतनातिरात्रेषो
डशिनंगृह्णातीतिनिषेधेनतस्याधर्मजनकतेतिविरुद्धस्वीकारःकथमितिचेत् सत्यमुभयत्रापिसंकल्पसलक्षण
यासंकल्पद्वयस्यापिवोधनात् तयोरन्यतरस्यचेछयापरिग्रहः एवंसर्वत्रस्मार्तवैदिककल्पस्थलेवोध्यमतएववैका
ल्पिकेष्विष्वादितोवधारणमिस्तुरुघोषइतिदिक् तत्रप्रतिषेधद्वयीगतिःप्रतिषेधंदृष्ट्वापश्चादुत्सर्गस्यतद्विषयत्वाभाव
ज्ञानेप्रामाण्यग्रहस्तेकाएवमुत्सर्गापवादस्थलेपितदुक्तंहरिणाब्राह्मणानांक्षतिर्दधिनिप्रक्रांतामाठरंविनामाठर
स्तत्कृसंबंधीतत्रावशेषयथार्थतामितिदधित्राह्मणेभ्यइत्यादौमाठरवर्जमेवदधिदानंउपक्रांतमुत्तरकालंतत्कंमाठरा
येसेतनस्ययथार्थेनांगमयतीतिभिन्नवाक्यतायामशाब्दत्तुमानेवाननत्संबधंविनानन्वयस्यप्रतियोग्याकांक्षयात
त्संबंधोवकुमशक्यःस्वाकांक्षाभावपदार्थएवमसविषयइत्यस्यविस्तरःअभावपदेचविरोध्यर्थकएवसःभाववि
रोधीत्यर्थःएवंचाभावस्यभावविंप्रतियोगिकत्वमेवाभासाभावइत्यादिव्यवहारोववैराणामप्रमाणिकएवघटाभा
वोनास्तीत्यादौतत्कतत्कमत्तायाभावप्रतियोगित्वएवंमेवनामहत्वदत्तत्रात्तेइत्यादावपिवोध्यं येननाप्राप्तेनावि
स्तुःपृथिवीपतिरित्यादौनञ्द्वयस्यप्रकृतार्थगतदाढ्र्यद्योतकत्वं तदुक्तं चिनञ्द्वयंद्र्तिसत्रेनाष्येतौप्रतिषेधौ
प्रकृतमर्थंगमयतःननमहसहैवेतियद्वाविस्तुःपृथिवीपतिर्नभवतीत्यर्थःमध्यामिकोरवज्ञातंमसरेनकोपादि
त्यादौकाकुसहकारेणनञामंथनादिगतंनिश्चितत्वंद्योततेतदेवाभिलप्यतेमध्यास्येवेतिज्ञाज्ञाम्बंगंनास्तीत्यादौवो

नञ्०
१८

यप्रतियोगिप्रसिद्धेः सत्त्वात्तद्दोषः वह्नित्वेन घटो नास्तीत्यादावप्रसिद्धप्रतियोगिकाया अभाववुद्धेः सोदंडादिभिः स्वीकाराच्च
अत्रेदं बोध्यं प्रतियोग्यारोपोऽभावज्ञाने तद्व्यवहारे च हेतुः प्रतियोग्यतालिंगिताभाववुद्धेरभावात् सर्वथैव सुमेरुर्नेदं तद्दस्या-
भावपोर्व्यवहाराभावाच्च न च नञ्सूत्रे तदनालिंगिताभावबोधो भाष्ये स्वीकृत इति वाच्यं तादृशाभावाप्रसिद्धेः नञ्सूत्रेन
न एकं प्रियं इति भाष्ये प्रयुक्तस्य च नोस्माकं प्रियं नेत्यर्थः कैयटेनोक्त इति प्रतियोग्यालिंगितैव तत्राभाववुद्धिः तथा वा-
ध्येचेति सत्त्वे भाष्ये न नञिति द्वित्वे उदाहृतं तदपि न न भारती सेकदेशा इति कैयटे न व्याख्यानं एवमन्यदपि भाष्ये परिदृश्यते इ-
ति ग्रंथे न निसं प्रतियोग्याकांक्षैव दर्शिता एतदेवाभिप्रेत्य नञ्सूत्रे भाष्ये स्पष्टं ब्राह्मणं दृष्ट्वा गुणस्य गौरत्वादेर्दर्शनाद्
दुष्टोपदेशाद्वा अब्राह्मणेऽयं ब्राह्मणोयमित्यध्यवस्यति ततः पश्चादुपलभते नायं ब्राह्मणस्ततोऽब्राह्मणोयमिति प्रयुं-
क्ते अत्र तस्य तदुदृष्टगुणदर्शनाद्दुष्टोपदेशाद्वा ब्राह्मणत्वाध्यवसाय एवं कमेवायं न ब्राह्मण इति ज्ञानं भ्रमयं कालवा-
र्भावयति आसीनं दृष्ट्वाध्यवस्यति ब्राह्मणोयमिति यथास्थितं वस्तुतत्त्वं तस्य न ज्ञातं भवतीति तदारोपाभावान्न तदा-
भावज्ञानं तत्रेति ब्राह्मणाब्राह्मणशब्दयोरुभयोरपि तत्र प्रयोगाभाव इत्यर्थः कं एतेन प्रतियोग्यारोपस्यान्वयव्यतिरेका-
भ्यां स्पष्टमेवाभावज्ञाने कारणतोक्ता एतदेवाभिप्रेत्यारोपितरजतत्वायामेव शुक्तौ नेदं रजतमिति प्रतीतिरिति लीलावत्यु-
पाये उक्तं अत एव प्रतियोग्यधिकरणाभावो निरूप्यत इति कृत्वाः अधिकरणपदेन संनिधानात् प्रतियोग्यारोपाधि-
करणमेव तदेवाभावाधिकरणं आरोपस्यैव ज्ञाप्यप्रयोगकारणत्वाद्धेतुरपि तदारोपविषयस्यैव प्रतीतेरारोपितत्वमे

वनमर्थइतियुक्तं अत्रब्राह्मणोनास्तीत्यादावपि एतद्देशाधिकरणकारोपितब्राह्मणकर्तृकाभावस्यैवबोधः आर्थ्य
स्तु तत्तद्भावबोध अतएव तत्र तत्संसर्गेतरसत्ताप्रतीतिः अतएव ननः एकक्रियमित्यादौत्वसंबंध्येकक्रियनिषेधेनैकक्रि
याप्रतीतिरितिभाष्येउक्तं एवंचयत्रतादात्म्यारोपस्तत्रारोपितत्वंनामार्थेगतं यत्रसंसर्गारोपस्तत्रक्रियागुणगतं तद्वितिबो
धस्याद इदमेवयुक्तं अन्यथानकलंजंनञ्यदित्यादावनुपपत्तेः यदिकलंजभक्षणाभाव प्रेरणाविषयइतिबोधस्तत्र
प्रत्ययानांप्रकृत्यर्थान्वितस्वार्थबोधकत्वव्युत्पत्तिभंगः तस्मादारोपितंकलंजभक्षणं प्रेरणाविषयइतिबोधः अनिष्टसा
धनत्वंबुध्यतेइतिविधिवादेस्पष्टं अतएवतत्सादृश्यप्रमाभाव अतद्भावत्वंतदल्पता अप्राशस्त्यंविरोधश्च नञर्थाःषट्प्र
कीर्तिताइत्यसंगतंयुक्तं वाक्येसादृश्यादार्थिकार्थेषुभावनेदयोगेननमितिदिक् यत्तुप्रमायांगुणस्यकारणत्वानुरोधेन अ
प्रतियोग्यारोपस्याभावप्रमायांहेतुत्वमिति तन्न प्रमायागुणजन्यत्वेमानाभावात् चक्षुर्गतपित्तदोषाभावेशंखेप्वे
त्वप्रमातत्त्वेन तज्जत्वमङ्कुरवत् अजानाभावेशंखप्रमातत्त्वेतेषामन्वयव्यतिरेकाभ्यां तत्प्रमायांतद्दोषस्यप्र
तिबंधकतायाएवकल्पनात् सत्यांसामग्र्यांकार्यविरोधित्वमेवप्रतिबंधकत्वं आरोपेगुणत्वाभावाच्च प्रत्यक्षेतेनदुष्टे
न्द्रियसन्निकर्षादेः आहार्यारोपेज्ञानस्यगुणस्यसत्त्वाच्च यत्तुअघटइत्यादौसमासेष्वाप्यसादाभावात् घट
भिन्नइत्यबोधः अत्रवर्षाहेमंतौनवयस्त्रीत्यादौहेमंतादिगतलिंगंतुनलोकाश्रयत्वाल्लिंगस्य असइत्यादौसर्वनामका
र्यंतुएतत्तदोः सुलोपोकोरनञ्समासइतिज्ञापकेनसर्वपदार्थप्राधान्येष्वुत्तरपदार्थप्राधान्यप्रयुक्तकार्यज्ञापनात्

ं॰ मं॰सू॰ अत एवात्वं न वसीत्यादौ तु लक्षणवत्या अनेकमन्यपदार्थे ऽस्यैकवचनं तु विशेष्यमतस्तु विसस्यैकवचनांतत्वात् सेत्स्यते।
१ १९ नेकयाऽस्य त्वाविपोषयेति विशेष्यानुरोधे नैकवचनमत एव पतंस्यनेकेऽस्यादौ बहुवचनमपि न शोद्योनकत्वेन लिंगोवित
त्वेष्टाद्यर्थ इति नियुक्तं द्योस्यार्थस्य विशेषणतायाएव भाष्यसंमतत्वादिति तत्र नाभ्यां लिंगोस्त्रीसर्थकेऽतौस्त इति प्रयो
गे द्विवचनानापत्तेः एकवचनापत्तेश्च किंच विशेष्यानुरोधादनेकमित्यस्यएवैकवचनेऽवर्षीहेमंतऽस्यादावप्येकवचना।
पत्तिः स्वःगतान्यसंख्यामत्वे विशेष्यगतसंख्यावचनं भवतीत्यनुशासनानावाश्च पसंतनेकेऽस्याद्यसाध्वेव एकेनैवाने
कत्वाद्येन सकलार्थप्रतीतेरनेकानेकत्वाद्यप्रयोगापत्त्या नेकोरथ्योगजोऽश्चऽस्यथादेकशेषेणवहुवनमित्यपास्तं किं
च विशेष्यबोधकरथ्यादिपदानां पृथक्विक्तित्वेकस्यैवानेकपदस्यार्थस्यान्वय इति एकशेषानुपयोगः तेषां द्वंद्व
निर्देशेपिसमुदितैकस्यैवान्वयसंभवात् तदनुपयोग एव एतदेवाभिप्रेत्य भाष्येऽदंस्वल्वपि नूयउत्तरपदार्थप्राधा
न्येसंगृहीतं किमनेकमित्यत्रैकवचनं आरोपितैकत्वबोधात् बहूनां संप्रत्ययऽस्त्युक्तं अनेकस्मिन्निष्ठतीति भाष्ये दाढतेवि
शेष्यादर्शनात् अनेकोजगतीनाम्नाऽस्यस्यसाधोरसाधुतापत्तेश्च अनन्यमासेऽस्य नेनोत्तरपदार्थप्राधान्यस्यै
वज्ञापयितुमुचितत्वाश्चेतिदिक् न कश्चिदस्तीत्यादौ नकाप्यस्तीत्यर्थः एवं नञ्समभिव्याहृतनकश्चिदादिपदं भगवन्हि
दिसमस्याम्नथत्वात् अतएव न डिसंबुद्ध्योरिति सूत्रभाष्ये नकश्चिदडिलोपेन लुप्यतेऽस्यस्य सर्वत्र लुप्तमनैवलुप्यते
इति प्रतिनिर्देशः कृतः कश्चिन्नेत्यादौ तु अनिर्धारितविशेषाधर्धिन्नेकस्मिंश्चदेवाभावः प्रत्याप्यते सजंनकाश्चिदि। ७९

जहौलादिलामिस्यत्राविकापिनविजहाविति प्रतीतौ सर्वानविजहुरिति प्रतीत्याऽदुष्टत्वं जलक्रीडावर्णने कस्याश्चिदेका
स्या एव तथावर्णने कवितात्पर्यात् एवशब्दोवधारणे एवेचानियोगेऽइति वार्त्तिके नियोगोवधारणमिति कैयटाद्युक्तेः अ
स्मादेसंनवाद्यपि तदर्थः अवधारणं ज्ञानविशेषः सचैवकारोद्योत्यएव समभिव्याहृतपदार्थप्रकारकज्ञानरूपा
र्थविशेषणं अवधारणविशेष्यः पार्थो धनुर्धर इति बोधः साधारण्येन धनुर्धरत्वज्ञानवत्तं प्रति तद्भ्रमनिरासायैवं प्रयोगा
त् नाऽन्यो धनुर्धर इति तु फलितिकदाचित्स्पष्टत्वार्थं तस्य योगो विपयथा त्वन्मुखं त्वन्मुखेनैव तुल्यं नान्येनकेनचित्
इति आर्यासप्तशत्यां लक्ष्यस्य शब्देन प्रतिपादने पौनरुक्त्याभावस्यालंकारिकैरुक्तत्वात् लक्षणमेवासौ नुक्तेरस्यादोष।
चुयाद्यर्थकस्य घट एव प्रसिद्ध इत्यादावप्यर्थकस्यैकेवनोत्तमे इत्यादावसंनवार्थस्यव तस्यत्वेन तदर्थकत्वस्या
वृत्तये तदुक्तेश्च शंखेपांडुरत्वमेवेत्यादौ त्वातिरिक्तरूपानाश्रयत्वेन गृहीतसमभिव्याहृतप्रकारकज्ञानरूपमव
धारणं शंखेनेकरूपवत्त्वज्ञानवत्तं प्रत्ययं प्रयोगः एवमग्रेप्यूह्यं शंखः पांडुर एवेत्यादौ विशेषणसंगते त्वातिरिक्तरू
पानाश्रय समभिव्याहृतपदार्थकविशेष्यकज्ञानरूपं तत् अवधारणप्रकार पांडुरभिन्नः शंख इति बोधः क्रिया
संगते चैत्रो हसत्येवेत्यादौ त्वातिरिक्तवृद्धिस्य क्रियानाश्रयसमभिव्याहृतपदार्थप्रकारकज्ञानरूपं तत् नरो दिती
ति प्रतिनिर्देशात् नीलं सरोजं भवत्येवेत्यादौ नीलं भवनात्यन्ताभावानधिकरणसमभिव्याहृतप्रकारकज्ञानरूपं तत्
नभवतीति नेति प्रतिनिर्देशात् ज्ञानमर्थं गृह्णास्येवेति आदौ अवच्छेदकावच्छेदेनार्थग्रहणाद्यन्ताभावानधिकरणज्ञा

नादिप्रकारकज्ञानरूपं नग्र[illegible]तीति नेति प्रतिनिर्देशात् ज्ञानकर्तृकमर्थकर्मकमवधारणविषयो ग्रहणमिति बो
धः शीत एव स्पर्शो जले इत्यादौ शीतान्यस्पर्शाद्यनधिकरणसमभिव्याहृतपदार्थप्रकारकज्ञानरूपं नान्यः स्पर्शो जले
इति प्रतिनिर्देशात् चैत्रेणैवेयं दृश्यते इत्यादौ चैत्रान्याकर्तृकसकलकारकविशिष्टदर्शनादिक्रियाविशेष्यकबोध
रूपं तन्न घटत्वं पृथिवीवृत्त्येवेत्यादौ पृथिव्यन्यावृत्तिघटत्वप्रकारकज्ञानरूपं नान्यवृत्ति इति प्रतिनिर्देशात् अवधा
रणविषयपृथिवीवृत्तित्ववद्घटत्वमित्यादिप्रकारेण बोधः ऋतौ स्वनार्यामुपेयादेवेत्यादौ स्वाभावानाश्रयप्रकारकप्र
कारकज्ञानं रूपं तन्नोपेयादिति नेति प्रतिनिर्देशात् एवं च ऋतुकालाधिकरणकस्वनार्याकर्मकमवधारणं विषयो
गमनं प्रेरणाविषय इति बोधः तेन तस्य प्रत्यवायसाधनत्वं लभ्यते सकलसाधारणं अवधारणत्वं अखंडोपाधिः ते
नैव रूपेण शक्तिबोधश्चेति बोध्यं पंचपंचनखा भक्ष्या इत्यादाववधारणविधेयबुद्धिस्थवृत्तिपंचसंख्यावृत्ति
पंचपदस्य लक्षणा अवधारणं चान्यत्वातिरिक्तसंख्याधिकरणासंबंधिसमभिव्याहृतप्रकारकज्ञानरूपं ते
नान्ये भक्ष्या इति फलति एवकारस्य तदर्थे लक्षणया वा फलं तु ज्ञापकप्रमाणबोधितस्य तदतिरिक्तविषयत्वा
भावकल्पनमिति इष्टसिद्धिः यत्वेवकारार्थोऽन्ययोगव्यवच्छेदः पृथिव्यामेव गंध इत्यादौ पृथिव्यामितस्यैवकार्थे
न्यत्वे गंधे वान्वयः पृथिव्यन्यावृत्तिः पृथिवीवृत्तिर्गंध इत्यादिक्रमेण बोधः विभक्त्यर्थरहितस्यापि पृथिवीपदार्थ
देरन्वयो भुसत्तिवैचित्र्यात् शाब्दे नन्वाख्यातं च विभक्तिं विना तंत्रेणोच्चारणासंभवाच्च पृथिवीवृत्तित्वस्यमानं

न्तरेणलाभाच्च अतएवैवकारसमभिव्याहृते नविधेयतायां तात्पर्यं किंत्वाप्यभिमतनिवृत्त्याभावेवेतितांत्रिकाः एवंचैवकार
समभिव्याहारेणार्थैवपरिसंख्यासाचोपात्तातिरिक्तेसमभिव्याहृतपदार्थान्नावगमरूपा यथा पार्थ एवधनुर्धर इत्यत्रा
न्यैनान्योधनुर्धर इति सचनैवघटितवाक्यार्थः किंत्वार्थएवोक्तरीतेः शाब्दीतु त्वन्मुखं त्वन्मुखेनैवेत्यादौ पंचपंचनखाइत्या
दावप्युक्तरीत्यार्थ्येवपरिसंख्या अतएव युष्मद्युपपदे इत्यादौ नियमार्थीयमारंभो युष्मद्दिमध्यम एव युष्मद्येव मध्यम इ
तिवेति भाष्ये उक्तं तेनहि नियमशास्त्राणामेवकाराभावेपि तदर्थाभावे नबोधकत्वं सूचितं यत्तु पंचपदस्यैवं चातिरिक्त
लक्षणान्तस्यपदस्यान्तत्वाभाववत्तितेनपचातिरिक्तान्तस्यत्वाभाववंत इति बोध इति तन्न पदद्वयलक्षणापत्तेस्तयोक्त
कारस्यैवन्याय्यत्वात् किंचैवं शास्त्रप्राप्तस्य शास्त्रीयमै नियमे विकल्पवारणाय सामान्यविशेषन्यायेन विधेस्तद्विष
त्वाभावकल्पनमित्यपि गौरवं किं मासेत्यं पुंसांसविधमनवद्यं युष्मदि तदित्यार्थ्यपरिसंख्योदाहरणमिति प्रकाशादिग्रं
थासंगतेश्चत्वईत्याहि युष्मदित्सविधातिरिक्तमनासेव्यमिति बोधेनस्याः शाब्दत्वात् अतएव शाब्दपरिसंख्यायां किंन्तू
षणं सुदृढमत्र यशो नरत्नमिसुदाहृतं भाष्यकारो विषयस्य शायामाह किंशब्दापराशब्दयोरुपदेशः कार्यं नेतान्यतरो
पदेशः अन्यतरोपदेशो न कृतं तस्मात् तद्यथा भक्ष्यनियमेनाभक्ष्यप्रतिषेधो गम्यते पंचपंचनखा भक्ष्या इत्युक्ते गम्यत एत
दातोन्येऽभक्ष्या इति अभक्ष्यप्रतिषेधेन भक्ष्यनियमः तद्यथा अभक्ष्यो ग्रामकुक्कुट इत्युक्ते गम्यत एतदारण्यो भक्ष
इति एवमिहापि यो गौरित्युपदिष्टे गम्यत एतन्नुगाव्यादयोऽपशब्दा इति गाव्यादिषु चोपदिष्टेषु गम्यत एतत् गौरित्येष शब्द

मं.सू.० नीतिस्तत्र सुशब्दोपदेशः साधुत्वबोधनद्वारा प्रयोगविध्यर्थः अपशब्दोपदेशः तन्निषेधार्थः अत्र गम्यते इत्युक्तास्तस्या।
८१ ज्ञानस्य शास्त्रबोधाविषयत्वं स्पष्टमेवोक्तं किं च लक्षणावादितमते दृष्टं तदादृष्टेति कयोर्महद्वैषम्यं नियमेनेतस्य बोध
देशेनेत्येवार्थः संदर्भबलाल्लभ्यते शास्त्रान्तरेणानुपदेशात् अर्थतो लाभाद्वायं न मुख्यमुपदेश इति नियमपदप्रा
योगः ईदृशाइतरनिवृत्तिफलकमुपदेशं एवं च नियमपदेनोच्यते इति प्रामाणिकाः परेतु इमामगृह्णन्रशनामश्व
स्येत्यस्याभिधानीमादत्ते इत्यत्र गिलिंगा ऊर्द्धं नरशनायामविशाम स्य मंत्रस्यापूर्वविधिद्वारा परिसंख्यान इत्युक्तं तंत्रवार्तिके
अपूर्वविधिरेवायं यतो मंत्रश्च निश्चतः परिसंख्याफले नोक्तेति आलंकारिका अपि परिसंख्याप्रकरणे प्रमाणान्तरेणप्रा
प्तस्यैव वस्तुनः पुनः शब्देन प्रतिपादनं प्रयोजनाभावादनूद्य तुल्यान्यव्यवच्छेदं गमयतीति नागवतेपि लोकेप्यवाय।
मिषमद्यसेवानित्यास्तु जंतोर्नहि तत्र चोदना व्यवस्थितिस्तेषु विवाहयज्ञसुराहेराम्सु निवृत्तिरिष्टेति नित्याः रागतः।
प्राप्तेः जंतोः प्राणिमात्रस्य अतस्तत्र चोदनाविधिर्नास्ति नन्वेवं ऋतौ भार्यामुपेयात ऋतस्नोषंतस्यपेत् सौत्रामण्यां सु
राग्रहानुगृह्णातीत्येतेषां वैयर्थ्यं भार्या विवाहेतां तत्राह व्यवस्थितिरिति तेषु पुनः प्रापणमित्यर्थः रागतो नित्यप्रा
प्तत्वान्नैते नियमविधयः पाक्षिक्यां हि प्राप्तौ नियमो भवति किं तु प्राप्तस्याप्यर्थस्य पुनः प्रापणमनर्थकमित्यपूर्ववि।
धिद्वारास्य निवृत्तिः फलतीति तदाहास्तु निवृत्तिरिति भाष्येपि नियमपदेनास्यनुज्ञा स्त्वलुम्नातां तु यो भार्यामितिदो
श्रवणं तु मनमिकामेसत्यपि स्त्रां द्वेषां दिनातुपगमे बोध्यं एवं च ऋतौ भार्यामित्यस्य ऋतावेव न तत्र भार्यामेवत ८१

ऽन्तामुपेयादित्येतस्यार्थद्वये तात्पर्यं अत एव गृहस्थस्यानृतावनुपगमो ब्रह्मचर्यमुक्तं अविवाहितागमने ऋतौ चा
र्यागमनाभावे प्रायश्चित्तं चोक्तं स्मृतिषु तत्रान्यत्र च प्राप्तौ परिसंख्येति गीयत इत्यस्य शास्त्री आष्टी वेसर्थः इजादेः
सनुम इति सूत्रे कैयटोप्याह नियमे प्राप्तबाधः सिद्धस्य पुनरुपादानं अनुवाददोषश्च यस्य हल इति सूत्रे विनियमे
श्रुतार्थत्यागेनाश्रुतायाश्च निवृत्तेः सामर्थ्यात्परिकल्पनमुक्तानुवाददोषश्चेत्यनुपपन्नमिति सूत्रे भाष्येपि प्रति
षिध्यते तत्र परस्मैपदं स्वरितञितः कर्त्रभिप्राये क्रियाफले इत्यात्मनेपदं भवतीत्युक्तं तेन हि विधेरेव प्रतिषेध आर्थफलमि
ति स्पष्टमेवोक्तं एवकारोपि स्वसत्ते स्फुटं तदर्थद्योतक एव न तु तत्समभिव्याहारेपि शाब्दबोधे नक्तातं तत्समभिव्याहारे
ण मनसा बुध्यमानत्वमपि द्योतकत्वं एवकारासमभिव्याहारेप्यनुवादबलादेव तदर्थलाभः शाब्दपरिसंख्या तु त्वन्मुखं
त्वन्मुखेनैव तुल्यं नान्येन केनचित् किं दूषणं मुद्दृष्टमत्र यज्ञो नरत्वमित्यादिस्थे युष्मद्युष्मदि मध्यम मध्यम युष्मद्या
व मध्यम इति भाष्ये नैवकारासमभिव्याहारासमभिव्याहारयोस्तुल्यार्थत्वमेव सूचितमिति स्यात् पक्षद्वयेपि स्वार्थहानि
परार्थकल्पनाप्राप्तबाधरूपदोषत्रयं तु यथाश्रुतेऽप्रतीयमाने स्वार्थे तात्पर्याभावात्तात्पर्यान्न स्वागोन्यार्थैता
त्पर्यांगीकारेण तात्पर्यतः परार्थकल्पना प्राप्तबाधश्चेति स्वरूपपादं ननु व्रीहीनवहन्तीत्यादौ पक्षे प्राप्तस्य नियमेऽवह
ननियमव्रीहीन्प्रसंस्कुर्यादित्यत्र नखविदलनादिनेति प्रतीतेन अपि त्रैदोष्यं प्राप्तमिति परिसंख्यातस्तस्य लघुत्वमवहा
रानुपपत्तिरिति चेन्न पक्षे स्वरसत एवनस्याप्राप्त्याकृतस्य बाधस्यैव बाधकल्पनेन परिसंख्यायां तु निःस्वप्राप्तस्य कृत्स्नबाध

मं॰भू॰
८२

स्य कृत्यनामिति ततः परिसंख्यायां गुरुत्वात् तत्प्राप्तिकस्यैव च प्राप्तिबोधनेनाशब्दविधेरपि नियमस्य लघुत्वं अस्मा-
दस्मात्त्वे नियमस्तु अत्र नपदं विधायके मध्यमादि विधायके च प्रकृतसुपपदनियमरूपतद्विषये हि प्रत्ययानां प्राप्ति-
की प्राप्तिः अत एव युष्मदीतिसूत्रे उपपदनियमं प्रकृत्य समये देवो यजे त्वेति वसाद्धिकं प्राप्तो नियम इति कैयटः
न च तत्सूत्रे नाप्यो कृत्प्रत्ययनियमानुपपत्तिः प्रत्ययनियमस्य परिसंख्यात्वेन गुरुत्वादिति वाच्यं एतदनपेक्षे-
तरत्फलमस्ति नवेति एतावन्मात्रेण प्राप्तबाधकत्वेन द्वयोः समतामाश्रित्य नाप्ये विचारसत्त्वे नादोषात् ए-
वं च पचपचपचनस्वादिस्यादेः पत्तिः समासएवेस्यादेश्च विधिसूत्रस्थे नैव प्रवृत्तिः अवधारणविषयत्वबोधनात्
पुनरनुवादाद्वा सामान्यप्रायकप्रमाणस्य तदतिरिक्तविषयकत्वरूपः संकोचः तेन चार्थस्तत्कार्यमावा-
त्मामादाय नियम्यशास्त्रस्य प्रतिषेधत्वव्यवहारो नान्यत्रे स्यादि प्रतिनिर्देशाद्ध्येयमन्यत्र विस्तरः इति धात्वर्थनिपा-
तार्थनिर्णयः ॥ ॥ धातुप्रकृतिक तिङां कर्तृकर्मरूपाश्रयोऽर्थः तत्र कर्त्ता क्रियाव्यापाराश्रयः कर्मलिफ-
लाश्रयः धात्वर्थमात्रानुवादकस्तु भावे तङ् लः कर्मणि च भावे चाकर्मकेभ्य इति सूत्रात् चेन तत्र कर्त्तुरनु-
कर्षः आश्रयत्वं चाखण्डं शक्यतावच्छेदकं तस्याश्रयनिरूपकसंबंधेन दाने देव्या आश्रयतात्वेनानुगमा-
न्नशक्त्यानन्त्यं न चाश्रयः प्रथमान्तपदेन लब्धः आश्रयतात्वेनाप्रतीतिः वस्तुतः कर्तृत्वादिशक्तिमत्त्वे-
नैव समप्रत्ययार्थः साशक्तिश्चाश्रयनिरूपकत्वेनेदं देवैकेचेति गम्यर्थलोटे इति सूत्रे कैयटः तत्र समम १ ८२

पंचम्यौकारकमध्येइतिसूत्रेतत्रशाब्दान्त्रयस्य ग्रंथविरोधात् तस्मात्तद्भेदाद्भिन्नत्वे सा कर्तृत्वेनचानुगमा
इत्येवतत्त्वं यत्तु कृत्साश्रयस्य कर्तृत्वेन तत्र शक्तौ शक्यतावच्छेदकगौरवात् कृतिरेव शक्या नचकर्त्तरि कृदि
त्यतोनुवर्त्तमानकर्तृपदस्य कृत्प्रत्यये वैयर्थ्यं ज्ञानजादौ सत्त्वन्ततो भावोर्थो न्यतेऽस्मादीतिइत्ते सत्वन्न
नइतिवैषम्यस्यादोषत्वात् कृतित्वंच जातिरूपं शक्यतावच्छेदकं पचति पाकं करोतीतिधात्वर्थस्य कविवि
यमाणत्वेनधात्वर्थव्याप्यत्वात् तस्मात्तदतिरिक्तव्यापार एव धातुशक्यः रथो गच्छति जानाति यतते ऽस्मादावाश्रय
त्वे लक्षणा वर्त्तमानत्वा वर्त्तमानत्वाद्यन्वयस्तु सर्वत्र धात्वर्थ एव कर्माख्यातवदस्याश्रयत्वे शक्तिपक्षे तु धात्व
र्थेऽस्माकं तन्न तस्य तावच्छेदकत्वस्येव शक्यतावच्छेदकत्वस्यापि गुरुणोऽलीकरिवाधकाभावात् अस्मा
नानतिरिक्तवृत्तित्वरूपस्यावच्छेदकत्वस्य गुरुण्यपि सत्त्वान्न किंचित्क्षतं अस्तु वा सं नवति लघौ गुरौ नाव
च्छेदकत्वमिति परं तु यत्र लघुगुरुत्वरूपाभ्यां वोधो निर्विवादस्तत्रैव लघुधर्मावच्छिन्ने शक्तिः पूर्वावच्छिन्ने लक्षणे
ति युक्तं प्रकृते च प्रत्ययात्कृतित्वेन वोधः सविवादः धातुत एव तद्वोधात् किंचेदं गौरवं गुरुतरस्यारोढहनमिव
शरीरस्यचितस्यतानखेदजनकं कर्त्तयदादेस्तथा शक्तिग्रहेण तत्रतत्र ननु सवात् विशेष्यस्यानेकत्वेपि तद्रूपे
दवत् शक्यतावच्छेदकानेकत्वेपि तद्दोषात् अतादृशस्यास्तु न दुष्टं त्वद्वीजाभावात् न चैतदेवानुपपन्ना ज्ञा
तो शक्तिसत्त्वशक्तिज्ञानस्यावश्यकत्वात् अन्यथा गोत्वेनाश्वादिवोधस्यापत्तेरिस्य गवस्या मः विवरणे धा

मं॰ जू॰ तोः इत्थञ्च विवरणं तु तवाख्यातप्रत्ययार्थसंख्याकालकृतीनां मध्ये कृतेः कृधातुना संख्यादेस्तु उत्तरतिङा वि-
८२ वरणवत् धात्वर्थे कृतेरपि उपपन्नमिति न तत्प्रत्ययार्थत्वसाधकं अस्तु तत्र कृतिभूतः कृञा विवरणात् पच-
तीत्यत्रापि तस्याः प्रकृत्यर्थत्वमेव युक्तं तथा विवरणं तु मतिसंभवे संभवे सर्वत्र तस्याः प्रकृतिवाच्यतां बोधयितुं
किं च कृञ् व्यापारसामान्यार्थ एव न यत्नमात्रार्थः वा तत्र रोगादिना कंपमाने नाहं स्पंदं करोमीति व्यवहारस्तु व्याप-
रमध्ये कृतेरपि प्रवेशात् तदभावे त्वसमुदायाभावतात्पर्यकः काष्ठानि पाकं कुर्वन्तीत्यादौ तु प्रत्येकव्यापारवि-
वक्षयैवात्र तस्याः एव धात्वर्थत्वाद्वा एवमेवांकुरेण कृतो बीजादिना कृत इत्याद्युपपत्तिः अत एव कथं ज्ञायते
क्रियावचनाः पचादय इति पदेन्नेषां करोतिना सामानाधिकरण्यं किं करोति पचतीति भूवादिसूत्रे भाष्ये
उक्तं अनेन विवरणमपि धातोरेवेति कृञ् व्यापारसामान्यवाचीति च स्पष्टमेवोक्तं न च तवाख्यातार्थान्वय प्र-
कारकबोधं प्रति प्रथमांतपदजन्यबोधो हेतुस्तदर्थसंख्याप्रकारकबोधे तदर्थान्वय ज्ञानं हेतुस्तदर्थकाल-
प्रकारकबोधे धातुजज्ञानं हेतुरिति कार्यकारणभावत्रयं मम तु काले इष्टसाधनत्वाद्यतिरिक्ताख्यातार्थबो-
धे प्रथमांतपदजन्यज्ञानं हेतुरिति संख्याभावत्रयोरेक इति लाघवं आख्यातत्वाद्यज्ञाने तदीदृश कार्यकारण-
भावव्यवहारासंभवात् किं चाख्यातेन क्वचित् कृतेः क्वचिदाश्रयत्वस्य बोधः कृतेः क्वचिद्धातुना क्वचित्प्रत्यये-
न बोध इत्यर्थस्य पर्यवसितत्वेन त्वन्मते नैक क्लिष्टकार्यकारणभावापत्तेः न तल्लघुमतसमनुसारेण तथा न तथात्वो ८२

धस्य तेषां तेषां ज्ञायमानत्वेनुत्पत्त्या तथा कार्यकारणभावानां सर्वेषां आवश्यकत्वेन लाघवगौरवविचार
स्यायुक्तत्वाच्च किंच कृतौ शक्तिः इत्यो वदतेरथो गच्छतीत्यादावाश्रयत्वे लक्षणेति अयुक्तं दृष्टिगमननिरूपि
ताश्रयत्वे न इष्टरथनिष्ठेन कृतेः संबंधाभावात् अत एव कामप्रकाशकृतापयोजने तल्लक्षणासंबंधाभा
वात् इत्युक्तं अर्थनिर्देशवैयर्थ्यापत्त्या स्वस्यानुशासनादिवैयर्थ्यापत्त्या च विभक्तौ लक्षणा नोचिता च
अर्थनिर्देशस्यान्यार्थे साधुत्वबोधनफलकत्वेन लक्षणया अन्यार्थे प्रयोगमात्रस्यासाधुत्वाच्च किंच युष्मद्यु
पद इति सूत्रे कृत्स्यकृत्यनुमत्वसिद्धसामानाधिकरण्यस्य तन्मते अनुपपत्तिः तिङ्योभिन्नत्वं हि तिङ् सामा
नाधिकरण्यं तिङ्थसंख्यान्वयिवाचकत्वादे यौगिकसामानाधिकरण्यशब्दावाच्यत्वात् यत्तु पचतीत्येताव
न्मात्रोक्तावपि कर्तृत्वैकत्वसंज्ञायानुसत्ता तत्र लक्षणावश्यकत्वे न लक्षिते न सामानाधिकरण्यमिति तन्न
शक्तेरेवोचितत्वात् अन्यथा विशिष्टशक्त्युच्छेदः कृतिमात्रबोधस्य कायणाभावाच्च किंचैकः पचतीतिवत् अनेक
पचतीत्यस्यापि सत्त्वेन पचतीत्येतन्मात्रोक्तौ न तत्संज्ञायस्येष्टत्वात् किंच युष्मदस्मद्भेषरूपकर्तृकर्मणोस्तिङ्
थसंख्यान्वयिनार्थे गणएव प्रथमादीनां तन्मते साधुत्वेन तत्र संख्यान्वये नैव तत्संदेहानुपपत्तेः अत एव पच।
तीत्येतावन्मात्रोक्तौ कः कीदृश इति प्रश्नोदयवदत्तो घनश्यामस्तु तत्संख्यारसनः संगच्छते किंच पचत्यजयोः
अचकादिस्यासैप्रसयलोपे नयलकालसंख्यानां धात्वनुवाच्यत्वावश्यकत्वे न तत्र शक्तिकल्पने गौरवं प्रसपद्यो

सु०१० स्तत्वेनुपपत्तिस्यात्तिङोनापत्तिः किंच तवाभिधानानभिधानयोरेव स्यादनुपपत्तिः संख्यानभिधाने इत्यर्थे चैत्रः पक्ता
८४ स्यादौ तृतीयापत्तिः न च कर्त्रामपि संख्यावाचकत्वात् अनुशासनानां वैयर्थ्यमभावात् तद्वाचकत्वांगीकारे कर्त्रादिकृदिस्या
देवैयर्थ्यस्याभावेनैव तद्वाचकत्वस्यापि संभवात् अर्थबोधकानुशासनानां नियमार्थत्वेन तस्यासाधुतापत्तेश्च
प्रत्ययशक्तिग्राहकतायाः क्वचित्प्रवृत्तिशक्तिग्राहकतायाश्च व्याकरणमात्रे सत्त्वाच्च शक्तिग्रहं व्याकरणोपमानेत्या
दिना कोशशक्तिग्राहकेषु उक्तस्यापि संभवाभावेन इति चेत् किंचिदेतत् संख्याकर्त्रोरन्यतरानभिधाने इत्यर्थे गौरवं दु
र्निवारत्वं च तङिन्नभिन्नत्वस्यैवान्यतरत्वरूपत्वात् किंच तद्विधावुपस्थितस्य द्वयेकयोरित्यस्य किं लकारार्थस्यैकत्वादा
विस्यर्थे उत तिङ्पदानामानान्वयिगतैकत्वादाविति आद्ये सिद्धं नः इष्टं प्रसंगात् द्विधेयतिङ्गतदर्थानां चैतद्वाक्या
उद्देश्यत्वानुपपत्तिः अस्मदादीनुप्रत्यस्यैव व्याकरणस्य तदर्थे शक्तिग्राहकत्वात् न तु तिङ्वाच्यकारकवाचिनीति
त्वदीयानां व्याख्याने पि कथं तस्योद्देश्यकोटौ निवेशः सर्वैकवाक्यतया तिवादिसमुदायस्य विधायकत्वमिति सिद्धांतेम।
नान्तरेणालाभात् न च तिङ्पदेन स्वस्यानीलकारो लक्ष्यते लकारवाच्यकारकवाचिनीत्यर्थ इति न दोषः इति वाच्यं पर
मत्वं पचमि त्वलकल्पः पचसीत्यादेरसिद्ध्यापत्तेः अत्र हि त्वत्कल्पत्वशक्यस्य तद्वाचकत्वेपि युष्मदर्थस्यानत्वाभावात्
युष्मदस्मदिति विशिष्टरूपपरिग्रहाद्स्य च शास्त्रांतरत्वात् इति कैयटोक्तश्च न च युष्मदीत्येव सोत्रालक्षणया
युष्मद्वतीत्ये तदर्थकमिति वाच्यं अतित्वं नवतीत्यादौ मध्यमापत्तेः स्पष्टं चेदं भाष्ये इति चेन्न युष्मदिसाधनइत्यो। ८४ २

वं न भविष्यतीति भाष्य एव समाधानात् युष्मदर्थे न यत्र लस्तस्य सामानाधिकरण्यं तत्र मध्यम इति सूत्रार्थे न तत्र तद्वान
इति कैयटः एवं च लवाच्यसाधनसमानाधिकरणयुष्मदर्थप्रतिपादकशब्दे उपपदे मध्यम इति सूत्रार्थः सामानाधि-
करण्यं च तदर्थप्रवृत्तिनिमित्तयोर्बोध्यं परे तु युष्मदादिक्रियासमानाधिकरण इति व्याख्यातं क्रियाक्रियावतोश्चाभेदा
त् तत्पुल्लिंगं इदमग्रे संख्याप्रकरणे स्फुटीभविष्यति अत एव कैयटे लस्तस्येत्युक्तं अन्यथा लस्येत्येव वदेदिति भावः नच
व्याकरणं साधुत्वमात्रतात्पर्यकं नार्थव्यवस्थापकमिति वाच्यं व्याकरणं शक्तिग्राहकमिति तत्त्वदृष्ट्योक्तत्वसंगते अर्थविशेष
पुरस्कारेणैव साधुत्वस्य भाष्यसंमतत्वाच्च पदसमयज्ञानार्थं व्याकरणमिति न्यायभाष्योक्तेश्च तदुक्तं हरिणा नेयत्ते
दकसंबंधोपाधिने इति नियंत्रितं साधुत्वं तदभावेपि बोधो नेह निवार्यते इति किंचैवं कृतामपि कर्तृवाचकत्वापत्तिः ना
चमि ज्ञायत्कीति विशेष्यसमानलिंगत्वदर्शनात् कृतिकर्तृवाच्य इति वाच्यं वेदाः प्रमाणं गावो धनमित्यादौ सामानाधि
करण्येपि भिन्नलिंगत्ववत् कचिद्व्यधिकरण्येपि समानलिंगत्वस्य स्वीकारे बाधकाभावात् अत एव भाष्ये पठ्यते लिंगम
शिष्यं लोकाश्रयत्वाल्लिंगस्येति केवलकृतो प्रयोगस्तु पक्तापाचक इत्यादिरस्त्येव न च प्रकृतिकृते ओस्य त्वेवं चैत्रेण गंतेत्या
द्यापत्तिः आख्यातार्थकृते प्रथमांतपदोपस्थाप्य इव कृदर्थे कृते कृदंतसमानविभक्तिकनामार्थ एव आश्रयत
यान्वयस्वीकारेण दोषाभावात् अन्यथा तवैवं चैत्रः पक्ता स्यादेरापत्तेः विपरीतं केवलकृतो नोति ह तत्प्रयोगाभावेन तिङामपि
तत्रत्यस्य सिद्धिः कृत्सन्निधाने नैव च तृतीयाव्यवस्था भोक्ता तण्डुली स्यादौ कृतः कर्त्तरि लक्षणास्तु तस्माद्भेदा।

मं॰ न्रू॰ ८५

न्वयानुभव एव कृतस्तु कर्त्तरि शक्तौ प्रमाणं वाच्यमेवं च कृत्यनुभवसिद्धाभेदान्वयादाख्यातप्रत्ययस्यापि विधर्मिवाचकत्वसिद्धिः
किंच कर्माख्यातस्थले तत्तद्व्यक्तेराख्यातार्थत्वाभावे नत्ततीयां नासमभिव्याहृते किं क्रियत इति प्रश्नोपपद्यतेऽस्तु त्वन्मतेनापत्तेः
कृत्यनुभवथन्नार्थकत्वात् तत्र कृतेरप्याख्यातार्थत्वे तु कृत्सन्निधाने नाभिधानापत्तेः कर्त्तरि तृतीयानापत्तेः कर्तृकरणयोरि
ति सूत्रे कर्तृसंख्ययोरिव कृतेरप्युपस्थितत्वात् किंच करोतीत्यादौ कालान्वयस्य धात्वर्थ एवान्वय इति न दोषः किंच कृ
तौ कालान्वये पाकत्यागलायां काष्ठज्वलनाद्यनुकूले यत्ने न नष्टे पच्यमानमोमोदनं पचतीत्यादिवदनेपचतीत्यनापत्तिः मम
तु पाकव्यवस्तुनिष्ठविक्लित्तिविशेषानुकूलस्य पाकत्यागलावस्थानरूपव्यापारस्य धात्वर्थस्य तिष्ठमानत्वान्न दोषः अपि
च पावक इत्यादेः पचतीत्यादिविवरणादाख्यातस्यापि कर्त्रर्थकत्वमावश्यकं विशेषणविशेष्यभावव्यत्यासेऽपि चित्रगु
रित्यादेश्चित्रा गावो यस्येत्यादिविवरणवद्दोषः वस्तुतः समानत्वं विशेष्यविशेषणभावो हृस्वार्थीवद्दृश्येकेवाक्ये इ
स्यग्रे निरूपयिष्यामः इति दिक् एतेन यत्नातिरिक्तः फलानुकूलो व्यापारो धात्वर्थ इत्याख्यातार्थः स च लिङ्घेदा
नाम तत्राप्रतीते धात्वर्थे कारकान्वयः काष्ठैः पाक इति त्वष्टमेवेति मम न्वयमत्रेवाच समस्तुक्तं गुरुमपममपाक्तम यद्वि
कर्त्रधिकरणे नव्यमीमांसकाः फलावच्छिन्नव्यापारानुकूलः कृत्यादिरर्थ आख्यातस्य स च व्यापारत्वेनैव कृत्यादिव्यापा
रस्तु विशेष्यत्वानुरोधात् तिङ्वाच्यः रथो गच्छतीत्यादावाश्रयत्वमेव तिङर्थो व्यापारस्याप्यसत्त्वभूतस्यैव तिङो न्याया
पारत्वात् व्यापारान्तरस्याननुभवात् कालान्वयो धात्वर्थव्यापारे अनभिहितेऽस्य स्याद्बोधितेकर्त्रादाविव सर्वैः बोध

श्च त्वात्तया आक्षेपाद्वा लक्षणया वा तत्र कृतिरस्त्यातिङि भावनया वेत्येतल्लक्षणया वा विपरीतं तु न भावनायाः प्रा
धान्येन प्रतीयमानतया प्रत्ययवाच्यत्वात् कृदन्तेपि भावनयाक्तुराक्षेपेण तिङीव तस्याः प्राधान्यापत्तिः तत्र कर्तु
रेव प्राधान्यादाक्षिप्तादेर्धर्मिण मादायेवमामानाधिकरण्यं संख्यान्वयश्च तत्रैव अनुगमनमप्याक्षिप्ताद्यर्थानुगमन
मेव कारकान्वयप्रसयार्थ एवं साक्षात्परंपरया वा अन्यथा काष्ठैः पाक इति स्यात् अत एव नानन्तर्यं दृष्टिनिषेध
स्य दर्शपूर्णमासप्रकरणपठितस्य विनिगमनाविरहाद्धष्टान्तार्थानतो न यथवस्य कृत्वर्थत्वसिद्धिः कर्तृवाच्यत्वे मु
ख्यपुरुषार्थस्य प्रसंगात् प्रकरणाद्धि क्रत्वर्थत्वं तस्य चमुक्तसापेक्षतया दुर्बलत्वं स्पष्टमेव शाकलिखितलाघवदित
श्चैं नैयायिकोक्तानुकृतिर्वाच्येति तद्विनश्याष्ट्यामीत्यत्र तु न च विरोधे नाक्षेपस्यायुक्तत्वात् आक्षिप्तेशष्टेपा
स्थितसंख्यान्वयायोगाच्च किंच लक्षणाया अपि शक्तेः प्राधान्यस्य तवमते सत्वे न प्राधान्यानुरोधे नशक्तिकल्पना
युक्ता वाच्ये न कर्तृलक्षितेन भावनाया अपि प्राधान्योपपत्तेः अन्यथा शक्तेरपि वाच्यत्वापत्ता वा कृत्स्वधिकरणोच्छे
दः प्रसिद्धोद्यत्वं शक्तेः स्विक्तर्तुरपीतितस्यैवाख्याते विशेष्यत्वापत्तेश्च पचति चैत्र पचति मैत्र इत्यादौ स्पष्टं परिच्छे
द्यता प्रतीतेः कंच कृधातोर्भावनार्थत्वस्पष्टत्वेन सर्वत्र धातोरेव तदर्थत्वयुक्तं रवोत्तरमीमांसयोरपि कृत्व
स्तीनां भावनासामान्यवाचकत्वोक्तेः किंच कर्माख्यातेंपच्यते इत्यादौ च पाकः क्रियत इत्यादि विवरणात् किंक्रि
यत इति प्रश्ने पच्यते इत्याद्युत्तराच्च कारकान्वयानुरोधाच्च भावनालक्षणावश्यकत्वेन सर्वत्र भावनाया एवका

मं जू० ८६

स्य त्वमुचितं किं चैवं कृत्स्नेपि कर्तुर्वाच्यत्वानापत्तिः वैशिष्ट्यवीजाभावात् आश्रितकर्तृत्वके स्विप्राधान्यापत्तेः लिंगसं
ख्याद्यन्वयक्तितिरः ते संख्यान्वय एव लक्षणे तत्प्रतिपन्नं किंच कोशव्याकरणोक्तीलिंगिकार्थन्वास्यावकत्वे तयोः श
क्तिग्राहकत्वोक्तेस्तयोर्लाक्षणिकार्थान्वास्यानस्पात्स्त्रीनाच्च अतएव तटादिपर्यायेषु गंगादिपदानुषंगे खं कोशे शुक्ला
दिपदानां गुणिष्वपि शक्तिरेव विनापि बाधप्रतिसंधानं बोधात् किंच कृतौ शक्तस्य विशिष्टे कर्तरि लक्षणायां तस्य वि
शेषणत्वापत्तिः कृतौ शक्तिराश्रये लक्षणा तत्र लक्ष्या लक्ष्यार्थस्य शक्यार्थे विशेषणत्वेनान्वयोपि स्वरं गंगादिपदश
क्यस्य तत्त्वस्ये विशेषणतायाए वदर्शनात् कुसंतरकल्पने गौरवं किंच यथा लः कर्मणि स्यादिति शाश्त्रादिविमध्ये कवा
क्यतया धर्मिणि शक्तिर्बोध्यते तथाप्तिवादिविध्येकवाक्यतया विप्रयुक्तं चैवम्पे वीजीभावात् नवलः कर्मणि चेस्य
स्यघ्रोकयोरित्यनेनैकवाक्यतया कर्त्रादिगतैकत्वादिषु इस्यर्थेन विशेषणत्वात्कर्त्रादिनेप्रत्ययार्थ इति शावरस्वामु
क्तं युक्तं तिवादिविधिनाद्येकयोरित्यस्यैकवाक्यत्वेपि तत्र कर्मणि स्यादेरभावे न तथा वाक्यार्थस्यायुक्तत्वात् लका
राणां द्विवचनादिसंज्ञाभावे न लविधिनैकवाक्यताउल्लंभात् याएकवाक्यतायामपि सुप्तिवतिङ्ष्वपि का
त्रादीनां प्रत्ययार्थतामंख्यायास्तद्विशेषणत्वं च उवारं किंच संख्यायाः प्रत्ययार्थत्वे आख्यातजबोधे तस्याविशेष्यत्वा
पत्तिः अविवक्षकर्मविशेष्ये वमेवापत्तौ तस्यापि प्रत्ययार्थत्वे भावनायाः कर्मव्यभिचारात् तदनाक्षेपे च पच्यते तंडु
लः इत्यादौ कर्मप्रतीतिर्न स्यात् न च संख्यया क्षेपः कर्मत्वं शक्तिमत्वेन बोधार्थे शक्तेरावश्यकत्वात् आक्षेपापायात् ।

श्रयत्वेनैव स्यादित्युक्तं लाघवात्तु तेनैव शक्तिरिति तत्कारी साहृषणीयां किं चैवं दण्डाद्येगाद्यादीनां पदानामपि संबं
धे एव शक्तिः स्यात् लक्षिते न च संबंधिनामसामानाधिकरण्यं स्यादित्यरूणाधिकरणेच्छेद इति समासे निरूपयिष्या
मः किं चैवं तत्रैपयमिदध्यानयत्ति सा वैश्वदेव्यामिक्षा वाजिभ्यो वाजिनमित्यादौ वाजेनान्नेनामिक्षारूपेण संबंधा
द्वाजिनो विश्वेदेवास्तानन्द्य वाजिनगुणो विधीयते तेनोत्पन्नरूपवैश्वदेवमेकमेव कर्मेति पूर्वपक्षे वैश्वदेव्यामिक्षे
त्यत्रश्रौतः संबंधो वाजिभ्यो वाजिनमित्यत्र वाक्येन समस्यपि पदान्तरापेक्षणेत्याग्निन्नार्थकपदान्तरापेक्षायामपि श्रौ
तत्वं यत्र तु भिन्नार्थकपदान्तरापेक्षा तत्र वाक्यं प्रमाणमेवं च वैश्वदेव्यामिक्षेत्येतद्विहितयागानुवादेन न वाजिनद
व्यविधानं श्रौतद्रव्येण निराकांक्षत्वात् तस्मात् कर्मान्तरविधिर्वाजिभ्य इति चार्थवदेकाविधानमिति गुणाधिकर
णसिद्धान्तस्य भंगः न च लक्षितत्वद्रव्यमादाय श्रौतत्वं वाच्यं न नु नन्दत्येति वाच्यं एवं हि नानन्तवदेदिति निषेधस्यामक्त्या पु
रुषार्थत्वस्येव शास्त्राक्कर्तुरवाच्यत्वसाधनः स्यवैयर्थ्यापत्तेः क्रतुधर्मत्वसिद्धान्तासिद्धौ नामिध्या कर्त्रधिकरणोच्छे
दाच्च न चाकृत्यधिकरणन्यायेन दण्डादिपदानां संबंधे शक्तिरिति वाच्यं तत्र शक्त्या व्याप्यानां स्यादित्यादि दोषसत्वात् न च
तदनुगमक संबंधत्वे शक्तिरस्तु दंडी स्यादि जन्यबोधे नियमतस्तद् ज्ञानात् तत्संबंधेन दंडविशिष्टस्यैव बोधात् नी
लादिन्यायश्च नीलत्वविशिष्ट नीलरूपतः प्रतीतेरनुभवसिद्धत्वात् तेषां गुणगत जातावेव शक्तिरिति यतो पपत्तिः एवं
च यज्जन्यबोधे यस्य नियमेन प्रकारतया ज्ञानमनुगतत्वं च तत्रैवाकृत्यधिकरणन्यायप्रवृत्तिरितिबोध्यं किं च प्रत्यया

मं.जू.०
८१ र्थस्य प्राधान्ये क्रियाप्रधानमाख्यातमिति निरुक्तस्य स्वक्रियाश्रयस्य प्रत्ययार्थपरत्वे आख्यातमात्रस्य लक्षणस्य
नावाख्यातेव्याप्तिश्चैत्रेण सुप्यते इत्यादौ धात्वर्थविशेष्यतायास्त्वयाप्यंगीकारात् अस्मन्मते तस्य शास्त्रबलात्
त्प्रत्ययार्थत्वस्याप्यंगीकारे कर्मकर्तरि पि शास्त्रबलात् इवास्य तादुर्वारा किंच नानृतं वदेदित्यत्रापि प्रकरणोपस्थ ।
ित्यार्थोपेक्षया क्रत्वुपस्थितेर्भावनान्वयित्वकर्तुः प्रथमोपस्थित्या क्रत्वर्थत्वसिद्धिः प्रथमोपस्थितत्वमेव हि स्फुक्ते
र्बलवत्त्वे बीजं मम तु स्फूर्ति प्रकरणान्माम्यस्य क्रतुयुक्तपुरुषधर्मता अविरोधात् विरोधे एव बलाबलचिंताप्रवृत्तेः अ
न्यथा जंजभ्यमानो न ब्रूयादस्यपि दृष्टक्रतुरस्यक्रतावपि जंजभ्यमानपुरुषसत्वाद्विरुद्धाभ्यां वाक्यप्रकरणाभ्यां पु
रुषसंस्कारमुखेन क्रत्वर्थत्वसिद्धांतस्त्वदीयमच्छिद्येत तदुक्तं भट्टैः स्मृत्याद्यमांसमनृतादि पुरुषार्थमपि स्थितः
प्रतिषेधः क्रतोरंगं लिङ्गः प्रकरणाश्रयादिति अनारभ्याधीतो नानृतं वदेदिति स्मार्ते निषेधस्तु अर्थान्तरपर एव
वेदितव्याः परावरज्ञाः केचिदृषयो यद्वानस्तद्वान इति प्रयोक्तव्ये पर्वाणस्तर्वाण इति प्रयुंजते याज्ञे कर्मणि पुना
नीपन्नाषंते तेपर्वाणस्तर्वाणो नामऋषयो बभूवः इति पस्पशाह्निकस्थभाष्यस्वरसात् एतद्भाष्यादेव दृशीर्शूले
मासपवितस्यो नयनिषेधकत्वं तेहेलयो हेलय इति कुर्वंतः पराबभूवुरिति क्रतुप्रकरणपठितभाष्यलिखित
क्रत्वंतराच्च अत एव शिष्टाव्यवहारकाले स्वदेशभाषया व्यवहारं तो न प्रत्यवायं मन्यंते अत एकत्रैवाधिक
रणत्वेन तत्र संमते अधिकरणे अकर्मक्रतुसंयुक्तं संयोगान्नित्यानुवादः स्यादिति पूर्वपक्षसूत्रं क्रतुसंयुक्तं क्रा ८१

नुप्रकरणपठितमकर्मकर्मनिषेधकं नानृतं वदेदिति वाक्यमनारभ्याधीतेनानृतं न वदेदिति वाक्येन संयोगाख्यमाना
कारत्वान्नित्यानुवादः स्यादेवं च क्रत्वावपनानृतवदने स्यान्नमेवप्रायश्चित्तमिति तदर्थः तदुत्तरं विधिर्वा संयोगांतरादि
ति सिद्धांतसूत्रं अत्र संयोगपदं संयुज्यते कारणमनेनेति व्युत्पत्त्या प्रयोजनपरं स्मार्त्तेन न दिनहि नानृतवदने पुरुषस्य प्रत्य
वायो वर्जने च तदभावो न तु क्रतोः किंच नञ्भावाभावयोर्वैगुण्यमवैगुण्यं च एवं च यः स्वस्य प्रत्यवायमंगीकृत्य क्र
तुमवैगुण्यमिच्छति तेनानृतं न वक्तव्यं स्यात् क्रतुप्रकरणस्थेन तु तेन क्रतोर्वैगुण्यमुच्यते इत्यतो नानुवादः किंतु विधिरे
वेत्यर्थ इति केचित् परे तु अथ ब्रह्मचारिणो व्रतमित्युपक्रम्य नेक्षेतोद्यंतमादित्यमिति वदत्यापि पाठात् स्मार्त्तेनानृतं न व
देदितिनत्संकल्पपरमिदं तु संयोगांतरात् क्रतुप्रकरणपाठात् व्रतोपक्रमाभावाच्च उवारफलाभावाच्च प्रयोजन
मंतव्यं प्रतिषेधविधायकमेवेत्यर्थ उचितः नहि केवलप्रयोजनमात्रेण वाक्यार्थ अवस्थितिर्नहि प्रयोजनानुवर्त्ति प्र
माणमिति न्यायात् न्याये न तु वाक्यार्थे निर्णीते प्रयोजनसिद्धिरित्यस्तु न च तादृशोपक्रमानुपलंभ इति वाच्यं ब्रह्म
चारिप्रकरणे ब्राह्मणः काममश्नीयाच्छ्राद्धेन व्रतमपीडयन् ब्राह्मणो ब्रह्मचारी न तस्माद्धृतप्रदर्शी न परस्या मधुमां
सांजनोच्छिष्टशुक्लस्त्रीप्राणिहिंसनं भास्करालोकनाश्लीलपरिवादादि वर्जयेदिति याज्ञवल्क्योक्तेः व्रतमपीडयन्
मध्वादिपरिहारेण अश्लीलमसभ्यमनाषणमिति मिताक्षरायामाख्यानेनाश्लीलपदेनासभ्यानृतभाषणयोः संग्र
ह इति मदुक्तिंतं भास्करालोकअदितादेरिति च मिताक्षरायामुक्तं पक्षंबंध्वच इति च आदिपदेनस्य संतरोक्त गंधमाल्यादिव

मं॰ जू॰ दनंतरमपि संग्रह इत्यनेनेष्टेतोद्यंतमित्यादिविषये उपक्रमे श्रुतं ब्रह्मचारिव्रतपदं यतः तदन्वयः चत्वात्कर्मवि
८८ शेषो ह्यत्र चोद्यते इति मिश्रोक्तेश्च प्रकृताधिकरणे आवश्यकमपि संयोगांतरादिसूत्रे एकदेशमुपादाय नियमानुष्ठा
नेन पुरुषस्य संबंधः स्मर्यते प्रदार्थप्रतिषेधेन संयोग इह पुरुषस्येत्यय मिह संयोग इत्याहेत्याऊः नियमश्च सां
कल्प एव तदनंतरं क्रतुसंयुक्ते श्रौतोक्तिनिषेधवाक्ये जंजभ्यमानोनुब्रूयान्मयि दक्ष क्रतू इति विधिवाक्ये च साधार
णतया पूर्वपक्षोपपादकमहीनवत् पुरुषस्तदर्थत्वादिति सूत्रं अनयमपि पुरुषधर्मस्तदर्थत्वात् आद्ये वदेदिति
श्रुत्या द्वितीये जंजभ्यमानोनुब्रूयादिति वाक्येन पुरुषार्थत्वावगमात् यथा ज्योतिष्टोमप्रकरणपठिना नाह्याद
र्णोपसदस्तिस्र एवसाह्नस्योपसदो द्वादशाहीनस्येत्यहीनसंयोगात्प्रकरणादुत्कृष्यंते तद्वत् श्रुतिवाक्याभ्यां च
प्रकरणं दुर्बलमिति तदर्थः तदनंतरं प्रकरणविशेषात् तद्युक्तस्य तत्संस्कारोऽध्वरादिति सिद्धांतसूत्रं प्रकरणा
द्युक्तस्य क्रतुयुक्तस्य तत् अनृतवदनाभावो वचनां व्रंवराणादिसंस्कार इति तदर्थः विरोधे हि श्रुतिवाक्ये बलवती
प्रकृते च तयोरविरोधात् श्रुतिप्रकरणाभ्यां वाक्यप्रकरणाभ्यां क्रतुयुक्तपुरुषसंस्कारवत्वं यथा क्रतुयुक्तव्री
ह्यादीनामेव प्रोक्षणं संस्कारकं तेनोभयत्रापि वैपरीत्ये क्रतुवैगुण्यं सिद्धं अवैपरीत्ये तत्साद्गुण्यं च यानुषंगे प्र
तिनिमित्तं प्रायश्चित्तं च सिद्धं न च नानृतं वदेदित्यस्य क्रतुगतपुरुषधर्मत्वे यजमानस्य प्राधान्यात्प्रधानस्य कर्त्री या
जमानेनैव त्याज्यं स्यात् क्रत्वर्थत्वे तु प्रतिषेधस्य वर्जनीयत्वे न यत्कर्तृत्वेन पेक्षितत्वे न यज्ञप्रकृते न यजमाने न ऋत्विग्भिश्च

रित्यर्थकथनं कृतं तस्य च भावकर्मविषयाख्यातोरित्यर्थकैयट आह तद्विषयत्वं च धातोः कर्मादिविशिष्टक्रियावाचकत्वे
न कर्मादीनां स्वप्रकृतिकप्रत्ययवाच्यत्वेन वा तत्र तिङ्विषयलकारस्थलकार्यं क्रियाप्रधानमाख्यातमितिस्मर्यंतेतरां तु
त्रात्रविषये त्वं संप्रत्यप्रधानानि नामानीति स्मर्यते लः कर्मणि च सादेरप्येवमेवार्थः भावकर्मादिवृत्त्यादिति शानजादौ का
रप्राधान्यमुक्तं शीत्येव प्रत्ययार्थाज्ञानजादिष्वाति लेन भावस्य सत्वं तु तस्य बोधनमिति तत्र वा न सिद्ध्येत् तस्मादुभयत्राप्या
र्थे तदं ज्ञेयस्त्वतात्पर्यं चेदत्रापि तथैवास्तु वर्तमाने लडित्यादिविहितलानुवादेन चैतदर्थनियायकमत एव कर्त्तरि
कृदित्यादिना कर्त्रादेः प्रत्ययार्थत्वबोधनमेव भावविषयादिस्यस्य च केवलक्रियामात्रबोधकादित्यर्थः किं च ह्येकयो
रित्यादीनां तिङ्विषयाणामपि नियमत्वं इति भाष्ये स्पष्टं तद्धि द्वांसिद्धौ च नियमो वर्ति धातुवाच्यत्वेवानिर्दिष्टार्थाः प्रत्य
याः स्वार्थे भवंतीति सामान्यसूत्रेण सर्वत्र सिद्धो नियमत्वं युज्यते नान्यथा संख्यायाश्च कारकस्येव क्रियायामेवान्वयः
इत्युपपादयिष्यते स्पष्टं चेदं वकुष्विति सूत्रे भाष्ये तत्र हि तिङ्गविशेषेण धातुमात्राद्विधीयत इति नियमार्थं ह्येकयो
रित्यादीन्युक्तं एकवाक्यतया विधानमिति पक्षे विफलत्वो नियम एव तद्विनापि तत्र सिद्धेः अतएवानुदात्तङित इति सूत्रे
भाष्ये ऽप्युपदेशे तेषां सूत्राणां परित्यक्ष्य व्यवहारः अतएवाजघाप्यच कादित्यादौ धातुमात्रात्सर्वबोधः संगच्छते लुप्त
स्मरणाद्बोध इति त्वेकदेशिकस्त्वेपस्य यलक्षणकार्यसिद्धेः लोपफलत्वं वदता भाष्यकारेण तिरस्कृतं लोपमजाना
तो बोधानापत्तेः यत्तु कैयटेन तिङा स्वभावतः संख्यावाचकत्वमभ्युपेत्य तिङ्विषयाणां तेषां नियमार्थमुक्तं

तत्र एवं स्वभावाश्रयणे तेनैव तत्तिङां तत्तत्संख्यावाचकत्वसंभवेन नियमशास्त्राणामपि वैयर्थ्यापत्तेः सुप्विषयाणा-
मप्यनेन न्यायेन एकद्वि आदिपदेष्वपि नियमार्थत्वसंभवेन तत्र नियमोपपादनाय विशिष्य तत्र पंचकपक्षालंबनवैय-
र्थ्यापत्तेश्च शास्त्रमात्रस्यैव वैयर्थ्यं चेत्यन्यत्र विस्तरः सार्वधातुके यगिति सूत्रस्थस्य सार्वधातुकार्थाः कर्त्रादय इति।
भाष्यस्य तद्द्योत्या इत्येवार्थः विकरणस्त्वस्मिन्पक्षे साधुत्वार्थ एव विकरणार्थ इति पक्षे विकरणद्योत्या अपि भावकर्म-
वाच्यनीयादेरपि तद्बोधक इत्यर्थः तत्र सार्वधातुकार्था इति पक्षे एकत्वादीनामपि तद्द्योत्यत्वा वा नियमानुपपत्तिमा-
शंक्य अर्थनियमाद्याश्रयेण परिहृतं भाष्ये न विकरणार्था इति पक्षे त्वनभिधानाद्विकरणो न स्यादिति भाष्यदूषणा-
नुपपत्तिर्द्योतकसमुच्चयस्य अतिलुनीते गार्ग्यायणीत्यादेर्दर्शनादिति वाच्यं लिङ्लिटोर्विकरणहीनयोरद्यादौ च लका।
रमात्रेणापि तद्द्योतनेन तेनैव कृतत्वस्य तया विकरणानुत्पत्त्यापत्तिरित्याशयात् अतिलुनीते इत्यादौ आत्मने-
पदमात्रेण न तद्द्योतनं अन्यत्राप्यात्मनेपददर्शनात् गार्ग्यायणीत्यादौ तन्मात्रेण तद्द्योतनं गार्ग्यायणे प्याय-
नस्य दर्शनात् तत्र शक्तिस्वभावात् क्वचिद्विकरणसहितस्य तद्द्योतकत्वं क्वचित्केवलसार्वधातुकस्यापीति तद्
दूषणपरिहारः विकरणानां नैरर्थक्यप्रवादस्तु तं विनापि सार्वधातुकमात्रेणार्थद्योतनात् क्वचित्तत्सहायेनार्थ।
प्रतीतेरर्थवत्त्वव्यवहारोऽपि अत एव स्त्रियामिति सूत्रे भाष्ये स्त्रीत्वस्य प्रत्ययार्थत्वपक्षे प्राधान्याद्द्विवचनाद्यनुपप-
त्तिमाशंक्य प्रधानस्यापि द्व्याद्यभेदेन प्रतीत्या समाहितं न तु तस्य प्रकृत्यर्थं प्रति विशेषणताश्रयेण द्योतत्वा। ८९

वर्त्तनं सिध्यतीति विज्ञेय इति वाच्यं क्रतिप्रकरणस्यांक्रतुसंबद्धपुरुषकर्त्तृकानृतवदनाभावइति वोधेन तत्संभवा
त् क्रतुकर्तृकर्तृकेति वोधेमानाभावात् किंच वर्ज्यभावनायाः कर्तृत्वेपेक्षत्वेव्यभिचारेण भावनायाः कर्तृपेक्षत्वमेवत्व
मुक्तं भज्येत किंच युष्मदस्मद्भिन्नसामानाधिकरण्ये प्रथम इत्यर्थकेन शेषे प्रथम इत्यनेन तत्सामानाधिकरण्य एव प्रथ
मस्य साधुत्वाद्वदेदित्यस्य साधुत्वाय पुरुष इति पदस्य तदर्थस्य वाध्याहारावश्यकत्वेन जंगमस्य मामानवाक्ये तो वैष
म्यं दुरुपपादं न च तत्सामानाधिकरण्याभावे प्रथम इत्येव तदर्थः उपपदे समानाधिकरण इत्यधिकारेण शेषपदस्य ।
रस्येन चतादृश्यार्थो संभवात् न चैवं त्वं च वैत्रश्च यच्चय इत्यत्र परत्वात् प्रथमापत्तिः उपनक्षासमभिव्याहृतस्य उ
पक्रातृत्मस्य शेषपदार्थत्वात् स्पष्टं चेदं भाष्ये न्यायसुधाकारो पि क्रत्वर्थत्वे पि क्रतुफलसिध्यर्थतास्पुरुषार्थमप्य
स्तीति वदन् क्रतुसंबद्धपुरुषधर्मतापक्षमेव साधुमन्यते एवं च जंगमस्य मानसंस्कारो पि क्रतुसंबद्धपुरुषमात्रस्येव
ति वोध्यं न वक्तु विपरीतं यजमानस्यैव स्यात् एतेन प्राधान्यात् यजमानसंस्कार एवेति परास्तं यद्यपि इदं द्वय
मपि दर्शपूर्णमासप्रकरण एव पठितं तथापि तद्गतक्रतुत्वसामान्यपि तन्मेव पूर्वोक्तमहाभाष्यात् भगवान्
शावरस्वामी तु नानृतं वदेदित्यस्य पुरुषधर्मत्वमुक्त्त्वा तमेवाशंक्योक्तत्वमेवक्रतुराख्यातप्रत्ययार्थत्वनिरासे
न प्रौढ्यासमाहितवान् तथा भावार्थाधिकरणे भगवंतो भट्टपादाः प्रौढिवादे नैव प्राधान्यादियुक्तिभिर्भावना
याः प्रत्ययार्थत्वमुक्त्त्वा तमेवोक्तवंतः भावार्थाः कर्मशब्दास्तेभ्यः क्रियाप्रतीयेतैष ह्यर्थो विधीयते इति हि तत्र ।

मं०सू० सूत्रे कर्म शब्दायनेतदृशानुकृत्यादि स्याद्यस्तेनाबाध्याः प्राधान्येन क्रियार्थाः क्रियाप्रधानमाख्यातं नामप्रधा
९० नमाख्यातमिति सूक्तेरन्यत्रैव क्रियाप्राधान्येन प्रतीयते तद्धि प्राधान्यादेवैवोऽर्थः क्रियारूपः सर्वत्र विधीयते नेन नामा
र्थः तस्माच्छ्रीघ्रतादि ल्यादेरस्मत्पूर्वेभ्यी कार्यमिति तदर्थः नह्यतेनन्नावनायाः प्रत्ययार्थत्वं न धात्वर्थमित्यर्थः
स्थूपतेनन्यमीमांसकानां गुणौ द्विवादेनाप्युक्तेऽर्थे मुख्यसिद्धान्तत्वन्नमइति सुधियो विभावयन्तु तस्माद्धातुवाच्ये
वन्नावनानतइत्युक्तं कारक इति सूत्रे भाष्ये अधिश्रयणोदकासेचनैधोपकर्षणक्रियाः कुर्वन्नेवदत्तो यदा पचतीत्यु
च्यते तदा तत्राधिश्रयणादिषु पचिर्वर्त्तते ज्वलनक्रियां कुर्वन्ति काष्ठानि पचन्तीत्युच्यते तदा तत्र पचिर्वर्त्तते संनव
नं धारणं च कुर्वती स्थाली पचतीत्युच्यते तदा तत्र पचिर्वर्त्तते इति संनवनं ग्रहणं धारणमास मासिस्थायनमित्यिके
यटः कर्तृकर्मरूपो धर्मी प्रत्ययार्थः स्पष्टं चेदं तिङन्तामेकंङ अभिधीयते इत्यादिनागस्यथ्यलोपेति सूत्रे भाष्ये का।
र्त्रादिपदानां शक्तिपरत्वेपि शक्तिशक्तिमतोरभेदात् स एव प्रत्ययार्थः कर्त्रादिविभक्त्या शक्तिमदभेदमापन्नाया।
एव शक्तेरुक्तिरिति सार्वधातुके यगिति सूत्रे कैयटोक्तेः प्रत्ययार्थः प्रधानमित्युत्सर्गस्यापि भाष्यनिरुक्तकाराद्यनु
मतत्वेनन्याग्यतिनदर्थकारकस्याप्यस्य प्रतिविशेषणत्वेतिकेचित् परेतु प्रत्ययार्थः प्रधानमिति यत्र प्रत्यय
स्य वाचकता तद्विषयकं कर्त्तरीत्यादेस्तद्विषयाद्धातोरित्यर्थेतेति ङांतटूद्योगाकतनकत्वाद्विशेषणत्वमेव भावेऽ।
त्यस्य तथान्वयस्यैवयुक्तत्वात् अतएवसुक्रमोरितिसूत्रे भाष्ये भावकर्मणोरिति सूत्रस्य भावकर्मग्रहणातो ९०

पक्षे च विशेषणतोक्ता एवं सुपामपि द्योतकत्वेन पंचकं च प्रातिपदिकार्थः एतन्मूलकमेव सत्त्वप्रधानानि नामानीति
तत्र हि नामपदेन सुबंतमित्यनुपदमेव स्फुटीभविष्यति स्त्रीप्रत्ययांतस्य तु न नामत्वं शास्त्रप्रक्रियायां नतोप्यर्थबोधा।
त् तत्र प्रत्ययार्थत्वपक्षे द्विवचनाद्यनुपपत्तिराशंकिता ते न प्रत्ययार्थः प्रधानमिति युक्तमिति रजादौ व्यभिचरितेति परास्तं
अत एव सूत्रकृता प्रधानप्रत्ययार्थवचनमशिष्यमर्थस्यान्यप्रमाणत्वादित्येवोक्तं न तु व्यभिचरितत्वादित्यप्युक्तमि
ति वदंति तत्र कर्तृत्वशक्त्याश्रयस्य व्यापारेन्वयः योग्यत्वात् परस्मैपदशापश्रमादिस्वयमेवैतत्सममभिव्याहृ
तयक्तङादिरूपाणां समभिव्याहृतकर्मत्वशक्तिमतश्च फलेन्वयः योग्यत्वात् तङ्यक्चिणादिसमभिव्याहा
राच्च ननु कारकविशेष्यकबोध एव कुतो न स्वीक्रियते इति चेन् न रमते ब्राह्मणकुलमिति क्रियाप्रधानमिति ह्रस्वो नपुंस
क इति सूत्रस्य भाष्यविरोधात् तत्रैतन्नामाख्यातयोर्लक्षणं सत्त्वप्रधानानि नामानि भावप्रधानमाख्यातमिति निरु
क्तविरोधाच्च तत्र ह्याख्यातशब्देन नियमतो जनकाकांक्षं विभक्त्यंतं पाचकइत्यादौ एकदेशार्थस्य तदाकांक्षत्वेपि विभक्त्यं
तार्थस्य न तदाकांक्षत्वं आख्यातमाख्यातेनेत्यादौ तदर्थे व्यतीते चत्वारि पदजातानि नामाख्यातोपसर्गनिपाता
श्चेत्युपक्रमाच्च भावकालकारकसंख्याश्चत्वारोर्था आख्यातस्य तत्र भावः प्रधानमिति तद्भाष्याच्च निष्कौशांबिरित्यु
दाहरणविषये लुप्ताख्यातेषु चेति समर्थसूत्रस्थवार्त्तिके क्रियाख्यातपदप्रयोगानुपचारान् इति बोध्यं भवतीति सं
बुध्यं तस्य तिङंतस्य चसमत्वाल्लक्षणापेक्षा बोध्या एतेनाख्यातपदेन धातुराख्यायते सर्वः प्रधानीभूतो येनेति ने।

मं.ज्ञ.६ तिष्ठत्यस्मिन्नेरित्यपाल्लं त्रि त्रुपडतितिडं नेतिआसेश्च कृत्स्नकृतिन्नूतधातावथामेश्च क्रियावाचकत्वमात्रेवक्तव्ये प्राधा।
९१ न्यनिवेशस्यार्थत्वाच्च एतदेवाभिप्रेत्य निपातवादोक्तप्रातिशाख्येनइख्यतं येन नामावं संधातुरित्यत्र तत्र नीयार्थे
प्रथमेतितन्नाष्येयाख्यातं अत एव प्रश्नसमायां रूपविवितिमत्रे नाष्येपचतिरूपं पचतोरूपमित्यादेरसिद्धिमाशंक्य क्रि।
याप्रधानमाख्यातं स्यप्रधानं नामयतः क्रियां शष्ठत्तिडाचष्टे किंदेवदत्तः करोति पचतीति तिङ्मंशष्ठ कृत्वा चष्टेक तरो दे
वदत्तोयः पाचक इतीसुब्न्तनामान्याख्यातजानीमत्रत्वाख्यातपदं तदव्ययवधातुपरं संवेनामधातुजमाहनिरुक्तेऽपि।
करणे शाकटस्य च तोकमित्सुणाद्यय इतिमत्र नाष्येक्तेः नामक्लिडं तज न्यत्वानावाच्च नाष्ये कृत्तेस्यस्य स्यकृतिक
सुबंतेनेत्यर्थः नामपदेन च सुबंतमेवोक्तं उक्तेः प्रकृतिः प्रत्ययो विभक्तिरेस्येतावन्नाम सत्ताद्रव्यं लिंगंसंख्येति नामार्थः
तेषु द्रव्यं प्रधानमिति निरुक्त नाष्योक्तेश्च नमन्याख्यातार्थं प्रति विशेषणं भवति इति नामेति मुनिरुक्तनाष्यं इदं
चाव्ययातिरिक्त नामलक्षणं उपसर्गनिपाताद्यस्य तु निपातपदमव्ययमात्रोपलक्षणमिति भावः तत्र द्रव्यस्य स
त्ता लिंगसंख्यानिरूपितया धाधायापितस्य क्रियाकारकभावं संबंधं प्रति विशेषणत्वेन कांडे द्रव्यादेर्विभक्त्यर्थप्रधानो
क्तिः न विरुद्धाः क्रियाप्रधानं इत्य क्रियात्वं धसाध्यत्वरूपं तेन हि हरुगादिषु नाख्यातलक्षणातिव्याप्तिः हिरुगादी
नां क्रियाप्रधानत्वं तु क्रियामात्रविशेषणत्वरूपं अत एव तदर्थेन कारकान्वयः तदन्वययोग्यस्य साध्यत्वस्य तत्र तानाना
त्वबक्तनोहि हिरुगाद्यर्थस्य सिद्धत्वेनामानमात्रेणगोणः क्रियात्वव्यवहारः येतु क्रि क्रियातराकांक्षा नुत्थापकत्वा

वच्छेदकत्वे जातस्य स्वकारकान्वये नियामकत्वं वदंतीति तेषामोदनं भुक्त्वा ग्रामं गच्छतीत्यादौ क्त्वाप्रकृत्यर्थे कारकान्वयो न
स्यात् तन्मते तिङ्कृत्तद्धितयानामलक्षणे सिद्धत्वापरपर्याय सत्त्वस्य वनिवेधः एधित्वम् भुक्त्वा कर्तृप्रवृत्तिरूपं एधांयामित्यादि
नामसरूपमाख्यातमेवकिं कर्त्तव्यमिति क्रियाप्रश्ने पक्ष्यामि त्याद्युत्तरात् नियमतो ऽन्यतयाक्रियाकांक्षायनदत्र नामत्वा।
ख्येति ज्ञा चष्टे ऽसुपलक्षणंकृता चष्टे इति च तद्धितादेरुपलक्षणं धात्वर्थफलस्याप्युक्तक्रियात्वसत्त्वात् नकमाख्यातेऽतल्ल
क्षणाव्याप्तिः द्योतकत्वात् क्रियासमभिव्याहारनियमाच्च निपातानुपसर्गास्यपृथगुक्तिः एवंच क्रियाप्रधानमित्यस्य स्व
यायप्रधात्वर्थः प्रधानंतदाख्यातमित्यर्थः नच धात्वर्थो पेक्षयाक्रियाकृतिः प्रधानमिति तदर्थः नावशिष्टे नापि कृतिरेवेति वा
च्यं प्रत्ययार्थः प्रधानमित्येव सिद्धेः नावाख्यातेऽव्याप्तिश्च नन्वेवमपि प्रथमांतसमभिव्याहारे एककर्तृविशिष्टपाकाश्र
यो देवदत्त इति प्रथमांतविशेष्यकबोधएवास्त्विति चेन्न तथा बोधानुनुभवात् यत्रोभे नावप्रधाने भवतः सुप्तस्तिङ्कृति
रोधात् तदर्थस्तु तत्राप्येवमुक्तः नामाख्यातयोः स्वस्वपदार्थोक्तौ एकस्यैवाप्रधान्यमेकस्य सत्त्वप्रधानमुक्तं अथवा।
पुनर्यत्रोभे नामाख्याते नवतस्तत्रहे नाम प्रधाने आख्यातार्थक्रियाप्रधाने वाक्ये ह्याख्यातं प्रधानं तदर्थत्वात् गुणभू
तं नामतदर्थस्य भावनिष्पत्तावंगत्वात् एवंतावद्वाक्ये आख्यातं प्रधानमिति अत्र नामपदेन निपाताद्यतिरिक्तस्य ग्रह
णमुक्तं तेन क्रियायानन्यर्थे विविशेषणत्वेपि न क्षतिः अतएव हरिवमतद्दर्भौस्यादौ धातुसंबंधे प्रत्ययाः इस्यनेन प्रधा
नतिङ्तवाच्यक्रियानुरोधेन गुणभूतक्रियावतिस्य: कालांप्रसयानतुतिङ्कालांतरे इति व्यवस्थासिद्धिः किंच सर्वत्र

मं.भू.
९२

अथ मां तार्थं प्रत्येकं क्रियाया विशेषणत्वमिति पक्षे पाकक्रिया भवतीत्यर्थे पचति भवतीत्यस्य तथा सिद्धिः तदुक्तं भवाविसर्गे भाष्ये
कातरीयं चोयुक्तिः पचति भवति त्वं पचसि भवतीति चेत् उत्तरं पचादयः क्रिया भवति क्रियायाः कर्त्री भवंतीति पचंतिभ
वंतीत्यस्य न भविष्यंती पाकक्रिया सत्कार्यवादांगीकारात् सूक्ष्मरूपेण भवतीत्यर्थे न दोषः न च सत्कार्यवादे कार्य
स्य नित्यतया सामग्रीवैयर्थ्यमिति वाच्यं तस्या अभिव्यक्त्यर्थत्वात् न चाभिव्यक्तेर्जन्यत्वे सत्कार्यवादव्याघातः नित्यत्वे स
र्वदाभिव्यक्त्यापत्तौ व्यवहारापत्तिः अभिव्यक्तं तरां वेत्तायां त्व न वस्येति वाच्यं अभिव्यक्त्यभिव्यक्तेः स्वतद्भिन्नतिरेकात् तवो
त्पत्तेरुत्पत्तिवत् परेतु सूक्ष्मतया विद्यमानस्यैव स्थूलरूपस्य विद्यमानताया एवाभिव्यक्तेः सामग्री साध्यत्वं तथा व्यवहा
राद्व्रमत्वेन सामग्र्यास्तस्य प्रतिबंधकतमसो निवृत्तौ व्यवहारस्तमतेस्य दोषात् एवं व्यवहारादिविषयेपि सत्कार्यवादा
बाधो वोध्य इत्याहुः युक्तश्च सत्कार्यवादः असदुत्पत्तिवादे मालतीकुसुमादेर्विकासस्य गंधोत्पादकत्वे वाच्यमेवं च वि
गंधेपि विकासेन गंधोत्पत्त्यापत्तिः वैजात्यनिवेशादिना तद्वारणे तु सत्कार्यवादाभ्युपगम एव युक्तः सूक्ष्मत्वं च कार
णाभेदे नस्थितत्वात्ततः पृथक् ज्ञानायोग्यत्वं विषयनिष्ठतमसा प्रतिबंधाद्व्यवहाराक्षमत्वं च सूक्ष्मत्वं केचित्तु कारण
त्मनास्थितसूक्ष्मरूपेण सत्स्थूलरूपेणात्वसदेव कार्यमिति सदसत्कार्यवादः तत्र सूक्ष्मरूपमादाय सत्कार्यवादः सं
ख्यानां स्थूलरूपमादाय्या सत्कार्यवादो गोतमीयानामित्याहुः अत एव किं कि लास्य योगेति निरुक्ते भवति विद्यते वा त्वं
भूद्वीग मिष्यसां तित्रुस्य दावुदाहृतं अपि च कर्मणा यमपि वैतीतिसूत्रे क्रियाविधिकृदि संक्रमी क्रिया विहितेयं क्रियया ९२

प्सितानवतिकयाक्रियया संदर्शनादिक्रिययेति भाष्ये उक्तं तदीस्याधावनकर्मकं दर्शनमिसर्थे भाष्यकृदिष्टं पश्यमृगो
धावतीतिवाक्यं न स्यात् कर्मत्वस्य चात्राकांक्षावसात्संसर्गतया भानं मृगस्य कर्तृकर्मत्वेन तत्रान्वयसंभवः विभक्त्य।
र्थमद्वारीकृत्य नामधात्वर्थयोर्भेदेनान्वयायोगात् मृगात् द्वितीयायां तु शशुक्त वाक्यासिद्धिः अप्रथमासामानाधिक
रण्येन तिङर्थबाधित्वात्रत्रापत्तेश्च वासरूपन्यायेन तु न तिङ्कृत्सादेशेषु तदभावस्य भाष्ये स्पष्टत्वात् यो धावति मृगस्तं।
पश्येत्यध्याहारेणान्वये पि भाष्यसंमतस्य पदैकवाक्यतयान्वयस्य भंगः एतेन विशिष्टवाक्यार्थस्य कर्मतया दर्शनेन्वया।
एवं च नमुत्तति विरोधः स्युत्पन्ने नीमार्थविषयकत्वाद्विशिष्टवोधकस्याप्रातिपदिकत्वान्न च द्वितीयोपत्तिः शक्त्वाम मेतन्म।
हाभाष्यं तथा चोसन्नयः श्रु नाऽतिवदिस्ययास्तं नीलविशिष्टघटस्य दर्शनकर्मत्वे प्रतिविपादयिषितेनीलं घटं जानामी
त्यादौ द्वितीयानापत्तेश्च नचैतवाभिमृगोपधावनस्य विशिष्टस्य दर्शनकर्मत्वे विशेषणस्य मृगस्यापि कर्मत्वात् प्राति
पदिकत्वाच्च तद्वाचकाद्द्वितीयास्यादिति वाच्यं मृगस्य धावनविशेषणत्वे न तत्त्वयुक्तस्यां तरंगसंस्कारस्य प्रथमात्रय
स्या निवृत्तेः न वक्तुतस्य धावनविशेष्यत्वाऽदृष्टोसाद्यादिविशेषणत्वात्प्रधानकार्यस्यांतरंगादपि बलवत्तया यादृतुमतिचे
तिसूत्रे भाष्यसंमतत्वेन द्वितीयाद्वुर्वारानुपपन्नयः श्रु नाऽतित्वार्थे ऽस्यलकिंच वैत्रः पचतीत्यादौ कृतिप्रकारकः प्रथ
मांतविशेष्यको बोध इतिनयस्तं एकविशेषणवैशिष्ट्यो नोपस्थिते विशेष्ये तत्स जातीयसंबंधेन विशेषणांतरसंबं
धस्याप्युपपत्तेः अत एव राजपुरुषो भार्यायश्चेति न घटो ऽस्यमिसर्थे घटो ऽस्मत्वस्येति नचेति समर्थसूत्रे भाष्ये स्पष्टं

सं.०
९२

किंच तत्र पचति व्रजती त्यस्य साधुतापत्तिः स्वस्वबुद्ध्यनुसारेण बोधस्य ऽर्वाक्सत्त्वेऽपि तत्र साधुत्वस्यापाद्यत्वात् साधु
त्वं तत्तदर्थनिरूपणनियुक्तवैयाकरणसंमततेर्थे एवं नामत्वेति नेद्यनेदकसंबंधेस्यादिनास्य एमेवह्वरिणो क्तं तेविना।
स्यंताः पदमिति गोतमसूत्रेऽस्याय वार्त्तिककारोऽप्याह द्वयी विभक्तिः स्यादयस्तिवादयश्च तत्र स्याद्यंतं नाम तिवाद्यंतमाख्या
तं अभिधेयस्य क्रियांतरयोगाद्विशिष्यमाणरूपः शब्दो नाम यथा ब्राह्मण इति क्रियाकारकसमुदायः कारकसंख्या वि
शिष्टः क्रियाकालयोगाभिधायि क्रियाप्रधानमाख्यातं यथा पचतीति अत्र वाचस्पतिमिश्राः क्रियांतरक्रियाविशेषणत्वसंबं
धाद्विशिष्यमाणरूपः पर्यवसितार्थः शब्दो नाम यस्याभिधेयं नियमेन क्रियाविशेषमाकांक्षति तन्नामेति फलितं यत्रा
पि क्रियापदं नास्ति तत्राप्यस्तीत्यस्यैव उदाहरणं ब्राह्मण इति राज्ञः पुरुष इत्यादौ राज्ञ इत्यादेरपि पुरुषादिद्वारा तदाकां
क्षत्वं बोध्यं यद्वा तदभिधेयस्य राजेत्यादौ तदाकांक्षत्वं अथ नामार्थमाह क्रिया इत्यादि क्रियाजात्यादिकारकं तदाश्र
यः सच व्यक्तिगतसंख्यायुतो नामार्थः यद्वा कारकं कर्मादिशक्तिः संख्याग्रहणं लिंगस्याप्युपलक्षणं अयमव्यया
तिरिक्त नामार्थ इति बोध्यं एवं च सर्वत्र नामपदेनाव्ययातिरिक्तमेव एवं च नामार्थादिसूत्रेषु अव्ययातिरिक्तविशेषण
ता नमितिप्रलापएव आख्यातलक्षणमाह क्रियाकालेति क्रियापदः कालयोगः पौर्वापर्यक्रमः कालयोगेन तस्याभावा
त् तेन घटादिनाम्नो व्यवच्छेदः नन्विदमुक्तेस्यावतिव्याप्ति मतः क्रिया प्रधानमिति त्वकांतादौ हि क्रियांतरेणापर्यवस्या
नीक्रियागम्यते पचतीत्यादौ तु न सर्वत्र तथात्वं किंतु तत्संबंधापि यथापचती नवतीति एवं च यद्वा आक्रियाक्षचितू क्रि। ९२

यांतराणाकांक्षास्वयमेवप्रधानं तद्व्याख्यातमिति निष्कलितं एतच्चेत्कर्तव्यमिसस्य नामलक्षणाक्रांतत्वाभावात् क्रि
यांतराणाकांक्षत्वाद्व्याख्यातत्वमेवापततीत्यंपचतिरूपमित्यादौ दृष्टे ऽपि अत्रक्रियाप्रधानमितिनिरुक्तसमानाकारशब्दे नति
रुक्तमाख्यातोक्तरीत्याप्रत्ययार्थकालकारकसंख्यानांवेद्यधात्वर्थप्राधान्यंसूचितं पंचमेन्यायमाख्येपिक्रियाकालयोगाभिधा
ख्यातं धात्वर्थमात्रंचकालाभिधानविशिष्टमिति तत्रवालेनाभिधानेनकारके विशिष्टं धात्वर्थमात्रमाख्यातार्थ इति सिद्ध
र्थः तस्यैवव्याख्यानंक्रियाप्रधानमिति वार्त्तिककृतात्रकृतं तत्रैवसूत्रे प्रघट्टकांतरे वार्त्तिककारमाह विशेषणविशेष्य
भावस्यैकविषयत्वाद्यदिगोशब्दस्तिष्ठतिशब्दस्यैकमभिधेयंभवति ततोविशेषणविशेष्यभावापन्नयोर्गोशब्दतिश
ब्दयोः सामानाधिकरण्यं युज्यते नान्यथेति अनेनचस्पष्टमेवकारकस्यप्रत्ययार्थतोक्ताविशेषणतायोक्ताः एवंचकृति
र्वेध्याश्रयमांतविशेष्यकोबोधइत्याद्यर्वाचांसुष्कलाघवादितर्कैकशरणानांकुकल्पनाविलसितमितिस्पष्टमेवपदसम
यपरिपालनाय व्याकरणं प्रवृत्तमिति वदतावात्स्यायनेनस्पष्टमेवव्याकरणबोध्योर्थ एवं परमनयविषय इत्युक्तं एवंचार्वाचीनैया
यकमीमांसकानांव्याकरणोक्तातिरिक्तेर्थेपचतीत्यादिप्रयुंजानानांयज्ञे कर्मणिप्रत्यवायोयज्ञवैगुण्यंच उर्वरं तदितिरिक्ते
र्थे तेषामसाधुत्वात् नचनिर्मूलमेतदनुशासनं तस्माद्ब्राह्मणेननिष्कारणः षडंगोवेदोध्येयोज्ञेय इति श्रुतेर्मूलत्वात्
पाणिनीयंमहच्छास्त्रंपदसाधुत्वलक्षणं सर्वोपकारकं ग्राह्यं कृत्स्नं त्याज्यं नकिंचनेति पराशरोपपुराणाच्च साधुत्वज्ञा
नविषयासैषा व्याकरणस्मृतिरिति अभियुक्तेश्च नचासाधुत्वेपि बांततदर्थबोधानस्यादिति वाच्यं साधुत्वज्ञा

सं.जू.० नस्यबोधकारणत्वाभावात् असाधुत्वज्ञानस्य तत्प्रतिबंधकत्वाभावाच्च क्रियायाः कर्तृकर्मभावेनान्वयेपि तदितरकारक
९४ त्वेन क्रियांतरेतन्वयात् क्रियानाधारकाश्रकत्वेनानन्वयाच्च लिंगसंख्यानन्वयाच्चासत्वभूतत्वं बोध्यं यत्रोपमानत्वाभा
वस्तस्याप्यसत्वं अत एव रोदतीवपचतीत्यादौ नोपमाकर्तृस्तु तस्याः क्रियांशे तद्विशेषणत्वात् तदुक्तं सत्त्वे तेनाख्ये न वैशिष्ट्यं ते
नोपमानमस्तीति इति किं तु संभवानार्थ्यस्वरूपः इति कैयटः तिङन्तार्थे तोपमानबोधो नास्तीति तदर्थव्याख्यार्थः उपमेयत्वं त्व
स्येव ब्राह्मणवदधीते इत्यादौ तथा प्रतीतेः तथा नद्यतनेऽलुङितिसूत्रे भाष्ये इयं तु कदा गंतायदेवं पादौ निदधातौ स्या
दौ अद्यतन भविष्यद्विषये लुट् कथमिसाङ्गं क्रमगं तेवगं तत्स्यर्थे न वेतिङन्ते नोपमानमस्तीति दूषयित्वा अनद्यतने इवानद्यत
ने इति भाष्यान्तं प्रयोगदर्शी नक्षत्राणि कुले विप्र अनद्यतनेवत्प्रत्यय इति कैयटः यथा वैरूपेनोतिपत्यादन्तेषु एवमयं द्विषत त्रातव्यं
निवस्यादन्तेयमस्ति चरतिज्ञाने नेत्यादौ यथाश्रुतस्य नेदकधर्मवद्वाचकतायाः प्रकारवचने थालिति सूत्रस्थाकरसंमतत्वे
न यत्प्रकारवत् रूपेण कर्तृकं पक्वात्रान्नं तत्प्रकारवदेतत्कर्तृकं रिघात्रानमिति बोधोत्तरं तमेव धर्मं तत्प्रयुक्तमादाय क्रियां
वा निमित्तीकृत्य उपमानरूपेणाभिन्न उपमेयोयमिति बोधः लक्षणामूलकः व्यंजनात्स्य लक्ष्ये वा चापि बोधद्वयस्य शास्त्र
त्वं यथा ग्रास समभिव्याहारे सर्वत्रैवमेव बोधद्वयं बोध्यं आद्ये वेषोपमानत्वबोधेन चैत्रितिङन्तेनेति भाष्यविरोधः कर्त्री
स्तु विशेषणत्वात् प्राथमिके बोधे सा थालः सादृश्यार्थकत्वे यत्सदृशो हरिस्तत्सदृशो हर इति बोधे पि हरिसदृशो हर
इत्यलाभ इति बोध्यं अत एवालंकारिका अपि लिंपतीव तमोंगानीत्यादावुत्प्रेक्षामेव वदंति हरिरण्वाह साध्यस्यापरि ९४

रिनिष्पद्यते सोयमित्यनुपपन्न इति तिङंतैरंतरेणैवमुपमानं न ततो न तैः तिङंतार्थस्य साध्यत्वाद् परिनिष्पन्नेः सिद्धत्वेनाभानात्
इवयोरिवमंतरेण सिंहो माणवक इति च नूपपत्तिरो दितिस्यादौ सोयमित्यत्रिसंबंधोभावात्तिङंतार्थो नोपमानं साधारण
धर्मान्वयाभावात् यस्योपमानस्येवमंतरेण उपमेयेन सह सोयमित्यत्रिसंबंधस्तस्यैव समभिव्याहारेणोपमानत्वे न पचती
तितिनि त्रंगीकारात् ननु रोदितीव पचतीत्यादौ कर्त्रुरेव नत्वं साद्रत्तउक्तं साधनत्वं प्रसिद्धं च तिङंतसंबंधिनां यतः तेनाध्या
रोपणं वस्यादुपमानुनकल्प्यते संबंधिनां गुणभूतानां अध्यारोपउक्ते त्याम्न नत्वोत्कृष्टत्वाभावाच्च नोपमानत्वमित्याह
भूतेष्विव समानार्थमुपमानं विधीयते क्रियाचैवाश्रये सर्वा तत्र तत्र समाप्यते येनैव हेतुनाहंसः पततीत्यभिधीयते अ
तीतस्य समाप्तत्वाद् उपमार्थो न विद्यते इति समानार्थे येनैव हेतुना पक्षादिनाहंस वा इति पततीत्यत्र न साधनयोरुपा
मानोपमेयभाव इति हे लाराज्ञः पचतीत्यत्र देवदत्त इत्यादावप्याख्यातार्थे देवदत्तस्य विशेषणत्वेनैव बोधं नन्वेवं पच
ति भवतीत्यादौ सामानवाक्ये तिङ् वृथला भेन न ख्यापूरूसमर्थेति तिङः तिङ् इति सूत्रे तिङ्ग्रहणस्यावश्यकत्वेन नत्यस्या
ख्यानपस्याप्य विरोध इति चेन्न लौकिकैकवाक्यत्वं च सुप्तिङंतचयो वाक्यं क्रियावा कारकान्वितेत्यभरोक्तं अत्रवा
शब्दो द्विसमर्थे बोध्येति शेषः कारकान्वितक्रियाबोधकसुप्तिङंतचय इत्यर्थः सुप्च तिङ् च सुप्तिङ् सुप्विशिष्टं ति
ङ् सुप्तिङं तयोरेकशेषे अंतशब्देन समासः तेन सुबंतचयतिङंतचयसुबंततिङंतपानां त्रयाणां भवितानः तत्र सु
बंतचयस्यैवत्रेलाज्ञापितव्यमिति तिङंतचयः पचति भवति अंतस्थैवः पचतीति क्रियावेत्यनेन न निरर्थकपदसमुदाया।

मंजू० ९५ व्यावृत्तिः सुप्तिङंतचपदेनकेवलस्यपचतीत्यादेर्व्यावृत्तिः तस्यापिकर्त्राद्यविशिष्टक्रियावोधकत्वात् एतदेवैकोद्दे
श्यकैकविधेयत्वगर्भमेकंवाक्यलक्षणं नतुक्तंहरिणासाकांक्षावयवंभेदेपरानाकांक्षशब्दकंक्रियाप्रधानंगुणवेदे
कार्थवाक्यमुच्यते इतिवाक्यमितस्यैकवाक्यमित्यर्थः अर्थैक्यादेकंवाक्यंसाकांक्षंचेद्विभागेस्यादितिजैमिनिसूत्रात्
गुणवदित्यस्यसाक्षात्परंपरयावायद्विशेषणंतद्वदित्यर्थः यत्वमरेक्रियावेतिलक्षणंतरमर्थोनिष्ठवाक्यत्ववोधकमितित
न्न वचोशब्दसंज्ञायामितिकृत्वनिषेधेनार्थेवाक्यशब्दाप्रयोगात् इतिभाष्यप्रदीपोद्योतेविस्तरः संख्यात्वापरमातार्थ
श्रय विशेषणानां लःकर्मणिचेतिसू तमभिद्धेकयोरितिच तेषामेकवाक्यतायाएकत्वादिविशिष्टकर्त्रादौतद्विधानाभितिके
चित् परेतु लःकर्मणीत्यादेर्वाक्यैकवाक्यतालकाराःकर्मादौभवंतितेषांचसंख्यानेएकत्वादौतिवाद्दौतिवाद्यद्यस्येवंरूपा
नहितत्रद्वितीयंकर्मणीत्याद्यन्तियस्यासंख्याविशेषणंस्यात् आवृत्तौचनमानंतस्मात्संख्यायाधात्वर्थेन्वयः यस्येकत्वादा
विसाकांक्षायामुपस्थितप्रकृत्यर्थस्यैवान्वयौचित्यात् प्रकृत्यर्थगतैकत्वादाविसैवार्थः एवंचसुप्तिङ्विषयेतेषामेक
रूपताभवति कर्मणीत्यादेरपिविधेयंप्रतिगुणत्वात्कुलानांचपरार्थत्वादितिन्यायेनसंख्ययातदसंबंधात् कर्मणीत्यादेर
पिकस्येसाकांक्षामत्वेनतत्रधात्वर्थान्वयस्यस्कृप्तत्वाच्च कर्मणिद्वितीयेत्यादौप्रातिपदिकस्यैवकर्मत्वाश्रक्तिमत्वेनकर्म
णएकत्वेद्वितीयेत्यादिभाष्यादिग्रंथानानासंगतिः स्वप्रकृतिकप्रत्ययवाच्यसाधनगतसंख्यायास्तत्रारोपात् नहित १
यादिसंख्यावाधस्तत्रध्वनितंचेदंयग्विधांयकैयटेन प्रत्येकपदवाच्यसाधनसंख्याश्रयद्वि वचनादीतिपदस्वइतिवदताः

ज्ञाः अत एव साधने न द्वित्वादिसंज्ञायः क्रियागतसंख्यारोपस्य साधनसंख्याज्ञाननिमित्तत्वात् शाब्दशक्तिस्वभावाच्च न
भिन्नपदवाच्यसाधनगतसंख्यायास्तत्रारोपो न भावे द्विवचनादि अनेकः पचतीत्यादे साधने व्यारोपितसंख्याया एव प्रती
तेः पच्यते इत्यादौ पदांतरसमभिव्याहारेण संख्यावगमेपि न बहुवचनलक्षणानुसारेण तत्र पदसंस्कारपक्षस्यैवाश्र
यणात् धातुना च स्वनिवृत्तभेदैव क्रियोच्यते तदुक्तं हरिणा प्रकृत्वेपि क्रियाख्याने साधनाश्रयसंख्यया नियुज्यते न तु लिं
गाख्यो भेदस्तत्र तदाश्रय इति अत्र हेलाराजः एकयोपात्तकर्तृकर्मलक्षणसाधनाधारकद्वित्वबहुत्वाभ्यां पचतः प
चंति पच्यते इति क्रियाविशेषणेनेते न हि द्विवचनसाधनसाध्यत्वं प्रतीयते क्रियायाः एवं तद्गतलिंगयोन शाब्दार्थप्रती
तेः स्यान्नाधिकत्वे न युक्तगम्यत्वात् अत एव देवदत्तः पचतीत्यादौ द्वयोर्णक्रियायाः सामानाधिकरण्यं अत एव
द्व्यवादिनामाख्यातार्थोपि द्वयमिति स्वीकार इति तथा संबंधाज्ञानभेदोयमिति हरिकारिकाप्रतीकमुपादाय
व्याख्याते प्रत्ययवाच्यकारकभेदे सति तत्संबंधाद्धात्वर्थे क्रियाया अपि भेदः प्रतीयते यथा पचतः पचंतीति पुंज
राजः अत एव घटपदेनेत्यादौ व्यासज्यवृत्तिधर्मावच्छिन्नप्रतियोगिताकाभावप्रतीतिरिति संगच्छते यत्र तु सा
वेलि संख्यावगमस्तत्र न वस्येव बहुवचनं यथा हतशायिकाः शय्यंते इत्यादौ तत्र हि यादृशानि हतानां शयना
नि तादृशानि शायनानीत्यर्थः तत्रोपमानत्वेनोपमेयेति तत्प्रतीतेः अन्यथोपमाने बहुत्वोपादानं व्यर्थं
स्यात् न च संख्यावान् सत्वन्तोयं सर्वैः नाभिधीयते भेदाभेदविभागोपि लोके संख्यानिबंधन इति संख्यास

मं.जू.
९६

मुदेत्रोहर्युक्तेकथमसत्वमूतक्रियायाः संख्यावत्वं इदं तद्दितिसर्वनामपरामर्शयोग्यार्थः सत्वमूतः तत्रद्वितीयादि
र्नेदव्यवहारस्तु न चराजपुरुषाश्रितौ तौ तुपसर्जनार्थे संख्यानवगमात्सर्व एवेत्यनुपपन्नं तस्याप्यर्थस्य वाक्ये प्र
धानुपान्वितौ तद्वगमसत्वात् इतिवाच्यं यथान्यायनयेगुणत्वान् द्रव्यगतैवसंख्यारोपेण गुणादौ द्वितीय ।
दिव्यवहारस्तथासमक्रियायामतत्संभवात् क्रियायां तदयोग्यत्वव्यवहारस्थानारोपितसत्वेसंख्यानाश्रयत्वेन
बोध्यः न च न्यायनये गुणा दृश्यपेक्षाबुद्धिविशेषविषयत्वरूपा गौणी संख्या न तु द्रव्यगतायाआरोपइतिवाच्यं ।
अयमेकोयमेकइत्यादिबुद्धेरेवतत्रापेक्षाबुद्धित्वेन गुणादौ तस्याश्चभावात् एकत्वस्यापि गुणरूपत्वेन गुणावसं
भवेन तथाबुद्धेरसंभवात् किं चैवं तथैवद्रव्येपि तद्व्यवहारोपपत्तौ अतिरिक्तसंख्यापदार्थविलयापत्तिः एवं
चतिङः धप्रकारकबोधेधात्वजन्यज्ञानंकारणमित्येकएवकार्यकारणभावइति लाघवं प्रत्ययानां प्रकृत्यार्थान्वि
तस्वार्थबोधकत्वव्युत्पत्तेर्न गच्छ अत एव श्राप्नुसूत्रे भाष्ये तत्सत्वे भावे पचतिपचत्यादौ तिङ् तात्पर्याद्युत्पत्ति
मात्रं क्वैकत्वादीनामुक्तत्वान्नेत्युक्तं न च तु तिङ्कर्तृगतायाउक्तत्वे विक्रियागतायाअनुक्त्या तदापत्तिद्रु
र्वारा सुपां प्रकृत्यर्थविशेष्यगतसंख्याभिधायित्वान् तथारूपपुमर्त्वेतिङ् तप्रकृतिकरूपवाधतेपचतिरूपं
पचतोरूपमित्यादौ संख्यालिंगाभावाद्योनुपपत्तिमात्रात्क्रियाप्रधानमाख्यातं क्रियाचैकानद्वित्वादिम
तीति तिङः ताद्रूदानवगतेः क्लीवत्वं च स्वभावात् पद्येकापचनइत्यादौ कथं द्विवचनादीत्याशंक्यसाधनापेक्षं त ९६

दित्युक्तं तस्य साधनान्वयीति नार्थः एकत्वं क्रियान्वयि यदि स्यात्तदि साधनान्वयीति वैरूप्यापत्ते तस्मात्साधनगतसं
ख्यारोपाद्वेत्यभिमतोऽर्थः अपितः प्रत्ययनिर्दिष्टमत्र च भाष्ये प्रातिपदिकार्थसूत्रे अनुवृत्तमप्यन्निहिते इति अन्यस्यासंभवात्
संख्यायाएव विशेषणं स्यात् एवं च पचत्योदनं चैत्र इत्यादावेकत्वादीनामुक्तत्वात्प्रथमा न स्यादित्युक्तं तस्यायं भावः सा
धनगतसंख्यारोपनिमित्तत्वेन वस्तुतः साधननामार्थगताया उक्तत्वं एकवचनमपि साधननिष्ठत्वाद्बुद्धिनिमित्तके
तदनारोपएव वक्ष्यमाणयुक्तेः एवं च तज्ज्ञानवत्त्वबुद्धौऽप्यभ्यस्तिः संख्यात्वाभावे नैकत्वमप्यवगतमेसाधनइति नतद्विरो
धः अन्यथा तिङर्थाश्रयगताया उक्तत्वेपि चैत्र त्वविशिष्टाश्रयरूपनामार्थगताया अनुक्तत्वान्न वापि तदसंगतरेव
पचतो रूपमिति स्यादेत्तद्धि वचनादित्यनद्ययोरेकस्य वक्तृषु त्रयाणामष्टानामिमसादिति निर्देशः प्रातिपदिकार्थसूत्रे
प्रवृत्तिनिमित्तमत्र संख्याबोधकवचनशब्देन च संख्याप्रवृत्तिनिमित्तिकेषु न केवला प्रकृतिरिति समयस्यानुवा
दकवित्त्वस्यैव पालने पि अन्यत्रौत्सर्गिकैकवचनेनैव तस्यालनं लघ्यानुरोधात् भाष्यप्रमाण्याद्वेति बोध्यं एवं च भा
वे स्वगतैकत्वेनैवैकवचनं अन्यथा तद्वपचति भवति पचतो भवतीत्यादौ भवत्यर्थसंख्यान्वयः कस्मात् भवतिः पुना
वेत्तं मानकालं तं तादृशसमारोपे मानाभावाच्च अत्र चेदमेव भाष्यं मानं किंच करोति पचादीनां सर्वान्कालान्सर्वाणिवच
नानि अनुवर्तते इत्यत्र भाष्ये स्मियानि दृष्ट्वादिनाधात्वर्थे एव कालान्वयवत्संख्यान्वयः स्पष्टमुक्तः वचनं संख्याप
चत इत्यादौ तु नस्वगतैकत्वप्रयुक्तैकवचनं गौणीमुख्याचोत्तरासंख्याशब्दे संख्याबाधते इत्यत्र एतत्सूत्रभाष्योक्तेः नव

मं.जू.० किंचिदस्ययद्भिन्नस्यार्थप्रधानंचिंचिक्रियाप्रधानंञ्चैवरिसाद्यंहितगिसाद्यंसतिवंतमपिकांडेइस्मादिविनस्यार्थ
९१ प्रधानंरमतेइतिक्रियाप्रधानंञ्चैतयोरर्थयोर्लिंगसंख्याभ्यांयोगइतितद्धितश्चेतिसूत्रस्थभाष्यविरोधइतिवा
च्यं तत्राव्ययेषुकांडेइस्मादौताभ्यांयोगेनतदसंगतेः अनारोपितैकत्वातिरिक्तसंख्यायोगइतिवातदर्थः नचैवं
नवेतिइं तास्येकत्वोक्तयोजयंतिक्रियायाएकत्वादितिसरूपसूत्रस्थभाष्यासंगतिरितिवाच्यं स्वतोऽसंख्यायाअ
सत्वात् आरोपितसंख्यामादायतुनानेकत्वाद्यप्रवृत्तिः अतएवजातिपक्षेसरूपसूत्रस्थाख्यातंजास्याश्रयगतसंख्याया
आरोपेप्यनेकत्वाद्यप्रवृत्तेः अन्यथातदसंगतिः स्पष्टैवेत्यशेषात् अतएवविधिनिमंत्रणेतिसूत्रेविध्यादिषुवाच्येषु
लिङि अवृत्तनायएकत्वाद्विवचनाद्यनापत्तिरितिदूषणमभिहितं भाष्येतेनहितिङर्थसंख्यायाआख्यातजन्यबो
धविशेष्येत्वयइतिसूचितंयत्तुकैयटेनकर्त्रादिगतसंख्यानिबंधनद्विवचनादीतितदाशयमुक्तः विरोधाभावाद्वेःक
र्मणीतिसूत्रेलइतिबहुवचनाच्चनतदाइतिसिद्धांताशयमुक्तः तत्रवृत्तेर्नायाएकत्वादितिभाष्यासंगतेःतिवादे
रप्यनापत्तेश्चभावकर्मकर्त्रर्थकलस्यैवात्मनेपदपरस्मैपदविभागेनतद्विधानात् युष्मदस्मच्छेषसामानाधिक
रण्याभावेनप्रथमपुरुषाद्यनापत्तेश्च अर्थनियमेउपपदनियमेप्यनियमापत्तेश्चसिद्धांताशयोऽप्ययुक्तः अवि
रोधेपितत्कर्तृलाद्धात्वोर्बाधदर्शनात् एतावांश्चलः लत्वेषुसाधनेषुयथास्यात् यावद्रूपग्रहणमितिलःकर्म
णिचेतिसूत्रस्थभाष्येणलइत्यस्यप्रथमैकवचनांततयाएवबोधनाच्च कर्त्रादिगतसंख्यायाः स्वनिष्ठधात्वर्थी ९१

आरोपवत् तद्विषयप्रवर्त्तनायामारोपेण मानं इत्याऊः इति धात्वर्थसंख्यान्वयविचार कालान्वयस्तु धात्वर्थव्यापा
रे न फले नापि कारके तेन आपारापगमेपि क्रिनिमत्त्वेपश्यते इति स्यात् पचतीति न स्यादतीतक्रियेकत्वेस्ति पचतीति।
स्यादिपरास्तं सर्वद्योत्यएव विशेषणतयान्वयानुभावात् वर्त्तमानक्रियावाचकाद्धातोर्लडिस्यादिवर्त्तमानेलडिस्यादे
रर्थः एकधातुप्रकृतिकानेकलडादेशानां तत्र शक्तिकल्पने गौरवाच्च आमवातजडीकृतकलेवरेणत्यानात्कूलयत्नस्य
त्वेपि नोत्तिष्ठतीति प्रयोगः तस्योत्थानोद्देश्यकत्वेपि तत्प्रयोजकत्वाभावात् अतएव तत्रोत्थानाय यततइत्येव प्रयोगः
यागपाकादुद्देश्यककुंडमंडपतंडुलक्रयणादिव्यापारमादाय पाकाय यतते इत्यादिवद्यजतीत्यादिवारणाय प्रयोज
कताविशेषस्यैवसंबंधतायाः अनुपेयत्वात् तत्राभिमतफलजनने सति तन्निष्पादकसकलव्यापारापगमे भूतत्वं
फलावच्छिन्नतादृशसकलव्यापारस्य नाशित्वेन भविष्यत्वं याश्चाभिमतफलप्रयोजकक्रियायाः समाप्तिर्न भवति
तावद्वर्त्तमानत्वमित्यनुपदं वक्ष्याम एवं च चैत्रः पचतीत्यादावेकचैत्रकर्तृकैकावर्त्तमानपाकक्रियेतिबोधः ननु धात्व
र्थविशेषणतया बोधविषये कर्त्रादौ कथं चैत्रइत्याद्यर्थस्य विशेषणतयान्वय इति चेन्न सामान्यरूपस्यार्थस्य निय
मेनविशेषाकांक्षावलाद्विशेषणत्वे नापि तेन विशेषणतया तदन्वयात् यथा नियताकांक्षावशाद्देवचैत्रेण गतो।
ग्राम इत्यादौ विशेषणत्वं तत्क्रियायां कारकान्वयस्तद्वत् नन्वेवं कर्तुर्नैः क्रियांतरेणापि संबंधः स्यात् एवं च पच
तिपचतिस्यात्पिस्यात् एककर्तृकपाठक्रियाकर्तृकर्तृकापचिक्रियेतिबोधसंभवात् इति चेन्न तदाकांक्षाभा।

मं.जू.० ९८

वात् अत एव क्रियायाः कारकनिरूपितप्राधान्यस्य न भंग यथा वनितास्वाकांक्षितस्नानादिसंस्कारं पसुः सहते न व
नितांतरसंबंधं स्वानाकांक्षितं तद्वत् तंडुलः पच्यते चैत्रेणेति कर्मणि लकारे तु एकस्यैव प्रथमा प्रथिकाया वर्त्तमानत्वाच्चनात
त्वन्नैकतंडुलाश्रयिकैका विक्लित्तिरिति फलविशेष्यको बोधः पक्वत्वं डलइत्यादेः फलस्य विशेष्यता पाकस्य स्वरूप।
कत्वात् अत एव प्रत्ययार्थे साक्षात्प्रकृत्यर्थे विशेष्यान्वयित्वस्य सर्वत्र क्लृप्तस्य न त्यागः अन्वयित्वं विशेष्यतया विशे
षणतया च अत एव कर्त्तरि लकारे न फलविशेष्यको बोधः एतेन कर्मलकारेपि भावनाविशेष्यके बोध इत्यपास्तं।
अत एव इष्यते पुत्र इत्यर्थे पुत्रीयतीति न प्रयोगो भिन्नार्थत्वात् किं तु पुत्रमिच्छतीत्यर्थे एव क्यजंतात्कर्मणि प्रत्य
यस्तु दुर्लभो कर्मकत्वादिति स्पष्टं सुप आत्मनः इत्यत्र भाष्ये अन्यथोन्नयत्रापि पुत्रकर्मकेच्छानुकूलो व्यापार इति
बोधे न भिन्नार्थत्वासंगतिः इच्छानुकूलो व्यापारश्चात्र मनःसंयोगादिरेव मम त्वेकत्र आपारो विशेष्यो परत्र फ
लमिति भिन्नार्थत्वं स्पष्टमेव उक्तं च कैयटेन यदा क्रियाफलस्य प्राधान्यं तदा वाक्यमेवेष्ट पुत्र इष्यते पुत्र इति न तु।
क्यजंतस्याकर्मकत्वात्कर्मणि प्रत्ययानुत्पादादिति दिक् भावलकारे तु भावे नैव विशेष्यता तथैवानुभवात् तिङ्।।
त्वनुवादक एव कालस्तोमकस्य क्रियाया एकत्वादेकवचनमेवेत्युक्तं अन्ये तु क्रियासंख्यायोग्येति भत्वौत्सर्गिक
मेकवचनमेव संख्यान्वयिकर्त्तृकर्मणोरप्रतीतेः मध्यमोत्तमावपि न तिङ् समानाधिकरणयुष्मदाद्यभावात्
इत्याहुः तदयुक्तमित्युक्तं अत एवाव्ययेभ्यः संख्याद्यभावाद्वचनानुत्पत्तिमाशंक्यैवौत्सर्गिकमेकवचनमुक्तं भा ९८

ध्येन तु भावार्थे ष्योपि तदनुत्पत्तिमात्रं क्येति वोध्यं ननु भावे प्रथमोपि न स्यात् तस्यापि शेषे निपतत्वादिति चेन्न ।
शेषे इति पदं स्वस्वाप्रथमस्योत्सर्गिकतया नाप्ये अकर्तृत्वेनादोषात् सर्वे शेषे इत्यवयुत्यानुवाद इत्याहुः यदा तु सकर्मकाणा
मपि सौकर्यातिशयविवक्षया कर्तृव्यापारस्यागे धातोः फलसमानाधिकरणव्यापारपरत्वे न फलमात्रपरत्वेन वा कर्मणः कर्तृत्व
विवक्षा तदा कर्मस्थक्रियाणां पच्यादीनां लवाच्यकर्तुः कर्मवद्भावेन पच्यते ओदनः स्वयमेवेति प्रयोगो न्येषां तु पश्यति राजेति
विशिष्यते ज्ञानविषयो भवतीति चार्थः अत्र स्वयमेवेति कर्त्रंतरनिवृत्तौ तात्पर्यग्राहकं न्यैकस्य धातोरर्थस्यागश्वे कर्मा
र्थांतरे वृत्तौ ग्राह्यार्थसंबंधनिसता हानिरिति वाच्यं धात्वंतरत्वात् दुपचष्पाके इत्यादिस्तु तंत्रेण निर्दिष्टः तदुक्तं एकदेशे
समूहे च व्याकरणां पचादयः स्वभावतः प्रवर्त्तंते तु स्वरूपं समाश्रिताः इति यत्र कर्मणि क्रियाकृतो विशेषः प्रत्यक्षगम्यः तत्र क
र्मस्था क्रिया न तत्रैव कर्मवद्भावः यथा पक्वापक्वतंडुलेषु छिन्नाछिन्नकाष्ठेषु गमिदृश्यादौ तु नैवं न हि गतागतग्रामे दृष्टा
दृष्टवस्तुनि वा कश्चित्प्रत्यक्षगम्यस्तत्कृतविशेषोस्ति क्वचित्कर्त्तेति तत्कृतश्रमादिरूपो विशेषो दृश्यते इति कर्त्तृस्थैव ।
सा अत्र यद्वक्तव्यं तदुक्तं प्राक् तदयमत्रानुगमः निर्वर्त्ये विकार्ये च कर्मणि कर्मस्था आप्ये तु नेति तदुक्तं क्रियाकृतवि
शेषाणां सिद्धिर्यत्र न लक्ष्यते दर्शनादनुमानाद्वा तत्प्राप्यमिति कथ्यते इति निर्वर्त्ये स्वरूपलाभ एव क्रियाकृतो विशेषो
विकार्ये विकाररूप एव सः आद्यं घटं करोति द्वितीयं सुवर्णं कुंडलं करोति काष्ठं भस्म करोति अनुमानाद्यथा पुत्रः सुखं करो
तीत्यादौ सुखस्वरूपलाभो मुखप्रसादादनुमेयः एतद्द्वितं प्राप्यं यथा रविं पश्यतीति यद्यपि विषदृष्टिः सर्पदृष्टे विषज्वाला ।

सां.जू.० वलीढतारूपो विशेषोदृश्यते तथापि न सर्वत्र तत्सत्त्वमिति भावः अत्र वस्तुतोदृश्यत्वाभावादालोकोदर्शनयोग्यदेशा
९९ वस्थितिर्दर्शनकारणं बोध्यमिति दिक् ननु कोसौ कालो यस्य वर्त्तमानादिभेदेन त्रैविध्यमिति चेदुच्यते प्रकृतेः परिणाम
स्यातिभंगुरस्य विभोः क्षणस्य धारायाः कालत्वात् तस्यैव च क्षणस्य प्रचयविशेषैर्लवपलघटीमुहूर्त्ताहोरात्रादिद्विपरा
र्द्धांतव्यवहारास्ते च कल्पिका नैकलक्षणावयवका बोध्याः क्षणसमाहाराः क्षणप्रवाहाविच्छेदरूपाः तत्तत्सानीयपर्यंत्रादिपरि
च्छिन्नकिंचित्क्षणसमूहपरिच्छिन्ना सूर्यादिक्रियाश्च निमेषादिपरार्द्धपर्यंततत्तद्भेदानुमापिका क्षणानां तु अतींद्रियत
यानुमेयत्वेन चास्मदादीन् प्रत्यहराद्युपाधित्वासंभवात् अतींद्रियदृष्टुर्योगिभिस्तत्तत्क्षणसमूहपरिच्छिन्न
सूर्यक्रियापरिच्छिन्नत्वमहरादीनां ज्ञातत्वात्तत्तत्काल नियामकत्वेन यंत्रपानीयपलानां छायादीनां च निर्णयपूर्वकं
नियमनात् यद्वा शब्दतन्मात्रपरिणाम एव दिग्वत्कालः अत एव सांख्यशास्त्रे आकाशत्वेनैव तत्त्वेषु तयोर्गणनं कृ
तं भूतादिव्यवहारासाधारणहेतुत्वं सकलपरिणामहेतुत्वं चिरक्षिप्रव्यवहारहेतुत्वं च लक्षणं तदुक्तं क्षणतत्क्रमयोः सं
यमाद्विवेकजं ज्ञानमिति पातंजलिसूत्रे भाष्ये इतरेतराध्यासवृत्तया सर्ववस्तुनामशेषविशेषैः साक्षात्कारणरूपं सत्त्वपुरु
षान्यथाख्यातिरूपाद्विवेकाज्जायमानं ज्ञानं लक्षणतत्क्रमयोः संयमाद्भवति प्रतिक्षणं सर्ववस्तुपरिणामात्
तत्र क्षणो नाम कालस्याधाररूपस्यापकर्षावधिभूतः पूर्वापरांशशून्यः क्रमस्तु तत्प्रवाहाविच्छेदरूपः मुहूर्त्ताहोरा
त्रादयो बुद्धिसमाहारा एव क्षणिकत्वादेव वस्तुन्मेलनासंभवात् क्षणस्तु वस्त्वेव प्रकृतेः शब्दतन्मात्रद्वारापरिणामविशे ९९

षः॥ आनंतर्यरूपक्रमस्य क्षणरूपप्रतियोग्यनुयोगिघटितत्वेन तस्यैव वस्तुत्वात् स एवास्माकमस्थिरो न तु पदार्थमात्रमि
ति बौद्धमताद्विशेषः इत्यादि स चायमुक्तः कालो भावमात्रस्योत्पत्तिस्थितिनाशहेतुः शरदादिरूपेण कुसुमादीनां पुष्पफल
प्रसवशक्तीः प्रतिबध्नाति वसंतादिरूपेण च ताः अनुजानाति इति तत्त्रितयहेतुः तातस्य तत्र जन्महेतुतोक्ता एवं स्थितिरपि नि
यतकालानंतरधीनैव एवं वृद्धिक्षयनाशा अपि तदधीनं घटीयंत्रसहस्रशीर्णिर्वसंतादिप्रवृत्तिभिः सकलानुवृत्तीक्षत द्वयस्याक्षे
णप्रतिक्षणं च परिणामैः कलयतीति कालः इत्युच्यते क्षणानां क्रमिकत्वात् तस्य क्रमवत्ता क्रियाभेदोपाधिकी च तत्स्व
णस्य सूक्ष्मस्य वसंताद्याख्या किं चाक्रमब्रह्मविवर्तस्य विश्वस्य यदिदं क्रमेणाभासनं तत्कालाख्या अविद्याशक्तिकृतमेव
एवमेवाधिकक्षणसमूहा एवेदं चिरं अयं क्षिप्रं क्षणसंतानोपाधिकं क्षिप्रमिति चिरक्षिप्रव्यवहारोपि आंजस्येनोपपद्य
ते अत एव रामायणे हिरण्यगर्भेष्टत्वेनागतस्य कालस्य रामं प्रति वाक्यं तवाहं पूर्वके भावे पुत्रः परपुरंतप मायासंभा
वितो वीर कालः सर्वसमाहर इति पूर्वकभावे सनातनरूपब्रह्मसद्भावे करिष्यमाणे संसारस्यानुज्ञाप्रतिबंधाभ्यां सृष्टिस्थि
तिसंहारनिग्रहानुग्रहनिर्वाहकः कालाख्यो मायापरिणाम इति तदर्थ इति दिक् यत्तु प्रसिद्धपरिणामा सूर्यक्रियैवा
क्रियांतरपरिच्छेदहेतुत्वात्कालः कालत्वेनैव रूपेण तस्याः कालिकसंबंधावच्छिन्नाधारतावत्त्वेन तत्क्रियायां घट इ
ति न प्रयोग इति तत्र क्रियायाः क्षिप्रक्षणाव्याप्तित्वेन क्षणव्यवहारानापत्तेः न चोत्तरदेशसंयोगाद्यवच्छिन्नक्रिया क्षण
इति वाच्यं विशिष्टक्रियायाः विशेष्यविशेषणतत्संबंधरूपत्वे त्रयाणामपि स्थिरत्वेन क्षणव्यवहारासंभवात् यदि वि

मं.जू.
१००

शिष्टमनतिरिक्तं तर्हि परिभाषामात्रमतिरिक्तो न काल इति किं चैकक्षणे नेकासामुत्तरदेशसंयोगावच्छिन्नक्रियाणां
जायमानत्वेन तत्पत्ते नवोध्यं अस्थिरत्वेन चस्य शंक्षणरूपतोक्ता क्षणसमूहरूपश्च सषडिंद्रियवेद्यः इदानीं घा
तुपामिजिघ्रामीत्यादिव्यवहारादित्यलं तत्र वर्तमानत्वं प्रारब्धापरिसमाप्तक्रियाधिकरणसमयत्वं तदुक्तं भाष्ये।
न्याय्या त्वेषा वर्तमानकालता आरंभान्नपवर्गात् अवद्रूपं तु ज्ञानो हसति जल्पति तिनिमिषति चेति नांतरीयक
त्वात्तासां न विच्छेदकत्वमतिर्युक्तोऽस्युपपत्तिः फलावसानः क्रियासमूहश्च क्रिया यद्वा तासामपि तदनुकूलत्वे
न नु ज्ञादिधात्वर्थत्वविवक्षेति तद्भाव इति कैयटः वस्तुतो विद्यमानध्वंसप्रतियोगिसमयत्वं भविष्यत्वं वर्तमानप्राग
भावप्रतियोगिसमयत्वं प्रागभावपदस्य व्याहार्येतायाः क्वचित्स्वीकारावश्यकत्वेन सना तीसप्रसंगतमेव तदाश्रय
स्य तत्तत्कालस्य धात्वर्थव्यापारेन्वयः इत्युक्तं कालघटितलक्षणादेवभूतः स्मृत्यानद्यतने इत्यादि विशेषणं अ
द्यतनभिन्ने इति तदर्थः अद्यतनत्वं च तस्य अपदेशिवद्भावेन अद्यत्व वर्तमानत्वादिकालगतमिति स्पष्टं वर्त
माने लडित्यनयोर्नोध्येस्पष्टं एतेन वर्तमानध्वंसप्रतियोगित्वं भूतत्वं प्रारब्धापरिसमाप्तत्वं वर्तमानत्वं प्रा
गभावप्रतियोगित्वं भविष्यत्वं सकल भागैवगतं कालस्य तु तद्भावोपाधिकं तत्त्वं वर्तमानाद्यवस्थया गृहीते
घटादिस्वरूपं स्वाधारे काले आरोप्य तत्र वर्तमानत्वं भूतत्वग्रहः समर्थहेतुसंनिधाने भावित्वेन यद्रूपं बुद्धौ निश्चि
तं तत्तत्प्रतिबिंबस्य निर्मलादर्शरूपे काले संभवात् बिंबप्रतिबिंबयोरेकताध्यत्वाव मायानृतऋतं भावित्वं काले आरो १००

प्यतस्यनावित्वं अध्यवसायनतदुपाधितद्भावेषु व्यवह्रियते तदुक्तं नित्यो विभुरखंडः काल इति वेत्रोपि कमतो वपाद

नेहरिणा तस्याभिन्नस्य कालस्य व्यवहारे क्रियाकृताः भेदा इमे त्रयः मिश्रया यत्र लोकोतिवर्त्तते इत्ती प्राप्तं तेषां कालमा

त्रयधर्मत्वाद्वर्त्तमाना क्रियेत्यादि तु तत्कालवृत्तिः क्रियेत्याद्यर्थकं आदिकर्मविषये प्रकृतः कटं देवदत्तः प्राकार्षीत्कट

मित्यादाववयवगतातीतत्वस्य समुदाये आरोपेण प्रयोगः अ गणवानेकदिनप्राप्यं ग्रामं जिगमिषुः प्रथमेदिने किंचिद्ग

त्वाहेदं मया गतमिति तद्दिने तत्फलावच्छिन्नगतिक्रियाया अममामा वपिय किंचिद्गतिक्रीयातीतत्वेन समुदाये ती

तत्वमारोप्य तथा प्रयोग इति स्पष्टं निष्टेति सूत्रे भाष्ये एवं भूतानद्यतनपरोक्षार्थ काल्लिट्पपाद्येत्यादितो वोध्येत द्वि

षयसंदेहानुरूपान्नूनन्नत्वादेर्ज्ञानद्यतनत्वादेरपि वोधविषयत्वं सा तात्करोमीत्येतादृशो विषयता ज्ञानि ज्ञान

त्वं ज्ञानविष्टमपरोक्षत्वं तद्विषयत्वं चार्थनिष्ठं तद्भिन्नत्वं चपरोक्षत्वं तादृशी विषयता च ज्ञानकरणक ज्ञान एव दा

न्नामतत्वमसीत्यादिशास्त्रजज्ञानसहकृतमनसा दशमोहमस्मीतिसा लाकारो ननु ततः शाब्दादेवमः अत एव

तत्वमसीत्यादि शास्त्राचार्योपदेशशमदमादिसंस्कृतं मन आत्मदर्शने करणमृद्भूति गीता भाष्ये उक्तं ननु साध्य

त्वे नाभिधीयमानो गुणीभूतावयवः क्रमिकव्यापारालामेकफलजनकत्वविषयैकबुद्धाविषयीकृतः समूहः क्रि

यातत्राववर्णां तामेलनाभावेन समुदायोप्रसत्त एव किंचपचेर्यथोदकमेचनादयोवयवास्तथा तेषामप्यवयवा

इति तेपि समूहरूपा एव यस्तु तण्डूपो वयवः स तु स्फुट्टेन धातुवाच्यः किंत्ववयवसमूहात्मनैव आश्रितकमरूप

मं ऊ॰ त्वात् तथा च यस्य एवं च सदसद्रूपा क्रियानन्तवस्तुविषयेंद्रियग्राह्या तदुक्तं क्रमात्सदसतां तेषामात्मानो न सम्
१०१ हि नाम वस्तुविषयैर्याति संबंधं चक्षुरादिभिरिति वस्तुतः क्षणरूपा अवयवा अध्यक्षसत्ता एव ज्ञानपञ्जेत्तुरितिनेदि
ष्टस्यापि स्वांगुल्यादिगतज्ञानक्रियाभेदतत्क्षणसंयोगभेदानवगमे नवत्कसौक्ष्म्यवत्क्षणकालावच्छिन्नत्वस्यापि
प्रत्यक्षे प्रतिबंधकत्वाच्च एकत्वेन त्रिक्षणस्थायिन्या अपि क्रियायाः प्रत्यक्षासंभवात् येन उत्तरदेशसंयोगस्यैव प्र
वेदेशसंयोगनाशात्मकत्वे क्षणस्थायित्वमेव क्रियाया मन्यंते तेषां सुतरां तदसंभवः तदुक्तं भाष्ये क्रियानामेया
मसंताऽपरदृष्टत्वाशक्यापिंडीभूता निदर्शयितुं साक्षादनुमानगम्येति परेण प्रधानेन प्रमाणेन प्रत्यक्षेणासंतमा
दृष्टावयवरूपेण समूहरूपेण चेत्यर्थः असंताऽपरदृष्टेति प्रतीकमुपादाय निर्दिष्टेति सूत्रे कैयटेनैवमेव व्याख्यानात्
न् पिंडीभूतेति अवयवानां क्षणिकत्वेन पिंडीभावस्यैवाभावादुक्तमाशयः तस्मादुत्तरदेशसंयोगादिरूपफलाव्य
मेयैव सर्वा क्रिया पश्य मृगो धावतीत्यादौ दृश्यत्वं न सामान्यपरता धावतेः फलमात्रपरता वा अन्यथावयवस्य
प्रत्यक्षत्वेऽपि तस्य धातुवाच्यतया एतत्प्रयोगानुपपत्तिरेव तदुक्तं भूवादिसूत्रे यदा त्वेकस्मिन् क्षणे भवतीति प्रयोगस्त
दापि तत्र समूहरूपारोपणं ज्ञाप्यते शक्तिस्वभावाच्च नैकः क्षणो धातुवाच्य इति कैयटेन अत एव वर्तमाने लडिति सूत्रे
भाष्ये नास्ति वर्तमानः कालः क्षणभंगुरेषु पदार्थेषु द्वितीयक्षणे नाशात् समवायिकारणाभावेन क्रियाभावात् तदा
श्रयवर्तमानकालाप्रसिद्धेः तदप्रसिद्धौ भूतभविष्यतोरप्यसिद्धिः कदाचिद्वर्तमानस्यैव तदवस्थाप्रतीतेः यद्यपि प्रत्य १०१

नित्यानुपपत्तांअस्येनव्यवहारोपत्यज्ञावाच्च क्षणभंगुरवादोप्युक्त एव न च न वर्त्तते च क्रमिषु र्नेपाम्लतेनस्यंदंते सरितः
सागराय: कूटस्थोयं लोको न कश्चिदेशितास्तियो ह्येवं पश्यति सोप्यनंध इति भाष्यश्लोके न क्षणभंगवाद उक्तः प्रयोक्तु:
क्रियाश्रयस्य च क्षणद्वयमपि स्थैर्याभावात् परिवर्त्तते च क्रमित्यादिव्यवहारः स्वप्नुप्यायमानः यतोयं लोकः क्षणस्था
यी कूटस्थः स्वरूपस्य एव न चेशाश्रयः क्षणद्वयं स्थितो हि तत्कारणं कारिकायो तर दले भवेदपि न च नावदपि स्थैर्यमस्ती
ति तदर्थ इति वाच्यं असंतं संसारानित्यत्वबोधनेतत्तात्पर्यात् यो ह्येवं संसारानित्यत्वं कथंचिदपि पश्यति जानाति सो।
प्यनंधो ज्ञानी किं पुनर्यो योगानुष्ठानेन सम्यगेवं प्रत्यक्षीकृतवान् सज्ञानीति किं वक्तव्यमिति वाक्यशेषेण तथा बोधन।
त् न हि क्षणभंगवादी अनंध इति शिष्टसंमतं क्षणभंगवादिना पतितं नाम समानार्थमादायायं श्लोकः स्वमतसाधकत्वेन।
कृ इति तदनुवादो नाख्येपि कृतः पूर्वपक्षे इति न दोषः तथापि वर्त्तमानकालो नास्त्येव अनुपलब्धिप्रमाणेन तदभावा।
निश्चयात् तदप्युक्तं श्लोकैः मीमांसको मन्यमानोप्युवामेधाविसंमतः काकं स्मेहानुपश्यति किं ते पतितं लक्षणं अनाग
तेन पतिष्यति क्रांते च काकन यदिसं प्रतिपतसि सर्वो लोकः पतत्ययं हि भवानपि गच्छति अनागतमतिक्रांतं वर्त्तमान
मिति त्रयं सर्वत्र च गतिर्नास्ति गच्छतीति किमुच्यते इति मीमांसको विचारकः स्वयं चात्मानं तथा मन्यमानः मेधावी तेषां
संमतश्च अनेनास्यास्तिकत्वमुक्तं पतितं पातः तस्य किं लक्षणं नास्त्येव महास्यार्थः कालत्रयेप्यनुपलब्धेः काकपर्या
यकाकतञ्चाख्यस्य संबोधनं काकते ति मं प्रतिवर्त्तमानक्षणे स्वस्य कालावच्छिन्नत्वेनानुपलब्ध्याभाव निश्चियेपि क्षणस्य

मंजू० १०२ एवं विपरीतत्वावयवक्रियानाश्रयत्वेपि यदि पतन्तीत्यादिव्यवहारस्तदा सर्वोयं लोकः पतति अपरिदृष्टसंयोगविभागो हि
सर्वानुगच्छतीत्यपि व्यवहारापत्तिरेवं च कालत्रयेप्युक्तरीत्या गमनाभावान्न गच्छतीत्यादिव्यवहारो संगतः सूत्राणि चासंगता।
न्येवेति एवं पक्षे एकं समाधानमुक्तं क्रियाप्रवृत्तौ यो हेतुस्तदर्थं यद्विचेष्टितं तं समीक्ष्य प्रयुंजीत गच्छतीत्यविचारयन्निति
लक्षणं तं गनिरासं मन्नमिति निधायोत्तरदेशसंयोगादिपर्यन्तं क्रियायाः स्थैर्याभिप्रायेणेदं क्रियाप्रवृत्तौ यो हेतुः इच्छावि
षयउत्तरदेशसंयोगादिरूपं फलं तस्य विनानिमित्तस्य संभवात् तन्निमित्तं यद्विचेष्टितं क्रियासमूहरूपं तत्समीक्ष्य बहि
रवियमाणं बुद्ध्या विषयीकृत्य बुद्धिविषये तत्र बुद्ध्या वर्तमानत्वं विषयीकृत्याविचारयन्नतीतत्वरूपमविचारयन्नेवाविचारि
तरमणीयेनैव तेन गच्छतीत्यादिप्रयोगं कुर्यात् इत्यर्थः तदुक्तं हरिणा क्रियाप्रबंधरूपस्य बुद्ध्यात्मनि निगृह्यते संक्रान्तवि
बमेकत्वतामाकु वर्तमानतां बुद्ध्यात्मनि बुद्धिस्वरूपे ततोपरं समाधानमुक्तं अपर आह अस्ति वर्तमानः कालः आदि
त्यगतितत्रोपलभ्यते इति अनुपलब्धाहि वर्तमानकालाभावत्कृत्स्वयानुलब्धिश्चौपाधिकीति न सा तदभावस्य बो।
धका यथा क्रियप्रत्यक्षत्ववादिन आदित्यगते दूरत्वदोषेणानुपलंभस्तथा सूक्ष्मकालावच्छिन्नत्वदोषेणास्यानुपल।
नः अनेनस्पष्टमेवाद्यसमाधानस्य वर्तमानकालसत्ताभावमंगीकृत्यैव प्रवृत्तिर्दर्शिता अत्र न क्रियासमूहोपवर्तमा
नकालो विषयः समूहस्य युगपदसंनिधानादत्वेन प्रत्यक्षत्वाभावात् तदप्रत्यक्षस्य दोषाजन्यत्वाच्चादित्यगतिवा।
दितिदृष्टांतोपपादनस्यैवैयर्थ्यापत्तेः तदप्युक्तं हरिणा कार्यानुमानसमर्थ्यवास्येन धर्मेण तत्तथा आत्मतत्त्वेन गद्ये १०२

तस्माद्यस्मिन् वर्तमानत्वेति कार्योत्पत्तौ समर्थसमूहरूपं फलजनकत्वादेकक्षणोऽपि तदन्ते देनाध्यवसितः क्रियात्वेन व्य
ह्रियते इति तत्र वर्तमानत्वं मुख्यमेव स्वेन धर्मेण फलजनकत्वेन तत्क्षणरूपमपि तथा फलजनकः अत आत्मतत्त्वेन क्रिया
त्वेऽसमर्थस्यानन्तक्षणवृत्तित्वेऽप्येवं मतं कुत इत्यत्रोक्तं विसम्यवालाइवद्दृश्यमानानलक्ष्यते विकृतिसंनिपातेऽस्तीति तां वे
दयं ते त्रिभावाः सूक्ष्मो हि भावोऽनुमितेन गम्य इति विसेद्दृश्यमानेन तदंतर्गतवालाद्दृश्यमानोऽपि तत्त्वेन प्रत्यक्षेण न गृ
ह्यते किं तर्हि विसदृशाहेन तदंतर्गत्वात् सदाहोऽनुमीयते तथा फलानुपपत्त्या कल्प्यमानसमूहे क्षणिकावयवसद्भावोऽनुमी
यते ननु समूहस्य वौद्धत्वमेव वाच्यं युगपत्तस्याभावात् एवं चावयवसत्तानमानसिद्धा अत आह अस्तीति त्रिषु कालेषु भावो
भावनायेषां ते योगिनः तामवयवक्रियापरूपां तीक्ष्णधीः अनेन योगिप्रत्यक्षं मानं दर्शितं अन्येषां त्वनुमानेन तज्ज्ञानमि
त्याह सूक्ष्मो हीति रूपेण सूक्ष्मः सूक्ष्मकालावच्छिन्नत्वेन वा सूक्ष्मसर्वोऽप्यनुमानगम्य एव फलानुपपत्त्या कल्प्यमानो
बुद्धिविषयः समूहे वर्तमाने लडित्याक्षिप्तस्वं च तदनुमायकमेवं चावयवगाः समूहगाश्च क्रियाः प्रत्यक्षे वेति स्पष्टमे
वोक्तं यदपि न वादिसत्त्वे कैश्चिदेन समूहस्याप्रत्यक्षत्वेऽपि एकैकस्य क्षणस्य प्रत्यक्षत्वेन बुद्ध्याऽनानुक्षणानुसंकल्प्यते
इति प्रयुज्यते इति तदपि योगिप्रयोगविषयं अस्मदादिप्रयोगस्तु व्यवहारपरंपरया विकल्पात्मकज्ञानविषय एव अत ए
व तिष्ठतीत्यादेर्विप्लोदाहरणत्वं पातंजलेऽप्युक्तं यथा क्षणसमूहेऽवुध्यासंकलिते योगिनां घटिकामुहूर्तादिव्यवहारोऽस्मा
कं पश्चाद्व्यायाद्यनुमितेन व्यवहारपरंपरया घटिकादिव्यवहारस्तद्वत् योगिनां क्रमे नानुज्ञवविषयाणां मध्ये कबुद्धौ संक

मं.न्यू०
१०२

लनान्नवस्येव अनुपूर्वकं हि स्मरणं न तु क्रमोपलब्धं युगपन्न स्मर्यते इति किंचावयवस्य प्रत्यक्षत्वे प्रकृतः करइ
साद्यवयवातीतत्वेन समुदायातीतत्वमादाय कथमुपपाद्यं न च द्वयवप्रत्यक्षत्वेन समुदायप्रत्यक्षत्वमादायत
द्धावर्तक तयापरोक्षत्वस्य चारितार्थ्ये नाप्यस्पृष्टवैपक्ष्यात्मसिद्धांतयोरसंगत्यापत्तेः तस्मात्परोक्षत्वस्यसंगतमिति
चेन्न तदनुकूलत्वशक्तिमतां आपाराविशेषानां साधनानां परोक्षत्वमोहविकल्पितत्वात् भूतानद्यतनीयाक्रियाविशि
ष्टपरोक्षसाधनिका क्रिया तद्धत्ते लिडिति स्मर्यात् तेन क्रियानां विशेषसाधनप्रत्यक्षेपि लिट् भवत्येव यद्वा क्रियाफलस्य
प्रत्यक्षत्वे न क्रियाप्रत्यक्षत्वबुद्धिस्तस्या रोपेणैव तस्याः पारोक्ष्यं स्पष्टं चेदं द्वयमपि भाष्ये एवं स्वव्यापारस्यासंगादिना
मनोसंनिधानस्य यमप्रतिसंधाने तस्मात्संख्या युक्त्या ज्ञाने तत्कार्येणानुमितौ वालिटभवत्येव यथा वज्जगद
पुरस्तात्तत्समताकिलाहमित्यादौ मनस्त्वांतःकरणपरिणामविशेषो मध्यमपरिमाणं संकोचविकासशालि अ
न्यत्र मनोऽस्तु वंनाप्योषमितिष्कृतिसिद्धं अतएव सदा न ज्ञानयौगपद्यं कदाचित्तद्यौगपद्यं च वस्तुतो एवेवमनःल
क्षणं मनसो ज्ञानस्याभावो भाव एव च वैधस्यात्मनमोज्ञानं संनिधास्त्वं वर्तते अणुत्वमसम्यक् चैकत्वं चैगुलोम
नसस्मृतौ इति चरके पतंजल्युक्तेः विकासस्तु योगबलेन योगिमन सएव अस्मदादीनां तु क्षण विलंबे पियौगपद्य
न्त्रमः शतपत्रभेदइव अन्यथा हृदेशस्थमपि ज्ञायते किंच विकासेनियतनियामकाभावः अदृष्टविशेषात्तृपि
तस्यनियतो विकास इति केचित् अंतःकरणं च विभु अतएव तस्यानंतवासनाधारता सर्ववृत्तिनिरोधे योगिनां १०२

सर्ववस्तुज्ञानं च अन्यथा संनिकर्षाभावाल्लग्रहेत योगजधर्मस्य प्रमाणं तत्त्वकल्पने गौरवात् तेन च तमःप्रारब्ध
प्रतिबंधकनिवृत्तौ संयोगादि प्रत्यासत्त्यैव तेषां प्रत्यक्षं भूतभाविनोरपि तदीयसूक्ष्मावस्थासंनिकर्षेणैवेदंमेव
भाविभूतं तच्चेति ज्ञानं भग्नघटीकपालकलापः चक्षुःसंयोगेनायं घट आसीदिति अस्मदादिज्ञानवत् न चांतःकरण।
नां विभुत्वे स्वीकुर्वतामपि दोषः तदवच्छेदेन तत्तदंतःकरणादेरभावः स्वीकारे विभुत्वभंगइति वाच्यं सर्वस्य माथिक
त्वेनानिर्वचनीयतया जलं नलिनीपत्रवद्दोषात् कृतार्थं प्रतिनष्टमप्यनष्टं तदन्यसाधारणत्वादिति योगसूत्रे
ण तथा बोधनात् कथमेकमनष्टं च नष्टं चेत्युपपद्यते यदि काकोलूकनिशा ममत्वमिहनेष्यते ऽस्य नियुक्तोके
अविवेककृत बंधस्य विवेकादपगमनं वस्तुतां माया बोदपर्यवसानाच्च गौतमो विद्धम प्रविषयाभिमानवदयं प्रमा
ण प्रमेयाभिमानः मायागंधर्वनगरमरुगतस्मावद्बाह्यहेत्वभावात् असिद्धिमित्याहुः प्रस्य वतिष्ठते विज्ञानवादीस्
वं वाचस्पतिनाविचारितेनाद्यसूत्रद्वयेन यथा स्वप्ने विषया न संति अथ चाभिमानो भवति एवं प्रमाणो भवति एवं
प्रमाणप्रमेयाणि न संति अथ च तदभिमानः एवं च न विज्ञानधारारूपचित्व्यतिरेकिणो विषया जाग्रत्तास्य याश्च
पि निर्विषया दृष्टा मायागंधर्वनगरादिप्रत्यया अपि पूर्वपक्षं कृत्वा यद्यपि स्वाप्नादि विषयाणां असत्त्वं प्रतिबो
धादाभवतु पलंभात्तथापि जाग्रदवस्थायां समीचे एवोपलभ्यमानविषयाणां यावद्व्यवहारमबाध्यमानत्वा
तीयानां चित्तव्यतिरेकेणोपलभ्यमानानां तत्त्वेन हेतुरिति भाष्यवार्त्तिकादौ तत्तीयं सिद्धं तत्त्वेन व्याख्यातमेवं

मं.सू.० १०४

चानिर्वचनीयतावादस्य सूत्रसंमतत्वमर्थादुक्तप्रायं तस्य श्रुतिमूलकत्वेन हेत्वाभावादसिद्धिरित्यनेन खंडनासंभवा
च्च तद्वादे चानिर्वचनीयस्य व्यावहारिकसत्त्वांगीकारादर्दोषः अथ च चितातिरिक्तबाह्यसद्विषयसाधनोत्तरमेवं तर्ह्य
पवर्गे विबाह्यविषयसत्वान्मुक्तस्यापि तदुत्पत्तिप्रसंग इति सूत्रेण पूर्वपक्षं कृत्वा चेष्टेंद्रियसंयुक्तस्यैव बाह्यविषयस्य ज्ञाने।
त्पत्तिकारणत्वमपवर्गे च धर्माधर्मयोर्नाशेन स्थूलसूक्ष्मसकलशरीराभावान्न तदुत्पत्तिरिति सूत्ररीत्या एवं च तुल्यन्यायात्
शरीराभावबद्धर्माधर्माभावाद्विषयाभावोप्युक्तप्रायस्तदुक्तं कृतार्थं प्रति नष्टमप्यनष्टमिति तदुक्तं चापवर्गः कथमित्याशंक्य त
दर्थं यमनियमाभ्यामात्मसंस्कारो योगाच्चाध्यात्मविध्युपायैरित्युक्तं तस्यापवर्गस्याधिगमाय यमनियमाभ्यां अधर्मनाशाय धर्मो
पचयरूप आत्मसंस्कारः कार्यः ततो योगात्पातंजलारब्धयोगशास्त्रात् चित्तैकाग्र्यसंपादकैरध्यात्मविध्युपायैस्तपःप्रा
णायामप्रत्याहारादिरूपोध्यात्मविधिः अस्मेतद्यः अनेन तदुक्तार्थे सर्वस्मिन्नूहस्याप्यनुज्ञा सूचिता योगपदं वेदांताना
मप्युपलक्षणं नन्वेवं तेनैव सिद्धेः इदं शास्त्रं व्यर्थमत उक्तं तत्त्वाध्यवसायसंरक्षणार्थं जल्पवितंडे बीजप्ररोहसंरक्षणार्थं कं
टकशाखावरणवदिति अनुत्पन्नतत्त्वज्ञानानामप्रहीणदोषाणां तदर्थं घटमानानामुपायएतदिति तद् भाष्यं तस्याभवा
स्थायां सौगतादिकृततर्कैः प्रागस्य तन्मतविश्वासस्य नाशाय जल्पवितंडाभ्यां तन्मतखंडनतास्थैर्यकमिदं शास्त्रं स्थूलसू
क्ष्मशरीरातिरिक्तात्मसाधनद्वाराध्यात्मशास्त्रांगमिति तदाशयः गुर्वादिभिर्वादे तत्त्वनिर्णयार्थं चैतदित्यपि तत्रोक्तं अ
नेनाद्वैतशास्त्रातिरिक्तसर्वशास्त्राणामेवंविधत्वं सूचितं किंच प्रमाणप्रमेयेति सूत्रे स्यायनभाष्यकृता संशयादीनामपि प्रमे १०४

यद्धि मुख्यं ब्रह्मैवेति तस्यैवेह ग्रहणं स्यादिति तन्मात्रत्वापत्तिरिति तदाशङ्क्य अनेनोपनिषदे मुख्याध्यात्मविद्येति सूचितमत
एवास्य तंत्रस्य प्रदीपः सर्वविद्यानामुपायः सर्वकर्मणां विद्योद्देशेऽप्रकीर्तितेति प्रयोजने नाख्ये एवोक्तं विद्योद्देशे आन्वीक्षि
की त्रयी वार्त्ता दंडनीतिश्चतुर्थिकस्तत्र तथा तदिदं तत्त्वज्ञानं निःश्रेयसाधिगमश्च यथाविधं वेदितव्यमिति च भाष्यकार वा
तुष्टं च व्यावहारिकविधानामध्यात्मविद्यानुनयावहारिकीर्तिनात्रोक्ता तस्मान्मुख्यं तत्त्वज्ञानं अध्यात्मविद्योपनिषदुक्त
मेवास्य तु न उपाय इति स्पष्टमेवोक्तं इत्यस्य ग्रंथविस्तरः अनद्यतनत्वं चातीतरात्रेः पश्चार्द्धेनाभिव्याः पूर्वार्द्धेन च सहितो दि
वसोऽद्यतनस्तद्भिन्नत्वमिति वृत्तिः अतीतरात्रेरंत्ययामेनागामिन्याश्चाद्ययामेन च सहितो दिवसोऽद्यतन इति लुङःस्थे
कैयटः एवमनद्यतने भविष्यति लुट् गम्भविष्यत्सामान्ये लृडित्यादितत्तदनुशासनादितो बोध्यं तत्रानद्यतनेऽभूते विषया
न्भूतत्वमात्रविवक्षा तदा लुङादि एवं तेन यथायास्तीदित्यादौ भूतत्वमात्रविवक्षायां लुङ् पश्चात् पदेनानद्यतनत्वा
प्रतीतिरिति न दोषः एवमनद्यतनभविष्यति भविष्यत्त्वमात्रविवक्षायां लृडप्युपितः यस्यामस्ति यथा एवमियं तु कदा
गंतायैवं स्यादौ निर्द्धातीस्यादावद्यतनेऽपि अनद्यतनत्वारोपेण लुट् तदारोपफलं तु अतिविलंबितगमनप्रत्याय
न तु वृत्रे दे वेदेवे वे स्वहूः संपन्नाः शालय इति प्रयुंजते संपत्स्यंते इति च प्रयुक्ते मैवं वोच संपन्नाः इति ब्रूहीति लोका
वदंतीति तदनुपपन्नमिति चेन्न अप्रशालिबीजसंयोगे निमत्तद्वृत्तिस्वीकारेण तदुपपत्तेः यदा फलनिष्पत्तिरेवा
निष्पद्देरर्थः अप्रशालिबीजसंयोगे एव कार्यनिष्पत्तिरूपमध्यवस्यंते इति तस्यातीतत्वाद्भूततापदानं तत्रकारणमेवो

मं.जू.० सत्तिगतमतीतत्वं दृष्टौ ज्ञानिसंपत्तौ चारोप्यन्ते तत्र एतेन मे ह्योतस्सु तत्काले पि तथाप्रयोगः समर्थितः आरोप-
१०५ फलं तु कारणांतरापेक्षाऽभावप्रतिपादनद्वाराऽश्रांतत्वादिप्रतीतिर्यथा कोशगतेष्वपि शालिषु तुज्यर्थमवहनना-
दीनि प्रतीयन्ते एवमेष्यपि स्थूलरूपेणाग्नि व्यक्तिः प्रतीत्येति न तद्देवानुज्ञेक्रियेति द्विप्रवचनेऽल्पाङिमत्र नाख्येतथा ।
यामांतरं जिगमिषवः स्थानविशेषरूपमत्ताग्निस्थयवंतो नार्विनितख्यानगतमतीतत्वादिरूपमत्तायामारोप्य
तत्तत्कालप्रसमयो बुद्धिविषयत्वमात्रविवक्षायां कूपोसीति वर्तमानप्रसमय इति ऊ भविष्यतिगम्यादयो नद्यतने लृ-
ट् द्विप्रवचने लङि स्तावौ नाख्येस्यष्टं एवं चयानोनिकिरणावलीमुदयनः स्यादि भूतत्वानद्यतनत्वपरोक्षत्वा
नामारोपे लोपपन्नं आरोपफलं तु ग्रंथेऽतिसुकरत्वशीघ्रनिष्पाद्यत्वादिप्रत्यायनं तत्फलं त्वध्येतॄणामर्थप्र
विवेकादिफलकमनुग्रंथं ज्ञातुं सोत्केनताऽवप्रधानतया उत्कंठयाममवर्तमानासोत्कं उत्कंठस्यर्थसोभा
ण इति यत्कानामान्हारः परोक्षत्वारोपोप्येतत्फलएव एवं सूक्ष्मकालेन करिष्यामि पत्रकरणकाले त्वयमा-
पिसाध्यात्कं तु मशक्यमित्येवं बोधनात् अनायासेन ग्रंथकरणमपि ध्वनितं स्यर्थियमाप्येतसौ विवेक इतरग्रंथे
भ्यो ग्रंथे तत्कर्तृत्वस्य स्वस्मिन्व्यतिरेकोपि ध्वंग्यते विष्यतः प्रयोगकाले वास्तवमेव परोक्षत्वमिति न तद्ध्रंशो
आरोपापेक्षेत्यपि वदंति ननु नाविदिक्षस्समासीदित्येव मनुत्पन्ने भूतत्वभविष्यत्त्वयोर्विरोधात् नवधातुसंबंधे
इत्यनेन नाविशाष्टे प्रधाननतात्वा नानुरोधेन भूते प्रत्ययः एवं ह्यासीत्नाविशाष्ट्रयोपर्यायितयानुगपत् प्रयोग । १०५

नापत्तिः किंच भाविनो भूतकालतायाः प्रतिपिपादयिषितायाः भावगम्येन किं तु यदि दंडकं नेयं वस्तु तदासीदिष्येव प्र
तीयेतेति चेन्न यत्कृतं संश्यं तं कालं भावित्वेनाव्यवहृतं तदासीदिष्यर्थात् एवं ज्योतिष्टोमयाज्यस्य पुत्रो जनितेत्यतो विज्ये 1
ति ष्टोमयाजी त्वेवं व्यवहरिष्यमाणो जनितेति बोधः एवं च नादृग्वाक्यार्थे वाक्यैकदेशप्रयोगोऽयं अत एव तस्य सूत्रस्य वि॰
धायकत्वं नाख्येयस्याख्यातं तत्र संप्रस्ययाः इति च प्रत्याख्यातं गोमानासीदित्यत्रापि गोमड्रूपस्यातीतत्वेऽन्तस्य तायाः अ॰
तीतत्वान्न भूते प्रत्ययः तेनार्थानुमवामतीतत्वप्रतीतिः वसं त्वत्तरं तं दर्शीसादौ दर्शनकालिकं वा साव्यतारयोर्वर्तमा
नत्वं बुद्धिस्थीकृत्य प्रत्ययः तत्फलं च दर्शने तत्समकालत्व प्रत्ययः शास्त्रस्थले क्रिययोः समानकालत्वप्रतीतेरित्य
न्यत्र विस्तरः ननु लिङ्निमित्ते लृङ् क्रियातिपत्तावित्यनेन भविष्यति लृङ् विधीयते भविष्यति मर्यादावचनेऽवरस्मिन्
दनुवृत्तेः क्रियातिपत्तिश्चासन्नं क्रियायुक्तमसिद्धलक्षणा सुवृष्टिश्चेदभविष्यत्तदा सुभिक्षमभविष्यदित्यादौ सुवृष्टिभवनसु
भिक्षभवनयोः साधनवैकल्यान्नियमानुपपत्तिः प्रतिपाद्यते तत्र भविष्यत्वाद्यनुपपन्नं अत्यन्तं च सत्त्वातिक्रमेणाभूत इति
अतो समर्थसाधनसंनिधाने संभाविनोऽस्ति सिद्ध भविष्यतीति कथ्यते अत्र च साधनाभावात् संभावितापि नोस्ति इति
तिचेन्न साधनाभावाद् भविष्यस्य पि वस्तुनि भविष्यत्वमारोप्यते निषेधः इति योगित्वायेऽस्य दोषात् सुभिक्षभवनहेतुसु
वृष्टिभवतं भविष्यत्वेनासंभयनेवं समभिव्याहृतेपि योज्यमितिदिक् त्वं पचसि अहं पचामि त्वं पाठयसेऽहं पाठयेऽस्मादौ मध्य
मोत्तमयोः प्रत्यकत्वं अस्त्वं चक र्तकर्मविशेषणतया बुध्यते शाब्दशक्तिस्वभावात् तत्र प्रत्यकत्वं प्रयोक्तुरहं कारता॰

मं०नू०
१०६

स्मदर्थे दृत्तत्वं अपरत्वं अहंकारास्पदचेतनत्वं तदुक्तं पुरुषसमुद्देशे हरिणा प्रत्यक्त्वापरभावश्चेत्युपाधीकर्तृकर्मणोः तयोः शक्तिविशेषेण वाचकौ मध्यमोत्तमौ सदसद्वापि चैतन्यमेताभ्यामवगम्यते चैतन्यभागे प्रथमः पुरुषो न तु वर्तते इति तत्र कर्मविशेषणतया तयोः प्रतीतिरात्मनेपदेनैवेत्युक्तं शक्तिविशेषेणेति वाचकत्वं द्योतकत्वं एवं च मध्यमोत्तमौ चेतन्ययुक्ते कर्तृकर्मणी बोधयतः नन्वेवं शृणोतु ग्रावाण इत्यादौ मध्यमो न स्यात् तत्रोक्तं सदसद्वेति असदनभिव्यक्तं एवं चैतन्यवत्त्वेनैव तद्बोधस्ततोपि एतद्बलेनैव सर्वस्य चेतनवत्त्वं मन्त्र्ये नाश्चेदुक्तं तत्र हि चेतनधर्मस्याचेतने आरोपमत्यति नवु चेतनत्वं काष्ठानि पचंतीत्यादावज्ञानार्थधातुविषये प्रथमपुरुषान्नियमेनतदनभिव्यक्तेः युष्मदस्मदेविं तनेष्वेव प्रयोगान्मध्यमोत्तमाभ्यां तदभिव्यक्तिः संबोधनार्थो मध्यमे प्रतीयते युष्मदस्मसंबोधने एव प्रथमोति तु न युक्तं त्वं पचसीत्यादौ तदप्रतीतेः क्रियाविनियोगफलकाभिमुखीकरणस्यैव संबोधनपदार्थत्वात् इस्याग्रे निरूपयिष्यामः अथोपग्रहः कः पदार्थ इति चेदत्र हरिः यस्त्वात्मनेपदाद्भेदः क्वचिदर्थस्य गम्यते अन्यतश्चापि लादेशान्मन्यंते तमुपग्रहं अन्यतः परस्मैपदात् उपग्रह इति तत्र पूर्वाचार्यसंज्ञा तं विभजते क्वचित्साधनमेव। सौ क्वचित्तस्य विशेषणं साधनं तत्र कर्मादिव्यक्तवाकृत्वं विशेषणं कर्मादीत्यादिना कर्त्ताभावश्च भावोपि तिङुवाधः क्रियायाम् एकपदवाच्यसाधनानानात्वमावेदयन् भवति साधनं व्यक्तवाच्यं समुच्चारणे इति व्यक्तवाकृत्वं स्वविशिष्टस्य कर्तृतामावेदयन् उपग्रहः क्वचित्तु क्रियाविशेषउपग्रहः स्यादहधा त्वर्थस्तद्विशेषश्चाप्युक्तः क्वचिदुपग्रहः १०६

धात्वर्थो गंधनादिः स्यात् प्रतीहारो विशेषणं तद्विशेषस्तद्विशेषणं गंधनावक्षेपणादयः संतोपि मात्मनेपदम
तेभि प्रसक्ताः इति उपग्रहः यथा उत्कुरुते इति प्रतीहारस्तु क्रियाविशेषणमात्मनेपदव्यंग्यउपग्रहः प्रतिलुनीतेइ
त्यादौ क्वचित् विषयभेदेन क्रियाविशेषउपग्रह इत्याह क्रियाविशेषभेदे न जीविकादिषु भिद्यते ला देशैः सक्रिय ।
भेदो वाक्येष्वप्यवगम्यते विषयविशेषेण धात्वर्थः क्रियाभिद्यते भव भेदो ला देशैर भिव्यज्यते इति शेषः यथा पचे जीवा।
नोपायत्वेनानुष्ठीयमानो विक्लित्त्यनुकूलव्यापारेण ल संस्कारलक्षणः पाकः तदर्थकत्वं परस्मैपदव्यंग्यं यथा पच
तिय जति प्रधानं ह्यत्र क्रियाफलं न कर्तृगामि स्वत्विजां तृतिमात्रार्थित्वात् यजमानादीनां तु पाकादि सामग्रीसंघटन
रूपं प्रति विधांतरर्थो तदर्थकत्वं चात्मनेपदव्यंग्यं यक्रियाफलं कर्तृगामि स्वरितञितो धातोरात्मनेपदमिति स्वरितञितः क
र्त्रभिप्राये क्रियाफले इति सूत्रार्थः सक्रियाभेदः स्वयं यजते यजती स्यादौ वाक्ये स्यादि पदेनापि गम्यते विनाप्युप
देनेति तत्र पदद्वय मिसंबंधेहेलाराजः अत एवोक्तं स्वरितञित इति शाकयमकर्तुपासादिषु कस्मान्न भवति कर्त्रभिप्राये
क्रियाफले इत्युच्यते सर्वेषां च कर्त्रभिप्रायं क्रियाफलमस्ति न एवं विज्ञास्याम येषां कर्त्रभिप्रायं प्रचाकर्त्रभिप्रायं च।
क्रियाफलमस्ति तेभ्य आत्मनेपदं भवतीति न चैषां कर्त्रभिप्रायं चाकर्त्रभिप्रायं च क्रियाफलमस्ति तथा जातीयकाः
खल्वप्याचार्येण स्वरितञितः पठिता ये उभयवंतः एषां कर्त्रभिप्रायं चाकर्त्रभिप्रायं च क्रियाफलमस्तीति अनेन
च भाष्येणाकर्त्रभिप्रायफलाभावप्रयुक्तोपासादिषु न यामा वोलभ्यते न तु पासादिष्वपि सेना प्रयाति विप्रर्थंती

मं.जू. थीतिगच्छतीत्यादौ परानिप्रेतं अयथ मौदिफलमस्तीतिचेन्नभाष्येच श्रवणात्कर्त्रभिप्रायमेवाकर्त्रभिप्रायमेवचक्रि
१०७ याफलमस्तीत्यर्थात् इदंचोभयाभिप्रेतमितिनतथेत्यभिप्रायः तत्रयजेर्ऋत्विग्व्यापारवचनत्वे कर्त्रभिप्रेतनस्फ
लाभावः यजमानस्यतदाकर्तृत्वाभावात् यजमानव्यापारवचनत्वेतद्धत्वं उभयवचनत्वेस्वाभिप्रायतावितिवा
च्यमाणवत्प्रयोगइतितदाशयः ननुपच्यादीनांविक्लित्यादिवचनत्वेनकथंप्रतिविधानमर्थः किंचतदर्थत्वा
भावेकर्त्रभिप्रेतक्रियाफलाप्रसिद्धिरतआह संविधानंपच्यादीनांक्वचिदर्थः प्रतीयतेतन्निमित्तं यथाप्याविक्रिया
धिश्रयणादिकारकः पचेः प्रधानार्थः यासौतंडुलानांविक्लित्तिः अथइदानींतदपिसंधानपूर्वकमन्वेषणं प्रेष
णवायुरूपंयत्सर्वेपच्यर्थइतिहेतुमतिचेतिसूत्रेभाष्योक्तेः संविधानमपिसामग्रीसंघटनपूर्वंपच्याद्यर्थः यथा
विक्लित्यर्थस्यापिपचेरधिश्रयणादिः कर्तृव्यापारोर्थः देवदत्तः अन्यथादेवदत्तस्यकर्तृत्वानापत्तिः णिचस्तुत
नहिसंविधानमेवणिजर्थः अपितुतत्पूर्वकंप्रेरणंयत्रमतिप्रयोजकइत्युच्यते संविधानंकुर्वन्नपिनयावत्प्रेरय
तिनतावत्प्रयोजकइत्युच्यतेइतिहेलाराजः भिक्षावासयतिकारीषोग्निरध्यापयतीत्यादावपिप्रयोजकत्वारोपो
वोध्यः तूष्णीमासीनोयस्तत्समर्थोन्याचरतिसोपिवासादिप्रयोजकइतिभाष्यात् तत्समर्थाचरणमात्रेणतत्प्रयो
जकत्वारोपइतिपदार्थः अतएवायंयत्तसंज्ञावान्संघट्टयतिकंवाप्रेरयिष्यतिआर्त्विज्यायेतिनजानीमइति
व्यवहारःस्वरितञितइतिसूत्राद्यमर्थः कथंलभ्य तत्राहकर्त्रभिप्रायतासूत्रेक्रियाभेदोपलक्षणंतथाहि १०७

नासाहितत्कर्तृफलमात्मनः कर्त्रभिप्राय क्रियाफलग्रहणेन संविधानक्रियानिर्दिश्यते नन्वत्र दृष्ट्वा वाचं विसृ-
जेदित्यत्र न त्वत्र दर्शनेन कालविशेषनिर्देशवत् यत एवंरूपक्रियाया कर्तृफलेन युज्यते न ह्यसंविद धत्तूयागादिता-
त्फलं स्वर्गादि श्रुते न तस्य कार्यनिमित्तफलसंबंधेन कारणभूतक्रियाविशेषउपलक्ष्यते तद्यच काम्यतो रात्मनेपदमिसु
क्तं भवति संविधानोपलक्षणं च क्रियाफलं किं न आह यस्यार्थस्य प्रसिद्ध्यर्थमारभ्यंते पचादयः तत्प्रधानं फलं तेषां न ला
भादि प्रयोजनं तदेव स्वत्रे क्रियाफलशब्देन गृह्यते इति भावः तथा पाकस्य भोजनं लोकतो वगतं यागस्य स्वर्गो वेदतः त
उक्तं भाष्ये साधीयो यत्र कर्तारं क्रियाफलमभिनिर्वर्तितं चांतरेण भवियजिंयजिफलं च विंशवापि फलं लभंते याजकाः पु-
नरंतरेणापि यजिं गाल्लभंते न तत्काश्यवेतनमिति यत्र यस्यां क्रियायां सत्यामिस्यर्थः साधीयः क्रियाफलं स्वर्गादिः या-
जिं यागसंविधानरूपयज्यर्थः एवं च विभिस्यपि अंतरेणापि यजिं त्वसाध्ययागव्यापारं विनापि मतांतरमाह क्रियाप्र
वृत्ता वाख्याता केश्चित्स्वार्थपरार्थता च मती वासती वापि विवक्षितनिबंधना सर्वइमे स्वमूर्त्स्यर्थे प्रवर्त्तंते न हि कश्चित्परो
नुग्रहीतव्य इति प्रवर्त्तते इति भाष्योक्तेः सर्वस्य स्वार्थे प्रवृत्ता स्वार्थेनास्सर्वत्र मुख्या परार्थता त्वसती वा सती वेति तु लौकि
की वाचोयुक्तिः विवक्षितं विवक्षा मानिवंधनं हेतुर्यस्याः परार्थताया इत्यर्थः एवं चासमराधेताविवक्षायं मा न्नूदा
त्मनेपदमिति कर्त्रभिप्रायेऽस्मनेन क्रियाफलं विशेषितं स्वशाथेत्त्वे तस्व्वे क्रियाफलकेथत्वे कर्त्रभिप्रेतो हेतुपकेम्प्रा
त्मनेपदमित्यर्थः अत्र केश्चिदित्यनेनाऽरुचिर्वोधिता तद्बीजं तु यजं तेऋत्विज इत्यादेरप्यापत्तिर्येः स्वर्गादि फलार्थं

निर्वर्त्तनेनेतरं व्यापारयति स्वयं च पचति विधानमात्र न तत्रैव प्रयोजकमानादौ कर्त्तर्यात्मनेपदमिष्यते यत्तु नृतिरूप निर्वि
र्त्तिमात्रफलः स्वामिनि वित्तानुवर्त्तनादेव कृतार्थतां मन्यते तत्र नात्मनेपदं न स्यादाविनीतीति हेलाराजः किं च स्वरितत्रि
दूयूहणं च स्यात्व्यानस्यो ज्ञानाख्यविरुद्धमिदं तेनार्थद्वयवाचकत्वं स्वाभाविकं यत्रामिति त्रविषया इतिस्य ष्टमुक्तं
कर्त्तृत्वविवक्षायामुपयोगः किं च फलस्य स्वर्गादेरेवात्र ग्रहणमित्यर्थस्य न्याय्यसंमतत्वेन क्रियाप्रवृत्त्याविस्मसंग
तं किं च क्रियाप्रवृत्तेः सर्वत्र स्वार्थेर्हि उपकत्वेन तत्र परार्थे द्वेत्रपकत्वविवक्षा अस्यं तमनुचितैवेति दिक् केचित्तु प्रा
तिविधानार्थादिपितदर्थद्योतकमात्मनेपदणिचा सह विकल्प्यते संविधानमेव णिजर्थः सर्वे इमे स्वविभ्रमस्वार्थे
प्रवर्त्तन्ते इति न्यायेन स्वार्थे प्रवर्त्तमानस्य प्रयोजकस्यानुकूलकर्त्तुः संविधानोऽतेप्रैषस्तु न णिजर्थः एवं चैकविष
यत्वात्तयोः पर्यायेणान्यतरेणापि जयतीति वदंतित्तन्मतमाह केषांचित्कर्त्तुर्निप्रायेणिचा सह विकल्प्यते आत्मनेप
दमन्येषां तदर्थो प्रकृतिर्यथा णिचा सह णिजर्थो प्रकृतिर्धातुर्यथा विकल्प्यते तद्वत् अन्येषां स्वरितत्रिद्य
तिरिक्तानां धातूनां हेतुमति चेत्यस्यापि संविधानरूपे व्यापारे वर्त्तमानाद्यातोर्णिजित्यर्थः यजतेश्च संवि
धानमेवार्थः पाचयतीत्यादावप्येवमित्येतन्मतं वस्तुतो णिचूडे रणा वाचीत त्प्रयोजको हेतुश्चेति सूत्रात्
अत एव तदाश्रयस्य कर्त्तृत्वमत एव पाचयति देवदत्तो यज्ञदत्तेनेत्यादिप्रयोगाः गतिबुद्धीति सूत्रं च चरिता
र्थे एवं च निन्नविषयत्वाद्विकल्पोक्तिरसंगताः किं च सामान्यविहितस्य णिचो धातुविशेषाद्विहितेनात्म १०८

नेपदे न बाध एवोचितः एतच्च केषांचिदिष्यमानेन सङ्गच्छत इति हेलाराजः अथैतेषां आत्मनेपदयोर्विकल्पक्रमबी
जं दर्शयति - क्रीणाति वपते धत्ते चिनोति चिनुते चिच आम प्रयोगात् तद्रूपं तेषु परार्थो निधीयते आत्मानं क्रीणीष्वेति विनतां
कद्रूराह तस्य च दास्याद् आत्मनो मोचनाय पुत्रसंनिधानं कुर्वित्यर्थ इति तेषां तत्क्रमबीजं तत्र तत्र प्रत्युपकारं विना दास्यान्मु
क्त्यसंभवात् प्रत्युपकारस्य च स्वसाध्यत्वात् तदर्थसामर्थ्यात् पुत्रसंविधानं गम्यते न तु मतदर्थ इति मतेषां क्रमः एवं केऽ
त्र मस्कन्द वपते इत्यत्र वनकर्तुः संविधानं कुरुते इत्यर्थ इति तेषां क्रमबीजं तत्रापि स्वस्य सामर्थ्येन सामर्थ्यात् तदुच्यते इ
ति तेषां क्रमः सः एवमन्यत्राप्यूह्यमिति हेलाराजः अथ सिद्धान्ते शंकते यत्रोनौ स्वामिदासौ तु व्यारभ्येते समहत्क्रियां युग
पद्धर्मेनेदेन धातुना तत्र न वर्तते स्वामिसाध्यं संभारघटनरूपं संविधानं दाससाध्यं तु विक्लित्तिपर्यन्तं साधनविनियोग
रूपं तत्र भिन्नत्वाद्व्यापारस्य युगपदेकधातुवाच्यत्वासंभवेन किं संविधानापेक्षमात्मनेपदं किं वा संस्कारापेक्षं परस्मैपद
मिति संशयः अनेकार्थत्वाद्धातूनां युगपदर्थद्वयाभिधानेप्येकत्र प्रयोगे विरुद्धत्वाद्धात्वादेशद्वयानुपपत्तेः एवं संशय इति
हेलाराजः न च क्रियाया न विशेषणविवक्षितं तत्त्व क्रियया स्वामिनो भोजनस्य लाभेन दासस्य श्रमसाफल्यलाभेन पूर्वव
त्स्येव सिद्धेः किं चैवं रीत्या यजति यजमान इत्यस्याप्यापत्तिः न चेष्टापत्तिः तदा कर्तृगामिनोऽकर्तृगामिनश्च फलस्या
भावेन स्वरितञितश्च न यवंत इति नाप्यस्यासंगतेः अत्र स्वामिपदार्थसामर्थ्यात् उक्तं संविधानमवगतं दासपदार्थसा
मर्थ्याच्च न तत्क्रियायाः परार्थत्वमवगतमिति नात्रारब्धा तस्य व्यापार इति शेषत्वात्परस्मैपदमिति केचित् एवमपि पू

मं.नू.० वैपक्षस्यैवसिद्धिरित्यन्ये समाधत्ते संविधात्वश्वसांनिध्यादृष्टसेधर्मोनुबध्यते छत्रिणश्चापिसंबंधात् छत्रन्यायाग्नि
१०९ धेयता अन्तरार्थस्ययद्येस्यादिःद्वासधर्मस्यतुनत्वामित्यारोपः उत्तमेनिकृष्टधर्मारोपाभनीतेरित्यलंविस्तरेण अग्नी
न् आदधीतेत्यत्रयद्यप्याधानफलमाहवनीयत्वाद्यग्निनिष्ठंतथापियज्ञहोमादिमुख्यत्वानत्वपंकत्र मन्नमपि अस्तित
दादायात्मनेपदमन्आहवनीयत्वादेराधानसंस्कारातिरिक्तत्वेमानाभावेनतस्यचधात्वर्थतयातदतिरिक्तस्यैवअक
स्यतत्फलत्वौचित्यात् स्पष्टंचेदमेकःशब्दपरयोरितिसूत्रेभाष्येएतेनकर्तृगामित्वेनत्वंफलेकर्त्रर्थत्वमेवनतुकर्तृसमवे
तत्वमितिपार्थसारथ्युक्तमपास्तं अष्टवर्षंब्राह्मणमुपनयीततमध्यापयीतेति श्रुतिवाक्यं पंचपादिकाविवरणेधृतं तादृ
शंब्राह्मणमुपगन्तुमुपनयनेनसंस्कुर्यात्संस्कृतंचाध्यापयेदितितदर्थः नानाविधेतिकर्तव्यताकलापस्योपगमनविधेः
श्रवणादुपगन्तमित्यस्यलाभः छांदोग्यश्रुतौजाबालस्यप्रसिद्धमेवगुरूपगमनंतत्रोपनयनसंस्कारोनित्यः तदभावेव्रा
त्यतादोषश्रवणात् वाजसनेयिनामुपनयनंप्रकम्यस्वाध्यायोऽध्येतव्यइत्यध्ययनविधेरुपनीतस्यैवाध्ययनंतदपि
नित्यं अश्रोत्रिया अननुवाक्या अनग्नयः शूद्रसधर्माणइतितदभावेदोषश्रवणात् तत्रयदधीतमविज्ञातंनिगदेनैवशब्दा
द्यते अनग्नाविवशुष्कैधोनतज्ज्वलतिकर्हिचित् इतिनिंदार्थवादश्रवणेनसार्थकाध्ययनमेवनित्यंनिरर्थकाध्ययनं
तुनिषिद्धंनिंदार्थवादेननिषेधोन्नयनात् अधीतंग्रहतः अविज्ञातमर्थतः निगदेनपाठमात्रेण अनग्नाविवेत्यादिना
तस्ययज्ञाद्यनुपयोगित्वेननिष्प्रयोजनत्वमुच्यते अतएवभाष्येश्रुतोक्तं अनर्थकंमाधिगीष्महि इत्यध्येयंआकर १०९

णमितिनिरर्थकाध्ययनेपिकिंचित्फलसत्वेदोषाभावेचसार्थकं। अध्यगीष्महीत्येववदेत् स्थाणुरयंभारहारइतिनिरुक्ते
भारपदेनपापभारइत्यस्यचनिरूपितं श्रुतिरपिपतंजलस्तुन्नाह ब्राह्मणेननिष्कारणोधर्मःषडंगोवेदोध्येयोज्ञेयश्चेतिनि
ष्कारणःदृष्टकारणनिरपेक्षः अनेनविशिष्टस्यनिस्यतोस्यश्रमः मंत्रार्थज्ञोजपंजुह्वन्तथैवाध्ययनंद्विजः स्वर्गलोक।
मवाप्नोतिनरकंतुविपर्यये इति अत्रजपंजुह्वेतिमंत्रध्यकर्ममात्रोपलक्षणं किंचस्वाध्यायपदस्यवक्ष्यमाणयातेनप्रोक्तमि
तिसूत्रभाष्योक्तयारीत्यावेदपदस्येवशाब्दार्थाभिनयपरतयास्वाध्यायोध्येतव्यइत्यस्योनयाध्ययनविधायकत्वंदोषश्रवण
मपितद्विधिवोधिताध्ययनाभावेइतितन्नयोरविनिमत्वंवोध्यं निष्कारणोधर्मइतिवाक्येज्ञेयश्चेतितु अध्ययनमात्रेणसर्व
स्यज्ञानासंभवात् ज्ञानपर्यंतमध्ययनंकार्यमित्यर्थः अतएवसमानमीहमानानांसमानंचाधीयानानांचकेचिदर्थैर्यु
ज्यंतेपरेनेतिभाष्येउक्तमितिवोध्यंतत्रोपनयीनेस्यत्राचार्यकरणेद्योमेसंमाननोत्संजनाचार्यकरणज्ञानव्ययविगणन।
व्ययेषुनियइत्यनेनात्मनेपदंनतुस्वरितञितइत्यनेनउपनयनफलस्याध्ययनस्यकर्तृनिष्ठत्वाभावात् कर्तृनिष्ठफल
कक्रियायाअभावात्वर्थत्वाभावाच्च उपनयनफलंचाचार्याधीनोवेदमधीष्वेत्येतत्समहकृताध्ययनविधेःसंस्कृतस्याध्ययनमेव
अंतरंगत्वात् आपस्तंवोपिउपनयनंविद्यार्थस्यश्रुतितःसंस्कारइतिनगुरोरध्यायनंपचौलदादीनांलाभवत् वहिरंग
त्वाच्च किंचयत्किंचिदुपनयनेनैवतत्सिद्धावतिदरिद्राशक्तोपनेयांतरोपनयनेऽप्रवृत्त्यापत्तेः जातोपनयनस्यगुरोर्मतेगु
र्वंतरेणोपनयनंविनाप्यध्यापनदर्शनाच्च आचार्यलक्षणंचतद्द्वितीयंजन्मतद्यस्मात्सआचार्यइतिस्मृतावुक्तं।ग।

मं.जू.०

११० यनीयनुयः शिष्यं वेदमध्यापयेद्द्विजः सकल्पं सरहस्यं च तमाचार्यं प्रचक्षते इति स्मृतौ चोक्तं न चाचार्याधीनो वेदमधीष्वे
ति एतत्स्पृहकृत्ताध्ययनविधिनैवाध्ययनलाभे तद्विधिर्व्यर्थः किं च वृत्तित्वेनैवाध्यापने प्रवृत्तेरुपपत्तावयं विधिर्व्यर्थ एवेति वा
च्यं संस्कृतो दृष्टो नाध्ययनस्य नित्यतावबोधनार्थत्वात् अध्ययनस्यापि नित्यत्वादुपनेतरि मृते अन्यगत्युपसदनमप्युपपन्नं अ
ध्यापनस्य वृत्तिताश्रवणात् काम्यत्वमपीष्यत एतत् न चाध्यापनं विनाध्यापनासंभवेनाध्ययनविधिनैवाक्षेपादध्ययनला
भे तद्विधिर्व्यर्थ इति वाच्यम् अग्निहोत्रादीनामध्ययनं विनासंभवात् तद्विधीनामपि विधाक्षेपकत्वेन शूद्राणामपि तत्राधि
कारापत्तेः समर्थो नामस्य आक्षेपात् अध्ययनविधौ तु मति तदाक्षेपात् शाक्य एव प्रकृत्यानन्तद्बोधनेऽधीतवेदत्रैवर्णिकाना
मेवाधिकारो नान्यस्येति नियमसिद्धेः फलत्वात् अनुमितिसामग्र्यपेक्षया श्रौतसामग्र्या बलवत्त्वस्य न्यायनये लिंगाद्वेद
या श्रुतेर्बलवत्त्वस्य मीमांसकनये सत्त्वेन तत्राध्येपस्थितलिंगानुमितार्थानुवादकत्वस्य वेदेऽन्याय्यत्वात् यत्त्वध्यापनेनाध्य
यनाक्षेपे नित्यानित्यसंयोगविरोधः अध्यापनस्य काम्यत्वादध्ययनस्य नित्यत्वात् इति तत्तत्स्वदूषकतावीजानभिज्ञोक्तेः न्याय
नयेऽनित्यश्रुत्यनुमितकाश्यस्य नित्यत्ववत् अनित्याध्यापनानुमिताध्ययनस्याकरणे दोषश्रवणेन नित्यत्वेऽपि बाधका
भावात् उक्तरीत्याध्यापनस्यापि नित्यत्वाच्च एतेन वृत्त्यर्थेनयोपनयनाध्यापनयोः प्राप्त्या तद्विधिवैयर्थ्यात् अष्टवर्षो ब्राह्मण
उपगच्छेत् सोऽधीयीतेति चोक्तस्य अर्थस्य इत्यपास्तं न विधेः परः शब्दार्थ इति न्यायविरोधात् इति शब्दस्वादेरुपनयनाध्ययनापत्तेश्च प
तेन देवताया विग्रहवत्त्वे विग्रहस्यानित्यत्वेन नित्यवेदशब्दवाच्यत्वे नित्यानित्यसंयोगविरोध इति परास्तं घटाकाशयोः सं ११०

योगस्य नित्यानित्ययोर्जन्मजनकभावस्य च प्रसिद्धत्वाददृष्टकृताबीजाभावात् स्वर्गकामादेर्विग्रहवत्वेनानित्यतया स्वर्गकामा
दिपदवाच्यत्वानापत्तेश्च अनित्यस्य पश्वादेर्नित्ययागपशुनायजेतेति नित्यत्वस्याविधानापत्तेश्च प्रवाहनित्यतात्तु न यत्रापि समाजा
तिनित्यतापि समा इति विभावनीयं एतेनात्र संबंधे शास्त्रार्थो नित्यत्वाहानिरित्यपास्तं न च ज्योतिष्टोमे राजन्यवैश्यनिमित्तेन वि
हितफलचमस्यापेक्षाभिषवादिसंस्काराः स्युः मम तु न दोषाः अभिषवादिसंस्काराणां निमित्तसंयोगाभावात् नित्यवदाम्नाता
नां निमित्तसंयोगेन विहितफलचमसेनानित्येन संबंधायोगात् किंतु नित्यविहितसोमस्यैव संस्काराः राजन्यवैश्यकर्तृकेपि या
गे यजमानचमसादेव सोमस्य निवृत्तिरन्यत्र तु संस्थित एवेति मनित्य इति वाच्यं तावतापि बीजानिरुक्तेः किं च नित्यविध्युत्त
रं नैमित्तिकविधिप्रवृत्तिरिति स्पष्टं न्यायविदामेवं च यत्काले नित्यसोमविधानं तत्काले एव तद्विशेषणतयास्यार्थे विधाने
न कृतार्थाः संस्कारविधयो न नैमित्तिकेन संबध्यंते आवृत्तिप्रसंगात् तथा च सिद्धांतसूत्रं नैमित्तिकमतुल्यत्वादसमान
विधानं स्यादिति फलचमसविषयेऽभिषवसंस्कारा न भवंति यतो नैमित्तिकमतुल्यत्वान्नित्यधर्मसारूप्यात्त्वानित्यधर्म
सारूप्याभावान्नित्येन समानविधानं स्यात् अतस्तत्र न संस्कारा इति तदर्थः अतो नेदं नित्यानित्यसंयोगविरोधस्य मुख्य
मुदाहरणं स्पष्टं चेदं शास्त्रदीपिकायामिति दिक् सर्वावेदनाचयज्ञादिष्वनेरश्ववदिति सूत्रे शांकरभाष्ये तु नित्यसंयोग
विरोधादित्यस्यार्थ एवमुक्तः नित्यकाम्यत्वयोः कर्मणां एकेन संयोगेन विधिना विधाने विरोधः काम्यत्वेन तस्याना
रूपकत्वं नित्यत्वेन तस्यारूपकत्वं एकेन विधिना बोधयितुमशक्यः विरोधादिति तद्व्याख्यातारः संयोगभेदे तु न तयोर्वि

मं.नू०
१११

रोधः तुल्यबलत्वात्तद्द्वयेन पृथगेव विधिः संयोगभेदः यथा वैल्वो वा खादिरो वा पालाशो वेत्येको नियतत्वबोधको विधिः
तस्यैव क्रत्वर्थस्य खादिरस्य खादिरं वीर्यकामस्येत्यपरः काम्यत्वबोधको विधिरित्येकस्य खादिरस्योभयार्थत्वमितिना
यमालीतिः प्रकृतेः एकस्योभयरूपत्वाभावात् आक्षेपकविध्यपेक्षयाक्षेप्यविधेर्भिन्नत्वाद्युक्तं उक्तं जैमिनिना एकस्य
तूभयत्वे संयोगपृथक्त्वमिति एकस्य नित्यनैमित्तिकत्वे संयोगपृथक्त्वं विधिभेदो नियामकः यथा खादिरे बध्नाति स्वा
दिरं वीर्यकामस्येति तद्व्याख्यातारः लिङ्स्तु विध्यादयोर्थाः लोट् च आमंत्रणविधिनिमंत्रणामंत्रणाधीष्टसंप्रश्नप्रार्थनेषु लि
ङ् लोट् चेति सूत्रात् तत्र विधिः प्रेरणा यथा निकृष्टस्य भृत्यादेः प्रभुणा स्वाभिलषिते प्रेरणं इयमेवाज्ञा अप्रवृत्तप्रयोजकस्वा
तदभिलषिताज्ञातोपायप्रवर्त्तनोपदेशः यथा स्वर्गकामो यजेतेत्यादिर्यथा वानेन पथ्या पाहीत्यादिभवच्च सोपि विधिरेवेति
मंत्रिणं नियोगकरणमावश्यके श्राद्धे भोजनादौ स्वाभिलषिते प्रवर्त्तनं आमंत्रणं स्वाभिलषिते कामचारेण प्रवर्त्तस्वेति प्रवर्त्त
नं कामचारश्च प्रवर्त्तस्वेत्येवमेषैव कामचारानुज्ञा प्रवृत्तस्य प्रयोजकस्य निवृत्तिप्रतिबंधेन तद्धिते प्रवर्त्तिकोक्तिरनुज्ञा आर
ब्धं कुर्वित्येवंरूपा तथा कुरुष्व यथाहेतमिस्युक्तिरप्यनुज्ञैव एतत्सर्वोपि लक्षणमात्रं एणं अधीष्टः सत्कारपूर्वको व्यापा
रो यथा माणवकमध्यापयेति एषैवान्यथीना प्रार्थना नुस्वाभिलषितवस्तुदानादिप्रवर्त्तिकोक्तिः सर्वानुस्यूतं प्रवर्त्त
ना सामान्यं विध्यर्थः तदतिरिक्तांशस्य मानांतरलभ्यत्वात् सूत्रे संप्रार्थनानां च बहूनां ग्रहणं प्रपंचार्थं इत्यग्रे निरूपयि
ष्यामः प्रैषातिसर्गेति सूत्रेण प्रैषेपि लिङादयः प्रैषो ज्ञातविषयप्रवर्त्तना तत्र प्रवर्त्तना प्रवृत्तस्यानुकूलव्यापारः प्रवर्त्त १११

कनिष्ठेष्टलिङादिघटितन्नाश्चप्रयोगरूपः प्रवर्त्तकत्वं च स्यात् तं प्रेमतिलिङाद्युच्चारयितृत्वं राजप्रेरितपदार्थे लिङा
द्युच्चारयितृत्वेपि प्रवर्त्तकत्वस्य व्यवहारवारणाय स्यात् तं प्रेमतीति पदार्थप्रेरितोहं न कुर्वे किं तु राजप्रेरित इत्यव्यवहारा
नुपपत्तेश्च न प्रेरितेराज्ञापि स्यात् तं अत्र मत्स्येव वेदे प्रवर्त्तनालिङ्घटितत्वरूपं प्रवर्त्तकत्वं च व्याश्चनिष्टमेव वक्ष्यमाणस्वरू
पाप्तोक्त्या वक्तयाप्रतिबंधकाभावविशिष्टयास्वविषये इष्टसाधनत्वाद्याक्षेपः ततः प्रवृत्तिर्यद्यपि जीवनमुक्तस्य
तदं प्रति तत्त्वार्थेनयाप्ततोपदेशोप्रवृत्तौ नेष्टसाधनताज्ञानं प्रयोजकमिति व्यभिचारान्न तदाक्षेपकत्वसंभवः
स्तथापि सर्वेषामेव तन्मूलसर्वप्रवर्त्तितेष्टिहेतुमतिश्चेति सूत्रभाष्योक्त्या तदतिरिक्तप्रवृत्तौ तस्य योज्यत्वनियमेना
क्षेपः सुलभः आप्तोक्तये सुक्ते ः ना नु प्रयुक्तान विषं भुंक्ष्वेति वाक्यान्न तदाक्षेपो नापि प्रवृत्तिः विषं भुंक्ष्व मा च
स्य गृहे भुंक्था इत्याप्तोच्चारितानवारणाय प्रतिबंधकाभावविशिष्टयेति तत्रानिष्टसाधनत्वप्रयुक्तद्वेषस्य प्रति
बंधकस्य सत्त्वान्न दोषः तदुक्तं गोजने ऽसंतानिष्टसाधनत्वबोधने एवक्तुः स्यात्स्य यत् कुद्वेन सेर्ष्येण चोक्तान्न
दं भुंक्ष्व पायसं भुंक्ष्वेति वाक्याद्बोधो भवत्येव प्रवृत्तिस्तु न दोषविशिष्टोक्तत्वेन तस्याक्षेपकत्वाभावात् दोषर
हितस्यैवाप्तत्वात् आप्तत्वं च भ्रमादिदोषरहितत्वे सति तत्तत्क्रियाविषये स्वेष्टप्रतिबंधानिष्टेष्टस्तु भयानुकूल
यत्नाभाववत्त्वं अत एव वनेऽपहृतसर्वस्वानामपि दस्यूनां मार्गोपदेशे आप्तत्वं भवत्येव आप्तश्च वक्तेनाप्ताना
मनुगमः तदाक्षेपश्च कं चित्तामान्यतः वक्ष्य वितत्वया यासमाधेतु विशिष्टैव आक्षेपश्च पचेत्या दिस्तेष्टोपस्थि

मंजू० तत्राविपाकं पाकत्वेन पक्षीकृत्योक्तहेतुना बोध्यः आभिचारिकश्येनयागादिविषयेऽपदेशात् प्रथमोपदेशस्तु योगत
११२ स्तज्ज्ञानं न च योगिसत्त्वेन मानं श्रुतेर्मानत्वात् तदुक्तं हरिणा ज्ञानमस्मद्विशिष्टानां सर्वं सर्वेन्द्रियं विदुः अन्या
सान्मणिरूपादिविशेषे छिन्नविच्छिद्यामिति अस्मद्विशिष्टानां ईश्वरस्य योगसिद्धानां पतंजल्यादीनां च ईश्वरस
त्वेवन एवमनुमयः प्रमाणं तत्र तेषां ज्ञानं सर्वं सर्वेन्द्रियसाध्यं घ्राणतः शब्दं स्पृष्टवं तिरष्टतो रूपाणि पश्यन्तीत्या
दिश्रुतेः यस्मात्स्वपरीक्षकाणामभ्यासातिशयान्मणिरूपातिशयप्रकाशाम्लवत् योगाभ्यासवलात् यो
गिनामीश्वरस्य स्वत एवेति तेषां परम्परेति तदर्थः शब्दं विनापि स्वीयप्रवृत्तिसत्त्वेस्मन्न पाकशब्दाद्युपस्थिता
नाविपाके नन्वग्रहः यस्य जातस्य पवित्रव्यवहारविषयता सद्दृष्टसाधनमित्याद्याकारस्तद्ग्रहः एवं मूकादे
रपि जन्मान्तरानुभूतशब्दस्य स्मरणं कल्प्यं बालकस्यादृष्टस्तनपानप्रवृत्तेरिव तज्ज्ञाननिर्वाहाय तवाप्यस्यावश्यक
त्वात् अहरहः संध्यादिसमभिव्याहृतनित्यनैमित्तिकविध्योरव्यपानुष्ठेयत्वमपि प्रेरणया बोध्यते तेन तदभावे
प्रत्यवायसिद्धिः विश्वजिता यजेतेत्यादौ स्वर्गातिरिक्तस्य सर्वेष्टस्याभावात् प्रवर्तनया स्वर्गरूपेष्टसाधनत्वा
क्षेपः प्रेरणा च प्रवर्तकनिष्ठः प्रकृत्यनुकूलो व्यापारस्तत्र लिङादिसमभिव्याहारे व्यापाराः अन्तरस्यानुभवात्
लिङादयं तत्र शब्दरूप एवं इत्युक्तं तदुक्तिप्रेरणात्वं चाखण्डोपाधिः तेन रूपेण च तस्य लिङ्वाच्यता शब्दरूपत्वा
च्चमाज्ञादीनां च वेने सुच्यते शब्दनिष्ठेति व्यवहारोपि प्रेरणात्वेन तस्याः सद्वृत्तित्वेन लोके पुरुषनिष्ठत्वं च तात्तृज्ञा ११२

न्नाष्टप्रयोक्तृतयावच्छेदकत्वेनालिंगसंख्याद्यनन्वयित्वाद्व्यापारपदस्य वहाम्यीतिमाप्रेरणत्वेन तस्य विषयाचेतिवो
ध्यं यत्तु इष्टसाधनत्वमेव प्रवर्त्तना तज्ज्ञानस्य प्रवृत्तिहेतुत्वात् इत्थं च क्वचित्साक्षात् क्वचित्परंपरया तदेव प्रेरणया
हमध्यापयामि न किंचिन्ममेष्टमिति व्यवहारस्तु न साक्षात्किंचिदिष्टं इत्येवंपरः इच्छाविषयत्वोपलक्षितं तत्फल
साधनत्वेन ज्ञानं प्रवर्त्तकं तेनैव च रूपेण विधेः शक्तिः बलवदनिष्टाननुबंधित्वज्ञानं तु न प्रवर्त्तकं बहुतरदुःख
स्यापि कुतश्चिदल्पत्वेनाल्पस्यापि कुतश्चिद्बलवत्त्वेनानुगतबलवत्त्वस्य दुर्वचत्वात् मधुविषसंयुक्तान्नभोजना
दौ प्रवृत्तिस्तु न तत्तद्विषयकबलवद्द्वेषस्य स्वातंत्र्येण प्रतिबंधकत्वेनादोषात् युक्तं चैतत् सत्यपि बलवदनिष्ट
जनकत्वज्ञाने तत्र द्वेषाभावदशायां आस्तिककामुकस्य रागांधस्य परदारगमनादौ प्रवृत्तेः द्वेषे सत्यप्रवृत्तेश्च
क्वचित्तु तज्जन्यफले उत्कटेच्छाविरहे तज्जन्यदुःखे द्वेषे द्वेषविषयसाधनताज्ञानात् उपाये द्वेषे उपायेच्छाभावा
त् अप्रवृत्तिः क्वचित्फलद्वेष एव तथा अत्र तज्जन्यसुखे उत्कटेच्छोत्तेजिका तेन यत्र सुखापेक्षयानुत्कटानि दुःखा
नि पत्रवाक्रियाजन्यबहुसुखापेक्षया उत्कटदुःखाभत्यानि तत्रापि तज्जन्यसुखे उत्कटरागात्प्रवृत्तिः अत एवांत
रालिकमप्रमेव बलवद्द्वेषवान् ज्योतिष्टोमादौ न प्रवर्त्तते अन्यस्तु प्रवर्त्तते एव एतेन कृतिसाध्यताज्ञानं प्रवर्त्तकं कृ
तित्वं च निवृत्तिजीवनयोनियत्नव्यावृत्तोपलक्षणं व्याप्यो जातिविशेष इत्यास्तं कृत्यसाध्ये प्रवृत्त्यभावस्य तत्तदिच्छा
भावेन वृथाश्रमजनकतया द्वेषादुपपत्तेः चिकीर्षाया एव प्रवृत्तिं प्रति कारणत्वं तां प्रति च तत्कारणमिस्याद्दोषाश्च

मं.जू०
११२

यत्त्वज्ञातस्यापि यत्किंचित्कृतिसाध्ये प्रवृत्त्यापत्त्या मत्संज्ञाविशिष्टं प्रवर्तकं वाच्यं तस्य च विधितो मानसेन यागो मत्कृतिसा
ध्यो मत्कृतिसाध्यत्वविरोधिधर्मानधिकरणत्वादित्यनुमानेन तदूहो वाच्यः एवं चान्यलभ्यत्वात्तस्य न विधिवाच्यता उपा
ये च्छां प्रति फलेच्छायाः समवायसंबंधेन कारणतयातिप्रसंगो नो तदिष्टसाधनताज्ञानस्य मत्संज्ञा तन्निर्वेण कारणत्वे न फ।
लं नापि मानं फलेच्छोपायजिज्ञासोपायज्ञानानां इत्थमस्यैर्लयौगपद्यांगीकारात् फलेच्छायामुपायेच्छां प्रवर्तकत्वस्य
नदितिति रितितन्त्र सर्वत्रांजस्ये न फलेच्छोपायजिज्ञासादेर्यौगपद्योऽपयादनासंभवेन फलेच्छाया उपायेच्छां प्रत्यकारण
त्वात् किंच प्रतिपुरुषं विधेराहृत्यावोधकत्वेन तत्तत्पुरुषेष्टसाधनत्वस्य तत्तत्पुरुषकृतिसाध्यत्वस्य च बोधसंभवात् ना
नुमानानावश्यकता यजेतेति कर्त्रर्थे केन तत्तत्पुरुषं प्रति प्रवृत्तेन वाक्येन प्रत्यासत्त्या तत्र पुरुषस्वरूपकर्तुरेव बोधनात् साध
नत्वं चास्वं इष्टोपाधिः ज्योतिष्टोमेन स्वर्गकामो यजेतेत्यादौ देवतोद्देशेन द्रव्यत्यागरूपस्य यजेरर्थस्य फलस्य तदर्थेक्रा।
स्यादिरूपभावनां प्रति करणत्वं तस्यां चेष्टसाधनत्वान्वयः एवं च भावनानिष्ठस्येष्टकरणत्वस्य लिङोक्तावपि भाव
नानिरूपित तस्य भावनान्वयनिर्वर्तकत्वरूपस्य यागनिष्ठकरणत्वस्यानुक्तत्वान्न तत्समानाधिकरणे ज्योतिष्टोमा
दिपदे तृतीयानुपपत्तिः ज्योतिष्टोमादिनामधेयमपि त्यागस्यैव त्यागघटितदीर्घतलीयायुद्धवसानीयान्तकर्मकला
पे तथा व्यवहारस्तु गौणः तस्य स्वर्गकरणत्वव्यवहारोऽपि तथैवेति बोध्यं न कलंजं न त्वयेदित्यादाव निष्टसाधनत्वं
विध्यर्थः अत्रैव नञ्जूतात्पर्यग्राहक इति तत्र चिकीर्षया इष्टसाधनत्वस्यापि अन्यथासिद्धेः अमुकफलसाधन। ११२

मिदं कृतिसाध्यं भवत्विति तीच्छायाश्च चिकीर्षात्वात् एवं हि प्रवृत्तौ फलविषयतानियमस्याप्युपपत्तिः उपायेच्छायाश्चत
दन्यथासिद्धेश्च साक्षादनुकसाधनं पाको जायतामित्याकारैवेच्छायाः स्वजनकज्ञानप्रकारप्रकारकत्वनियमात् नचद्वा
रेण द्वेषिणो नान्यथासिद्धिः यस्य द्वेषिणो भावान्तरेण तत्कारणतामिच्छाय यागपरस्योत्तदन्यथानुपपत्त्याचद्वारस्या
पूर्वादेः कल्पनं तद्विषये तदभावेपि अन्यत्र तदभावे भानाभावात् येषामपि चिकीर्षाव्यापारे स्वव्यापारे कृतेरपि निवेशा
त्कृतीच्छापि सा तेषामपि व्यापारविषये इष्टसाधनत्वकृतिसाध्यत्वज्ञानोत्तरमेव समेतिते अन्यथासिद्धे एव किंचेदं तेइष्ट
साधनं कृतिसाध्यं चनापचत्विः एवं तस्मात्त्वं कुर्विति स्वारसिकलोकव्यवहारसत्त्वे न तस्य विध्यर्थता वकुमत्राकाद्यपौरु
षापत्तेः नवेदे पौरुषत्वं सर्वं चेष्टसाधनत्वबोधनाय तस्मादिसस्यानन्यथापत्तिः अपि च राज्ञा प्रवर्त्तितोहमित्या
दिव्यवहारात्प्रवर्त्तना प्रवर्त्तकपुरुषनिष्ठा सा लिङ् आज्ञ्येति सूत्रभाष्यादिसंमतं नचेष्टसाधनत्वं तद्बोधो वा तन्निष्ठः
तज्ज्ञापनस्य तन्निष्ठत्वेपि न तदिष्टसाधनत्वं नापि तत्स्वरूपत्वेन तदसंमतं न ज्ञानानुकूलव्यापारस्य मङ्क्षातिरि
क्तस्याभावाच्च किंचेष्टसाधनताज्ञानादिव साध्येष्टकत्वज्ञानादपि प्रवृत्त्यनुभवेन विनिगमनाविरहेणोभयोः प्र
वृत्तित्वे गौरवं साधनत्वमिष्टयोगक्षेमसाधारणं साध्यत्वमप्यखंडमिति न तस्यापि कारणतावच्छेदकगौरवं ए
वं च कृतिसाध्यत्वज्ञानादिव मत्कृतसाधनकः पाक इति ज्ञानादपि चिकीर्षाप्रवृत्त्योर्दर्शनात् न च स्तावपि विनिग
मनाविरह इति दिक् नकलंजं भक्षयेदित्यादौ आरोपितं कलंजभक्षणं प्रेरणाविषय इति वाच्यार्थस्तदभावः प्रेरणा।

विषयइति त्वार्थः ननु शाब्दः नञ्वादोक्तरीत्या नञर्थैवान्यस्याविभक्त्यर्थान्वयाभावात् तेन च प्रतियोगितिनिष्टनि
ष्टसाधनत्वं बोध्यते यदभावत्वेन पदभावः प्रेरणाविषयतया बोध्यते तत्प्रतियोगी क्रूसे श्याधिकानिष्टसाधनमिति
ख्यातेः तदुक्तं प्रायश्चित्तविधयश्च तत्र तथा कल्पनेनास्य तात्पर्यग्राहकाः ननु समन्वयादिति तत्रैशां करनाष्के विन
ब्राह्मणं हन्यादित्यादौ हननावतो हंसर्थानुरागी नञ् एषण वचनञः हननाबोधयत्वसंबंधिनोभावबोधनं निषेध्याभा
वबुद्धिश्च निषेधविषयौदासीन्यकरणमिति औदासीन्यं निवृत्तिः शास्त्रग्रहणादिरूपा या तदुक्तं नोद्यमक्रिया
तस्मादुपरंतव्यमिति बुध्या या शास्त्रस्थापनादिक्रिया तदुपलक्षितचेष्टावत्त्वस्याभावसमानाधिकरणः क्रियावि
शेषो निवर्त्तते इत्यादिपदवाच्या निवृत्तिः सचेष्टस्याभाव एव निवृत्तिरस्य विनिगमनाविरहात् तस्मादित्थंप
दार्थद्वयं परस्पराभावसमानाधिकरणमिति प्रामाणिकाः अन्ये न हि धात्वर्थाभावे लिङर्थप्रेरणाविषयत्वे
तिलभ्यते अप्रवृत्त्यभावप्रविरोधइति तत्रैवाब्धे न सुरां पिवेदिति वाक्येन न्वतिपदत्रयसंबंधात्सुरापानप्रतिषेध
एवगम्यते ननु विध्यर्थप्रतिषेधः इत्युक्तयन्नुमिश्रैर्निषेध्येऽनिष्टसाधनत्वाबुद्धिरेव निषेध्याभावबुद्धिरितिव्या
ख्यातं तत्र अप्रदेशात्वात्स्यात् ममतु निषेध्याभावस्य प्रेरणाविषयत्वेन बुद्धिर्निषेध्यविषयौदासीन्यकार
णमिति तदर्थः किंचानिष्टसाधनत्वमित्यस्य यदीष्टसाधनत्वाभाव इत्यर्थस्तदाकलंजभक्षणादौ बाधः
यद्यनिष्टजनकत्वमर्थस्तदा नञोविध्यर्थानुरागेण विध्यर्थैकदेशानुरागेण वा हंत्यर्थानुरागी नञिति ना

ध्यासंभवति : एतेन नञ्समभिव्याहारे प्रत्ययार्थाभावरूपेष्टसाधनत्वं विध्यर्थः तदन्ताबो नञा बोध्यते ज्वरितो भक्षि
जीतेत्यादौ तु : स्वबृध्यभावरूपेष्टसाधनत्वं विध्यर्थः एवं च निषेधप्रकरणेष्वीत्यस्यवायउः स्वकृतीऽस्यपास्तं यो।
ब्राह्मणायावगुरेत्तं शतेन यातयादित्यादौ हेतुहेतुमतोर्लिङ्प्रयुक्तकर्तृको ब्राह्मणवधोद्यमस्तत्कर्मिका ताडना वधो
द्यमजन्यायमनूत्तकर्तृकाज्ञा नया तनेति बोधे न साध्यसाधनत्वग्रहे प्रवर्त्तकत्वेन निवर्त्तकत्वेनैव वा वेदस्य प्रमाण
त्वात्तेन वधोद्यमनिवृत्तिपरत्वग्रहे तस्मान्नावगुरितव्यमिति विधिः कल्प्यते अत एव भगवान्पाणिनिर्विधिनिमंत्रणे
तिसूत्रे विधिपदार्थं तद्विशेषनिमंत्रणादिभिर्विवृतवान् निमंत्रणमावश्यकश्राद्धादिभोजनानुकूलो व्यापारः प्रयोजक
निष्ठो निमंत्र्यंते इत्यादितस्तस्य प्रतीतेः न चेष्टसाधनत्वं तद्विशिष्टमित्युक्तं युक्तं च हरिणा अस्ति प्रवर्त्तनारूपमनुस्यू
तं चतुर्ष्वपि तत्त्वैव लिङ् विधातव्यः किं भेदस्य विवक्षया न्यायस्तु स्यात् नार्थो वा प्रपंचार्थमन्यापि वा विध्यादीनामुपा
दानं चतुर्णामादितः कृतमिति न्याये सम्प्रागुरुन्यायेस्यर्थः नन्वस्य लोकव्युत्पत्त्यैव सिद्धिरतः प्रपंचार्थमिति
चतुर्णामित्युपलक्षणं प्रार्थनस्यापि अत एव हेतुमति चेति सूत्रे भाष्ये स्तु तु भवानिस्य त्रणिं कस्मान्न भवतीति लि
ङादिशब्दप्रयोगरूपस्य कर्त्तृप्रयोजकव्यापारस्य सत्त्वादिति प्रश्नः उत्तरमकर्तृकत्वादिति सक्रियप्रेरणायां लि
ङ् निष्क्रियप्रेरणायां लोडादिः तत्र प्रयोजक इत्यत्र कर्तृपदेन व्यापाराविष्टः कर्त्ता गृह्यते इति भावः अन्यापि कथंचित्कर्त्ता
स्यादेवमपि न दोषो लोटो कृत्वा स्वेषणस्यापि जन्मविषयतीति इष्टसाधनस्यापि जत्थेत्वाभावेन तस्य विध्यर्थत्वे।

मं.ज्ञ० तदसंगतिः स्पष्टैवः यत्तु कैश्चिदुक्तं प्रेरणा प्रयोज्यस्तस्य प्रेरकः प्रयोजको भवतीति तद्व्यापारे लिङ्स्तस्य सह लोटः पर्याय
११५ प्रसंगादिति प्रत्याश्रयवक्तः सविंसः पर्यायस्य लोटोक्तत्वादिस्मनेन दारणासंभवात् तन्नाविपर्ययः प्राप्नोति लोट्प्र
योगरूपे प्रेरणायास्तत्प्रयोगेऽभावात् विधिनिमंत्रणेति सूत्रे भाष्ये विधिः प्रेरणमित्युक्तं वात्स्यायनोपि विधिर्विधिर्नियो
गइत्याह नियोगे नियोजनं नियोजयतीत्यादिप्रतिपाद्यं प्रवर्त्तकनिष्ठव्यापाररूपमेव प्रेरणात्वं प्रेयो द्विधा त्वर्थ
तावच्छेदकतया सिद्धमेव तस्य च लिङादिवृत्तित्वमात्रं कल्प्यते इति न मे किंचित्कल्प्यं एवं चेष्टसाधनत्वबोधे तस्या
साधुत्वं स्पष्टमेव एतेन वक्तुः कर्तव्यत्वेनेच्छैव लिङर्थः तथा चेष्टसाधनत्वाद्यनुमानं तद्यथा स्वर्गकामस्य यागइ
ष्टसाधनं कर्तव्यत्वेनाप्तोक्तलिङ्बोध्येच्छाविषयत्वात् यथा मन्मित्रेष्यमाणं मम भोजनं विषभक्षणादेरविकस्य
चित्कृतिसाध्यतया तत्कर्तव्यत्वेनेश्वररूपाप्तेच्छाविषयत्वेन तदनुमापकत्ववारणाय लिङ्बोध्येति वेदेऽप्याप्तस्तु
ईश्वर एव विधिरेव तावत्कर्तव्यचकुमार्याः श्रुतेः पुंयोगे माननमिति आचार्योक्तमप्याप्तं वक्त्रिच्छायाः अविइष्टसाधनत्व
वदनुमेयत्वाच्च कः प्रयोज्यस्य प्रेरणया यो यदभिप्रायेष्वासज्जते इति हेतुमति चेति सूत्रस्य भाष्ये लेच्छायाः प्रेरणा।
नुमेयत्वस्यैव लाभात् किंच पचेत्यादिप्रयोगाभावे तदिच्छां प्रकारांतरेणानुमाय पाककरणेतरं कस्य प्रेरणया पा
कः कृत इति प्रश्ने नाहं मनेन प्रेरितः किंतु एतदिच्छां ज्ञात्वा मयेदं कृतमिति व्यवहारात् प्रेरयितुरपि न मयायं
प्रेरितः किंतु स्वचातुर्येणैव मदिच्छां ज्ञात्वा कृतवानिति व्यवहाराच्चेच्छाजनकस्य प्रयोगादेरेव प्रवर्त्तनात्वं लभ्यते ११५

नत्विच्छायाः किंच वेदे अधिकारी इदं कुर्यादिति ईश्वरेच्छायामंगीकारे तदिच्छायाविसंवादित्वापत्तेः नचेश्वरेच्छायाविसं
वादिनीत्वं त्वदीयानामपि संमतं अधिकारिणापि ज्योतिष्टोमादेः कदाचिदकरणात् किंच वेदस्य सकर्तृकत्वे ईश्वरज्ञानप्रा
माण्यापेक्षयावेदप्रामाण्यापत्तौ स्वतः प्रामाण्यं तस्य न स्यात् बुद्धवाक्येपिप्रामाण्यापत्तेश्च ईश्वरवचनत्वसाम्ये बुद्धवाक्यं न
प्रमाणं वेदवाक्यं प्रमाणमिति विनिगमनाविरहात् अश्वामेधाश्वमेधादिवदीश्वरकर्तृकत्वं तु वेदस्य न विवादविषयः
वौद्धायागमस्तु नैवं बुद्धिपूर्वकयत्नेनैव बुद्धादिनिमित्तकरणादिति तच्छास्त्रेषु कूर्मादिपुराणेषु च प्रसिद्धमत एव यस्य ग्रायां मा
ध्येमोत्रामण्यां सुराग्रहनिंदाबोधकस्य यसाधनत्वस्यैवानुमानात् ध्वनितं चेदं त्वरितजितइतिसूत्रे भाष्ये नत्र हि नचांतरेण
यजिंयजिफलं लमंतरस्तुक्तं नहि स्वर्गादिफलं यागमंतरेण नवतीति कैयटः एतेन यत्केश्चिदुक्तं सर्वेषां स्वर्गसाधनत्वमे
वगम्यते न च ज्योतिष्टोमाग्निहोत्रयोः फलसाम्यापत्तौ अल्पवित्तव्ययायाससाध्याग्निहोत्रेणैव सिद्धौ अमाधिक्ये न हो
धात् ज्योतिष्टोमादावप्रवृत्तौ तद्विधीनामननुष्ठानलक्षणाप्रामाण्यापत्तिरिति वाच्यं तत्फलस्वर्गाणां न्यूनत्वाल्पत्वका
ल्पनया प्रवृत्तिसंभवात् युक्तं चैतत् नहि वैजात्यमात्रज्ञानात् प्रवृत्तिः संभवत्यपि क्षीरपाने मंडपाने प्रवृत्त्यापत्तेः तत्रा
पिफलवैजात्यज्ञानात् न्यूनत्वमनेकधा फलवाऽल्पं फलेऽत्कृष्टत्वं वऽल्पवपुरुषगामित्वं शीघ्रताचेत्यादि अन्यथा
सर्वेभ्यः कामेभ्यो दर्शपूर्णमासौ इत्युक्तेः समारब्धदर्शपूर्णमासानां काम्येष्टिप्रवृत्तिविलोपस्स्यादिवार इत्यपालो
किकप्रतिष्ठारूपफलेछायस्य तत्प्रवृत्तिसंभवः अत एव सकलशास्त्रविदां युधिष्ठिरादीनां स्वल्पफलकराज्यार्थे

गोत्रजाब्राह्मणादिस्वस्वधर्मप्रवृत्तिः दर्शितं चार्जुनं प्रति तदेव फलं भगवता अकीर्तिं चापि भूतानि कथयिष्यंति तेऽव्ययामि।
स्यादिना अत एवाधुनिकानां कर्मसांगत्वं जानतामनधिकारिणामपि वर्णविभागव्यवस्थायामसाध्येषु यावद्वर्णविभागो
स्तिष्ठावद्वेदः प्रवर्त्तते संध्यामंचाग्निहोत्रं च तावत्कुर्यात्कलौ युगे इति देवलवाक्यस्य संकरेभ्यो वर्णानां पृथक्करणेन रू
पो वर्णविभागो यावत्तावद्वेदस्य नियमाध्ययनरूपा प्रकर्षेण वृत्तिस्तावत्तन्न तदद्वयमनुष्ठेयमित्यर्थः कस्य काल
बोधकैः चत्वार्यष्टसहस्राणि चत्वार्यष्टशतानि च कलेर्यदा गमिष्यंति तदा त्रेतापरिग्रहः सन्न्यासश्च न कर्तव्यो ब्राह्मणे
न विजानता स्यादित्यादिवाक्यादिभिः कलिवर्ज्यत्वविधिः अग्निहोत्रयागादिः शुद्धमलाभफलकप्रतिष्ठार्थं प्रवृत्तिः प्रतिष्ठाद्यु
पाधिवशाज्जायमानोत्कटेच्छैव प्रवृत्तौ प्रयोजकेति न दोषः अत एव गीतायां अभिसंधाय तु फलं दंभार्थमपि चैव यत्
त इज्यते नरतश्रेष्ठ तं यज्ञं विद्धि राजसमित्यनेन दंभस्यापि यज्ञफलतोक्ता दंभो धार्मिकत्वेन ख्यापनं अपि चेति प
दाभ्यां विकल्पेन समुच्चये न च फलत्रयमुक्तं इति तद्व्याख्यातारः यद्यप्येवं निषिद्धत्वात् संप्रति अधर्म एव तथापि
तत्त्वमजानतां लोकानां धर्मत्वभ्रमाद्दंभार्था तत्र प्रवृत्तिः विधिहीनमसृष्टान्नं मंत्रहीनमदक्षिणं श्रद्धाविरहितं
यज्ञं तामसं परिचक्षते इति च किंच समानफलानामविकर्मणां शाक्ताशास्त्रभेदेन व्यवस्था सहस्रशाखि अश्व
तं ज्ञात्वा शक्तिर्द्वेष्टापि च दद्यादपश्चय ज्ञात्वा सर्वे तुल्यफलाः स्मृता इति भारतोक्तेः अत एव विद्वज्ञादौ न कार्ये
न इति तत्तद्भूतप्रकरणे यद्यात्ते इति तत्परास्तं उक्तन्यायविरोधात् तत्तद्देशस्यापि तत्तद्भूयस्त्वसमनियत।

त्वान्न दोषः ननु भीष्मकएवादीनां वाक्योक्तयोर्वैयाघ्रपद्यगोत्राय सांकृत्यप्रवराय च गंगापुत्राय भीष्माय आजन्मब्र
ह्मचारिणे अपुत्राय ददाम्येतदुदकं भीष्मवर्मणे इत्यादितर्पणमंत्रवसूनामवताराय शंतनोरात्मजाय च अर्घ्यं ददामि भी
ष्माय आबाल्यब्रह्मचारिणे इत्यर्घ्यदानमंत्रयोर्निमित्तब्रह्मचर्यश्रवणात् पत्नीकत्वया ऽपत्नीकस्य च पत्नीवदस्याग्निहोत्रं न
वतीत्यादिवचनैरग्निसाध्येकर्मण्यनधिकारात् कथं तदनुष्ठानं अयं पितरमाज्ञाय कामार्त्तं तं तनुं पुरा ऊर्ध्वरेतसमात्मा ।
नं चकारेति वचनाच्च नाप्यनूर्ध्वरेतस्त्वमप्यूर्ध्वरेतसं चकारेति तदर्थः आबाल्यब्रह्मचारिणे इत्याद्येकवाक्यत्वात्
त्वां हि राज्ये स्थितं स्फीते समग्रांगमरोगिणं स्त्रीसहस्रैः परिवृतं पश्यामीहोर्ध्वरेतसमिति शांतिपर्वोक्तेश्च दारा इत्यादिनि
रपुत्रपत्नीत्वादीनां हस्य पत्नीपर्यायत्वाभावात् अनेकसहस्रविवाहाभावाच्च अद्यप्रभृति मे दाश ब्रह्मचर्यं भविष्य
तीत्यादाशागे कृतप्रतिज्ञायाः पुनर्ब्रह्मचर्यं न विष्यतीत्यर्थः किंच ऊर्ध्वब्रह्मचर्याभावे ऽमोघवीर्यत्वेन कथं तस्यापुत्रा
भावः स्यात् किंचानेकसहस्रपत्नीसत्त्वे ऋतुस्नातां तु यो भार्यामित्यादिदोषश्रवणात् तत्प्रतिज्ञाया अस्य नोच्छित्तिः स्यात्
दाक्षिण्याद्वा कथं तत्पर्यनुयुंजीत पश्यामीहेति पाठे ऊर्ध्वरेतसं त्रिविधमिव पश्यामीत्यर्थः एते नैतदूबलात् तस्य पत्नीकत्व
निमित्तपाठः कृतेत्रेतायां तत्र वा भीष्मान्तपश्यामूर्ध्वरेतसमित्युत्तरार्द्धपाठः क्वचिदूर्ध्वरेतस्त्वं चाष्टविधमैथुनेच्छारहितत्वं
न च नित्यस्य ऋतुकालिकस्यापगमस्य नैमित्तिकेन पित्रर्थमंगीकृतेन ब्रह्मचर्येण बाधः षोडशानामेव सन्निहितं अनेन
नित्येन तत्र नैमित्तिकसंकल्पनिषेधबाधस्य दर्शनात् अतएव कृतो श्राद्धदिनेपि भार्यागमनेन ब्रह्मचर्यहानिरिति

मं.ज.० मिताक्षरा तस्याग्निहोत्रादिमत्त्वे मानं तु तन्मरणकाले महता राजयोगेन परिवारेण संवृतः स्तूयमानो महातेजा भीष्मा-
११७ स्याग्निननुव्रजन् प्राप्तोस्मि समये राजन्नग्नीनादाय ते विभो इत्यादिना भारते युधिष्ठिरवाक्यश्रवणं यएष रोषात्तु प्रत
पन्नलस्योयोनः सेनांसिहं द्वारस्स एव भीष्मः कुरुवंशके तुर्येनाहृता त्रिदशा वाजिमेधाऽस्यादि च त्रिशतं वाजि
मेधा इति कश्चित्पाठः नोस्मत्तः सेनां स्वीयसेनामित्यर्थः क एवस्य तु महाकविना कालिदासेन रघुकुं तलोपाख्याने भा
रतोक्तमूर्ध्वरेतस्त्वं प्रथमां के स्वयमुक्ता चतुर्थे तस्यैवैतानिकाग्निवर्णनं कृतं एवमाधुनिकानामप्यनधिकारिणां ता-
त्कर्मणि प्रवृत्तिरिति चेन्न वद्धच ब्राह्मणे अपत्नीकोप्यग्निहोत्रमाहरेन्नाहरेदिति विचारमुपक्रम्य आहरेदित्याह
यदि नाहरेदनद्धा पुरुषः स्यात्को नद्धा पुरुषः न देवान्न पितॄन्न मनुष्यानिति तस्मादपत्नीकोप्यग्निहोत्रमाह
रेत् तस्मात्सौमंथाजयेदित्युक्तेरपत्नीकस्यापि अग्निसाध्ये कर्मणि अधिकारात् अद्धेति सत्यनाम तद्विपरीतोनद्धे
त्यर्थः न देवानिति इज्ययेति शेषः मनुष्यानतिथीन् अत्र अपत्नीकोपी त्यपिना तस्या विद्यमानत्वे तां विना पत्न्या
द्यभावं सूचयति नचेयं श्रुतिर्मृतपत्नीकपरा सामान्यप्रवृत्तश्रुतेः संकोचे नमाख्यानस्यायुक्तत्वात् अतएव
यायजमानस्य पत्नी सा निर्दुस्ता वहं तियो वा कश्चिदविद्यमानायामित्यापस्तंबसूत्रव्याख्याने रुद्रदत्तविधार-
ण्यास्यामुक्तं अवहं तीत्यनुकृष्य ते अविद्यमानायामनालंभुकत्वादिना निमित्तेनासंनिहितायाम भावे च तस्या
इत्यर्थः अविशेषात् वसंति च पत्न्यभावे ते अग्न्यादि लुप्यते इति किंचास्याग्निहोत्रमिति यजमानस्यैव स्वामि- ११७

त्वख्यापनेन व्रीहियवपश्वाज्यकपालपत्नीसंबंधानीतिप्रसिद्धांगसमग्निमाहारेण चतस्यांअंगत्वेनतद्भावेपि
तन्न् किंच विद्यमानायास्तस्याः सहाधिकारेपि न यजमानसाम्यं यदुक्तं आज्ञीब्राह्मचर्यं तत्तपत्न्या अतुल्यत्वादि
तिमीमांसकोक्तेः किंच वसंते ब्राह्मणोग्निमादधीत दर्शपूर्णमासाभ्यां स्वर्गकामो यजेतेत्यादिकर्मचोदना अपि अज
मानमेवाधिकुर्वंति न पत्नीवत्कृच आह्मलेप्युक्तं तस्मादपत्नीकोपि अग्निमाहरेदिति किंच आचारोप्यत्र दृष्टः शिष्ट
तमानां शूद्रैर्षां यथा कएवविनांडकनीष्प्रादीनां यथा च भगवतो दाशरथेरिति अत्रांसोऽसंनिहितपत्नीकः आ
धानस्तद्भाववंत अत्रैवं वस्तावविद्यारण्येन श्रुतेः संकोचेन व्याख्यानं स्वानभिमतामिति दर्शितं अनेनाचारेण संको-
चेन व्याख्यानस्यैवला नात् पत्नीवदस्याग्निहोत्रं भवतीति सूत्रे च रुद्रदत्तेनैवमुक्तं अग्निहोत्रं पत्नीवत्संनिहितपत्नीकं स्व
आयतने पत्न्युपविशतीसु तरसूत्रेण सिद्धे पत्नीवद्वचनं तस्याविद्यमानत्वे आदरार्थं अस्येतिवचनाद्यजमानस्यैवकर्मा-
णित्वाम्यं न पत्न्याः इति ख्यापितं भवति तथा दर्शितं ब्राकृ इति एतेन यप्रमांडारेण श्रुतिः निर्मितपत्नीकविषयाअत्र तस्मस्येति
वचनं तु प्रवृत्तमत्राणां कस्यचिन्मरणे तन्नोदिष्टं तस्याने दीर्तधित्वात्तेन सहस्वसमापनमुक्तमेव चकुंडपायिनामयनेमास
मग्निहोत्रानुष्टाने नोदिष्टपत्न्यामसहप्रयोगः प्राप्तस्तथामानून तमस्तपत्न्यैवसह कर्तव्यमित्यर्थमित्युक्तं तदपास्तं विनावाधं प्र
करणांतरेभिवेशस्यायुक्तत्वात् किंचैतद्व्याख्यानेऽस्य प्रस्य पत्नीविशेषणत्वे पत्नीवदितिवृत्तिरयुक्ता स्यात् सविशेषणानां
नां वृत्तिर्नेत्युक्तेः मतस्यात्रानुपस्थितेश्च अतएवकाव्यदोषेषु प्रकाशादावुक्तशास्त्रविरुद्धत्वरूपदोषउष्टकथनेन सकुं

मं.जू.० ११८ तैलानाटकरूपकाव्यमात्रदुष्टत्वं न न चैवमपि मनीषिणां वेदाध्ययनोत्तरं कृतसमावर्त्तनानामपि केनचिन्निमित्तेनाग्नि-
ख्यपावाऽकृतदारपरिग्रहाणामनाश्रमित्वदोषापत्तिः अग्निहोत्रानुष्ठानातिथिशुश्रूषादिना तस्य गृहस्थाश्रमसिद्धेः अग्नि
होत्रविधुरत्वं तु अग्निहोत्रैर्विदुरादिनार्देवर्णमुक्तिस्तेषां पितृऋणापाकरणं भीष्मस्य पितृभक्त्यान्येषां स्तकादिभिस्तपोबले
न मानसपुत्रैर्वा सिद्धं अत एव कण्वादिभ्यो गोत्रे इति गर्गादिषु कण्व पाठश्च संगच्छते यद्यपि त्रिभिर्ऋणवान्जायते ब्रह्मच
र्येण ऋषिभ्यो यज्ञेन देवेभ्यः प्रजया पितृभ्यः एष वा अनृणो यः पुत्री यज्वा ब्रह्मचारी चेति श्रूयते तथापि नैष्ठिकब्रह्मचर्येण
ग्निकार्यादिना च सिद्धेः स्मृतिषूक्तत्वात् एतेनात्र वाजिमेधाद्यस्येतत्तत्समफलकदानादिपरं पत्न्यभावेन मुख्ययज्ञासंभा
वात् अग्नीनादायेत्यपि संस्कारकाग्निपरं इति स्यैकैश्चिदुक्तं एतदेव तस्य पत्नीकस्य कर्मिसत्त्वैरुक्तं तस्यराम्नं अग्नीनिति पत ०
वक्ष्य वचनासंगतेश्च इदानींतनानां तु न तथानुष्ठानं तथाचाराभावात् ऊर्ध्वरेतस्त्वादिषु एवं तामेव तथानुष्ठानेऽपि त्विस्येनेदा प्रागुक्तो ०
नींतनानां प्रायसस्त्वासंभवाच्चेत्यलं नित्यनैमित्तिकयोरपि प्रत्यवायपरिहारः फलं वेदसहस्रैरपि बोधितेति निष्फलत्वाज्ञा-
नदशायामप्रवृत्तेः उक्तरीत्या विविधित्वे न प्राप्त प्रत्यवायस्य तत्करणे परिहारावश्यंभावात् न चाफलाकांक्षिणो यज्ञो वि
धिदृष्टोपद्यते समात्विक इति गीतावच न विरोधः यज्ञादीनुपक्रम्य यज्ञो दानं तपश्चैव पावनानि मनीषिणां एतान्यपि तु क
र्माणि संगं त्यक्त्वा फलानि च कर्तव्यानीति मे पार्थ निश्चितं मतमुत्तमं इति अष्टादशे गीतायामेव पावनत्वोक्तेः संगस्तत्कर्तृ
त्वाभिमानस्तस्माद् उद्दिष्टोऽपि प्रत्यवायपरिहारः फलमिति स्वर्गादिफलं सत्त्वापि क्रियमाणस्य पावनत्वमिति तदाशयः ११८

नित्येष्वपि जीवित्वमेवाधिकारः नित्यत्वं च प्रत्यवायहेत्वभावप्रतियोगित्वं अहरहरित्यादिवीप्सायावज्जीवसदापदादिकं
च तत्त्वेनास्यार्थग्राहकं चैवं नित्यसंध्यावंदनविषयश्रुतिः माभाभ्यासान्नाववतत्तत्संध्याकालस्य पापहेतुत्वान्नकृतसंध्यावंद
नस्य कृतौ नष्टायां पापोत्पत्तिः संध्यामुपासते ये तु सततं संशितव्रताः विधूतपापास्ते यांति ब्रह्मलोकमनामयमिति कैश्चि।
न्नित्ये फलश्रवणमप्यस्ति नन्वयमर्थवादस्तावको न तु फलबोधकः प्रशस्तत्वरूपास्तुतिश्च प्ररोचनाद्वारा पुरुषप्रवृत्त
र्थेति चेन्न सर्वेभ्यः कामेभ्यो दर्शपूर्णमासावित्यादेरपि तत्त्वापत्तेः चतुर्थीनिर्देशविरुद्धोऽस्यार्थवादस्य चतुर्थीवन्नार्थसा
धिकारदर्शपूर्णमासाभ्यां स्वर्गकामो यजेतेत्यादितः फलाकांक्षानिवृत्तेश्च तत्तत्फलजनकत्वरूपं च प्राशस्त्यं धर्म्मेतररूपं प्राश
स्त्यं तु न प्रवृत्त्युपयोगि विधितः इष्टावगमेपि तस्यावांतररूपेण बोधनद्वारा क्वचिच्छीघ्रोत्पत्तिज्ञापनद्वारा त्वरितप्रवृत्तये।
र्थवादाः इतीदृशार्थवादानां फलबोधकत्वमपीति बोध्यं अत एव सर्वशास्त्राधिकरणे काम्यं यथा फलायोपदिष्टं तथा नि
त्यमपीति नव्यैरुक्तं कर्मविपाकप्रायश्चित्तप्रवर्त्तनयाऽस्वानुसाररूपेष्टसाधनतानुमानं अन्यत्र पापध्वंससाधनता
नुमानं अनुमानपक्षश्च धात्वर्थे करणीभूतो यागस्तत्करणको व्यापारो वा यत्तु तद्विषयकृतिपक्षकं तदिति तन्न क्रियेष्ट
साधनताज्ञानादपि प्रवृत्तिदर्शनात् पाकादेरिष्टसाधनताज्ञानं विना तत्कृताविष्टसाधनत्वस्य ज्ञातुमशक्यत्वाच्चेतस्य
च विस्तरः तत्र लिङ्रूपा शाब्दी भावना अंशत्रयापेक्षा करणेतिकर्तव्यताभिः तत्र तस्याः सविषयत्वेन विषयाकांक्षायां स
मानपदोपात्तत्वप्रत्यासत्त्यांशत्रयविशिष्टार्थी भावना प्रवृत्तिरूपा विषयः इयमेव भाव्याकांक्षा साध्याकांक्षेति बोध्या।

मं०ज०
११९

ते साध्यत्वाख्यविषयतयैव तस्या विषयत्वात् साध्यत्वं च साक्षात्परंपरासाधारणं एवं तस्याः साध्यत्वेऽवगते केनेत्याकां-
क्षायां शब्दस्यानुकूलव्यापारबोधकत्वेन ज्ञातपदज्ञानं करणत्वेनान्वेति करणत्वं च भावनाभाव्यनिर्वर्तकत्वमेव कुठारादे-
रपि पुरुषव्यापारनिर्वर्त्यछेदनिर्वर्तकत्वेनैव करणत्वात् भावनाभाव्यकरणाकांक्षैव च भावनाकरणाकांक्षेत्युच्यते तत्र कथं-
कर्मेति भावायां उपाये द्वेषेणालस्यादिनाऽप्रवर्तमानं पुरुषं प्रशस्तफलवत्ताज्ञापनेन द्वेषाद्युपसारणद्वारार्थवादवाक्य-
जन्यशब्दोक्तप्राशस्त्यवत्तारूपा स्तुतिः सहकारिणमिति त्र्यमितिकर्तव्यतेत्युच्यते ननु शाब्द्यानुपस्थितकरणादेः कथमा-
न्वय इति चेन्न शाब्द्योपस्थितप्रवर्तनायानुक्तत्रयाकांक्षायाः शाब्दाद्युपस्थितैस्तत्सहकारेण मनसोपस्थितेश्च पदार्थै-
स्तद्विषयमानसबोधस्य तात्पर्यवशेनांगीकारात् तथाहि लिङादेः श्रोत्रेणोपस्थितिः तस्य च भावनाबोधकत्वेना-
ज्ञातत्वमपि मनसोपस्थितं एवं चार्थी भावनां प्रवर्तनाबोधकतया ज्ञातपदज्ञानेनान्वयेदिति बोधः एवमर्थवादाना-
मुपस्थितिः श्रोत्रेण प्राशस्त्यस्य तु तैर्लक्षणया ज्ञाततया स्तु मनसेत्यर्थवादैः प्रशस्तत्वेन यागं ज्ञात्वेतीतिकर्तव्यतासंबं-
धः प्राशस्त्यं च शीघ्रफलदातृत्वरूपं यत्तु स्वतः फलतो वा बलवदनिष्टाननुबंधित्वरूपं प्राशस्त्यमर्थवादैर्बोध्यत
इति तन्न रूपेण फलस्य शत्रुवधस्यानिष्टहेतुत्वेन फलतोऽनिष्टहेतौ श्येने रागोत्कर्षेण प्रवृत्तिदर्शनेन तदर्थवादैस्त-
द्बोधनासंभवात् प्राशस्त्यज्ञानजननेन विधेः प्रवृत्तिजनने साहाय्यमर्थवादैः क्रियत इति विधिस्तत्साकांक्षः एवम-
र्थवादा अपि नूतनार्थानुवादकाः स्वाध्यायविध्यापादितप्रयोजनवत्त्वलाभाय विध्याकांक्षास्तत्रार्थवादानां प्रयोज- ११९

नांशोविधिनापूर्य्यतेविधेःशाब्दभावनायाऽइतिकर्त्तव्यतांशोर्थवादैरिति अन्वयश्रवणेपूर्णंवाक्यमेकश्रवणेत्वन्यस्यकस्य
नेतिबोध्यं एवमार्थीभावनापिअंशत्रययथायजेतेत्यत्रयजदेवपूजायामित्युक्तेर्देवपूजाकरणकव्यापारोयजेरर्थः देवश्चा
त्रमंत्रकरणकोदेवोद्देश्यकोहविषस्त्यागः अयमेवयागः भाव्यस्तुस्वर्गकामादिपदोपस्थाप्यः स्वर्गोर्थतोलभ्यते यद्यपि
सव्यापारस्यागविषयोपितथापितस्यकरणत्वेनैवोपस्थितस्याऽसुखस्वरूपत्वेनापुरुषार्थतयाचनभाव्यत्वमितिबहिर्भूते
स्वर्गस्यैवभाव्यत्वं अतएवज्योतिष्टोमेनेत्यादौतृतीयाकरणत्वेधात्वर्थस्यागेऽन्वेदेनान्वयात् यत्तुभाव्याकांक्षाकिमि
तिशब्देनमीमांसकैर्दर्शितातदयुक्तं भावयेदितिपदस्योत्पत्त्यनुकूलव्यापारवाचितयासकर्मकत्वेनतदुपस्थितेस्ता
थाकांक्षाविरहेपियजेतेत्यादितः तेनरूपेणबोधात्तदुपस्थाप्येतथाकांक्षातोपिस्यात् ततोपितथाबोधांगीकारेस्वर्गं
भावयेदितिवत्स्वर्गंयजेतेत्यापत्तेः अतः किमर्थमित्येवतदाकारउचितः अतएवेदृशानांकामांतपदेनचतुर्थ्योबोध्ये
त्वेः करणंतुधात्वर्थोयागः करणत्वंभावनान्वयनिर्वर्तकत्वमुक्तमेवसहकारिकारणाकांक्षारूपकथंभावाकां
क्षातुसंनिधिपठितानूयमानफलकियाजातरूपेतिकर्त्तव्यतयानिवर्त्ततेतैर्विनायागेनापूर्वाजननात् पवतीसा
दैसकर्मकस्थलेतुतंडुलादिरूपकर्माकांक्षाप्यधिकाकरणाकांक्षाउवहिर्भूतेकाष्ठादिपदैर्निवर्त्तते वाह्यफला
कांक्षायांतत्प्रयेऽत्याद्यपिप्रयुज्यते नचविशिष्टस्यधात्वर्थतयातदर्थस्वर्गभावनोद्देशेनत्यागस्यविधेयत्वंतस्मा
दितिवाच्यं विधिप्रत्ययबोधितप्रवर्त्तनाविषयत्वरूपविधेयत्वस्यप्रकृत्यर्थेसंपूर्णधात्वर्थेशाब्दबोधेपिस्वर्गस्यमु

मं.त.० स्वरूपत्वेन स्वत एवेष्टतया तद्व्यापारे स्वरसत एव प्रवृत्तेः सिद्धत्वेन च विशेषणे फलेत्वप्रतीत्याऽदोषात् तथा लोके हि
१२० तोऽमीषां कृत्विजः प्रचरंतीत्यादौ ऽनुपपादयिष्याम श्चेदं समासे इदं च भावनायाः प्रत्ययार्थत्वमिति मीमांसकमते
विग्भावरूपकं तेषामपि समानपदोपात्तत्वप्रत्यासत्त्या लिङर्थे प्रवर्त्तनायाः प्रथमतस्तदुपात्तभावनायामन्वय।
दितिदिक्। औपनिषदास्तु यागानुकूलो व्यापार एव यजेरर्थः पश्चादेरिव तत्र्यथ एव भाव्यः स्वर्गस्तु पुरुषव्या-
पाररूपभावना व्यवहितो ऽतरवर्त्तित्वाभावान्न तद्भाव्यः यागद्वारानुमसाध्यः तथा हि विधिरप्रवृत्तप्रवर्त्तकत्वे स-
ति प्रेर्यमाणेष्टप्रयोजनसाधनविषयोपदेशरूपः तस्य धर्मस्य ज्ञापकत्व उपदेशो विधिरित्यर्थका तस्य ज्ञानमुपदे-
श इति जैमिनिसूत्रात् तत्र ज्योतिष्टोमादिवाक्ये प्रेर्य स्वर्गकामस्येष्टप्रयोजनसाधनतया यागवतिर्विधित्वमा-
वात् यागस्तु कर्मणा ऽङः स्वत्वे न चेतनसमीहाविषयत्वाभावात् लोकस्वरूपविधिबोध्यभावनोद्देश्यरूपः किं तु स्वा-
र्गादय एव तेषां नामपदोपात्तत्वेपि कामपदात्साध्यत्वप्रतीतेः प्रवृत्तस्य वहितप्राग्वर्त्तीच्छाविषयत्वेनोपस्थितेश्च
प्रीत्यात्मकत्वे न समीहितत्वाच्च एवं स्वर्गीयेत्यध्याहृत्य स्वर्गीययां भावयेत् स्वर्गकाम इति बोधः यागे नाक्तानन्य-
यत्वरूपसाध्यत्वस्य स्वर्गसाधनत्वेन विरोधाभावात् अनेकविशेषणविशिष्टक्रियाविधित्वेनोभयोर्नोभयत्वे
पि न वाक्यभेदः अत्र करणाकांक्षा वाह्येव्रीह्यादिभिर्निवर्त्तते यत्तु धात्वर्थफलस्य यागरूपस्य भावनां प्रति
करणत्वमुक्तं तत्र कारकाधिकरे साधकतमं करणमिति सूत्रस्य क्रियाजनके बुद्धिया याः प्रकृष्टं जनकं करण १२०

मंत्रकमित्यर्थो भाष्यादिसंमतः अत एव वृत्तिकृदादिभिः क्रियासिद्धौ प्रकृष्टोपकारकं करणमित्युक्तं हरिरप्याह कि
यायाः परिनिष्पत्तिर्यद्व्यापारादनंतरं तत्करणमिति अत एव करणस्य व्यापारः कारकइति सूत्रभाष्ये दर्शितः तद्व्या
पारस्य धात्वर्थत्वे करणस्य कर्तृत्वं च तत्र भाष्ये उक्तं यागस्य न भावनाजनको नापि व्यापारवानिति तस्य करणतायाउ
रुपादत्वात् भावनाभाष्यनिर्वर्तकत्वं करणत्वमित्यर्थस्य सूत्रभाष्यादितो लाभात् यस्य यागउद्दश्यमननमपि उक्तेष्वर्थे
ष्वर्थेष्वेव अस्य प्रबोधकत्वं तु यस्मिन् कस्मिंश्चिदर्थे तद्बोधकमिति स्पष्टमेव यच्च सत्रब्रह्महत्यां तरति योश्वमेधेन यज
ते इत्यादौ प्रयोगादनुवादकवाक्ये तृतीयाभावपत्तिः नहि तत्र यजतेरश्वमेधयागेन भावयतीत्यर्थः भाष्यानुपस्थि
त्यासमाकांक्षत्वात् तारब्रह्महत्यामिति वाक्यांतरेण हि ब्रह्महत्यातरणरूपभाष्योपस्थितिः तस्यानुवादकवाक्ये भा
व्यत्वे नान्वयस्तु तप्युक्तः तच्छ्रयोगेन तस्य विधेयसमर्पकत्वात् किंच तस्यैवान्वये योघटमुत्पादयति सघटंलभते
इति वाक्यवदस्य वैदिकवाक्यस्य विसंष्ठुलतापत्तिः किंतु वाक्यद्वयजबोधेनैरमेतत्काम्योश्वमेधेन यजेतेति विधिः क
ल्पनरस्यैव ब्रह्ममर्यादायदविवाजपेयादिपदानि सुराद्यादिगुणविधायकानीति पक्षे एककरणावरुद्धेन तत्कर
णान्वय इति तदन्वयानुपपत्तिरिति तदपि न अस्याथेस्य श्रुतिस्मृतिबोधितत्वाभावात् किं चैवं फलरूपकर्मीवक
श्यांभावनायां वाह्यकर्मांतरयोगानुपपत्तिः तत्र सर्वकारकाणां भावनान्वयनियमात् तत्र फलद्वारैव भावना
न्वये त्वत्रापि यागद्वारैव भावनान्वये बाधकाभावः यागेपि सुराद्यस्य जनकत्वात् अवदानग्रहणमेव च तद्व्यापा

रः किंच वाजपेयेनेत्यादेर्विशिष्टेनेत्यध्याहारेणाक्यैकदेशन्यायेन वाक्यार्थीयागेन गुणविधावपि संबंधउपपद्यते
न च लक्षणानाविवाक्यभेदः विशिष्टविधेरिति वि नाच्यं तत्तस्मात्त्वक्रूपरंपरोद्देशेन कुविंद्यो ग्वमेधेनयजेतेत्यत्र सदा
शादीत्तोवाजपेयइत्यादावनुवादे न च ज्योतिष्टोमेनेत्यादेः पदपरस्यस्य ज्ञानद्वाराकरणत्वेनान्वयो भावनायां तस्यापि सं
कल्पद्वारायागभावनाकरणत्वात् पदस्य करणत्वं चोपस्थितयागविशेषणत्वेनैव संकल्पादिद्वारेति यागनामधेय
त्वमपि सिद्धं स्पष्टं चेदं धर्मे जैमिनिरिसधिकरणे नाष्य तत्र नाम स्योरिसाङ्गः न हिंस्यात्सर्वा भूतानीति निषेधात्
यागीयपशुआलंभनेपायं नवस्येव न चाग्नीषोमीयं पशुमालभेतेत्यादियागीयहिंसाविधिर्निषेधस्य विहितेतरहिंसा
परत्वं बोधयतीति वाच्यं विधिना प्रकरणेन च तस्याग्नीषोमीयेणाविषयत्वेनेष्टहेतुत्वकृत्यर्थत्वबोधनेपि उक्तरीत्या
निष्टहेतुत्वबोधे मानाभावेन निषेधस्य हिंसायां पुरुषानिष्टहेतुत्वबोधकत्वे न विरोधाभावात् परकीयसुंदरीगमना
दौ समावेशाद्दर्शनात् किंचालं न न मत्रस्यश्रीः अग्निहोत्रप्रकरणपठिते वत्समालभेतेति वाक्ये तदर्थकत्वनिर्ण
यात् हिंसात्वांगयागविशेषमनप्रकारोपदेशात्स्यामाद्रेपलस्यापवंचाद्रेपलस्यार्थेनविरोधेपि वेदस्याप्रामाण्यप्रस
क्तभावेन तत्संकोचेनमानं अन्यतराप्रामाण्यनीत्या हिंसंकोचः पापसत्त्वेपि तद्दोषमहिम्नोरेवरागवशीकृतस्या
श्येनादाविव ज्योतिष्टोमादावपि प्रवृत्तिरुपपद्यते एतेन तत्कर्कोक्तिन्यायेनाविरोधे विनिषेधस्य विहितेतरहिंसाप
रत्वं विशेषविधिना बोध्यते इत्यपास्तं हिंसाविधेरभावात् न च निषेधस्य पुरुषार्थत्वे नपदर्थो निषेधस्तदर्थमेव।

निषिद्धमिति नियमेन पुरुषार्थे हिंसाया एव स निषेध इति वाच्यं पुरुषार्थस्युपगमादि निषेधस्य क्रत्वर्थत्वदर्शि-
नेन त्वदुक्तनियमस्याव्यभिचरितत्वात् क्रत्वर्थहिंसाया अपि परंपरया पुरुषोपकारकत्वेन पुरुषार्थत्वाच्च न च यज्ञा-
र्थं पशवः सृष्टाः स्वयमेव स्वयंभुवा यज्ञोस्य भूत्यै सर्वस्य तस्मात् यज्ञे वधोऽवधः या वेदविहिंसा नियतास्मिन् चराचरे
अहिंसामेव तां विद्याद्वेदाद्धर्मो हि निर्बभौ इति मनुवाक्यादिभिः पापाभावप्रतिपादकैर्निषेधप्रायश्चित्तोपदेशाद्य स-
मन्निमाहृतविधिवाक्यबोध्यप्रवर्त्तनायाः स्वविषयप्रवृत्तिविषये धात्वर्थसामान्यतोऽनर्थहेतुत्वप्रतिक्षेपकत्वक-
ल्पनेन सामान्यनिषेधस्य तदतिरिक्तपरत्वम् आक्षिपत्यन्याया अपि विधितात्पर्यविषयत्वेन तत्राप्यनर्थहेतुत्वाप्र-
तिक्षेपात् अत एव गम्यत्वहिंसा चैत्यविधाने न हिंसैव पापजनिका स्त्राश्च तिरश्च हिंसन् सर्वेन् तामस्यत्रतीर्थेभ्य इत्याह तीर्थे
यज्ञः तीर्थं शास्त्राध्वरे इति कोशात् अत एव मरणांतप्रायश्चित्ताहवाग्निमुखहननोचितदंडरूपचोरहननादीनां न पापजनक-
त्वं शुद्ध्यर्थविहितमरणे तस्या युक्तत्वात् न दोषो हिंसायामाहवे इत्युक्ते श्व चोराद्य वधे राज्ञो दोषश्रवणाच्च तस्माद् गर्हिततर्हिं-
सातिरिक्तहिंसाविषयोऽयं निषेधः अगर्हिता चानुपदिष्टप्रायश्चित्तिका हिंसा एवं सर्वनिषेधे शुद्ध इष्टमिति वाच्यं मनुवचने ऽव-
धः सादावेत्युदाहृतकन्येति वदस्यार्थे न नः समत्वात् अन्यथा घटो घट इतिवदस्या बोधकत्वेनावधपदस्यापापजनकत्वल-
क्षणोपपत्तेः यज्ञानुपकरस्याहिंसापरमो धर्मो गीतो वै मनुना पुरेति ब्रह्मवैवर्ते प्रथमखंडे उक्ततया तदुक्तस्यैवोचितत्वात् प-
रमत्वं च पापाजनकत्वेनास्य अल्पीयः प्रायश्चित्तेन परिहर्तुं शक्यत्वात् तत्र न दोषः किं च महतः फलस्य कामनया तु दे-

सां.त.कौ. तत्रन दोषः पशुहिंसाजन्यपापस्याल्पप्रायश्चित्तोपदेशेन वऊख्याया यागसाध्ययागजन्यस्वर्गादिसुखमध्ये वाल्पस्य मनुना
१२२ यागविषयेऽल्पस्य त्ववोधनात् एवं च तत्फले न विधेः स्वविषये नर्थ हेतुताप्रतिक्षेपकत्वं अत एव गीतायां यज्ञानं जपयज्ञो।
स्मीत्यादिना जपयज्ञस्याहिंसारूपत्वेन प्राशस्त्यमुक्तं तथा स्वधर्ममपि चावेक्ष्य न विकंपितुमर्हसि धर्म्याद्धि युद्धाच्छ्रेयोऽन्य
त्क्षत्रियस्य न विद्यते इत्युपक्रम्य सुखदुःखे समे कृत्वा लाभालाभौ जयाजयौ ततो युद्धाय युज्यस्व नैवं पापमवाप्स्यसी
ति अनेन विहितेऽपि युद्धे पापं वदता ऽन्ताद्दशस्य यज्ञेपि तदुक्तप्रायमेव न च पापशब्दस्य ज्ञानजाधर्मस्य कूपखानकन्यायेन
सुरापशब्दस्य ज्ञानजधर्मेण नाशः फलांतरं चेति नाप्येयस्य ग्रायामुक्तं कूपखानकस्य तत्त्व तन वेलायां मदालिप्तस्य ततो ज
लं लब्ध्वा तं लेपं दूरीकरोति फलांतरं च लभते तेन न्यायेन यज्ञजधर्मेण तत्पापनाशः फलांतरलाभश्चेति न दोष इति वा
च्यं अपशब्दज्ञानादधर्मस्यावाचनिकत्वेन केवलवैपरीत्यमात्रेण कल्प्यस्याति स्वल्पत्वादुत्कृष्टेन साधुशब्दज्ञानज
धर्मेण नाशेपि न हिंसादिति वचन बोधित पापस्य तेनाधर्मेण वचनं विना नाशायोगात् उक्त गीतावाक्याच्च अत एवेंद्र
देशात्राश्वमेधफलस्वर्गभोगसमये अनेकशो रावणमहिषासुरादिभ्यो दुःखधाराः श्रुतिपुराणादिषु उपवर्णिताः या
ज्ञां नगीतहिंसादिजन्यपापफलस्य यज्ञफलभोगांतरम् सत्तेरुपपत्तिसिद्धत्वात् एतेनाध्वर इति यज्ञनामध्वरतिर्हिंसा क
र्मीतत्प्रतिषेधो ऽध्वर इति निषेधो निरुक्तः अहिंसा इति तज्ज्ञाप्यमपि व्याख्यातं तं न ओत्यार्थत्वात् अत एव तस्मादसुर
पयोगादहिंसा इति उपपद्यते इति तज्ज्ञाप्ये उपसंहृतं उक्तं च स्वर्गेपि पातभीतस्य क्षयिष्णोर्नास्ति निर्वृतिरिति अहिंसनम् १२२

वैतिष्कृतिस्त्ववैधहिंसास्वागमेष्टसाधनत्वंवैधाश्चत्वमाह ननुवैधान्यनिष्टसाधनत्वाभावेहिंसाविधयोविहिंसायाः
स्वर्गसाधनत्वमात्रमाक्षन्नत्वनर्थहेतुताप्रतिक्षेपमिति अल्पायुष्ट्वाद्यनिष्टबोधकस्मृतिविरोधात् तदुक्तंपातंजलभाष्ये
यद्विकथंचित्सुल्पधापगताहिंसाभवेत् तदातत्रसुखावाप्तावपि अल्पायुर्भवेदिति अतएवक्षत्रियाणामपियुधिष्ठिरा
दीनांस्वधर्मयुद्धेनजातज्ञातिहिंसायांप्रायश्चित्तश्रवणंतथा च नागवतेमुचकुंदंप्रतिकृष्णवाक्यंक्षात्रधर्मस्थितोजंतू
न्त्वधीर्मृगयादिभिः समाहितस्तत्तपसाजह्यघंमदुपाश्रित इति आदिनायुक्तं मार्कंडेयेसितस्माद्यास्याम्यहंतातदृष्ट्वे
मंदुःखसंनिधिं त्रयीधर्ममधर्माढ्यंकिंपाकफलसंनिभमिति किंपाकोनिंबः इंद्रवारुणीत्यरेमोक्षधर्मेभारते पितापुत्रसंवा
देनालेतदद्भुतोस्यस्तंजन्मजन्मांतरेष्वपि त्रयीधर्ममधर्माढ्यंनसम्यक्प्रतिभातिमेइतितथाकेनचिदुक्तं वृत्तिनामृगरू
पिणोधर्मस्यप्रलोभनतावाक्यैर्वेधेकृतेउक्तं तस्यतेनानुभावेनमृगहिंसात्मनस्तदा तपोमहत्समुच्छिन्नंतस्माद्धिंसानय
ज्ञियेति यज्ञियापिहिंसानकेवलधर्मायेत्यर्थः एवंचौषधीयज्ञेएवसात्विकब्राह्मणस्याधिकारः नमोब्रह्मण्ययज्ञाययेच
यज्ञविदोजनाः स्वयज्ञंब्राह्मणहित्वाक्षत्रयज्ञमिहास्थिताः पदेवसुकृतंहव्यंतेनतुष्यंतिदेवताः नमस्कारेणहविषा
स्वाध्यायैरौषधैस्तथेति वनपर्वणिजाजलिसंवादेउक्तेश्च अन्यत्र व्यवस्थितमर्यादैर्विमूढैर्नास्तिकैःपरैः संशयात्मभिर
व्यक्तैर्हिंसासमनुवर्णिता सर्वकर्मस्वहिंसाहिधर्मात्मामनुरब्रवीत् कामकाराद्विहिंसंतिबहिर्वेद्यांपशून्नराः इतिहिंसायु
क्तयज्ञनिंदापूर्वकंविष्णुमेवाभिजानंतिसर्वयागेषुब्राह्मणाः पायसैःसुमनोभिश्चतस्यापियजनंस्मृतं इतिमोक्षधर्मे

श्रुतिविरुद्धवाक्याच्च मायथापापायतनत्यावेद्यंतर्गतापीतितदर्थः नास्तिकैरितिकरणेतृतीयातैःकरणभूतैस्तानुहि
ष्टेपतियावत्तद्विरुद्धत्वेनैवसर्वदेवताज्ञानंतीत्यर्थः अतएवसर्वयज्ञेषुब्राह्मणानांपायसपुष्पैरेवतत्तद्भागकल्पनेत्य
र्थः एतेनेदंत्वात्तंत्रेणश्वविद्युयागविधायकमितिमयास्तं तैत्तिरीयश्रुतावपिपराग्वर्ततेध्वर्युःपशोःसंज्ञप्यमानादि
त्युक्तं तत्रपापसत्वेएवहितनःपरागावर्तनंयुक्तंनान्यथा रिष्यतइववाएषःप्रेववारिष्यतेयोयाजपतिप्रतिवारहूं।
तियाजयित्वाप्रतिगृह्यवानश्ननुत्रिःस्वाध्यायमधीयीतेतिस्मृतिजांप्रायश्चित्तोपदेशाच्च सोपिपापसत्वेएवयुक्तः ए
तेनोक्तपुराणानिःअपश्चचातुर्मास्यत्वावकाश्येवेत्यपास्तं सर्वकर्मस्वहिंसामितिविरुद्धवाक्येश्रवणाच्च हिंसामपानां
नित्यत्वोक्तिरपितामसंमांसमत्स्यादिरागांधवेदमार्गप्रवर्तीयित्वंनतुतत्वदृष्ट्या अतएवभागवतेपुन्यत्यैस्तुपराशीति
स्तयानपशुहिंसयेत्सुपक्रम्य इत्थयज्ञैर्यजस्यमाणान्दृष्ट्वान्तानिविस्मति एषमाकरुणोहन्यादतत्ज्ञोऽसुतृपो
ध्रुवं तस्माद्दैवोपपन्नेनैवधर्मवित् संतुष्टोहरहःकुर्यान्नित्यनैमित्तिकीक्रियामितिइत्थमत्रपशुःपशुयज्ञैरिति
पाठांतरं तेनचपशुम्यत्नेनतुष्टस्यतेनैवयज्ञोयातेनासंतुष्टस्यमासांसादिलुब्धस्यतेनेतिसूचितंतेषांतामसाधिक।
रिकत्वंचकपिलस्यूमरश्मिसंवादेमोक्षधर्मेस्पष्टमेव लोकेव्यवायामिषमद्यसेवेतिम्लोकेभागवतेपिस्पष्टमेता।
त् सर्वेवकारवादेनिरूपितं तत्रैवस्यत्नांतरेपिनसविवाक्यहिंसायांयदिरागःस्यात्तत्रत्वनचोदना हिंसाविहारा।
ह्यालब्धैःपशुभिःस्वसुखेच्छया यजंतेदेवतायज्ञैरितिहिंसायांनस्फलमांसमत्स्यादिरागत्यक्तैयज्ञएवेत्यस्यानु

ज्ञानाराताश्रूराणवतः प्रतिपदि संख्येयं न तु सर्वात्मना त्यागस्य शक्यत्वेनेयं चोदनाऽस्यार्थः निमित्तादिकमपि तावत्त्यजेदेव सा
र्थकमुक्त्वा वेदस्य हृदयं लोके नाम्नो महेश्वरके नेत्युक्तं मन्त्रमन्त्रो मोन वेदेस्यार्थः अत एव पतञ्जलिना योगसूत्रे एवं सू
त्रकृत्त्वेन व्यवहारः कृतं गीतायामपि अनिष्टमिष्टं मिश्रं च त्रिविधं कर्मणः फलं भवत्यत्यागिनां प्रेत्य न तु संन्यासिनां ।
कश्चित्तु इत्युक्तं कर्मण इति ज्ञात्वा वेकवचनं कस्यचित्तु कर्मण इष्टं तु स्वमेव फलं कस्यचिदनिष्टं दुःखमेव कस्यचिन्मिश्रं
एतत्त्रैविध्यं अत्यागिनां कर्मफलात्यागिनां प्रेत्य देहान्तरसंबंधे भवति न तु संन्यासिनां तत्फलत्यागिनां यत्त्वत्यागिनां
कर्मफलत्यागेपि कर्मानुष्ठातॄणां सत्त्वशुद्धेः प्रागेव मृतानां तत्तत्कर्मफलं कर्मत्रैविध्यात्त्रिविधशरीरग्रहणरूपं
भवति पापस्यानिष्टं तिर्यगादिदेहग्रहणरूपं पुण्यस्येष्टं देवादिदेहलक्षणं मिश्रस्य पापपुण्ययुगलस्येष्टानिष्टयुक्तं मनुष्यदे
हलक्षणं संन्यासिनां मुख्यसंन्यासिनां तेषां ज्ञानतो ज्ञाननिष्ठासादेहसंबंधाभावादिति तन्न तिर्यगादिदेहस्यापुन
र्यास्थ्यत्वात् तत्रापि सुखदुःखोपभोगानुभवात् न हि देहमन्तरा कांस्यकुंकर्मणीप्यदोषतः यस्तु कर्मफलत्यागी स त्या
गीत्यभिधीयते इत्युक्तश्लोकस्य त्यागस्यैवात्र त्यागपदेन ग्रहीतुमुचितत्वाच्च उक्तत्यागफलकथनपरत्वात् पतं
जलेकवाक्यतया उक्तार्थस्यैवोचितत्वाच्च संन्यासिपदेनापि उक्तश्लोकस्य त्यागिन एव ग्रहणमुचितं न तु गृहीतदेह
स्यापि जीवन्मुक्तदशापन्नस्यानात्कर्मफलप्राप्तिजन्यहर्षविषादाभाव इति तात्पर्यात् यत्तु इष्टापूर्तादिकर्मणा ये तं
द्रुलोकगतास्त एवानुक्तभोगा पुनरवतारसमये व्रीह्यादावत्याश्लिष्टिते अनुशयिनः संसर्गभाज एव न तु तद्भोगस्तेषां त

मं.ज.० तत्र भोगप्रापककर्माभावात् इति सिद्धांतो नोक्ते पशुहिंसादियोगादिरूपस्याशुद्धत्वात्तस्य तत्र भोगप्रापकमस्त्विति पूर्वपक्षे मिश्रं त
१२४ द्बोधकं व्याससूत्रमशुद्धमिति चेन्न शब्दादिति तस्यार्थः अशुद्ध~~मिति चेन्न शब्दादिति तस्याधर्म~~मेवेति चेन्न शब्दाद्धर्मत्वाधर्म-
त्वयोः शास्त्रैकगम्यत्वात् वैधहिंसाया धर्मत्वेनोक्तेर्न साऽधर्म एवेति अल्पपापत्वादेव वैधहिंसा न दोषायेति मीमांसकाः न दोषा
येत्यस्य न पूर्णदोषायेति तदाशयः अत एव तस्यात्यल्पपापस्याल्पायुष्ट्वादिकं फलमुक्तं स्थावरभावो हि सर्वथाऽशुद्धस्यैव
फलमिति व्यासाशयः किंच यत्राल्पं सुखमधिकं दुःखं सममेवा तेन तत्रापि रागांधात्मिकस्य परकीयसुंदरीगमनऽवत्सुखे-
त्कटेच्छावशात्प्रवृत्तिरुपपद्यते दुःखस्याल्पत्वेनु सुतरां अत एव मरणरूपमहानिष्टसाधनेपि सहगमनवेलीप्रवेशा
दावात्मास्त्संगके सर्वत्राश्वमादौ च प्रवृत्त्युपपत्तिः पुरुषस्य प्रत्यवायेपि यागस्य सांगत्वमस्त्येतमेव योनाम क्रतु
मध्यस्थः कलंजादीनि भक्षयेन्न न क्रतोस्तत्र वैगुण्यं तथाचोदितसिद्धिः तदप्युक्तेः तदुक्तं पंचशिखाचार्यैः कुशलं
ह्येव बहु स्यादल्पमस्ति स्वर्गेप्यल्पममर्षमनुभवतीति किंच जैमिनेरेव सर्ववस्तुतत्त्वज्ञत्वाभावो मार्कंडेयपुराणादवग
म्यते सुतरां तदीयानां तत्र हि व्यासशिष्यो जैमिनिर्भारतविषयेषु केषुचित्पदार्थेषु संदिहानो मार्कंडेयं पप्रच्छ सच
न मेवसरस्तस्मात्सर्वज्ञान् विंध्याचलवासिनश्चतुरः पक्षिणः पृच्छेत्युक्तवान् तस्यायमाशयः व्यासशिष्यो व्यय
मशुद्धचित्तस्तथा व्यासोक्तं न साधु मन्यते सर्वफलदं परमेश्वरं तत्त्वेन न मनुते किं तु कर्मैव फलदमिति तथा दे
वतिर्यगादीनां व्यासोक्तं ज्ञानाधिकारं न मन्यते असंभवात् अनधिकारं जैमिनिरिति व्यासोक्तेरतत्तिरश्चां शिष्यो १२४

भूत्वा तेषां ज्ञानाधिकारे ज्ञाने सर्वत्र व्याप्तो ऽक्षे विश्वस्तो भवेदिति देवासुरसंग्रामादेस्तन्मुखतः श्रवणेनैषामविग्रह
त्वाभिमानं च स्यस्यतीति तस्मात्सातं जलभाष्ये व्यासोक्तमेव श्रद्धेयमिति अत एव रामायणे वाल्मीकीये वालिवधे हृ
ते ते नन गवतो रामस्याधिक्षेपे कृते ऽत्रात जायप्रहारेण तस्य पापित्वमुक्तं भगवता अज्ञतिरश्चां तु कर्मानधिकारस्तथा
पराशरस्मृतिव्याख्यायां माधवाचार्यैर्जैमिनिमतानुसारिणो जहाम ईशसिद्धिर्न यान्वेदशास्त्रप्रामाण्यमी
युषां शास्त्रकृज्जैमिनिर्मुनिः केनमानेन मिथ्यतीति ईशसिद्धी स्वुपलक्षणं देवताविग्रहादेरपि इत्यं हि तदीया ना
मुक्तिः प्रबला ध्वस्तविषयनेदं दुर्बलवेदगीः मिथ्यात्वान्निःस्वरूपा च न निषेद्धुमलं किलेति इति दिक् यन्न दुःखेन
संभिन्नं न च ग्रस्तमनंतरं अभिलाषोपनीतं च तत्सुखं स्वः पदास्पदमिति स्मने नापि सूचितमेतत् आद्यपादेन तत्रैहिक
रस्यैतत्कालदुःखसदृशासुखसमानदुःखनिरासः नच ग्रस्तमित्यनेन तदधिकदुःखनिरासः अनंतरमित्यनेन निद्रा
कालवद्वैषयिकोभयरहितदिनरूपकालनिरासः अन्यथा सकलदुःखाभावस्याद्यपादेनैव प्रतिपादनेन सिद्धेन
च ग्रस्तमित्यस्य वैयर्थ्यापत्तेः अभिलाषोपनीतत्वेन विषयसंपादनक्लेशनिरासः स्वर्गे ऽपि वैषयिकमेव सुख
मिति अप्सरसामनंजायान्तत्वोपवर्णितेऽस्मिन् ग्रिष्टोमादिफलकथनेनैकः पूर्वपरयोरिति सूत्रे भाष्ये स्पष्टमुक्तं ए
वं च विजातीयसुखत्वमेव स्वर्गत्वं तस्मान्महिषासुरादिजन्यं दुःखमस्त्येवेति सूचितं यद्वा स्वनान्तरीयकावश्यं
भाविदुःखान्यदुःखजनकाधर्मानारब्धदेहोपभोग्यसुखत्वं तत्र सहगमनादौ मरणं तत्प्रायश्चित्तादौ चोक्तरी

मं.जू.०
१२५

स्यात्त्वं पापं न्नृपानुधर्मो ज्योतिष्टोमस्याये नेति वदंतीति दिक् श्येनफलीभूतस्य शत्रुवधस्य रागतः प्रवृत्तिविष
यस्य विधिविषयत्वाभावेन न हिंस्यादिति निषेधविषयत्वं श्येनमेव यज्ञांतःपातिवधस्यैवमनुनाऽस्य वधत्वबो
धनात् अत एव तज्जन्यपापे बलवद्द्वेषवतां शिष्टानामपेक्षितवैरिवधसाधनत्वेपि न तत्र प्रवृत्तिः श्येनस्तु मरणा
नुकूलव्यापारोपि न हिंसा मरणोद्देशेन प्रवृत्तस्य श्रौतविधिबोधितस्य तदनुकूलव्यापारस्यैव हिंसात्वात् तस्मात्स्वे
नैव वीर्येण निगृह्णीयादरीन्द्विजः श्रुतीरथर्वांगिरसीः कुर्यादित्यविचारयन् क्षत्रियो बाहुवीर्येण तरेदापदमात्म
नः धनेन वैश्यशूद्रौ तु जपहोमैर्द्विजोत्तमः इत्यादिना श्रौतस्यैव मनुनाऽभ्यनुज्ञानात् श्रुतिरित्यस्य तद्बोधिताभि
चारकर्माणीत्यर्थः कूपादौ विनष्टे गवि कूपकर्तुर्हिंसकत्ववारणाय मरणोद्देशेनेति मरणकामनयेत्यर्थः एवमा
त्मोद्देशेन प्रक्षिप्तनाराचहते ब्राह्मणे न तत्त्वे ब्रह्महंतृत्वं ब्राह्मणमरणकामनया तदप्रक्षेपात् तथा काशीमरणो
द्देशेन कृतत्रिविश्वजादेर्न हिंसात्वं यदा मे मरणं भवति तदा काश्यां भवत्वित्येवं कामनया मरणस्य काश्यधिक
रणत्वविषयतया तदाचरणेपि मरणकामनया तदनाचरणात् एवं चात्र हिंसात्ववारणाददृष्टद्वारकत्वं विशे
षणं वदतो मान्याः एवं मरणोद्देशेन कृतस्य तु हिंसात्वं भवत्येव श्रौतविधिबोधिते त्युक्तेस्तं चाद्युक्ताभिचाराणां हिंसा
त्वमेव श्येनादावविशिष्टानां विधानं तु श्येनादर्थो वधश्च न शक्रतिप्रतिसंधानेन बोध्यं श्येनानुष्ठानकाले शत्रुं न हं
नीति प्रयोगस्य क्रमोण एव तत्पापात्मकेषु अभिचारगणनं तु वैदिकेतराभिचारपरं स्मरत्वपेक्षया श्रुतेर्बलवत्त्वात् ए १२५

वंचरूपेनेकृते प्रतिप्रयोगादिनादैवाडिपोरमरणे रूपेनकर्त्तुर्नेकिंचिदपिप्रायश्चित्तं शत्रोर्मरणेतु तत्र तस्य प्रयोज
ककर्तृत्वात् प्रयोजकस्य च प्रायश्चित्तमुक्तं तावद्वनसंशूलेमरणजनकरोगादिकं प्रति अस्मकर्तृखड्गाघा
तादिकं प्रति चरूपेनस्यहेतुतायावेदेनवोधनात् रूपेनवधप्रयुक्तमस्यत्वंनवस्येवतांत्रिकाग्नि च यस्कर्त्तुर्मरणे
सिद्धौ तत्र वधप्रयोजकत्वप्रयुक्तमुपपातकप्रयुक्तं च प्रायश्चित्तं कृतेभिचारेदैवादमरणेतु उपपातकप्रयुक्त
मेव ब्राह्मणविषयेत्वभिचारस्य मन्वादिस्मृतौ निषेधात्तत्राधिकं प्रायश्चित्तं रूपेनादिश्यो ताभिचारकरणेपि प्रायश्चि
त्तं तद्विषये नाद्यः अपि रूपेनो विहितत्वादिष्टसाधनत्वाच्च धर्म एव तत्फलवैरिवधस्तु अनर्थहेतुत्वात् अधर्म एवे
ति प्रतिपन्नाः परे त्वेवं मति चोदनालक्षणोर्थो धर्म इत्यत्रार्थपदं अर्थनिषिद्धफलंजनकत्वादितु तच्चोदनालक्षण
मितिनतद्यावृत्तिफलकं तत् तस्मात् रूपेनो विहितत्वान्नाधर्मः नरकसाधनहिंसाफलकत्वाच्च न धर्म इति प्रतिप
न्ना इत्यलं वाजपेयेन यजेते त्यादौ वाजपेयपदेन तद्द्रव्यं सुरारूपं तत्पदोपात्तयागरूपकरणविरूद्धायां स्वर्गभावना
यां वहिर्भूतद्रव्यस्य करणत्वेनान्वयासंभवात् वाजपेयवतेति वोधेतु मत्वर्थलक्षणादोषः वाजपेयेन यागं भावयेत्
तु यागेनस्वर्गं भावयेत् इति वोधे वाक्यभेदापत्तिस्तस्मात् तन्नामधेयमिति सिद्धांतः तत्र मत्वर्थलक्षणेत्यस्य तत्त्
ताऽसाधुत्वं दोष इत्यर्थः तदर्थे तेषां प्रत्ययानां साधुत्वबोधकव्याकरणे नन्त्रार्थलक्षणयाप्रकृतिप्रयोगस्या
साधुत्वबोधनात् कुंताः प्रविशंतीत्यादावपि कुंतत्वादीनां तत्संयोगिन्यायोपोनतु कुंतसंयोगित्वेन लक्षणा

मं.जू.०
१२६

अत एव वाच्च अइ इत्यर्थे वच्चुरित्यादीनामसाधुत्वमुक्तं परस्पशेति सूत्रे भाष्ये न च तद्भाष्यं शक्तिभ्रमेण बोधे सा
धुत्वपरं शक्तिभ्रमस्य दुरुपपादतायाः प्रागुक्तत्वात् तत्संबंध्यपत्यमित्यर्थे ऽणादिप्रत्यय समासयोः
साधुत्वस्य सूत्राद्बोधेन तत्रार्थान्यशक्तस्य लक्षणयाप्यसाधुत्वमित्यर्थस्य सूत्रस्वारस्येन लाभाच्च एत
न्मूलक एव विभक्तौ न लक्षणेति प्रवादः घृतामन्वयमित्यादौ तदपत्ये रघुत्वारोपो बोध्यः सोमेन यजेतेत्यादौ छां
दसी मत्वर्थलक्षणेति बोध्यं अर्शआद्यजंतं वा सोमपदं अत एव प्रोक्ताल्लुगिति सूत्रे प्रोक्तार्थकप्रत्ययांतादित्यर्थे प्रो
क्तादिति नाश्रीमसाशंक्यमोक्षो निर्देश इति भाष्ये समाहितं अत एव गुणवचनेभ्यो मतुपो लुगिष्टव्य इति वचनं वार्ति
कं कृतारब्धं अन्यथा तदिति लक्षणयैव सिद्धेस्तद्वैयर्थ्यं स्पष्टमेव लुगपि समानाधिकरण्यवाचकमत्वे एव लक्षणापि
तत्सत्वे एव तत्रैवानुपपत्तिसंधानात् न च लक्षणैव लुकाप्यन्वाख्यायत इति वाच्यं शास्त्रबोधितत्वेन तत्र साधुत्वस्य निर्वा
धत्वात् गुणगुणिनिरभेदस्यापि सत्वेन तस्यान्वाख्यानमित्यन्यत् गुणवचनानामाश्रयतो लिंगवचनानीत्यनेन तत्सत्वे लिं
गादिसिद्धिर्बोध्या अन्यत्रापि नामधेयत्वबीजं पूर्वमीमांसायां स्पष्टं नामधेयत्वे च वाजपेयादिपदं पदपरं मत्वर्थलक्षणयाम
साधुत्वेपि अस्यां तत्वाभावात् स्वरूपस्यापि पदशक्यत्वाच्च पदतदर्थयोश्चाभेदाध्यवसायस्य पूर्वमुपपादितत्वेन वाजपेय
पदाद्भिन्नो याग इति बोधे प्रमाणं गोपां गविधिपर्यालोचने प्रवृत्तिनिमित्तरूपवैजात्योपस्थितेर्विजातीयो यं यागो वाज
पेयपदशक्य इति शक्तिग्रहे स्वतंत्रेण पदेन यागविशेषोपस्थितिः इहमहकारतरौ मधुरं पिकौरौ नीसादेश तत्स हकारत्व १२६

वैधिकरणकं मधुररवणं यत्कर्तृकं सविकल्पदाशिन्न इति बोधे सहकारे कोकिलत्वजातिमत एव मधुररवणं जानतस्तद्वैजा-
त्योपस्थितौ तद्वच्छिन्नेपि कल्पदशक्तिग्रहे तेन तद्रूपेण बोधः यत्तु पदस्य वाच्यतासंबंधेन पागेऽन्वय इति तन्न संबंधाप्रसि-
द्धेः पूर्वमनुपस्थितसंबंधस्य भानानंगीकारेपि सर्वथाऽप्रसिद्धस्याज्ञातस्य संबंधस्य भानाननुभवात् वाजपेयपदोत्तरतृतीया-
याश्च साधुत्वापत्तेश्च करणत्वेदेन हि सेति सिद्धांतः यद्यपि वाजपेयपदं कश्चिद्यज्ञमिति सामान्याकारशक्तिग्रहेण सामान्या-
तो वाजपेयपदशक्यस्यनुपस्थितस्याऽन्वेदान्वय इति तद्यपि न तथोपस्थितेः कारणाभावात् किंचिदिन्द्रियोपस्थितेश्च नहि
किंचिदभिन्नो याग इति बोधोऽनुभवसिद्धः किंच वाजपेयपदस्य योगेन सुराऽन्ने शक्तिग्रहमते नेदशशक्तिग्रहासंभवारि-
सत्वं प्रवर्त्तनाचलिङादेर्थौसा पद्ये स्यादौ विनापि लिङादिकं प्रवर्त्तनाप्रतीतेः अंतर्भावितण्यर्थे प्रवर्त्तनायाया धात्वर्थ-
त्वस्य हृष्टत्वाच्च कर्त्रादिविषयविघ्नोसताया एव हृष्टत्वाच्च अतएव निमंत्रयेयमवंतमिस्यादौ धातुना निमंत्रणस्योक्तत्वेपि लि-
ङ्सिद्धिः यद्वाग्राहं कृस्मत्तत्वश्चेति लिङ्लोटौ निमंत्रणादिनिष्टमर्हत्वं च अवश्यकर्त्तव्यतालक्षणं किंच तस्या वाच्यत्वेत-
स्या एव विशेष्यत्वेन तत्वैकत्वस्येव समत्वेन द्विवचनाद्यनापत्तिः संख्यायाः स्ववाचकप्रत्ययांतजबोधविशेष्य एवान्वयात्
कर्तृगतसंख्याया न्वितिष्टधात्वर्थेऽवतद्विषयकप्रवर्त्तनायाम व्यारोपेण तत्साधुत्वमिस्यविक्तिष्टं तत्रधात्पस्थिता-
व्यापाराणां मध्ये प्रयोजकव्यापारस्य विषयितया विशेषणत्वं इतरेषां तु विषयतया विशेष्यत्वं एवं च पद्ये स्यादावेककर्त्तृ-
काप्रवर्त्तनाविषयीभूतभावनाकानुकूलाक्रिये स्यादिरीत्या बोधः यत्तु द्योतकत्वेपि प्रवर्त्तनाविशेष्येति तन्न द्योत्यस्यार्थविशे-

मं.जू.
१२७

षणतयाएवन्याय्यत्वात् किंचतस्याविशेष्यत्वेदेवदत्तादेः प्रधानत्वम् तथात्वर्थानाश्रयत्वेनाकर्तृत्वेकर्त्तरिलिङाद्यना
पत्तिः किंचस्वाध्यायोध्येतव्यइत्यादौसत्वप्रधानेकृदंतेप्रवर्त्तनायाविशेषणत्वमावश्यकमितिसर्वत्रतथैवोचितंतत्रहिप्रवर्त्त
नाविषयाध्ययनकर्मस्वाध्यायइतिबोधःप्रवर्त्तनाविषयत्वेनकृदस्यधात्वर्थस्याश्रयत्वेनग्रहात् कथंभावाकांक्षागुरूपा
सदनादिविधिनानिवर्त्तते करणाकांक्षाचवाह्यैरध्ययननियमविधिभिर्निवर्त्तते फलाकांक्षाचयज्ञादिविधिभिः यद्वा
गुरूपसदनंकरणंनियमाश्चेतिकर्त्तव्यताः तत्रसकलकारकविशिष्टेधात्वर्थेप्रवर्त्तनायाविशेषणत्वेविधिप्रत्यय
स्तात्पर्यग्राहकः एवंचप्रवर्त्तनाविषमसमाप्यत्वंश्रेयःसाधनत्वंचविशिष्टएव धात्वर्थस्यप्राप्तत्वेतुतात्पर्यतोगुणां
शेपर्यवस्यतिप्रवर्त्तनावर्त्तमानकालैवनाम्नते शब्दशक्तिस्वभावात् इतरस्यात्वर्थस्तुभविष्यत्कालएव अतएवए
तेनप्रेरणाप्रयोज्यपाकवर्त्तमानतादशायांप्रवर्त्तेतिस्यादित्यपास्तं विधिलिङादावुक्तमस्तु न स्वप्रवृत्तौस्वप्रेरणायाअका
रणत्वेनतज्ज्ञानानुपयोगात् इदमेवाभिप्रेत्योक्तमपुरुषोविधिशक्तिप्रतिबंधकइतितांत्रिकाः एवंयत्कृद्योगेवकारा
दिप्रयोगोविविधिशक्तिप्रतिबंधकइतिबोध्यं इतिलिङर्थविचारः विपठिषतीत्यादौसनर्थइच्छा तस्याःप्राधान्यानुभवा
त् तत्रधात्वर्थस्यकर्मत्वसमानकार्त्तृत्वेनऽन्वयसंबंधेनविशेषणतार्थोलोः कर्मणःसमानकर्तृकादिच्छायांवेतिसू
त्रस्वरसात् गमेर्ग्रामःकर्मइषेस्तुनेकर्मणीतिसन्नन्तेभाष्योक्तेरस्मात्कर्मण्यपिलादयः अतएवविनिदिध्यासितव्यो
विनिश्चितासितव्यइत्यादिप्रयोगाःसंगच्छंते ननुज्ञानस्वभावात्वाद्धर्मानाध्यात्मसाविषयभविष्यत्वात्तत्रविष्यत्काले १२७

साकांक्षायां न तथेति तस्येनाध्येयकर्तृत्वं तदीयावर्त्तमानाया अपीच्छाविषयत्वविषयत्वे न विषयत्वाल्लत्वात् सनंताद्धर्त्तमा
नप्रत्ययार्थसंगतिरितिचेन्न सन्नन्तप्रत्ययार्थेच्छायाः प्रधानत्वेन गुणीभूतप्रकृत्यर्थेनानुयायित्वात् आशंसातु नप्रत्ययार्थ इति प्र
धानार्थानुयायित्वमेव आबाधादिवत् प्रयोक्तृधर्मी ह्याशंसा आशंसे इत्यादिशब्दप्रयोगे प्रयोक्तृधर्मः सा गम्यते इत्यन्यत्रा
विस्तरः आमुमूर्षेति कूलं पिपतिषतीत्यादौ आशंकार्थसन् अकर्तृकमरणविषयाशंकेति रीत्या बोधः इच्छारोपेणात्र प्रत्य
य इति भाष्यसंमतेपक्षे तु अर्थः पश्चात्मानसबोधविषय इति बोध्यं सनंते विधिबितिगंतुं इत्यादिवारणाय एकार्थीभावः त
स्यपदविधित्वाभावे विधावचनानर्थक्यं नित्यत्वात्सनः इहैवोपदेशो वृत्तिपक्ष आवृत्तिपक्षश्च तत्र स्वभावत एव एतद्भवतिवाक्यं
वृत्तिश्चेति भाष्यात्सः वृत्तेरेकार्थीभावविषयत्वाद्वाक्यस्य अपेक्षाविषयत्वाद्भिन्नार्थत्वाद्बाध्यबाधकाभावात् प्रसंग इति कैय
टः पुनः पुनरतिशयेन वा पचति पापच्यते इत्यादौ यङः प्रकृत्यर्थगतं पौनःपुन्यं भृशत्वं वा द्योत्यते बाहुल्यं कार्त्स्न्यं क्वचित्कौटि
ल्यगर्हा घ्रियिनित्यं कौटिल्ये गतौ लुपसदे इत्यादिज्ञापकप्रामाण्यात् तद्विषये क्रियासमभिहारे यङ्‌ न तन्निधानात् पाचयतीत्या
दौ णिज्वाधारेण नतु द्योत्यो विशेषणत्वापत्तेः एवं च तदाश्रयस्य कर्तृत्वानापत्तेः एवं तदाश्रयो जककर्तुरित्याद्यनापत्तिः
अत एव तद्द्योतकतापक्षस्य तत्र भाष्ये प्रकृत्यर्थविशेषणत्वशब्देनोक्तेश्च कृतः किं चैवमपि प्रयोजकस्य कर्तृत्वांगी
कारे गमितो ग्रामं देवदत्तो यज्ञदत्तेनेत्यादौ प्रयोजकव्यापारस्य गमिवाच्यत्वात् प्रयोजककर्तुरित्यस्यापत्तिः द्योत्यस्य वि
शेष्यत्वांगीकारे विपाचयति देवदत्तं यज्ञदत्तेनेत्यादौ प्रधानीभूतव्यापाराश्रयत्वेन प्रयोज्यस्य कर्तृत्वानापत्तिः ममतु धा

मं.लू.० तुनेदान्नदोषः नचस्वतंत्रपदेनशब्दतः प्रधानस्यैवार्थतः प्रधानस्यापि ग्रहात् उभयोः कर्तृत्वं नत्रप्रेरणायाविशेषणत्वेपि
१२८ तस्या अन्यानधीनत्वलक्षणमार्थं प्राधान्यमिति वाच्यं प्रयोज्यैककर्तृरित्तीयेवर्णे तात्त्वादेरप्यापत्तेः उहादीनामप्रधाने
कर्मण्यपिलादेः स्वीकारेण लादिविधौ कर्त्राद्यंशे प्रधानाप्रधानन्यायाप्रवृत्तेः तत्रार्थप्राधान्यस्य सत्वाच्च किंचैवमंतर्भा
वितण्यर्थेपुभयोः कर्तृत्वापत्तिः स्वसाध्यक्रियाजनकप्रयोज्यकृत्वं स्वतंत्रत्वमितिपक्षेपिस्वतंत्रंकारकं क्रियाजनकं कर्तृ
त्यर्थेवाधकाभावेन क्रियायाः प्रधानभूतायाएवग्रहणान्नोभयोस्तत्वं ममतु तत्र प्रयोज्यस्य कर्तुः प्रायेण करणत्वे
ननविवक्षा न क्रियायाअविधातुनाप्रायेण करणत्वेनैव बोधात् नतदाश्रयस्य कर्मत्वं क्वचित्तु तद्विवक्षया गर्गाः शतं
दंड्यंतामित्यादौ तत्र प्रयोज्यव्यापारानुकूलो व्यापारो धात्वर्थ इति बोध्यं अतएव चारेणाहं परसैन्यमनुप्रविश्य संकल्प
पानीत्यादौ प्रयोज्यकर्तुश्चारादेः करणत्वमुक्तं भामत्यां चारेणेत्यस्यानुप्रवेशनान्वयेपि करणे ह्वत्तृतीयेति बो
ध्यं वाचकत्वे तु न दोषः प्रयोज्यस्य णिच्प्रकृत्यर्थकर्तृत्वेपि णिजर्थकर्तृत्वाभावात् एवं तात्प्राधानकर्तृत्वमिति
भाष्ये प्रधानत्वं णिप्रकृत्यर्थकर्तृत्वरूपं स्पष्टं चेदं हेतुमति चेति सूत्रे भाष्ये इति सनाद्यर्थविचारः कृत्कर्मविहित
कृतां कर्तृकर्मणी अर्थः तयोरेवचलिंगाद्यन्वययोग्यतयोः प्राधान्यं सत्वप्रधानानि नामानीत्युक्तेः कर्मकृतिच
फलव्यापारयोर्वाच्यत्वामसद्रत्याद्युक्तं तत्रज्ञातज्ञानजं तार्थस्यारव्यानार्थं क्रियाविशेषणत्वमित्यर्थैलिखन्ना
स्तेन मिमितस्यअनुवर्थेद्रास्ये स्पष्टं काव्यप्रकाशे हरिरस्माह चंक्रम्यमाणोऽधीधात्र जयंस्थं क्रमणं कुरुतादधी १२८

स्याद्विशेषेपिशाब्दैरेः प्रतीयतेइतिअध्ययनमंत्रजपः अन्यत्रापिजपस्यैवविधिःशाब्देनत्वाद्येजपस्यप्राधान्यम
स्येतस्यगुणभावइतितदर्थः क्वचित्तुशब्दार्थस्याबुद्धिस्थत्वैकत्वादिरूपमप्राधान्यंप्रकरणादिवशाद्बोध्यं जनयावाप्रतीय
ते यथालिखन्नास्तेइत्यादौ एवंचतदर्थस्यमानाधिकरणनामार्थस्यविशेषणत्वमेवान्यथातत्रविशेषणतामापन्न
स्याख्यातार्थेविशेषणत्वं नस्यात् गतइत्यारेत्यादौसमासेतद्धितगृहवाक्येचविपरीतमितिनगतदित्यादेः शब्दे
निपातात्सिद्धिः नावार्थोनांकृत्सम्मतंकत्वादीनांखलर्थोनांनपुंसकेभावेक्तस्यचसाध्यावस्थापन्नधात्वर्थ
नुवादकत्वमेव अतएवैधितव्यमित्यादौनक्रियांतराकांक्षा अतस्तेष्वेकवचनमेवसत्वप्रधानानिनामानि
त्युक्तेः साध्यावस्थस्यापिचतिरूपमित्यादाविवलिंग [illegible]तत्रलिंगान्तरासंभवात् लिंगमत्रैनामत्वाच्चनपुं
सकत्वमेव लिंगान्वयित्वमेवचतत्रमतं अपितथाप्यर्थविशेषत्वालिंगाद्यन्वययोग्यसिद्धत्वावेदनमितिकश्चि
त् घञादिवाच्यस्तुसिद्धावस्थापन्नः पाकइत्यादौसर्वसंख्यान्वियोगदर्शनात् तत्रापिप्रकृत्यासाध्यावस्था
पन्नस्यैवोपस्थितेरुदितस्यपाकइत्यादौनकारकान्वयहानिः अध्याहृततिङन्तार्थक्रियायांतत्रकारकान्व
यइतितुनयुक्तं नलोकेतिनिषेधेनकृद्योगषष्ठ्यनापत्तेः कर्तृकर्मणोरित्यस्यैवयष्ठ्यापत्तेश्चकाष्ठैः पाकइति
त्विष्टापत्तिग्रस्तं नचैकस्यैवसिद्धत्वसाध्यत्वाभ्यामुपस्थितिः कथंविरोधादितिवाच्यं यथासंबंधिभेदेनैकत्रै
वाधारत्वंमातुलत्वंचतथाकारकलिंगादिसंबंधिभेदेनसाध्यत्वस्यसिद्धत्वस्यचैकत्रविरोधस्यैवाभावात् या

मं॰ञ्जू॰ १२९

यावाममगो धावति पच्येपेत्यादौ धावनस्य मगं प्रति साध्यत्वं स्पर्शनं प्रति च साधनत्वं तद्वत् एकस्यैव द्विधा त्वयेस्यसा
ध्यत्वेन प्रकारतासिद्धत्वेन विशेष्यता एकनिष्ठत्वाच्च तयोर्न स्फुटं ग्रहो बोधे एतेन घञ्वाच्यो भावः प्रधानमिति
ग्रंथा व्याख्याताः तदुक्तं कर्तृरि कृदिति सूत्रे भाष्ये घञादिवाच्यो भावो बाह्यः प्रकृत्यर्थादिति तुमुनादिवाच्या
भावो बाह्यः प्रकृत्यर्थादिति तु मुनादिवाच्य स्त्वान्तरङ्ग इति तुमर्थे इति सूत्रे भाष्ये तत्राद्यो भनाद्यर्थस्य धात्वर्थफला
न्वये स्त्रो भनं पाक इत्येव कर्तृकर्मणोरिति षष्ठी तु न कर्तृसाहचर्येण कर्मणो धात्वर्थेनैव तेनान्वयिन एव तत्र ग्रह
णात् स्पष्टं चेदं शजनास्तूजित मित्यत्राष्टमे भाष्ये एतच्च निरूपितं कर्तृकर्मणोरिति सूत्रे आद्ये ईश्वरे व्यापारान्वये
तु स्त्रोभनः पाक इत्येव तस्य कर्मत्वाभावेन तद्विशेषणे द्वितीयाया अप्रसक्तेः तिङन्ताख्ये व्यापारान्वये तु नपुंस
कत्वैव एतेन घञादीनां प्रयोगसाधुतामात्रमित्यपास्तं तदुक्तं आख्यातशाष्टे नागाम्यां साध्यसाधनवर्तिता
प्रकल्पिता यथा शास्त्रे मघ आदिषु विक्रमः साध्यत्वेन क्रिया तत्र धातुरूपनिबंधना सिद्धभावस्तु यस्त्वस्याः स
घञादिनिबंधन इति सिद्धभावं सिद्धत्वं यथा पचतीत्यादौ कल्पितान्वयव्यतिरेकाभ्यां धातुभागः क्रियायां प्र
वः कारके इति कल्पना श्रीयते तथा प्रकृतिः साध्यस्वभावमाचष्टे घञ्तस्याः सत्वभावमित्यर्थ इति हेलाराजः अ
नेनात्रापीयं शास्त्रकृत्कल्पनैवेति दर्शयति स्पष्टं चेदं भावे सार्वधातुके यगिति सूत्रे भाष्ये साध्यत्वेन नानादेवक्रि
यार्थक्रियोपपदे विधीयमानतुमुनादि सिद्धिः नोक्तुं पाक इत्यादि क्रियापदस्य साध्यत्वविशिष्ट एव शक्तेः पदार्थः १२९

परार्थे नेति न्यायस्तु क्रियातिरिक्तविषय एव नो क्तुं गतो देवदत्तेन ग्रामो गतः कृतपूर्वी कटम् इत्यादौ कारकाणां गुण
भूतक्रियायाम् अन्वयात् साध्यावस्थस्य प्रकारतया भानात् तस्य प्रसज्यप्रतिषेधरूपनञर्थेऽन्वयो न तेन छित्वा वृक्षि
त्वपाकाभावकर्तृकामत्त्वेति बोधाभिप्रायेण पाको नास्तीति न वस्तुतो नो क्तुं पाको नो क्तुं गत इत्यादय साध्यैव क्रियार्थो
यां क्रियायामित्तु क्त्वाप्रत्यासमस्याक्रिययोरेकजातीयत्वलाभेन स्वप्रकृतिकप्रत्ययार्थे प्रसगुणीभूतायाः साध्यावस्था
मात्राया एव क्रियार्थक्रियाया ग्रहणात् ध्वनितं चेदमुपपदमतिङ् गतिकारकोपपदात् कृदिति सूत्रयोर्भाष्ये इत्यत्र प्रपंचि
तं किं च यत्र कार्ये क्रियावाचकत्वाद् ग्रहणं तत्रोक्तक्रियाया एव ग्रहणं यत्र तु क्रियारूपार्थग्रहणं तत्र गुणीभूतादेरपि ग्रहा
णं अत एव गतपाकादियोगे कारकविभक्तिकृत्त्वसुचूल्कादीनां साधुत्वमित्यन्यत्र विस्तरः तुमुनादीनामसत्त्वभूतो भा
व एवार्थः अत एव कृतो भाव इत्युक्तेः पाक इत्यादाविव तुमुनर्थे वैलक्षण्यानुभवात् एवं चायं धात्वर्थानुवादक एव तत्र
तुमुन्नन्तु लौकिक्यां क्रियार्थायामित्युक्तेः तद्रूपत्वरूपतादर्थ्यम् अपि तुमुन्द्योत्यं तच्च संसर्गः प्रकृत्युपपदार्थयोस्ता
दर्थ्यं वन्नसमानकर्तृकत्वमपीहाभिधानवललभ्यः संसर्गः क्रियान्तराकांक्षानुत्थापकतावच्छेदकं वैजात्येन तु न भानं त
दाकांक्षादर्शनात् कारकान्वययोग्यतावच्छेदकं वैजात्येन तु भावनमस्त्येव एतद्धि हितैव तुल्यत्वकर्तृये वकृष्णम् इष्ट्या
त्रिं तं दर्शको यातीत्यादौ कृष्णकर्मकं न विषयदर्शनोद्देश्यकं दर्शनकर्तृकर्तृकं यानं कृष्णकर्मकं न विषयदर्शनकर्तृक
र्तृकं तद्दर्शनोद्देश्यकगमनमित्यादिरीत्या बोधः एवं क्त्वाणमुलादीनामपि असत्त्वभूतो भाव एवार्थः तुमुन्वत् क्त्वाप्र

मंजू० कृत्वर्थे क्रियाक्रियांतरे विशेषणत्वं धातुसंबंधाधिकारात् तयोः संबंध एककर्तृकत्वं पूर्वकालत्वोत्तरकालत्वं च समाना
१२० कर्तृकयोः पूर्वकाले क्त्वेत्यनुशासनात् समानकर्तृकयोरिति निर्धारणे सप्तमी पूर्वकाल इति बहुव्रीहिः समानकर्तृकयोः
क्रिययोरुपात्तयोर्मध्ये पूर्वकालसंबंध्यर्थवाचकाद्धातोः क्त्वेत्यर्थः एवं च वाक्यज्ञानकाले संबंधतात्पर्यग्राहकाः क्त्वादयः सू
त्रबलादेव तयोः क्रिययोरेककर्तृकत्वबोधः क्वचित्तु जन्यत्वव्याप्यत्वादिकमप्यधिकं भासते तत्तु मानांतरगम्यत्वान्न
क्त्वाद्यर्थः यथा भुक्त्वैव तृप्तो न पीत्वा अधीत्य तिष्ठतीत्यादौ अत एवाध्ययनकालिकस्थितिमादायैवाधीत्य तिष्ठती
ति प्रयोगो न तदभावकालिकस्थितिमादायेति बोध्यं तदपि संसर्गमर्यादयैव नातेऽपि ते न समानकर्तृकत्वं क्त्वावाच्यमि
त्यपास्तं संसर्गमर्यादयैव लाभे तिन्नमलभ्यत्वात् कर्तरि कृदित्यस्य तु नात्र प्रवृत्तिः अव्ययकृतो भावे इत्युक्तेः तत्रा
व्यवहितपूर्वकालत्वाद्येव संसर्गः अत एव वर्षातिशयितो जनमादाय भुक्त्वा व्रजतीति न अव्यवधानं तात्पर्यवशात् दंड
मुहूर्तादिव्यवधाने यथायथं बोध्यं तेनाद्यनुत्क्रामसौम्योऽगं तेत्याद्युपपत्तिः न च पूर्वकालत्वादेः संसर्गत्वे मुखं व्यादाय स्व
पितीति न स्यात् व्यादानस्य स्वापपूर्वकत्वाभावादिति वाच्यं व्यादानोत्तरमपि स्वापानुवृत्त्या तमादाय तदुपपत्तेः अत्र का
लिकसंबंधेन व्याप्यत्वमपि भासते तेन व्यादानोत्तरं स्वापे कृते तदनुवृत्तावेव तथा प्रयोगो न तु मुखमीलने तथा प्र
योगः तदा तन्निद्राया व्याप्यत्वाभावात् दर्शपूर्णमासाभ्यामिष्ट्वा सोमेन यजेतेत्यादौ दर्शादियागवैशिष्ट्यस्य सो
मयागे विधानमतो दर्शादितः प्राक् सोमकरणे प्रत्यवायसिद्धिः दर्शमात्रकरणे सोमाकरणे च तदभावसिद्धिः आधा १२०

नोत्तरं तावत्कालं संदिग्धजीवनस्यातिश्रद्धावतस्तु ततः प्राक् सोमानुष्ठानेपि न प्रत्यवायः प्रागपि सोमेनैक इति
आश्वलायनोक्तेः उत्तरकालमात्रं पूर्वकालमात्रं वा संबंध इति तु न युक्तं संबंध इति तु न युक्तं संबंधस्योभयनिष्ठता व
द्रूपकत्वात् तत्रोत्तरकालवृत्तित्वं न तत्र ध्वंसाधिकरणकालवृत्तित्वं स्थित्वा पश्यतीत्यादावभावात् किंतु तदधिक
रणसमयध्वंसाधिकरणसमययोरासत्तिकत्वं उत्तरकालस्य प्रत्ययार्थत्वं तु न युक्तं कृतिप्रत्ययार्थस्य विशेष्यत्वदर्शनात्तस्य
विशेष्यत्वापत्तौ क्रियाप्राधान्यविरहेणानीदण्ये छित्वा नावापत्तेः गुणक्रियामाश्रित्य तत्त्वप्रवृत्तौ पाचक इत्यादावतिप्रसंगः
प्रांचः परे तु समानकर्तृकयोरर्थयोर्मध्ये पूर्वकालविशिष्टार्थवृत्तेर्धातोः क्त्वेति सूत्रार्थात् पूर्वकालः क्त्वाप्रकृत्यर्थप्रक।
रः तत्फलादेवानंतर्यसंबंधेन तस्य धात्वंतरार्थेऽन्वयः अत एव भाष्ये समानकर्तृकत्वे न पूर्वं भुंक्ते पश्चाद्व्रजतीत्यत्र क्त्वा
प्रत्ययमात्राक्लृप्तत्वशंके नोक्तत्वान्नेति परिहृतं पूर्वेणाष्टस्यात्र पूर्वकालोर्थो न तु धातोस्तत्र वृत्तिरिति तदर्थः ननु क्त्वार्थो न।
मप्रयोग इति तदर्थः तथा सति इह कस्मान्न भवति आस्यते भोक्तुं इति शंकापरभाष्यासंगतेः तत्रापि फलार्थकतुमु
नापूर्वकालत्वस्यासिक्रियायां द्योतितत्वेन तदप्राप्तेः तत्र पूर्वकालत्वस्याप्रतीतौ तु कथं क्त्वा आपादनं वा सरूपन्यायेन
लटा साधितमित्यस्य तूपदात्वासेः क्त्वा तदा भुजेस्तुमुनन्नभिधानान्नेति कैयटः पूर्वं भुक्त्वा पश्चाद्व्रजतीत्यादावन्येनोक्तो
त्कृत्यः पूर्वं भुक्त्वान्येनोव्रजितव्यः पश्चाद्व्रजतीत्यर्थे इति साधनांतरक्रियापेक्षं पौर्वकाल्यमिति विभाषाग्रे इति क्त्वा
आनंतर्यसंबंधे न पूर्वकालिकदर्शादिवैशिष्ट्यं च सोमे विधीयते इति न तत्र दोषः एवं च पूर्वकाल इति कर्मधारय एव भू

तस्मिति नोक्तं लाघवानादरात् तत्त्वे भवो धात्वनुभावाच्च एवं च षष्ठ्याः संबंधवाचकत्ववदेषामपि समानकर्तृक
त्वादिरूपसंबंधवाचकत्वं वक्तुं शक्यमिति प्राहुः नन्वेवमिष्टकाः पक्त्वाहं नोऽस्येहं भुक्त्वा व्रजामीत्यादौ तृतीयाप
त्तिः न च तिङः तेन कर्तुरभिधानान्नैति वाच्यं तिङ्न्तार्थैककर्तुरुक्तत्वेपि क्त्वांतार्थकर्तुरभिधानाभावात् अनभिहिते
भवतीति पर्युदासात् अत एव प्रासादे आस्ते इत्यत्र सदिक्रियाधिकरणस्याभिधानेपि आसिक्रियाधिकरणस्याभि
धानात् सप्तमीति भाष्यादौ स्पष्टं तथा पक्त्वौदनो भुज्यते इत्यत्र द्वितीयापत्तिरिति चेन्न कर्त्रादेरेकत्वे प्रधानति
ङ्न्तार्थक्रियानिरूपितस्यैवाभिधाने क्त्वांताद्यर्थगुणक्रियानिरूपितशक्तेरनभिहितत्वस्य भाष्यादिप्रामा
ण्येनांगीकारात् तदुक्तं हरिणा प्रधानेतरयोर्यत्र द्रव्यस्य क्रिययोः पृथक् शक्तिर्गुणाश्रया तत्र प्रधानमनुरुध्यते ।
प्रधानविषया शक्तिः प्रत्ययेनाभिधीयते यदा गुणे तदा तद्वदनुक्तापि प्रतीयते इति क्रियांतरसंबंधस्य बुद्धिविषय।
त्व एव त्वक्तः साधुत्वमेतेन पूर्वं क्त्वांतार्थमात्रस्य बुद्धिविषयत्वे तस्य कर्तृकर्माकांक्षाभावादंतरंगत्वेन द्वितीयादि
कं दुर्वारमित्यपास्तं ओदनं पक्त्वा ग्रामो गम्यते देवदत्तेनेत्यादौ द्वितीया भवत्येव कर्मशक्त्योरेकनिष्ठत्वाभावात्
अत एव स्वाङ्मीति सूत्रेणाप्ये क्त्वाणमुलाद्यः समभिव्याहृतेनानुप्रयुज्यमानेन समानोधिकरणे तदा स्वका
रकेव क्त्वास्ते नोक्तविषये तृतीयादि नेति उक्तं अव्ययकृतो भावे इत्याश्रित्य च प्रत्याख्यातं तत्र समानशब्दः एकपर्या
यः एवं च द्वौ धं प्रतिहं तुं शक्यमिति कैयटोक्तं चिंत्यं वचनारंभे ऽसिद्धेः द्विधः प्रतिघातमात्रविशेषणत्वमपि न युक्तं १३१

गमेर्ग्रामः कर्मेत्येतत्तु अन्वयमितिमन्तुमत्र तस्य नाभ्यविरोधात् अत एव ग्रामो गंतुमिष्यते ऽस्येव न तु ग्रामाय ग्रामं वेति
एवं चार्थस्तोन यत्रापि ग्रामशब्दोन्वय एव ग्रामो गंतुमिष्यते ऽस्य तत्र गमिक्रियापेक्षे द्वितीयाचतुर्थ्यौ न कदापि न वतस्तद्वे
त्यसकर्मत्वस्यान्यनिहितत्वात् प्रकाशनादितिकैयटोक्तेः हरिरप्याह इषेश्च गतिसंस्पर्शाद् ग्रामे योन्तो विधीयते तत्रेप्सित
वन्निर्योगः क्रियते गतिकर्मणि इतिसंस्पर्शात् इष्टक्रियामुखेनैवैतस्य संबंधात् निर्योगः अभिधानं इषिणा तद्विहित
त्वादिना अत एव पक्तुमनुज्ञानम् अस्य त्रकेषांचित्तु नव्यपेक्षते ओदनं पचतिः सोमावनुमानात् प्रतीयते इत्यत्रकेषांचिदिदसु
क्तं प्रथमांतौदनपदवाच्यस्यायोग्यत्वात्तत्पचिक्रियया संबंधः किंतु तु जिनैवेति तपचिविनिरूपिताश्रक्तिरूपाश्लोदनपदा
र्थे किंतु सामर्थ्याद् द्वितीयांतौदनपदार्थस्तत्र गम्यते इति केषांचिन्मतमिति तदर्थेऽस्मलं अराख्यातवाच्यक्रियायाः प्रा
धान्यात्तां प्रत्येव तत्तोपस्थितानां सर्वविशेषणानां तु तासां परस्परं संबंधः गुणानां च परार्थत्वादिति न्यायात् अत एवा
नियतः प्रयोगः स्नात्वा तु नु त्वा पीत्वा व्रजति पीत्वा नु त्वा स्नात्वेसादिक्व आवाह्य षोडशोपचारैः प्रजयेदित्यत्रोक्तसंबंधे
नावाहनविशिष्टे पूजने षोडशोपचारैरित्यस्य करणत्वं तेनावाहनस्य षोडशोपचारांतर्गतत्वेपि न दोषः दक्षिणेन गम्ये
र प्राप्य गंगा पर्वते ऽस्मादेऽपरावस्योगेचेति त्वा प्राप्यते ऽस्याहारः अप्राप्येत्यस्य दक्षिणदेश आम्रपुरुषकर्तृका नदीका
र्मिका प्राप्तेरोपितप्राप्तिरर्थः सा चोत्तरकालिकत्वेन पर्वतकर्मकप्राप्तिरर्थः सा चोत्तरकालिकत्वेन पर्वतकर्मकप्राप्तिक्रि
यान्वयिनी अत्र पर भूतन घा अप्राप्येत्येतद् द्वारकः संबंधः एवमतिक्रम्य पर्वतं नदीत्यत्रापि व्यायोगः तु त्यक्तिकात्वावधि

त्वदर्शितेऽदेशस्य पुरुषकर्तृकपर्वतत्वकर्मकप्राप्तिध्वंसोत्तरकालिकी नदीप्राप्तिरिति बोधः तेनोत्तरयत्र क्रमेण प्रागभावस
मानाधिकरणत्वं ध्वंससमानाधिकरणत्वं चेत्तरप्राप्तौ फलत्वे क्वचित्स्यात्तानुक्रियाया एव परावरयोगः यथा वेर्मासमि।
ति विग्रहस्य अविकशाष्टादुत्पत्तिरित्यत्र परत्वादिकमत्र लोकव्यवहाराद्देववद्ध्विकमित्यत्र विस्तरः इति कृदर्थविचार
अथ प्रातिपदिकार्थो निरूप्यते तत्र घटादिपदेभ्यो घटत्वादिविशिष्टव्यक्तिबोधोऽनुभूयते तत्र यद्यपि शक्तिपरिच्छेद
केषु मुख्येनान्वयनान्वयनाद्यात्मकव्यवहारेण व्यक्तावेव तत्परिच्छेदस्तथापि व्यक्तिग्रहो संभवी तासामानंत्यात् य।
त्किंचिद्व्यक्तौ शक्तिग्रहात्तद्विषयव्यक्तेः तदस्यापि शाब्दबोधानेनोपपादकस्यापि ज्ञानापत्तिः तद्विषयकशाब्दे तद्विष
यकशक्तिग्रहस्य कारणत्वाभ्युपगमे तत्र व्यभिचारश्च किंच हस्तिपकव्यक्तित्वं तदेहस्तिसंबंधग्रहश्च तत्र हस्तिपके सन्नगृ
हीतः तस्यापि हस्तिदर्शनेन स्मरणापत्त्या व्यक्तित्वं तदेसंबंधज्ञानस्य व्यक्तित्वं तदज्ञानाहेतुत्वात् किंच सर्वेषां शब्दानां व्य
क्तिमात्रबोधकत्वे गौः शुक्लश्चलो डित्थ इत्येषां सहप्रयोगानुपपत्तिस्तस्मात् जातिगुणक्रियासंज्ञाविशिष्टासु।
तज्जात्याद्यनुगतीकृतव्यक्तिषु शक्तिग्रहो वाच्यः तादृशशक्तिग्रहेण सकलव्यक्तिबोधदर्शनात् व्यक्तेः शक्य
तावच्छेदकातिरिक्तानवच्छिन्नविशेष्यताशालीजातिप्रकारकः शक्तिग्रह इति जात्याश्रयसकलव्यक्तिबोधसं
भवः एवं चैतदर्थं सामान्यलक्षणप्रत्यासत्त्यंगीकारो व्यर्थ एव किंच तदंगीकारे प्रमेयत्वसामान्यलक्षणया।
धर्माणां धर्मिणां विशिष्टस्य च सर्वस्य तत्तद्रूपेण ज्ञानापत्तौ सार्वज्ञापत्तिः नच स्वरूपविधर्माश्रयत्वरूपव्याप्त्या सा १३२

मान्यधर्मप्रकारकमेव ज्ञानमिति न दोष इति वाच्यं प्रत्यासत्तेः प्रकारतयाज्ञानस्य कार्यदृष्टत्वात् किंचाविद्यमा।
नेन संबंधिना संबंधस्योपपादयितुमशक्यत्वेनाविभुज्ञप्तिग्रहासंभवस्तद्व्यस्य एवाविजातस्याश्रयत्वमाद।
यतउपपादने चक्षुःसंयुक्तेनाविपाकमरूपादेर्भाविचक्षुःसंयुक्तसमवायात्प्रसक्त्यापत्तिः विनश्यद्व्यस्य घ
टप्रत्यक्षवारणाय संनिकर्षाणां कार्यसहभावित्वेनैव कारणत्वावश्यकत्वेनात्रैव दृष्टविपरीतकल्पने मानाभावः
मम वेतगुणनाशाश्रयनाशकसामग्र्येव प्रसक्तेर्विषयस्यापि कार्यसहभावेन कारणत्वे गौरवं विनाशक।
लेऽव्यस्य सत्वे तेनापि कार्यकारणभावेन न निर्वाहः तत्काले तदसत्वे तु संनिकर्षस्यापि त्वभावः संबंधिद्वया
श्रितसंनिकर्षस्यान्यतरासत्वेऽनुपपादयितुमशक्यत्वात् वस्तुतो विनश्यद्व्यस्य घटः प्रत्यक्ष एव संस्कारसामग्र्या।
घटो नास्तीत्यादौ प्रसक्तियोग्यवर्त्तमानघटानामेवाभावप्रतीतिरिति सत्वं एवं च जात्यवच्छिन्नविषयकशक्तिमा
नु जातिशब्दः गुणाद्यवच्छिन्नविषयकशक्तिमान् गुणशब्दादिरिति भवस्या तत्र विशेषणविशेष्ययोरन्यनयोर
पि शक्तिः शक्यतावच्छेदकत्वं च शक्यैकदेशे प्रकारत्वं हस्तिपकत्वादावप्यारोपेण गृहीतहस्तिसंबंधात् हस्ति
नोऽदृष्टेर्हस्तिपकत्वेनोपस्थितिर्विशेषणविशेष्ययोरन्यतरस्य धर्मस्यान्यतरशक्तोपेण विशेषणत्वादिकमेवदी
त्तं अतएव त्रिशवीध्वलन इत्यादौ विशिष्टस्य ध्वंसेऽन्वयः कारकविशेषणे च गुणादौ कारकत्वं पदार्थसंबंधग्रहविशे
ष्यत्वस्य संबंधिनाननियामकत्ववत् तदवच्छेदकत्वस्य धर्मिज्ञानानियामकत्वं यथा हस्तिपकादौ हस्त्यादिसंबंधग्रा।

मं॰ मू॰ हस्यहेत्तिपकत्वादिनोपस्थितौ नियामकत्वं अत एव दंडात्तु घटत्वेन घटस्य घटाख्यदंडत्वेन दंडस्योपस्थितिः एतेन
१३३ शक्यतावच्छेदके पि शक्तिरित्यपास्तं फलाभावात् यथा च शक्तिग्रहे शक्यतावच्छेदकानुगमीकृतसकलव्यक्तिभान
मेव शाब्दबोधे पि तदनुगतसकलव्यक्तिभानं न ब्राह्मणमित्यादौ एकवचनं तु शक्यतावच्छेदकगतसंख्यां विशे
ष्ये आरोप्य प्रयोगान्नानुपपन्नं शक्यतावच्छेदकत्वं शक्यनिष्ठाया विशेष्यतातदवच्छेदकताख्यप्रकारतया भास
मानत्वं घटादिपदशक्तिग्रहे च घटत्वादेरेव तत्वं न द्रव्यत्वादेरिति न तेभो द्रव्यत्वादिप्रकारको बोधः द्रव्यादिपदाच्च
न घटत्वादिप्रकारको बोधः अत एवाकाशपदस्य शब्दाश्रयत्वे शक्त्यभावे पि न तद्रूपेण बोधः तद्विशिष्टविष
यकसंबंधग्रहस्यैव तद्विशिष्टविषयकज्ञानहेतुत्वादिति मणिकृतोक्तं वस्तुतस्तत्राकाशत्वमखंडोपाधिरूपं ता
स्यद्रूपं वा जातिरूपं वा शक्यतावच्छेदकं तेनाकाशः शब्दाश्रय इति प्रयोगोपपत्तिः तदुक्तं सरूपसूत्रे भाष्ये द
व्याभिधानं व्याडिरिति एतत्पक्षे जातेरुपलक्षणत्वेनाश्रयलक्षणा स्यादित्युक्ते नेदं द्रव्यमात्रं विशिष्टजातियुक्तं श
ब्देनोच्यते इति कैयटः अत्र पक्षे योयः शब्देनोच्यते स सर्वो विद्धधर्मयुक्तः कश्चिन्मुख्यतद्धर्मयुक्तः कश्चिदुप
चरिततद्धर्मयुक्तः तदुक्तं वल्लूपलक्षणं यत्र सर्वनाम प्रयुज्यते द्रव्यमित्युच्यते सोर्थो भेद्यत्वेन विवक्षित
इति इदं तदिति सर्वनामपरामर्शयोग्यं द्रव्यमित्यर्थः अत इति यत्प्रतीयते तद्द्रव्यमिति निरुक्तोक्तेः ल
क्षणांतरमाह नेघत्वेनेति किंचिन्निरूपितविशेष्यत्वेनेत्यर्थः विवक्षित इत्यनेन शब्दार्थस्येदं लक्षणं इत्यु १३३

क्तं एवं च जात्यादेरपि विशेष्यत्वविवक्षायां ऽव्यक्तत्वमेवेति इदंतार्थे कि यथा अपि किमादिभिः परामृशाक्तिमुख्यमिस्या

द्विभिविशेष्यत्वाद्वशिष्टां तेसंख्याया विशेषणाद्ध्र ऽव्यक्तत्वमेवेत्यपि प्रतिसिद्धं चेत्पादौ तु सामर्थ्यात्तंत्रांतरप्रसिद्धऽव्य

ग्रहणमिति हेलाराजः अन्येतु जातिरेव शक्या नयत्र शक्तिकल्पने व्यक्तौ शक्तेर्जातौ तत्रावच्छेदकत्वस्यवाकल्पने

गौरवात् युक्तं तरमपि शक्तिवादांते उक्तं व्यक्तिज्ञानं तु शक्तिग्रहविशेष्यत्वात् भवतत्रावच्छेदकत्वेन जातिमान

वत् शक्तिग्रहस्तु गो गौपदशक्य इत्येव मयत्वभीध्वस्त इति वन्नागृहीतविशेषणा बुद्धिर्विशेष्य उपजायते

इति न्यायसहकृतत्वलाघवेन जातिमात्रेपक्षा जातिविशेष्यक एव शक्तिग्रहः गौर्गौपदशक्य इति ज्ञाना वे

वशक्तावप्येवमेवाभिलापात् जातेराश्रयावियोगेपि तस्याः केवलायाः शब्दवाच्यत्वं यथा मुखस्य स्वस्था

नावियोगेपितल्लादेर्दृश्यमानस्य मुखपदबोध्यत्वं तद्वत् शक्यतावच्छेदकं तु शब्दगता जातिः शब्दार्थयोस्ता

दात्म्ये न तद्गत जात्योरपि तत्त्वात् यद्वा जातिगतो धर्मस्तथा विनापि संकेत विषयतां सामान्येन संबंधनियमा

त्वसहचरिता व्यक्तिर्जातिर्विविधा नहि यथा चक्षुरादीनि रूपादिज्ञानागृहीतान्यपि चाक्षुषया भीत्यनुव्यवसाये

गृह्यंते तद्वदिति हरिग्रंथे स्पष्टं मात्रस्तु वाच्य क्तौ नाभिसाकूः तदुक्तं तत्रैव भाष्ये आकृतिं वाजप्यायन इति व्यक्ते

रज्ञानेपि आनयनादिक्रिया तत्र केवलायां असंभवंती व्यक्तिसाहित्येन निष्पाद्यते तदुक्तं स्वरूपसूत्रे तद्धितार्थे

तिसूत्रे च भाष्ये आकृताभावस्वनादीनां संभवो नास्तीति कृत्वा तत्सहचरिते ऽव्ये ऽभविष्यतीति यथाग्निरानी

यत्तामिसुक्तेकेवलस्यांगेनानयनासंभवादबोधितमपिपात्रमानीयते एतदेवाग्रेणानयनंयस्मात्रस्यस्य तथात्कृता।
वारंनणादीनिचोपमानानिसामर्थ्यात् साहचर्यादंडमसज्ञिनि विज्ञातेसर्वएवाकृतेः क्रियायोगोगं तनीविनंडयायाएवे
तिडघटानकःसंपद्यतेइतिकैघटःसाहचर्यंचसंबंधः आकृतेरारंनणादिभिः शास्त्रेन्वयस्तुवोधेवाधस्याप्रतिबंधका
त्वादारोपेणवोपपाद्यः ऽन्यगतलिंगसंख्यादिश्वतद्धतनेदत्तोपेणगोधूगोम्बेसादिसमुच्चयोपपत्तिः कदाचिदेकेनैवशा
द्धेनऽन्यगतद्धित्वादिसत्वेनयनीतिरित्यायूह्यं हरिश्चाहव्यक्तोकार्योणिसंसष्टाजातिस्तुप्रतिपद्यतेइतिकेचित् व
स्तुतस्तुसंबंधात्स्यतव्यक्तेर्नानमित्येवन्याय्यं अतएवसरूपसूत्रादिस्थभाष्येएकवाक्यता तसाद्धेतमाद्देविशेष
णतयानानंइतिवक्ष्यतेगोत्वादिपदेजातिरेवधर्मीतद्धतिधर्मेचगोत्वादिपदानांशक्तिरतस्तत्रनकदापिगोव्य
क्तिविशेष्यकोवोधः नापितद्विषयाक्रियायतस्तैर्गवाद्युपलक्षितगोत्वादौइतरपदार्थसंबंधवोधनंप्रकृत्यर्थस
चयस्ययार्थेप्रायेणोपलक्षणत्वमेव अतएवोपगवमानयेत्युक्ते नोपगोरानयनं उपलक्षणत्वंचोपलक्ष्यविषय
क्रियाऽविषयत्वमेव सहचरितांव्यक्तिं जातिर्विशिनष्टीतिपदेजातिप्राधान्येएकवचनं तद्रूपेलमिसादैससमाहा
रद्वंद्वश्वतासर्वग्राहकःपरस्पसुस्पत्कंइसादौव्यक्तेः प्राधान्यंजातेर्विशेषणता शुक्तःपटःघटःपटोनेसादौचशा
वलेयस्यगोर्घटोनित्सइसाद्युतनिधानान्न एवमेवघटोनऽस्मितिन यद्याजातिव्यक्त्योरव्यतिरेकात् जातेरेवप्राधा
न्येपिनवाहाद्यन्वयानुपपत्तिः अतएवगवादिशास्त्रार्थोनामाश्रयगतलिंगादिग्राहिता तदप्युक्तंतद्धितार्थेतिति १३४

सूत्रे भाष्ये ऽथवा ऽव्यतिरेकाद्द्रव्याकृत्योः ईश्वानयनमिति गोत्वपदजन्यगोत्वबोधे तु नेदं प्रधानतादात्म्ये न व्यक्ते र्वि
शेषणत्वमिति न गोत्वं वाहयेत्यादिप्रयोगः एवमेव परः शुक्लः ऽत्याद्यै गुणिगतलिंगादिग्राहिता शुक्लादिशब्दानां पर
स्य शुक्लः ऽस्य तु नेदं स्यैव तत्र संबंधत्वात् यदा जातिव्यक्त्योर्भेद एव विवक्षितो वा हार्योः सममभिव्याहारो जातेः प्राधान्यं च तदा
भावप्रधानो निर्देशः इति व्यवहारः स्वयथाभिधानमिति नातिप्रसंगः तदुक्तं जात्याख्यायामिति सूत्रे भाष्ये जातिशब्देना।
जातिरभिधीयते ऽथमपि कथं पुनर्ज्ञायते ऽथमपीति एवं हि कश्चिन्महति गोमंडले आसीनं गोपलकं पृच्छति अस्त्य
त्र कांचिद्गां पश्यसीति स पश्यति पश्यति चायं गाः पृच्छति च नूनमस्य ऽव्यं विवक्षितमिति यद्यदा ऽव्याभिधानं तदा व
हुवचनं यदा सामान्याभिधानं तदैकवचनमिति जातिशब्देनस्य जातिशक्तिग्रहविषये लक्ष्यार्थः ऽव्याभिधानमित्य
स्य ऽव्याणे देनाभिधानं विशेष्यतया ऽव्याभिधानं चार्थः सामान्याभिधानमित्यस्य ऽव्याद्भेदेन विशेष्यतयाभिधान
मित्यर्थः यत्तु बहुषु बहुवचनमिति सूत्रे भाष्ये उक्तं यदा गुणो गुणविशेषको भवति तदा नांतरेण भावप्रत्ययं गुणप्रधा
नो निर्देशः यदा तु गुणिना गुणो ऽपदिश्यते घटस्य शुक्ल इति तदांतरेणापि भावप्रत्ययं गुणप्रधानो भवतीति निर्देशः इति
तत्तु भावप्रधानता तात्पर्यग्राहकमात्रोपलक्षणं तथा सरूपसूत्रे ऽपि जातेः पदार्थत्वे तस्या एकत्वात् द्विवचनाद्य।
सिद्धिमाशंक्य व्यक्तिवादे वचनब्राह्मणं हन्यादि स्यादावेकं ब्राह्मणमहत्वा कृतीत्यादिस्यादित्याशंक्योक्तं न ह्याकृतिप
दार्थिकस्य द्रव्यं न पदार्थो द्रव्यपदार्थिकस्य वाकृतिर्नेयं पदार्थे न योऽनयं पदार्थः कस्यचित् किंचिद्गुणभूतं

मंजू॰
१३५ किंचित्तु प्रधानत्वमिति यथा पचतऽइत्यादौ क्रियाप्राधान्येपि साधनसंख्याकृतो वचनभेद एवमाकृतिप्राधान्येपि द्रव्यसं
ख्याकृतऽइत्यदोषऽइति कैयटः भनुस्मृतेपि कैयटः स्वाश्रयगतैकत्वसंख्याविशिष्टा जातिः कार्यैराश्रीयते यथा पशु॰
नायजेतेत्यादाविति पदार्थेऽइत्यस्य पदजन्यबोधविषयऽइत्यर्थः गुणत्वं तऽइत्यादिः स्वाश्रयिकत्वयेति शेषः कदाचि॰
त्स्यापि प्राधान्यं तु तात्पर्यग्राहकमापेक्षमिति तदाशयः द्रव्यप्राधान्येच क्वचित् जातिगतसंख्यया वचनं यथा न
ब्राह्मणमित्यादौ तज्जात्याक्रान्तसकलव्यक्तीनां च बोधऽइति बोध्यं द्रव्यभेदेन व्यक्तेर्विशेषणत्वेऽप्यभेदेन विशे॰
षणत्वे तु जातिसंख्यायामिति मतो रीत्या एकवचनमेव व्यक्तेः प्रकारत्वं च निरवच्छिन्नाया एव विशेष्यत्वं तु जात्या
वानुगमः न हि प्रकारित्वमेवानुगमकमिति तत्र मानमस्ति यत्तु समर्थसूत्रे भाष्यकैयटयोः कृतं वीरः पुरुषऽइत्या
दौ द्रव्यवादे तस्य भेदाभावात्त्वमिति न्यायो नामैकार्थीभावकृतं सामर्थ्यमित्याशंक्य वाच्यमपि द्रव्यं धारीकृत्य यथा
विशेषणविशेष्यभावो जातिवादे एवं द्रव्यवादे वाच्यगुणकृतभेदमाश्रित्य तऽउपपत्तिरिति तत्र वाच्यमित्यस्य॰
शक्यविषयऽइत्यर्थः शुद्धद्रव्यवादस्त्वनुपदमेवोपपादयिष्यते घटो घटऽइत्यादौ विशेष्यविशेषणभावाप्रती
तेः सोपि भेदमापेक्षऽइति तदाशयः जात्याकृतिव्यक्तयस्तु पदार्थऽइति गौतमीये सूत्रे तु वार्तिककारो व्याह तु शब्दे
विशेषणार्थेः किंच विशेष्यत्वे प्रधानोपसर्जनभावस्यानियमेन पदार्थत्वं यदा भेदविवक्षा विशेषगतिश्च तदा
व्यक्तिः पदार्थो गं जात्याकृती यथा गौर्नास्ति इति गौर्गच्छतीति तयोः स्थानादीनामसंभवात्त्वात् पदार्थः यदा पुनर

तदेवविवक्षितः सामान्यगतिश्च तदा जातिः पदार्थ इतरे विशेषणं यथा गौर्न पदा स्प्रष्टव्य इति अत्र सर्वा
व्यक्तिलाभाय एकवचनोपपत्तये च जातिः प्रधानं तस्याः साक्षात्स्पर्शत्वं न वानुषङ्गेण भेदविवक्षा वोध्यापि
शृङ्कमयोगाव इत्यत्राकृतिः वैयाकरणनये आकृतिः शक्येति स्फोटवादे निरूपितं केचित्तु पिष्टकमय्यो ।
गाव इत्यत्र शाब्दज्ञानानुपपत्तिर्वस्तुशून्यं विकल्पात्मकं ज्ञानं वा तंज लोक्तं वस्तुशून्यमित्यस्य वाह्यवस्तुशून्य
मित्यर्थः वाधज्ञानाबाध्यत्वाच्च मिथ्याज्ञानादस्य भेदः वाधज्ञानसत्त्वेपि शाब्दव्यवहारस्य तज्जन्यज्ञानस्य च
जायमानत्वात् तदुक्तं असंतामसमपि ह्यर्थे ज्ञानं शाब्दः करोति हो तिइत्याहुः अपरे तु धर्ममुपलक्षणीकृत्य श
क्तिग्रहो वस्तुतस्तद्धर्मो कृतिविशिष्टा व्यक्तिर्बुध्यते न तु तद्धर्मप्रकारेणेति व्यक्तिवादः प्रकृष्टप्रकाशश्चंद्र
इति वाक्यतोपि वस्तुतश्चन्द्रविशेषणविशिष्टव्यक्तेः स्वरूपेणोपस्थितिः यथायः सदेवदत्त इत्यादौ कुण्डलवान् स उ
पलक्षिते शक्तिग्रहेपि देवदत्तपदजन्यबोधेन तज्ज्ञानं तथा जात्यादेरपि एतदेव जात्यादेरुपलक्षणत्वं या
त्वाश्रयाणां सर्वेषां स्वरूपतः शक्तिग्रहविषयत्वं संपाद्य स्वयं शक्तिग्रहाविषयो बोधाविषयश्च यथा काक
वन्तो देवदत्तगृहा इत्यादौ काकः स्वोपलक्षितोत्तरणत्वादिना तद्गृहमितरेभ्यो व्यावर्तयति तथा जातिर्व्यक्ती
रुपस्थाप्य स्वोपलक्षितानि तानि शक्तिमितरेभ्यो व्यावर्तयति घटत्वाश्रयो यः स घटपदशक्य इति शा
क्तिग्रहस्तस्य तदेन विशेषमात्रपरामर्शः घटो घटपदशक्य इत्यस्याप्ययमेवार्थः एतदेवाभिप्रेत्योक्तं मया

मं॰ऋ॰ १३६

येइतिसूत्रे धावतः पतितइत्यादौ अशक्यत्वमाशंक्य सतोप्यविवक्षायाः समाहितं स्मरणोपलक्षितं द्रव्यमात्रमत्र विव
क्षितं निमित्तं कैयटः तदुक्तं भाने स्येपि हि भावनामेकं कृत्वोपलक्षणं ग्राह्यः सुकरः संबंधो न च व्यभिचरिष्यतीति हरिरप्याह
अशक्यत्वेन निमित्ते तद्देवदत्तगृहं यथा गृहीतं गृहशब्देन शुद्धमेवाभिधीयते इति शुद्धमेव न तु उपलक्षणीभूतकाकवि
शिष्टमित्यर्थः तथाऽस्मत्सोपाध्युपलक्षितं तं मत्समुपाध्यनादरेणैव शब्देनाभिधीयते इति हेलाराजः न च ब्राह्मणमित्या
दौ ब्राह्मणत्वोपलक्षितत्वस्य सर्वव्यक्तिषु सत्त्वात् न दोषः यद्वा रूपसामान्यात् सर्वव्यक्तिषु हननिषेधादि तदुक्त
मइउणिति सूत्रे भाष्ये रूपसामान्याद्वा सिद्धं वा लस्यादृक्शक्तिग्रहो वीरुह्गोपदवाच्य इति अत्रापि पक्षे शक्ति
ग्रहे भासमानोपलक्षणकरूपेण द्रव्यस्य नेदमानस्य वीरपुरुषइत्यादौ समानासः वीरपदेनापुरुषस्यापुपस्थि
स्या तयोर्न पर्याय तानन्तो व्यक्तिमात्रबोधकत्वं हि पर्यायत्वमिति वदंति अयमविपक्षः समर्थसूत्रे भाष्ये स्पष्टइ
ति समासवादे वक्ष्यते यत्तु जातिपक्षे गवादिपदानामन्यत्र शक्तिः शक्तिग्रहकार्यकारणभावे च जातिप्रकारक
त्वस्यैव निवेशो न तु व्यक्तिविशेष्यकत्वनिवेशः अत एव व्यक्त्यंशो कुब्जा शक्तिः तदंशे तज्ज्ञानानपेक्षणात् ए
तावतैव जातौ शक्तिरिति व्यवहार इति तदपि न गौरवात् किंच सामान्यलक्षणाखंडनाय हृद्यं प्रकारस्य शाब्दबोधं का
र्यतावच्छेदककोटौ विशेष्यांशानिवेशो गोत्वेनाश्वादिबोधापत्तेः न च प्रकारताविशेष एव निवेश्यत इति वाच्यं तस्य
गोनिष्ठविशेष्यतानिरूपितेति शब्देनैव बोधनीयतया दुर्वचत्वात् तन्निवेशे तु गोव्यक्तौ तरबोधो न स्यात् तन्नि। १३६

ष्टविशेष्यतायां तन्निरूपकत्वाभावात् यदि तु विशेष्यांशे विशेष्यतायाः प्रकारातिरिक्तानवच्छिन्नतया निवेशा
न्न तत्र तद्दोष इति विभाव्यते तदा वृथायं प्रयासः किंच घटत्वावच्छिन्नं सर्वं प्रतिदंडकारणताग्रहो विमतं कुक्करीत्वे वस्तुग्र
होनन्नत्र कुक्करीत्वे सत्वं यत्तु कुत्सित इति सूत्रे भाष्य उक्तं स्वार्थमभिधाय शब्दो निरपेक्षो द्रव्यमाह समवेतमिति ।
तस्यायमर्थः स्वार्थं जात्यादिम् अभिधाय तद्विषकाभिधाग्रहविषयोभूत्वा शब्दः प्रातिपदिकरूपः तदितरनिरपेक्षः
समवायेन संबद्धं द्रव्यमाहेति अभिधायेत्यस्य प्रतिपाद्ये स्वार्थे क्त्वोनुपपत्तिः शाब्दतो जातिद्रव्ययोः क्रमेण बोधाननुभवा
त् प्रत्यक्षदृष्टक्रमस्यारोपे इत्यपि न युक्तं आश्रयातालिंगनजातिप्रत्ययस्यानुनवच्छिन्नत्वेन तत्राविवस्तुतः
क्रमाभावात् नद्रासु जात्याः अक्त्याक्षेपः विशेषणत्वे वैशिष्ट्ये नैव जातौ पदानां शक्तिग्रहात् विशेषणत्वानुपप ।
त्ता विशेष्यव्यक्तेराक्षेपः त्वादिरहितपदबोध्या जातिर्व्यक्तिविशेष्यकबोधविषयः विशेषणतयागृहीतशक्तिक
त्वादित्यनुमानं यत्तु जातेर्निर्विकल्पकोपस्थितिः निर्विकल्पके इन्द्रियवत् शब्दोपि कारणं शब्दस्य तु नवोपि जात्यं ।
शे निष्प्रकारकएव गोत्वं किंचिदाश्रितं जातित्वादित्यनुमानं पदप्रयोज्यायाश्चोपस्थितेः शाब्दकारणत्वान्नव्यु
त्पत्तिभंगः सति सास्ये यो धूमो यं ज्वलतीत्यतो वह्निर्ज्वलतीति बोधो नवत्स्ये वायमेवाक्षेप इति तन्न तादृशाहेतूपस्थि
तेरसार्वत्रिकत्वात् शाब्दतो जातित्वेनानुपस्थितेः अर्थापत्तेरपि नावसरः अनुपपत्तिज्ञानमन्तरेण विबोधात् समा ।
नसंवित्संवेद्यत्वमात्रेपि न युक्तं स्वर्णकरकादिषु गृह्यमाणेषु तेजस्त्वजलत्वपृथिवीत्वसंशयदर्शनात् इ

मं.मू.० अमितिघटज्ञानेघटत्वज्ञानानाभावात् घटत्वपदजन्यजातिज्ञानेविशेषणतयाअवच्छेदकनाभानाच्च किंचगवादिविशिष्टो
१२७ नचगोत्वस्यसमानविषित्वेघटत्वेविगोगोत्वविशिष्टानीतिसमूहालंबनमेवस्यान्नविशिष्टबुद्धिरित्याऽऽस्य
त्तत्वात्स्यादिप्रतिसंधानंविनापिबोधात् एतेनजातिशक्तस्यकाक्षौलक्षणेत्यपास्तं अनुपपन्निप्रतिसंधानंवि
नापिबोधात् क्वचित्त्वाक्यार्थमात्रबोधकपदस्यैवाक्यलक्षणायाद्दृष्टत्वाच्चनचैवंप्रकृतेऽन्यथोपपत्तेश्च्छेस
लं तत्रगवादिशब्देनगवादीनांप्रतीतौवाकदाचित्सास्नादीनांप्रतीतिःमानुमानिकोवेत्यन्येत्वागृह्येवेत्यपरेजल
तैलादयःशब्दास्त्ववयवावयविसाधारणाःयदात्वौषधादिसंस्कृतेपरिच्छिन्नेतैलादयोव्यवस्थितास्तदावि
तेवयवंसमुदायरूपारोवेलाऽऽस्मदादिप्रायेणनाप्येवक्तं समुदायेदृष्टाःशब्दाअवयवेपिवर्तंतेयथातैलंभु
क्तंइत्यादिना एवंगुणिपरशुक्लादिगुणशब्दाः नचानंसं शुक्लादिगुणनामेकत्वनियमत्वस्वीकारात् आ
श्रयभेदोपाधिकस्तुभेदव्यवहारःएकोपिसावयवःअतएवाल्पत्वमहत्वकृतोभेदःयद्वैकमखंडनैर्मल्यादि
गुणानांनरसंमिश्रलेमहत्त्वमन्यथाल्पत्वमितितन्नसूत्रेनाप्येस्पष्टं क्रियाख्येवमेकानित्याचउत्पादविनाशौसं
बंधस्यैवपच्यादिशब्दावाविपाऽऽग्रवधमनेनफलजनिकामैकेवक्रम्यामांनुतादृष्टात्पाकत्वव्यवहारोगौलः ए
कपरशुक्लापरपटशुक्लगुणयोःप्रत्यभिज्ञानावस्तुआरोपितभेदकृतःक्वचित्तस्येवतथाप्रत्यभिज्ञा गुणप
देषुतद्गतजातिःपाचकइत्यादेःपाकक्रियासंबंधवत् कर्तरिशक्तिःक्रियापचेरकस्यकर्तोराकाः संबंधोवि १२७

त्रिष्टत्राक्य: संबंधश्च क्रियाकारकभावइतिमूलेभावशब्देन प्रवृत्तिनिमित्तमेव अत एव ततः स एव तत्र प्रवृत्तिनि-
मित्तं प्रवृत्तिनिमित्तत्वं च यत्नु ज्ञाना च्छब्दप्रवृत्तिस्तत्त्वं तस्य भावइतिमूले भावशब्देन प्रवृत्तिनिमित्तमेव अत एव त-
तः संबंधे भावप्रत्ययः शब्दप्रवृत्तिश्च कचिद्धर्मस्वरूपज्ञानात् क्वचित्संबंधज्ञानादु इति मूलस्थं तस्य भावइत्यत्र कैयटे
तत्र जातिगुणयोर्लौकिकनिरूढत्वात्सोयमितिप्रतीत्या भेदनिबंधनसंबंधस्य तिरोधानात्तु न तत्र संबंधे भावप्रत्ययः
क्रियायास्वरूढं तेनेदमेवं नियमेन प्रतीतेस्तत्संबंधज्ञानादेव शब्दप्रवृत्तिरिति तत्रैव भावप्रत्ययः क्रियाकारकयो॥
र्भेदाभेदाविति मते तिङंतेषु युष्मद्युपदे समानाधिकरणेऽस्मुक्ते भेदतिरोधानं अत्र च शब्दशक्तिस्वभाव एव बीजं
अत एव कृत्तद्धितसमासेभ्यः संबंधाभिधाने भावप्रत्यये नेत्युक्त्वा पाचकत्वमित्युदाहृतं हरिणा क्रियाप्रवृत्तिनिमि-
त्तकस्य स्य क्रियासंबंधप्रवृत्तिनिमित्तकस्येवार्थः जातिगुणक्रियायदृच्छेति चतुष्टयी शब्दानां प्रवृत्तिरित्यत्र क्रि-
यापदं संबंधप्रवृत्तिनिमित्तकशब्दोपलक्षणमिति तन्न्यूनतायदृच्छाशब्दादित्यादयः कास्योन्नादयश्च तत्रडि॥
त्थादिषु एकद्व्योर्वचनमिति वेति संज्ञाभूतेषु व्यक्तिरेकव्याख्यानं स्य व्यभिचारयोरभावात् प्रातिपदिकमात्रादर्थवो-
धाभावेन सुबंताद्भस्वादेरेव प्रकारतया भाने न नतो निर्विकल्पकं न च डित्थत्वमित्यादौ स्वार्थाभावेन
त्वाद्यनुपपत्तिरिति वाच्यं व्यक्तेरेव प्रकारताविशेष्यतारूपविषयताद्वयेन भाने न प्रकारत्वावच्छिन्नाया व्यक्ते-
र्वत्वाद्यर्थत्वात् जात्यतिरिक्तधर्मांशेप्रकारतायाः सावच्छिन्नत्वनियमस्तु नेद संबंधावच्छिन्नप्रकारतायाः॥

मं.जू.० वेति न कश्चिद्दोषः यद्वा तत्तत्प्रकृतिः शब्दपराविशेष्यभूतोऽर्थ एव तद्वाच्यार्थः डित्थडित्थत्वपदयोश्च पर्यायता य
१२८ त्तु वाच्यत्वस्याभेदेन शरीरभेदात्तद्वृत्तिडित्थत्वादिजातिः सैव तद्वाच्यार्थ इति तन्न लोके तत्र भेदव्यवहाराभावे
न तादृशोपाधिभेदेन भेदे प्रमाणाभावात् आकाशे तु घटाकाशमठाकाशादिति लोके भेदव्यवहारेण तत्रौपाधि-
कभेदसिद्धिः अन्यथैकस्योपाधिभेदेनानास्यासंभवापत्तिः एतच्च तस्मिन्नावशतिम त्वेनाख्येस्पष्टमिति शक्तिवादे
निरूपितं तद्भिन्नवादे निरूपयिष्यते च श्वादिपदानां कादीनामेकत्वमते पंचादिगतजातिरेव शक्यारूपवान् क्रिया
वान् इतिपदयोः शक्तिग्रहे सर्वथा तयोर्दुर्वारत्वात् शुक्लादीनामप्यनेकत्वमिति पक्षस्यापि तमस्त्वेनाख्ये सत्वे
न तत्रापि तयोः सत्वाच्च उक्तं चैतत् अन्यथोत्कर्षाद्यघटादीनामपि नित्यत्वाद्यापत्तिः किं चैकत्वेऽप्यौपाधिकभे
दसत्वे ततोऽविशेषे पाचकादिषु संबंधप्रवृत्तिनिमित्तकेषु संबंधिप्रतियोगिक्रियागता जातिः शक्या गुडतंडुल
पाकेषु भिन्नेषु पाकः पाकोऽस्त्यनुगतव्यवहारेण पाकत्वस्यैक जातिरूपस्यांगीकारात् एवमन्यत्रापि डित्था
दावपि डित्थादिशब्दगत जातिः शुकाद्युच्चारणभेदेन डित्थादिशब्दानां नानात्वात् तद्व्यवसायात्तु वा गुणादि
गतजातेः परंपरयाऽव्यवृत्तितयाऽव्यवबोधनिर्वाहः साक्षात्संबंधप्रवृत्तिजातिबोधजनको जातिशब्दः गुणादिवा
रकपरंपरया तद्वृत्तिधर्मबोधजनका गुणादिशब्दा इति न च तु रूपीशब्दानां प्रवृत्तिरिष्यमहानिरिसारूः एवं च
शुक्लादयश्च त्यन्तशब्दात्मकागुणगुणिनिष्ठ आद्ये पुंस्त्वमेवान्त्ये विशेष्यनिघ्नता गुणे शुक्लादयः पुंसि गुणि- १२८

लिंगास्तु गंधवतीति कोशात् गुणिनि लक्षणेति तु तयुक्तं मानाभावात् लाक्षणिकानां कोशेऽनुपादानाच्च रूपादिश्चा।
श्रवाच्यस्यानुशासनशक्तिस्वभावान्न गुणपदेनेदमापन्नमिति बोध्यं जातिमत्तो गुणगुणपादे श्च समवायः संबंधः सम
वायो पृथगभावोऽद्रव्यादीनां गुणैर्मतः सनित्योयत्र हि द्रव्यं न तत्रानियतो गुण इति चरकेप्युक्तेः तत्र समवाय
इति लक्ष्यं अपृथगभाव इति लक्षणं अयमहैवावस्थानं अयमेवायुतसिद्धिः द्रव्यादीनामाधारभूतानां गुणैराधेयैः
समं संबंधो मतः संबंध इति शेषः तेन पृथिवीत्वगंधयोर्नैव संबंधः आधाराधेयत्वाभावात् आधाराधेयभावश्च तयो
रनियतः तंतुषु पटः पटे तंतव इति वृक्षे शाखेति च व्यवहारात् समवायो नित्यः किं सर्वत्र नेत्याह यत्रेति नित्यमिति शेषः
तत्र नित्य इत्यर्थः हि यतस्तत्रानियतेऽनित्यो गुणो न अतो नित्य द्रव्यतद्गुणयोः समवायो नित्योऽर्थादन्यत्रानित्य इत्यु
क्तं एवं चानेकत्वमप्युक्तमेव एक एव द्रव्ये अनेकगुणकर्मादिनिरूपितो नैकस्तु न मानाभावात् किं त्वेक एव एताव
तैवैकः समवाय इति व्यवहारः केषांचित् तदुक्तं कणादेन तत्त्वं भावेनेति तत्त्वमेकत्वं भावेन सत्तायाव्याख्यातमि।
ति तदर्थः स चापृथक्स्थितिरूपः समवायः स्वस्वरूपेणैव तेषां भेदव्यवहारनियामकः अयुतसिद्धिः मूलकारणभेदा
द्भेदाभावा भेदव्यवहारनियामकोपि परः स्युतः पटस्य सुतः तंतुषु पट इति तंतवो वृक्षे शाखे स्यादि व्यवहारात्
तदुक्तं हरिणापि तत्त्वस्तु समवायाख्या शक्तिर्भेदस्य बाधिका एकत्वमिव तास्वक्षीरापादयति कारणेश्चिति तत्तत्कार्य
व्यक्त्यनंतरं भेदस्य भेदमात्रप्रतीतेः कारणैः अयुतसिद्धत्वेनैकदेशस्थित्यसादविभागरूपैरिसमर्थ इति हेलाराजः तत्रा।

नेदस्य लक्षणोऽवयवावयविनावोगुणगुणिनावादिसंबंधः षष्ठीवाच्य इत्येतावता समवायस्य संबंधत्वव्यवहारः लोके
ष्व एव यन्नावारोपात् तदाश्रये संघे समवायव्यवहारः तत्र च समवायपदस्यैव प्रवृत्तिनिमित्तं समवायाभ्युपगमाद्भ्रमाय ।
द तवस्थितेरिति आसमत्रंतु समवायस्यैव साक्षात्संबंधत्वमित्यर्थ एवं उक्तं तदर्थस्तु समवायसंबंधाभ्युपगमादपि ने
ष्टसिद्धिः अवयवैरसंतभिन्नोवयवी समवायसंबंधेन तैः संबध्यते चेत्तु समवायोपि समवायिभ्योऽसंतभिन्नः समवाये
नान्येन वा संबंधेन समवायिभिः संबध्येतासंतभेदसाम्यात् ततश्च तस्याप्यन्योन्यः संबंधः कल्प्य इत्यनवस्थितिः स
मवायस्य समवायिभिः सम्बद्धितावत्तासाक्षेदातवनासेन न मुख्यसंबंधत्वमतो न षष्ठीवाच्यत्वः संयोगोपि न षष्ठीवा
च्यः पदार्थयोजनामात्रहेतुः संबंधो हि षष्ठ्यर्थः संयोगस्तु नैवं तस्य स्वतः पदार्थत्वात् संयोगं पश्ये स्यादिव्यवहारात्
परस्परं संयोगे तावयवानामवयवभुस्याटकत्वे न वस्तुभूतकार्यकारित्वात्संबंधस्य तु न तत्वमिति स्पष्टमेवेति स्यहंह
रिहेलाराजग्रंथयोः कणादोपि इहेदमिति यतः कार्यकारणयोः स समवाय इति इहेति इदमिति च यत इत्यर्थः कार्य
कारणयोरित्ययुतसिद्धानामुपलक्षणं आद्यं मृदि घट इति अस्तं मन्तु घटे स्यादि क्रिया क्रियावतोरपि चैत्रो गच्छती
स्यादौ अभेदप्रतीतिः प्रसपार्थ कर्तुः क्रियया अभेदेनैवान्वयात् भेदसंबंधस्य शाब्दादनुपस्थितेः अयं समवायो बौद्ध
शब्दार्थयोरपि वक्तुं शक्यः अत एव तयोर्भेदाभेदव्यवहारः अत्रार्थेऽयं शब्द इति व्यवहारेण तयोरपि आधाराधारभाव
सत्त्वात् विमानखंडेऽप्युक्तं वादमार्गे न यायव्यगुणकर्मसामान्यविशेषसमवाया ज्ञातव्या इति परके यत्तु भेदसमा

नाधिकरणाभेदरूपंतादात्म्यसंबंधः अभेदश्चव्यासज्यवृत्तिधर्मानवच्छिन्नप्रतियोगिताकभेदस्यतादृशएवाभावोना
तिरिक्तः एतेनभेदत्वावच्छिन्नाभावस्यभेदप्रसिद्धिः भेदप्रतियोगिकाभावस्यभेदघटितत्वादिनावृक्षादौनीलभेदाभावस्याविप्र
त्वात् वह्निर्नीलइत्यादेरापत्तिरित्यपास्तमितितन्नतस्यसाधारणधर्मरूपार्थयोगिकेनतादात्म्यप्रवेशेनप्रवेशमर्यादया
तावतोऽर्थस्यालाभात् तत्राप्यर्थेस्फटिकल्पनायांतुगौरवमरूपस्यकल्पनाचसमवायात्समवैतीतिसूत्रेसमवायंसमर्थ्यप्रा
प्यतद्रेकदेशीश्वतीत्यर्थ इतिवृत्तिव्याख्यानेनउक्तवचकश्लोकेनचसमवपूर्वकेणसत्तरशक्तिः रूपासपदार्थस्यरूपए
वेतिनमेकिंचित्कल्प्यंकिंचभेदतदभावयोर्विरुद्धस्वभावत्वात्कथमेकत्रस्थितिः नचेकोध्वस्तः तत्वंकिंभेदस्यतदभावस्य
वाव्याप्यवृत्तितामाद्यः किमाद्यव्यवहारकर्तृईश्वरस्योतमुनेश्चौरजनानांवासर्वदाधुनिकस्यवाद्येसिद्धंतस्याव्यावहारिकत्वमि
तिनतयोर्वैषम्यं अंत्येतद्धासवदेवास्यापिव्यवहारनियामकत्वाभावापत्तिः स्वर्णकार्यदानेस्वर्णदानादिधर्माधिकाश्रव
णात्किंचभेदाभावः प्रतियोगितावच्छेदकधर्मरूपइतिरूपादौतस्याभासएववाच्यइतितस्याध्वस्तत्वापत्तौत्वत्सिद्धांत
भंगः अतिरिक्तत्वेतुगौरवंकिंचातिरिक्तोपितत्समनियतइतिनाध्यासंविनानिर्वाहः अतिरिक्तोऽसमनियतइतिचेदा
रूपस्तकल्पनायामस्वंतगौरवं अत्रग्रंथेयत्पूर्वंवक्रूतादात्म्यस्यसंबंधत्वमुक्तंतस्तेचतत्सरवामनयेक्षितोध्यं ए
तेनायुतसिद्धानांस्वरूपमेवसंबंधोनसमवायः तथाहिस्वरूपविशेषेषुसंबंधत्वमपिधर्मैः स्वीक्रियते प्रत्येकरूपेणा
वसंबंधितापतीत्यनुसारात् संबंधत्वेनचतत्संबंधिद्वयनिरूप्यत्वंविशिष्टबुद्धिनियामकत्वंषष्ठीबोध्यताआधारत्वा

दिनियामकताच तंतुषु पटः समवेत इति तद्विशिष्टबुद्धेः तथैव समेवोपपाद्यत्वात् एतेनाऽनेकेषु संबंधत्वकल्पनापेक्षया
समवाये तत्संबंधत्वयोः कल्पना लघीयसी सपास्तं समवायनिरूपितमनेकेष्वनेकं संबंधत्वं कल्प्यं निरूपकभेदेन संबंध
त्वं कल्प्यं निरूपकभेदेन संबंधत्वभेदे समवायेप्यनेकं तत्कल्प्यं समवायश्चैक्यस्येति गौरवात् संबंधिभेदेन समवायस्याप्यनेक
त्वेऽ इति गौरवाच्च संयोगस्य तु न घटभूतलादिस्वरूपेण स्वयासिद्धिः वियोगकालेपि तत्स्वरूपतादवस्थ्यो न विशिष्टबुद्धि
प्रसंगात् समवायस्थले तु सतोः संबंधिनोर्न कदापि वियोग इति न दोषः गुणगुण्यादेः सतः कदाप्यवियोगे न लोका
नां विवेकाग्रहात् पटः शुक्ल इति भेदारोपेण तु पटस्य शुक्ल इति एवं च घटादिशब्दानां जातिशक्तत्वेपि जातिव्यक्त्यो।
र्विवेकाग्रहात् न वाह्याद्यनुपपत्तिरित्यपास्तं कदापि संबंधस्य द्रव्यत्वादिना प्रतीतेश्च अत एव द्रव्यस्वरूपातिरिक्त।
सत्तादिजातिसिद्धिः तदुक्तं कणादेन द्रव्यत्वगुणत्वप्रतिषेधो भावेन व्याख्यात इति भावः सत्ता यथा न द्रव्याद्यात्मिका।
तथा समवायोपि विलक्षणबुद्धिवेद्यत्वात् इति तदर्थः ननु भावविषयः शक्तिग्रहे बोधश्च कथं न सामान्यलक्षणया
तदनुपपत्तेरुक्तत्वात् न च जातिप्रकारकशक्तिग्रहस्य स्वाश्रयविषयकबोधजनकत्वेन तद्बोधनिर्वाह इति वाच्यं।
बोधकालेऽसत्त्वेन तस्य जात्याश्रयत्वाभावात् तत्त्वेनाग्रहाच्च तादृशे सतेनार्थे न शब्दस्यापि संबंधाग्रहात् वचनं च।
सत्कार्यवादे कारणे कार्यस्य सूक्ष्मरूपेण सत्त्वान्नानुपपत्तिः सूक्ष्मरूपेण सत्त्वमित्यस्य कारणरूपेण सत्त्वमित्यर्थः
तस्य सदादिशब्दवाच्यत्वेपि घटादिशब्दवाच्यत्वात् घटत्वाद्याश्रयत्वाभावात् तदूहाभावाच्च नचैवं शाब्दार्थसंबं

धनिसत्ताहानिः नउत्पत्तिकालमेवशब्दसंबंधेनविद्यमानयोःशब्दार्थयोरवियोगात् तज्जातीयेव्यवहारनिसत्ता
त्वनिसत्त्वव्यवहारानुपपत्तेरतएवसतःसंज्ञासंबंधइतिवृद्धिरादैच्सूत्रेभाष्येउक्तंमावर्लिकोनाममनुर्नैवान्नुविनविष
तीसादौभाविलत्वेनबुद्धिस्थस्यभाविलत्वेनबुद्धिस्थसंज्ञाबोधइतिनदोषइतिचेन्नबौद्धस्येवशब्दस्तोबोधेनानुत्तेःघटकु
र्बित्यादेश्चबुद्धिस्थघटंवाह्यरूपेणकुर्वित्यर्थःयदितुविधौलक्षणानुचिताकिंचयत्रक्रियापिबुद्धिस्थैवोत्पाद्यत्वेनप्रती
यतेकंसंघातयतीत्यादौतत्रबौद्धपदार्थेननिर्वाहोनान्यत्रकिंचास्यसूत्रस्यशास्त्रकंवयेसादौबुद्धिस्थेएतत्सूत्रसंबंधान्ना
वानुव्यनुपपत्तिःमाष्टीत्यादौबौद्धाकारस्यवाह्यशास्त्रेविनुधानानुपपत्तिश्चेतिविनाश्यतेतदाघटादिपदानांतस्यव्यवहारि
ष्यमाणेलक्षणयायस्यजातस्यघटपदेनव्यवहारोभावीतंकुर्विति तदर्थःसत्कार्यवादाभ्युपगमाच्चनतत्रव्यवहरिष्य।
माणत्वादेनुरनुपपत्तिःयत्रार्द्धशब्दबौद्धस्यैवशास्त्रविषयत्वंबौद्धस्यैवतयोर्भेदाग्रहादेतत्सूत्रसंबंधोनानुपपन्नःएवा।
मेवबौद्धाकारस्यवाह्येशास्त्रेविधानमप्युपपन्नं वानमपिबौद्धमेवेतिबोध्यं इग्यणइतिसूत्रेभाष्येस्पष्टमिदंवृद्धिरा
दैजित्यादौतुसर्वेषांशब्दानांनिसत्त्वेनसर्वाकारादिषुविद्यमानेसत्कारीत्याशक्तिग्रहस्यबोधस्यचोपपत्तिःशा
त्वंतुसाधुत्वान्वाख्यानमात्रमितिप्रकारांतरमपिभाष्येउक्तं किंचविद्यमानघटेषुगृहीतशक्तिकस्यनाविद्यरो
स्यस्यानंतरंगृहीतशक्तिकघटसादृश्यान्नतत्रतसदशक्तिग्रहःतद्बोधश्च घटोनष्टइत्यादेरपितस्यव्यवहृत्तो
नष्टइत्यर्थोबोध्यःइदंतुबोध्यं यत्रकयाचित्संज्ञयोपस्थितमनेकमर्थमुद्दिश्यसंज्ञांतरंबोध्यते यथैवशास्त्रेने

सं.त.० कारौकारावृद्धिरूपवृद्धिसंज्ञा तत्र पदेशे पुर्वृद्धिपदादैच्त्वेनैव तयोर्बोधः अत एवानुदात्तङितः तङ् इति सूत्रे अनुदात्तङि
१४१ तौ ह्यात्मनेपदमित्यस्य तङानावात्मनेपदमित्युक्त्यौ तत्र संख्यातानुदेशः प्राप्नोतीति यथासंख्यसूत्रभाष्ये स्फुटं संगच्छते अन्य
था तङानां तदर्थत्वेन आत्मनेपदत्वेन बोधे एकत्वे न तत्तुल्यां वैषम्यानुपपत्तिः स्पष्टैव ऐच्त्वमैच्पदं ज्ञाति।
विशेषोऽवसेयम् एवं च वृक्षादिपदानां न पदं प्रवृत्तिनिमित्तं यत्प्रवृत्तिनिमित्तं तन्नरामं भवस्यैव पदस्य प्रवृत्तिनिमित्त
त्वात् यथा आदिपदे इत्यन्यत्र विस्तरः एवं लिंगमपि प्रातिपदिकार्थः न तु प्रत्ययार्थः प्राधान्यापत्तेः वागार्गिश्रेष्ठे ष्यो
विनापि प्रत्ययं तद्बोधाच्च लिंगानुशासनस्य प्रकृतावेव दर्शनाच्च अत एव स्वमोर्नपुंसकात् ह्रस्वो नपुंसके नपुंसकस्य
झलचः इत्यादिसूत्राणि संगच्छन्ते तस्माच्छसः इत्यत्र पुंसीत्यस्य पुंलिंगशब्दस्य प्रकृतित्वे इत्यर्थः स्त्रियामित्यस्य च तत्रा।
वर्तमानात् प्रातिपदिकादित्यर्थः प्रातिपदिकार्थेति सूत्रेऽपि लिंगे इत्यस्यापि तत्र वर्तमानादित्यर्थः प्रथमायां लिंगा
र्थकतायाः अभ्युपगमे तु घटे नेत्यत्र तत्प्रतीत्यनापत्तिः ननु स्तनकेशवती स्त्री स्याल्लोमशः पुरुषः स्मृतः इत्यादिल
क्षणलक्षितपुंस्त्वादेश्चेतनेष्वभावात् खट्वादौ टाबाद्यनापत्तिः किं च दारा इत्यादौ न स्यात् तस्मात्तदर्थे पुंस्त्वस्त्रीत्वाभावा
दिति चेन्न अत्र भाष्यकारः सत्त्वरजस्तमसां प्राकृतगुणानां वृद्धिः पुंस्त्वं अपचयः स्त्रीत्वं साम्यावस्थारूपं स्थितिमात्रं
नपुंसकत्वमिति अत एव सामान्ये नपुंसकं इत्युद्घोषः उत्कर्षापकर्षौ सत्त्वेऽपि साम्यावस्थारूपस्थितिमात्रवि।
वक्षायां नपुंसकत्वमिति तदर्थः एतदवस्थात्रयस्य पदार्थमात्रे सत्त्वादिदं केवलान्वयि इयं व्यक्तिरिदं वस्तु अयं प १४१

दार्थ इति व्यवहाराणां सर्वत्राप्रतिबद्धप्रसरत्वात् अर्थनिष्ठं च तत् तथा च भाष्यं एकार्थे शब्दान्यत्वाद् दृष्टं लिंगान्यत्वमवय
वान्यत्वाच्चेति पुष्यस्तारका नक्षत्रमिति शब्दनानात्वदर्शनात् तेन केशाद्यतिरिक्तमेव लिंगमर्थनिष्ठं कुटी कुटीर इत्या
दौ रेफस्यावयवस्योपजनने लिंगभेददर्शनाच्चेत्यर्थ इति कैयटः अत एवोपक्रमभाष्ये रूपरसगंधस्पर्शशब्दानां।
स्त्यानप्रसवौ लिंगमित्युक्तं नहि रूपादयः शब्दगताः पुंलिंगः शब्द इति तु वाच्यवाचकयोरभेदोपचाराद्बोध्यं अर्थो।
द्यजंतं वा तत् आत्मनि सर्वस्याध्यस्तत्वे न परंपरया तत्रापि स्त्यानादिमत्त्वादात्मा ब्रह्मेत्यादि व्यवहारोपपत्तिः नचो
पर्यायादेर्विरुद्धस्यानेकत्र समावेशाद् इति एकस्य त्रिलिंगता नापन्निरिति वाच्यं कोशभाष्यादिप्रामाण्ये न विरोधस्यैवा
भावात् उपचयादीनां विवक्षैव व्यवहारनिमित्तमिति तेषां नहि कश्चिदपि स्वस्मिन्नात्मनि क्षणमप्यवतिष्ठते व
र्धते वा यावद्दनेन वर्धितव्यमपायेन वा युज्यते इति भाष्यात् तात्त्विकत्वेपि न व्यवहारहानिः तत्र कश्चित् शब्द एक
लिंगविशिष्टार्थे एव शक्तः कश्चित् त्रिलिंगद्वयविशिष्टे कश्चित्त्रितयविशिष्टे इति लिंगानुशासनादिभ्यो निर्णेयं।
भावतत्त्वविदः शिष्टाः शब्दार्थेषु व्यवस्थिताः यद्यद्धर्मागता मेति तत्तल्लिंगं प्रचक्षते इति हर्युक्तेः तेषां प्र
योगादपि निर्णेयं अत्र स्मोक्तशब्दार्थेष्विति लिंगमिति च सर्वधर्मोपलक्षणं सप्तर्षयोऽथ मनवः प्रजानां प।
तयस्तथा सदाचारस्य वक्तारः कर्त्तारश्च महीपते इति विष्णुपुराणात् एवं मधुशब्देन पुंस्त्वनपुंसकत्वविशि
ष्टतया मकरंदादिकमेवोच्यते पुंस्त्वमात्रविशिष्टं तु चैत्रादिकमित्यपि तत एव निर्णेयं एषु चतुर्मादिशा

मं.मं.जू० १ ◼४२

ष्टानंतृष्णादिवच्छास्त्रीयःसंकेतःअवश्यंकश्चित्स्वीकर्तव्यःतांतत्रास्थेयइतिन्याय्यात् तत्रटिघुभादिवत्त्वग्घीसं
ज्ञायुक्तेतिगुरुसंज्ञाकरणात्तत्वादिशास्त्रप्रवृत्तौलौकिकमपिलिंगंनिमित्तत्वेनाश्रीयते पुंसादिसंकेता
नामसंख्यासंज्ञायाइवार्थोतरसंग्रहार्थप्रवृत्तत्वेपिअर्थान्तरनिराभार्थमपइन्नेश्वतत्रलौकिकेऽसंनवेशास्त्रीय
एवतत्संनवेतुसामानाधिकरण्यसंबंधेनशास्त्रीयविशिष्टेलौकिकेनतुकेवललौकिकेनापिशास्त्रीयेहरिश।
पिआविर्भावतिरोभावस्थितिश्चैतस्यव्यापिनः धर्मोमर्त्तिषुसर्वासुलिंगत्वेनव्यवस्थितः इत्याहततापिनेदंसवि
तं अपायित्वंप्रतिक्षणनश्वरत्वं अतएवपशुनायजेतेत्यादौपुंस्त्वस्यविवक्षितत्वात्स्त्रियागइतिमीमांसकात
त्रपुंस्त्वस्यतस्यलौकिकपुंस्त्वस्यैवार्थःपश्वानतापुंपश्वानयेतिरूपेवदेदर्शनेनपशुशास्त्रस्यनिसपुमर्थकत्वा।
भावनिर्णयात् छागोवामंत्रवर्णादितिषष्ठ्यांस्याधिकरणन्यायेनछागरूपपशुविशेषग्रहणेऽवमंत्रवर्णस्यलौकिक
पुंस्त्वविवक्षायांतात्पर्यग्राहकस्यसत्वाच्च छागस्यवपायाइतिमंत्रेछागस्येत्यस्यछागत्वेनस्त्रियामसंभवा
त् अदंतच्छागशब्दस्यलौकिकपुंस्त्वसमानाधिकरणपारिभाषिकपुंस्त्वविशिष्टेशक्तेः यथासारस्वतोमेषाविस्य
सत्रच्छिन्नप्रकृतिःशब्दःस्त्रीलिंगःपुल्लिंगोवेतिसंदेहेसंदिग्धेतुवाक्यशेषादितिन्यायेनएतत्द्वैदेव्यंमिथुनमित्या।
र्थवादादेकशेषेणद्वयोर्ग्रहणंनिर्णीयते शास्त्रीयमपिलिंगंलौकिकलिंगवत् शब्दबोधेनासमेतेतथानुत्वात् उ
त्वविशिष्टोघटोघटपदशक्यइत्यादिप्रकारेणशक्तिग्रहः धर्मितावच्छेदकत्वेनधर्मितावच्छेदकसमानाधिकरण।

त्वेन विशेष्यत्वेन वा शक्तिग्रहविषयस्य बोधविषयत्वं फलबलादिति नातिप्रसंगः एतेन शब्दनिष्ठलिंगमित्यपास्तं
उक्तं भाष्यविरोधात् अर्थे तदन्वये संबंधगौरवाच्च पुंयोगादाख्यायामित्यादिसूत्रस्याच्च लौकिकेलिंगेर्थवृत्तिताया
एवस्फुटत्वाच्च नहि नपुंसकं नाम शब्दोस्तीति स्वमोरिति सूत्रे भाष्याच्च नपुंसकार्थानिधायित्वात्तदन्तेदाच्च शब्दस्या
नपुंसकत्वमिति कैयटहरी ऽस्मत्तविस्तरः वैशेषिकास्तु पुंस्त्वादयो जातयः तिस्रो जातय एवैताः केषांचित्समति
ताः अविरुद्धाविरुद्धाभिर्गोमनुष्यादिजातिभिरिति हर्युक्तेः परस्परविरुद्धाभिर्गोमनुष्यादिजातिभिः सह परस्परम
विरुद्धा एताः समावस्थिताः स्यर्थैः केषांचिद्वैशेषिकाणामिति हेलाराजः अतएव इदं वस्त्वयं पदार्थ इयं व्यक्तिरिति
व्यवहारः सर्वत्र क्वचिच्छब्दाश्रयत्वे न लिंगनियमो यथा पुष्यतारकानक्षत्रमिति क्वचिदर्थविशेषेण नियमः यथा
महत्त्वयुक्ते हिमारण्ययोः स्त्रीत्वमेव हिमानी अरण्यानीति यथा च ह्रस्वोपाधेः कुट्यादेः पुंस्त्वमेवेति कुटी कुटीर इ
ति यद्यप्येते शब्दा भिन्ना एव तथापि लाघवेनान्वाख्यानाय हिमादिशब्दं सामान्यमाश्रित्य सार्थे तत्र विषय शब्दानु
शासनकरणादेवमुक्तं एतद्योजकं च चेतनेषु स्तनकेशादि अचेतने तु प्रयोगादेव सिद्धस्यास्य समारोपाच्छब्दसंस्का
रहेतुत्वं यथा आपो दाराः इत्यादौ निष्कृष्टेपि वस्तुन एकत्वे धर्मभेदाश्रयत्वाध्यवसायाद्बहुवचनं तथा वहि
रमत्वेपि तस्य खट्वादावारोपेण स्त्रीयं कार्यं भाष्ये संस्त्यानप्रसवादिपदेनापुंस्त्वाभ्यां स्थितयोनित्यानां मति
स्यानां वा जातावानामनोपाधिकं निजं तत्त्वं स्थितिर्नपुंसकमित्युच्यते अवयवसाहित्ये नोत्पत्तिः पुंस्त्वं विनाशो वयवा

नामप्रत्ययः स्त्रीत्वं तु पाधिसंसर्गेण नु तिस्रस्य प्रत्युत्पत्तिना शाबितिगुरुपादोक्तिरित्याद्युपपत्तिः एतच्चारोपितं सर्वदा सर्व
व्यवहारनिर्वाहकं अनित्यानामपि सर्वो वस्त्वात्स्वनुवर्तमानं प्रत्यभिज्ञाविषयेष्वनुरूपं तदेव स्थितिः एवं लिंगेष्वप्युपाधि
संसर्गेणोत्तकल्पितमिति स्त्रीत्वं स्त्रीत्वेनास्यादेरुपपत्तिः शब्दप्रमाणकानां शब्दार्थ एवार्थ इति सर्वत्र द्रव्यगुणकर्मसामा
न्यादावपि लिंगजातियोगः गोत्वादयो नाव जातिसामान्यशब्दे लिंगोपाधय एवाभिधीयंते इति सर्वत्र लिंगजातिव्यवस्था।
ननु गोत्वादिभिश्च विरोधः कुत इति चेन्न भिन्नजातीयेष्वपि स्त्र्याद्याकारबुद्धेरनुगमात् तदुक्तं हस्तिन्यां वडवायां च स्त्री।
तिबुद्धेः समन्वयः अतस्तां जातिमिच्छंति ड्यादिसमवायिनीमिति आदिपदेन गुणकर्मसामान्यादिः अत्रापि कश्चि
देकलिंगः कश्चिद्अनयलिंग इत्यादिश्रक्रिया शब्दवदेवेत्याहुः एतत्तु अन्योन्याश्रयग्रस्तं लक्षणबलेनैव शास्त्रार्थ इति
र्णयवतां लक्षणैकचक्षुष्काणां प्रयोगाश्रवसि तल्लिंगारोपाच्छास्त्रीयं टावादि तच्छक्तिग्रहश्चैकं च प्रयोगात् तद्वा
माय इति वक्तव्यं तु तत्रावयवेषु धर्मेषु च संनिहितमिति तदा तेव इति ततो वैषम्यं स्पष्टमेव अत एव भाष्ये सांख्य
मते नैवसंस्थानवत्सवो निरूपिताविति दिक् एकं प्रातिपदिकार्थ इत्यस्य जातिव्यक्त्योर्मध्ये नान्यतरदेव तत्त्वक्य मित्य
र्थः द्विकमित्यस्य प्रथमाविधायके जातिव्यक्तिरूपं द्विकं प्रातिपदिकार्थशब्देन गृह्यत इत्यर्थः त्रिकमित्यस्य प्र।
कथंचिद्व्यक्तिग्रहविषयोपि तदर्थ इत्यभिप्राय इत्याहुः संख्याकारकेतु प्रत्ययार्थ इत्येके परे तु संख्यापि प्रकृत्यर्थः
दधिमधित्यादौ विनापि प्रत्ययं तत्प्रतीतेः अनंतप्रकृतीनां शक्तत्वकल्पनागौरवं तु फलमुखत्वाल्लदोषाय तथाग १४२

हीतशक्तिकस्य प्रकृतिमात्रस्यापि तद्बोधात्व अतिप्रसंगस्तु व्यवहारानुसारेण तात्पर्यवशात् परिहरणीय इत्याहुः केचि
त्तु कारकमपि तथेत्याहुः केचित्तु संख्यामात्रं विभक्त्यर्थः कारकान्तं चतुष्कं प्रातिपदिकार्थ इत्याहुः तदुक्तं वाचिकाद्योति
कावास्तु द्वित्वादीनां विभक्तयः अयस्मात् संख्यावतोऽर्थस्य समुदायोऽभिधायक इति तच्च पंचानामपि प्रातिपदिकार्थप्रकारक
बोधे सुबूजन्योपस्थितिहेतुरित्याशयविलीयते इति वाच्यं इष्टापत्तेः जातिलिंगसंख्याकारकशक्तिविशिष्टस्य उपस्थेवबो
धेन सुबर्थविशेष्यकबोधस्य स्वपुष्पायमाणत्वात् सर्वं चैतत् पक्षान्तरं न हि निहितमत्र नाष्यादौ स्पष्टः तत्र पंचकं प्राति
पदिकार्थ इत्येव न्यायः सर्वेषां विशेषणत्वानुभवादित्यलं ज्ञानमात्रेय थाशाब्दं नानेन तथोक्तं केचित्तु शब्दार्थयो नेदंए
वेतिपक्षेपि अनुभवबलात् ज्ञानसामान्यसामग्र्या एव शाब्दमानसकत्वकल्पनान्न दोषः यत्तु अर्थस्य तच्छब्दस्य
ज्ञानेन ज्ञानमिति तन्न प्रत्यक्षे शाब्दज्ञानानुपपत्तेः अर्थज्ञानोत्तरं स्मृतस्य तस्य वाव्यवसाये ज्ञानासंभवात् अनुव्यवसा
ये त्वेवं तज्ज्ञानमुपपादयितुं शक्यमित्याहुः पटादिति कुर्विस्यादावनुकरणे न्तु गोवृगित्यादौ चानुकार्यशब्दस्वरूपमर्थः
आद्ये ध्वनिमयत्व वर्णमयत्वाभ्यामनुकार्यानुकरणयोर्भेदसिद्धेरं त्येऽर्थपदार्थकत्वशब्दपदार्थकत्वाभ्यां भेदात् पा
णिनिर्प्याह स्वं रूपं शब्दस्याशब्दसंज्ञेति अत एवद्व स्वार्थबोधकत्वरूपार्थवत्वात् प्रातिपदिकत्वे सुवावाद्युत्पत्तिः त
दुक्तं मतौ छ इति सूत्रे भाष्ये यो सावानुनायेस्य वा मशब्दः पद्धते सक्रप्रत्ययप्रकृतेरस्य वा मशब्दस्याच्छ्वासीय इत्यादौ
पदार्थः अत एव प्रातिपदिकत्वान्नलुप्त सिद्धिरिति केचिदनुकरणं शब्द स्वरूपेणोपस्थापकं तथोपस्थितस्यापि शाब्दबोधेऽन्व

मं.ज.र० यस्तात्मर्थेवत्वात् वृत्तिज्ञानस्यचानुकरणाजन्यत्वाच्छब्दत्वमेवकार्यतावच्छेदकमतएवन्नूमनायामिस्यादौविनस्यनु।
१४४ स्मृतिः वृत्त्याबोधकत्वरूपार्थवत्वाभावात् तदुक्तंतत्रैवकैयटेनअनुकरणंतुश्रुतक्रमेणप्रयुज्यमानंसादृश्यादनुका
र्यस्यप्रत्यायकंभवतीतितात्पर्यविवेदयोरनुकरणस्यपदार्थइतिसिद्धांतिनोक्तेकिमनयोरन्यत्वमितिप्रश्नेब्रोमिस्याहान्वा
यशब्दानांस्वरवर्णानुपूर्वीदेशकालनियतत्वात् इत्येवोक्तंनत्वर्थवेदादिस्युक्तं तस्यक्वचिद्भावेनभसतत्रहेतुरितित
दाशयः यद्यप्यान्यशब्दानस्यासेकेचिदाऊरनर्थकान् स्वरूपमात्रवृत्तीस्वशिष्यालांप्रतिपादनेइतितथाप्यर्थेताम
र्थाभावमात्रंतत्रदेशकालादिनियमस्तुतत्राप्यस्त्येवेतिबोध्यं केचित्तुनूमनायामिस्यादिनिर्देशात्क्वचिद्विनस्यनुस्मृतिः
सादृश्यादर्थोपस्थितिस्तुनकिंतुवाचकसादृश्यात् श्रुतक्रमेणोच्चारितशब्दादपिबोधः आदियतइतिसूत्रेभाष्ये
प्युक्तं एकदेशविकृतमनन्यवदितितद्विदस्यार्थः तेनतद्वत्तदर्थोपस्थापकं अतएवदीव्यतुच्छेदेनेवदीव्यतिशब्दा।
र्थोपस्थितिंवदंति गामुच्चारयेत्यादेश्च गोशब्दमुच्चारयेत्यर्थः उच्चारयेत्यस्यत्वसमभिव्याहारात् शब्दपरतातस्यत्वे
प्यात्वादिप्रवृत्तिरस्त्येवेत्यन्यत्रप्रपंचितं तत्रस्वंरूपमित्यनेनोभयोरर्थशब्दयोः शक्तिबोधनेप्यर्थेकार्यस्यबाधेश
ब्दस्यविशेष्यतायथाग्नेर्टगित्यादौअन्यथाविशेषणताशब्दस्यविशेष्यत्वेचार्थोविशेषणं वृद्धिरादैजित्यादावपि
संज्ञापदानांपरपरतास्त्यादिपदानेदआदैजादिपदार्थोविधेयः आदैचांज्ञातत्वात् एतेनविपरीतउद्देश्यविधेयभा
वःपरास्तः प्रसिद्धवृद्धिपदार्थानेदस्यतत्रबाधात्सर्वनामानीत्यादौमहासंज्ञाबलादर्थवदोनयपरतागणतवि। १४४

तत्सर्वादिषु सामानाधिकरण्यसंबंधेन सर्वार्थवाचकत्वरूपार्थविशिष्टसर्वनामपदाभेदो विधेयः गणपतित्वं च
गणपतिशब्दबोध्यत्वं न च ज्ञाने शब्दज्ञाने सर्वपर्यायाणां भानापत्तिर्विनिगमनाविरहादिति वाच्यं शब्दोपस्थितस्य
वपदस्य ज्ञानेनादोषात् प्रसक्तादावुपस्थितत्वावच्छिन्ने बाधकाभावाच्चेति दिक् केचित्तु सर्वशब्दानां तत्तच्छब्दस्वरूपमेव
प्रवृत्तिनिमित्तं अथ कस्माद्गौरित्युच्यते गौरित्येव हि गौर्गौर्विवर्त्ततेऽस्यो कथ्यैक्याऽऽ इति निरुक्तात् यद्यत्स्वरूपं जात्यादि
चेत्तु तत्र प्रवृत्तिनिमित्तमित्याहुः अनुकरणत्वं च शब्दमात्रतात्पर्यकोच्चारणविषयत्वं पदार्थविपर्यासकृदिति समभि-
व्याहारे गौरित्याहेत्यादौ न वेति सूत्रभाष्योदाहृतेनानुकरणत्वं विशेषणतयार्थज्ञाने न शब्दमात्रतात्पर्यकत्वाभावात्।
अत एव गौरानेयेत्यभिप्रायेण गौरानेयेति परेण प्रयुक्ते इतरः सम्यगश्रुत्वा परं पृच्छति किमाहेति तेन गौरित्याहेत्युक्ते
तत एवार्थबोधात्प्रवर्त्तते तेन सम्यक् ताद्बोध इति तु न युक्तं उच्चारितस्यैव बोधकत्वमिति सिद्धांतात् अनुकरणत्वद्योत
कोऽपि क्वचिदितिः अनुकरणं चानितिपरमिति सूत्रात् अनुकरणे तु न विशेष्यतया नापि विशेषणतयार्थस्य भा-
नं यथास्य वानीयमित्यादाविति बोध्यं विष्णुर्नारायणः कृष्ण इत्यादौ कोशे कृष्णादिशब्दा अर्थपराः शक्तिग्रहस्तु
पदत्वहेतुकानुमानेन सामान्यत एव पदप्रकारकः एवं च विष्णुपदार्थाभिन्नः कृष्णपदार्थ इत्यादिक्रमेण बोधः वि-
नायको विघ्नराजेत्यादौ द्वंद्वविषये एते पदार्था विनायकपदार्थाभिन्ना इति बोधः सर्वपर्यायद्वंद्वात्मके कोशे एते
पदार्था अभिन्ना इत्यध्याहारेण बोधः ए तत्सदस्य अमुकवाचकमिति शक्तिग्रहस्तु स्वस्वप्रसिद्धपदार्थमादाय तत्तत्सुहृ।

घस्यानियमतः पश्चान्मनसैव अत एव तृतीयाध्याय तृतीयपादे शंकरभगवत्पादैरूडीयाधिकरणे सामानाधिक
रण्यं चतुर्धा अध्यासेनापवादेनैकत्वेन विशेषणत्वेन चाध्यासेन यथाऽयं प्रतिमा बुद्धिर्निवर्तते इति नायमपवादः
अपवादो यथाऽहं रजतमिति अत्र हि पश्चाज्जाविन्यायथार्थया शुक्तिबुध्याऽस्या बुद्धेर्निवृत्तेरपवादसामानाधिक
रण्यमिति व्यवहारः एवं चाध्यासस्य निरपवादस्य निरपवादत्वं सापवादत्वात्स्यांद्वैविध्यमुक्तं एकत्वेन यथा द्विजो
नमो ब्राह्मणो नृदेव इति नेदं लौकिकं वाक्यं लोकव्यवहारे एकैनैव विवक्षितार्थसमर्पणादन्यस्यानर्थक्येन पर्यायाणां।
सहप्रयोगाभावात् तस्मात्कोशरूपमेतत् एतेन कोशस्थपदानां परस्परत्वमित्यपास्तं विशेषणत्वेन नीलमुत्पल
मित्यादौ अत एव नामन्त्रिते समानाधिकरणे इति सूत्रेऽध्न्ये देवि सरस्वति इडे काव्ये विहव्ये एतानि ते ऽध्न्ये नामानीत्य
त्र समानाधिकरणपरत्वप्रयुक्तमविद्यमानवत्त्वनिषेधमाशंक्य सामान्यविशेषवचनत्वाभावमाश्रित्य समाहि
तं अन्यथैकार्थबोधकत्वरूपसामानाधिकरण्यस्याप्यत्राभावात्तदसंगतिः स्पष्टैव एकशेषस्तु न तत्र चतुष्टय
रूपस्य सम्यग्बोधानापत्तेः कोशस्य चानेकपर्यायाणां स्वरूपबोधनपूर्वकमेकार्थत्वबोधने तात्पर्यात् तदुक्तं भेदा
ख्यानाय न द्वंद्वो नैकशेषो न शंकर इति भेदाख्यानायेत्यस्य लिंगभेदाख्यानाय स्वरूपभेदाख्यानाय चेत्यर्थः लिंगा
भेदाख्यानाय खं नभः श्रावणो नभाः इत्यस्य स्थाने खश्रावणौ तु नभसी इति न कृतं विष्णुर्नारायण इत्यादौ स्वरू
पभेदाख्यानाय नैकशेषः कृतः तथा पूर्वपरस्य एकलिंगानां मध्ये भिन्नलिंगपाठरूपः संकरोऽपि न कृतः यथास्त १४५

वः स्तोत्रं नुतिः स्तुतिरित्येव क्रमः तु नतु स्तुतिः स्तोत्रं स्तवो नुतिरिति शिति कृतो ऽत्र भिन्नलिंगानामनुक्तानां क्रमादृते ऽस्या
प्यानुक्तानां स्थानां तत्रानिर्दिष्टानां भिन्नलिंगानां द्वंद्व एकशेषश्च न कृतो ऽन्येषां तु कृत एव यथा ऽश्वरोयस्त्रस्रोगंधर्वाः किं
न्नरा इति मातापितरौ पितराविति भिन्नलिंगानामिति भिन्नस्वरूपाणामप्युलक्षणं विरूपाणा।
मप्युलक्षणं वीतिश्चैकशेषप्राप्तिः अतो ऽर्थपरत्वेन कोशे न चिता क्रमादृते ऽस्य स्वर्गाः पृथ्वीपुरस्मान क्षौषधिमृगादि भि
रिसुराहरणं तत्र द्वंद्वसंकरौ कृता चेवे स्थलं सर्वं शास्त्रस्य बुद्धिविषयो यावत्तावच्छिन्नः स समूहोऽर्थः यावत्त्वमत्रैकत्वक्षित
भिन्नसंख्याकृतपरिच्छेदवत्त्वं तत्र समूहस्योद्भूतावयवभेदत्वे सर्वे घटा इति अनुद्भूतावयवभेदत्वे एकवचनं सर्व
श्रोदनो भुक्त इत्यादेः सर्वावयवक इत्यर्थः अवयवगतसर्वत्वस्यावयविनि आरोपो बोध्यः बुद्धिविषयत्वेन बुद्धि
विषयेन तदादेः शक्तिः अत एव तस्यापत्यमिति सूत्रे भाष्ये सर्वनामनिर्देशो विशेषासंप्रत्ययः सामान्यनिर्देशादिति शं
कितं तस्यापत्यमित्यर्थे प्रत्यय इति सूत्रार्थे तस्येति निर्देशात् सामान्यवाचिनः तच्छब्दादेव प्रत्ययः स्यान्न तूप
गवादेरिति शंकार्थे कैयटः सामान्यवाचिन उत्पत्तेः संभवाद्विशेषवाचिन उत्पत्तिरिति समाधानं इति तं अपत्यशब्दस्य सम्बं
धिविशेषाकांक्षतया तस्यापत्यमित्युक्ते कस्यापत्यमित्याकांक्षायां अनिश्चितत्वेन तद्विशेषणयोगाद्विशेषवाचिन एव उत्पत्तिः
यदा प्रकरणात्तदा स्थितो ऽपि विशेषे वर्त्तते तदा तस्मादपि प्रत्ययः स्यादेव नतु निरितीति कैयटः सामान्यरूपेणैव विशेषवि
शिष्टस्य ज्ञानं प्रकरणादिवशादिति तदर्थः विशिष्टे ऽपि बुद्धिविषयत्वसत्वात् एवं च तस्यापत्यमित्यादौ तच्छब्दोपादा

मं॰ जू॰ नमपस्याद्यर्थसंबंधघुपलक्षणमितिनान्वयं तदुक्तं तस्येदमितिसूत्रे कैयटेन षष्ठ्युत्तमात्रं तस्येतिप्रकृतित्वेना
१४६ विवक्षितं तत्प्रतियोगिमात्रंच प्रत्ययार्थत्वेन यत्तत्परलिंगसंख्याप्रसक्तत्वपरोक्षत्वादिकं तद्विवक्षितमिति ए
तदभिप्रायेणैव सूत्रोपक्रमे तस्येदमित्यपत्येपि सिद्धमित्युक्तम् शेष इति सूत्रे च भाष्ये उक्तं तस्येद्विशेषा ह्यपत्यम
स्यं समूहो निवास इति तस्येदमिति सूत्रे इदंपदार्थप्रवृत्तिनिमित्ताश्रया अर्थाः विशेषाः एते इति तदर्थः अत एव तस्मि
न्निति निर्दिष्टे इति सूत्रे भाष्ये सर्वनाम्नां निर्देशः क्रियते सर्वनाम च सामान्यवाचि तत्र सामान्येन निर्दिष्टे विशेषा अपि
उदाहरणानीति आपकं सामान्यं सामान्यो विशेषः तत्त्वं च विवक्षाधीनं अत एव गोकृष्णयोः परस्परसामान्यवि
शेषभाव इति च तत्र सामान्यवाचीत्यनेन सकलसाधारणसामान्यमेव प्रवृत्तिनिमित्तमित्युक्तं न च काव्यप्रकाशे
ऽनेकार्थस्यार्थस्य वाचकत्वे नियंत्रितेऽस्येत उदाहरणावसरे एतावन्मात्रस्तनिकेत्यादावभिनयेन शक्तिसंको
चस्त्युक्तं तद्विरुध्यते नद्यादीनां त्वडीसानानार्थत्वाभावादिति वाच्यं शक्यतावच्छेदकानेकत्वे एव शक्यताव
च्छेदकधर्माणां नानात्वेप्यनेकार्थत्वात् परे तु घटमानयेत्युक्ते तैलघटजलघटघृतघटानां मध्ये त
त्प्रकरणे तत्तद्घटानयनमत एवोक्ताः शार्कराद्यर्थपदधातीत्यादौ तेनैव घृतमिति लिंगात् शक्तौ इत्यस्य घ
तसाधनां जनपरत्वमिति हेलाराजादिभिरुक्तं हरिणाप्यशब्दार्थस्यानवच्छेदे रस्येवोक्तं एवं च संयोगादिना
क्यतावच्छेदकानेकत्वे एव नित्योयकमित्यप्युक्तं प्रकाशेऽनेकार्थस्येत्युक्तिस्तु न तद्वितीयार्थव्यंजनायाः स्फु १४६

दतयाग्रं जनानिरूपणप्रस्तावादित्याहुः यत्तु यद्यत् तत्पदं यादृशायादृशधर्मावच्छिन्नविषयकबुद्ध्याद्युपस्थितेन तत्तत्स
दं बुद्धिविषयतावच्छेदकत्वोपलक्षिततादृशधर्मविशिष्टे शक्तमिति शक्तिग्रहः बुद्धिविषयत्वस्यापि तदुपलक्षितत्वा
न् कदाचित्तेन रूपेणापि बोधः अत एव तत्पदात् कदाचिद्घट इति कदाचिज्जातिमानिति कदाचिज्जातिमान् घट इति
कदाचिद्बुद्धिस्थ इति बोधः तावदर्थनिरूपिता शक्तिरेकैव हर्यादिपदशक्यतावच्छेदकानां तु न तेनानुगमः तेन एकस्य
नानारूपेण बोधाननुभवात् अत एव तेभ्यो न कदाचिदपि जातिमान् हरिरित्यादिक्रमेण बोध इति तन्न तेषां तेषां
धर्माणां विशिष्य ज्ञानाभावेन तद्रूपेण शक्तिग्रहाभावात् तथा बोधासंभवात् मम तु बुद्धिविषयत्वेन तदाश्रये श
क्तिग्रहान्न दोषः सर्वस्यापि बुद्धिविषयत्वेनैव बोधादित्यादिक् अत्र तदिदमादीनां पर्यायत्ववारणाय परोक्षत्वा
द्यपि शक्यकोटौ निवेशनीयं एवं यच्छब्दशक्यकोटावुद्देश्यत्वं तदो विधेयत्वमिति इदं तु बोध्यं तत्पदप्रतिपाद्यतयाव
च्छिन्नबुद्धिविषयत्वे उद्देश्यपदार्थोपस्थितेर्नार्थप्रस्तावने नियमतस्तत्पदापेक्षा तत्रोत्तरवाक्यगतयच्छब्दस्य तच्छब्दाक्षे
पसमर्थत्वेन न तत्र तच्छब्दोपादानापेक्षा यथा माधवं इमसिपुष्करैः कृतं मीलितं यदभिरामतादिके इत्यादौ एवं ता
त्पदं यत्पदप्रतिपाद्यतयावच्छिन्नबुद्धिविषये विधेये शक्तं तत्र प्रसिद्धानुभूतप्रक्रान्तार्थकतच्छब्दस्य यच्छब्दाक्षेपस
मर्थत्वात् न तत्र यच्छब्दोपादानापेक्षेति काव्यप्रकाशादौ विस्तरः तत्रेदमेतदोः प्रत्यक्षे अदसो व्यवहिते शक्तिः तदुक्त
मिदमस्तु संनिकृष्टं समीपतरवर्ति चैतदो रूपं अदसस्तु विप्रकृष्टं तदिति परोक्षे विजानीयादिति स्थलं एतच्च तत्पदा

मं॰ टी॰ मितिसूत्रेनाष्येस्पष्टं परे तु परोक्तत्वाद्येव तदादेः शक्यतावच्छेदकं प्रकरणादिव शात्तत्तद्विशेषबोधः वक्तृभ्यो न तु द्वि-
१४१ स्थत्वमेव हि प्रकरणं एतावतैव सर्वनाम्नां बुद्धिस्थपरामर्शकत्वमिति प्रवादः तेषां प्रकरणज्ञानं विना सर्वथा विशि-
ष्टबोधाजनकत्वादत एव तस्याप्यस्य अस्य शब्देक्त इत्यंकापरनाम्नस्य सामान्यनिर्देशादिति प्रतीकमुपादाय तस्येति
सामान्यनिर्देशात् तच्छब्दादेव सामान्यवाचिनः प्रत्ययः स्यादिति कैयटेनोक्तं अन्यथा तच्छब्दादिस्य इति वदेदित्याहुः
केचित्तु एवं युष्मदः संबोध्यत्वमस्मदः उच्चारयितृत्वं प्रवृत्तिनिमित्तं तेन रूपेणैव बोधानुभवात् देव्युवाच मयात्वयि हते
त्रैवर्गिष्यं स्यामुदेवता इत्यादौ ऋषिवाक्योच्चारणकाले आनुपूर्वीसामान्येन देवीवाक्यस्याप्युच्चारणाद् देवीमहिषासु-
रयोस्तद्वाक्यप्रयोक्तृत्वसंबोध्यत्वप्रतिसंधानाद् देवताभ्यां देवीमहिषासुरप्रतीतिः अनुवादकऋषितत्संबोध्ययोस्तु न
प्रतीतिस्तात्पर्याभावात् मौनिनापि मंदोच्चारणशब्दकमेव लेखनेन तन्त्रिखिनाहं पदादुच्चारयितृत्वेन प्रतीतिरविरु-
धा उच्चारणमनुसंधानोपलक्षणं वा इत्याहुः परे तु क्रियाविनियोगफलकमभिमुखीकरणं संबोधनं तद्विषयत्वं च संबो-
ध्यत्वं न चैतत्त्वं पवसीत्यादौ प्रतीयते अभिमुखीभूते वितथाप्रयोगात् तस्मात्त्वयोक्तं रहंकारानास्पदचेतनत्वेन यु-
ष्मदः शक्तिः स्पष्टं चेदं गुरुमुष्टेः शोहरिग्रंथे इत्याहुः एकजीववादिशान्त्यान्वेवं मति युष्मदस्मत्प्रत्ययगोचरयोर्वि-
षयविषयिणोस्तमःप्रकाशवद्विरुद्धस्वभावयोरितिशांकरभाष्यानुपपत्तिः तन्नाभ्यां हि युष्मदो जडे शक्तिरस्मदश्चे-
तने इति स्पष्टं तद्विदां तत्वतस्तयोरपि चेतनत्वशक्तित्वेन तदसंगतिरिति चेन्न त्वंयज्ञशान्त्या तयोर्जतेरित्याहुः किं पदस्याजि १४१

ज्ञासाविषयेशक्तिः यत्रकिंपदार्थान्वयस्तत्रवाच्यत्वयस्तद्भिन्नधर्मावच्छिन्नोजिज्ञासाविषयत्वेनतच्छक्यः स्वीयजि
ज्ञासाज्ञापनाय किंपदघटितवाक्यप्रयोगात् अतएवकः पचतीतिप्रश्नेविप्रः पचतीत्येवोत्तरं नतुप्रमेयंपचतीति जिज्ञा
साविषयकर्तृकःपाकइतिप्रश्नार्थः तद्विषयजिज्ञासायास्तद्विषयीभूतज्ञानजनकाउक्तोत्तरान्निवृत्तिः कोब्राह्म
णः पचतीतिप्रश्नेचैत्रः पचतीत्येवोत्तरं नतुमनुष्यः पचतीति अयंकइत्यादौ समभिव्याहृतपदोपस्थाप्यधर्मावच्छिन्ने।
दृश्यतानिरूपितविधेयतावान्सद्व्याप्यविशेषधर्मावच्छिन्नोजिज्ञासाविषयतयाशक्यः अतएवतत्रायंब्राह्मणइत्येवो
त्तरं एवंप्रश्नवाक्यात्समभिव्याहृतधर्मव्याप्यधर्मप्रकारकज्ञानमिष्टसाधनमिति ज्ञानजन्यातादृशज्ञानंमेजायता
मितीच्छाज्ञायते उत्तरेणचविप्रत्वादिरूपविशेषधर्मावच्छिन्नप्रकारकतादृशालिज्ञानोत्पत्त्यातन्निवृत्तिः इष्टसाधनताज्ञा
नेनुतादृशधर्मोविशेषधर्मानवच्छिन्नप्रकारतात्ताशालीत्येवज्ञानानिविषयः एवंप्रश्नवाक्येयत्प्रधानंतत्समानलिंग
वचनत्वाद्युत्तरेवोत्तरंयथाकथंचित्प्रश्नविषयजिज्ञासानिवर्तकंच एवंचकेशिष्याअस्येतिप्रश्नेकवाइत्येवोत्तरंनतुक
टइति एवंकिंशिष्योयमितिवहुव्रीहिसमासेनप्रश्नेकवइत्येवनतुकटाइति तस्यकत्वेशिष्याणांकटत्वमर्थप्रास
मित्यार्थमिदमुत्तरमिति अनेकमन्यपदार्थेइतिसूत्रेभाष्येस्पष्टं मुखंकिमिंदुरित्यादावप्ययंकिमोवितर्कोर्थः
वितर्कश्चसंभावनात्मकंज्ञानं इंदुप्रकारकासंभावनाविशेष्योमुखमित्यर्थः संभावनाप्रयोजकाल्हादकत्वादिसा
धर्म्यप्रतीतिस्त्वर्थात् धनमिदं किंचैत्रस्येत्यादेश्चैत्रस्वामिकंतत्वेनसंभावनाविशेष्योधनमित्यादिरर्थः किंजो

रित्यादौ कुत्रार्थकोऽपि सः स्वपदस्य तत्र घटितवाक्यघटकक्रियान्वितेऽस्मन्निष्ठाहृतपदोपस्थाप्ये शक्तिः तेन चैत्र।
स्य भ्राता स्वपुत्रं पश्यतीत्यादौ स्वशब्देन चैत्र प्रतीतिः स्वपुत्रदर्शिनं चैत्रं मैत्रः पश्यतीत्यादौ तात्पर्यवशाच्चैत्र पुत्रमैत्रपु
त्रन्यतरप्रतीतिः कलशेनिजहेतुदंडजइत्यादौ अध्याहृतक्रियान्वयिनः कलशस्य स्वशब्दसमानार्थकनिजपदेन प्र
तीतिः सर्वनाम्नामुत्सर्गतः प्रधानपरामर्शित्वमित्यस्य प्रधानान्वयिपरामर्शकत्वमित्यर्थः एवमात्मीयधनज्ञाति
वाच्यपि स्वशब्दः ऐश्वर्यवाची ऽपि स्वामीति प्रयोगविषयः इत्यमत्र विस्तरः एकशब्दः केवलेपि शक्तः कैवल्यं द्वितीय
रहितत्वं द्वितीयशब्दश्च सजातीयसहाये रूढः एवं च तत्तत्क्रियाकर्तृत्वादिविशिष्टसजातीयराहित्यं कैवल्यं अयमेको।
ऽत्रानुकूले इत्यादावेतद्देशाधिकरणकभोजनकर्तृसजातीयरहितोऽनुकूले इत्यादिरीत्या बोधः अत एव एकाकी हयमा
रूढ इत्यादौ नानुपपत्तिः हयस्य द्वितीयस्य सत्त्वेऽपि तस्य सजातीयत्वाभावात् एवं योद्धृत्वेन सजातीयाभावे ऽश्वा।
दिपालकमनुष्यसत्त्वेऽपि एको रणं गच्छतीत्युपपद्यते इति दिक् दिग्वाचकपूर्वादिशब्दानां समशब्द एव प्रवृत्तिनिमि
त्तं एकस्या अपि दिश उपाधिभेदात्तत्तच्छब्दवाच्यता तत्र मध्याह्नसूर्यसंयोगवान् देशो मध्यं तत उदयाचलपर्यंतदेशो
पाधिका पूर्वा दिक् ततोऽस्ताचलपर्यन्तदेशोपाधिका प्रतीची तत एव मध्याह्नसूर्यसंमुखयावद्देशोपाधिकोदक् तस्य
पृष्ठस्य यावद्देशोपाधिका दक्षिणा मध्याह्ने सूर्यस्योन्मुखत्वात् अत एवांजलिर्विनावधयो दिक्शब्दाः देशादौ नुशा।
द्वोपात्तावध्यपेक्षाः इति हेलाराजः दिक्चेदं सस्मादित्यवध्यवधिमद्भावप्रयोजिकोत्क्षेपणादिक्रियाभेदप्रयोजि।

काऋजुवक्रत्वादिव्यवहारप्रयोजिकाऽऽशानां परापरव्यवहारप्रयोजिका च शक्तिः एकदिक्कमवयवप्रसारणं ऋजुता अ
नेकदिक्कं तद्वक्रता पूर्वमनुस्मरतोऽनविष्यतीति क्रियायाः पौर्वकालकृतमिति न दिक्कालशक्त्योरैक्यं नापि तयोः स्वतंत्रद्रव्य
त्वं परोपाधितयैव सदा प्रतीतेः सर्वत्र च तत्कार्यदर्शनात् तयोर्विभुत्वं सर्वत्र स्वकार्यसंपादकत्वमेवाम्नातो नापि विभुत्वं देशानां पू
र्वापरादिव्यवहारोऽपि दिक्कृत एव पूर्वदिगादिस्थानां तेषां पूर्वादित्वात् यस्त्वभिमुखः पूर्वः पृष्ठस्थः पश्चात् हस्तदक्षि
णो हस्तवाम इत्यादिव्यवहारः स न दिगपेक्षः प्रत्यङ्मुखस्य यस्य पश्चाद्देशस्थं तस्य प्राङ्मुखत्वे पूर्वदेशस्थत्वेन प्राङ्मुखे।
न्नानि भुंजीतेत्यादावव्याप्त्यापत्तेः किंतु तत्र वक्त्रसंमुखदेशत्वादेव पूर्वादिशब्दप्रवृत्तिनिमित्तं एवं तत्तदवधिकोद।
याचलास्ताचलसन्निहितत्वमपि देशवृत्तिपूर्वपरशब्दयोस्तत्र पूर्वदिगभिमुखं स्थितस्य दक्षिणवामहस्तसन्नि।
हितत्वमपि देशवृत्तिदक्षिणोत्तरशब्दयोस्तत्सूर्वध्युषितत्वं पूर्वाजितत्वमपि पूर्वशब्दार्थः पूर्वस्मिन्देशे वसतीत्या
दौ तथा प्रतीतेः सर्वं चेदं हरिग्रंथे हेलाराजीये च स्पष्टं विंशत्याद्यः स्वजातसंख्यायां संख्येये च वर्तते तेन विंशतिर्गी
वां विंशतिर्गाव इति च पदद्वये तेस्मुदायवचनास्तदापि समूहस्यानुद्भूतावयवत्वे गवामिति षष्ठी उद्भूतावयवत्वे
न संघसंघिनोरभेदविवक्षायां सामानाधिकरण्यमुभयथाप्येकवचनांताः अंतेपि शब्दशक्तिस्वभावात् नियमे
न धर्मिनिष्ठसंख्याया धर्मिण्यारोपेणैव प्रयोगः वेदाः प्रमाणमितिवत् तेचानवतेः स्त्रियां गावो धनमित्यादावप्येव
वमेव धर्मिनिष्ठसंख्यानारोपेऽतत्र गावो धनानीत्यपीति विशेषः संख्यापरत्वं च द्व्यादिपदेन संख्याबोधनं यथा द्वे।

मं॰जू॰ तत्रापि गवां विंशतिमानयेत्यानयनादिक्रियान्वये एवधर्मी तस्याः प्रसंख्यानूधमधमर्णोऽस्मै दाद्वेति पंक्तिविंशतीति
१५९ स्तत्रत्नाख्योक्तरीत्या बोध्यं अन्नेदं न बोधने संख्येयपरत्वमिति बोध्यं एकशेषेण विंशतिविंशतय इत्यादीष्टमेव द्रोणाद्या
स्यादिशब्दाच्चयत्ताविशेषावच्छिन्नपलादिपरिच्छिन्नधान्यादिपरिच्छेदकत्वसमानाधिकरणजातिविशेषरूपद्रोण
त्वाद्यवच्छिन्ने शक्ताः प्रवृत्तिनिमित्तं तु द्रोणत्वाद्येव परिच्छेदकत्वं तु लिंगवत्तत्समानाधिकरणमेव प्रातिपदिकार्थमा
त्रे भाष्ये ध्वनितमेतदित्याद्यूह्यं गोशब्दस्य स्त्रीत्वसमानाधिकरणं पुंस्त्वसमानाधिकरणं च गोत्वं शक्यमिति नाना
र्थोयं तत्राद्यं प्रसिद्धं अन्त्यं तात्पर्यग्राहकसापेक्षं बोध्यं अतएव गौरित्येतन्मात्रात् स्त्रीव्यक्तीनामेव बोधः स्वरसतः
अतएव गोबलीवर्दमित्यादौ सामान्यविशेषभावाभावाद्द्वंद्वः सिद्धः अंत्यस्तु गोवाहीक इत्यादौ एतान् गाश्चतुरो
बलीवर्दान् समेत्यादौ प्रथमयोरितिमत्रत्नाख्योदाहृते च एतदेवाभिप्रेत्य स्यादादीनीतिसूत्रे सामान्यविशेषवाचिनो
र्द्वंद्वो नेति वक्तव्यं एवं हि शूद्राभीरं गोबलीवर्दं तृणोलपमित्यादौ न स्यादिति शंकायामाभीरजात्यंतराणि उलप
मित्यपां नामधेयमित्यादिना सामान्यविशेषभावाभावउक्तो भाष्ये गोबलीवर्दमित्यत्र गावउत्कालितपुंस्का वा
हायच विक्रयाय च स्त्रियए वावशिष्यंते ऽस्तु स्कं वाहाद्यर्थेश्वपुकृतपुरुषाः स्त्रियः एवं गोशब्दव्यवहार्यत्वेनाव
पंते इति तदर्थः लोकव्यवहारेप्येवमेवेत्यलं धेनुशब्दस्य धानकर्मत्वं प्रवृत्तिनिमित्तं धेटपानेऽस्मतः कर्मणि नु
प्रत्ययसत्वात् अतएव वावीढ्ये न इत्यादिप्रयोगः संगच्छते हविर्धान्यामिधेनुष्विते भागवतप्रयोगश्च हविर्धानी १५९

गोः एतेन गोत्वसमानाधिकरणं धात्वर्थकर्मत्वं प्रवृत्तिनिमित्तमपास्तं न चोक्तप्रयोगे लक्षणाज्ञानस्यैवोपपत्तेः न चार्थे-
षन्नूत्त्रिवृद्देवमवेक्षस्य विश्ववस्य सौत्रीया धेनुर्दक्षिणा इत्यत्र द्यावापृथिवीयां धेनुमालभेतेत्यत्र च गवामेव प्रतीतिर्न स्यादि-
ति वाच्यं अपशवो वा अन्ये गोअश्वेभ्य इति श्रुतेः पशुत्वेन तत्र गवामेव प्रतीतेः वडवानां तु न दक्षिणात्वं नाग्नित्वादगवामि-
ति जैमिनिसूक्तेः नाग्नित्वमुपकारकत्वं दक्षिणा हि ऋत्विगुपकारार्था न च तानि ईग्ध्यादिद्वारा ऽग्निहोत्राद्युपकारः न केसरि-
णो ददातीति नोभयतोदतः प्रतिगृह्णातीति निषेधाच्च एतेन धनलाभद्वारा तासामप्युपकारकत्वमित्यपास्तं नाश्वं विक्रीणी-
त इति स्मृतेश्च द्यावापृथिवीयां धेनुमालभेतेत्यत्राप्युक्षणाज्ञानस्यादृश्यजातीयस्याश्वमेधातिरिक्ते पशुत्वाश्रवणाच्च गोरे-
वालंभः किं च तद्द्रव्ये वायव्यं वत्समालभेतेति श्रुतं तत्र च प्रत्यासत्त्या पूर्वोलब्धधेनोरेव वत्सस्य ग्रहणमिति वेदनाख्य-
कृद्भिर्व्याख्यातं एवं च तत्संयोगाद्गोपरत्वं वत्सशब्दस्तु गोत्वसमानाधिकरणवयःप्रवृत्तिनिमित्तक एव अत एव महिष्या-
दावपि धेनुव्यवहारो लौकिकानां अत एव हर्यादिभिः सवत्सा सकरेणा अवत्सा ऽकरेणा धेनुरिति संयोगविप्रयोगयो-
रुदाहृतं वत्ससंयोगादिना गोः करेणसंयोगादिना दुर्गी गम्यन्ते इति च विवृतं अत एव तथा सुवर्णशृंगीणां गो-
धेनूनां चतुःशतमिति कर्णेकर्णे पर्वाणि नारते प्रयोगः संगच्छते इत्यलं अन्योन्येतरेतरपरस्परशब्दानां क्रिया-
व्यतीहारविषयमेकमात्रावृत्त्यन्योन्यत्वमखंडोपाधिरूपं प्रवृत्तिनिमित्तमिति सर्वं प्रसिद्धिः इति प्रातिपदिका-
र्थनिर्णयः अथ तत्प्रकृतिकसुबर्थो निरूप्यते तत्र प्रथमाद्वितीयातृतीयाचतुर्थीपंचमीषष्ठीसप्तमीस्यादा

मं॰ ज॰ १५० सप्तविभक्तयः तत्र प्रथमाविधायकं प्रातिपदिकार्थलिंगपरिमाणवचनमात्रे प्रथमेति अत्र प्रातिपदिका-
र्थशब्देन तत्तच्छब्दप्रवृत्तिनिमित्तं तदाश्रयश्च अत एव लिंगादिग्रहणं चरितार्थं तेषामपि प्रातिपदिकार्थ-
त्वात् तदाश्रयश्चारोपितप्रवृत्तिनिमित्ताश्रयोपि तेन सिंहो माणवको द्रोणो व्रीहिरित्यादौ न दोषः किं च शा-
स्यार्थपदसाधुत्वेनान्वाख्यापकस्यास्य शब्दान्तरसंनिधानेऽन्वयानुपपत्त्या वक्तृश्रोतृभ्यां लक्षणाश्रयण-
मिति न दोषः अन्यथा गंगायां घोष इत्यादौ सुबनुत्पत्तेः प्राक् प्रातिपदिकस्यैव लक्षणायां नपुंसकत्व-
त्वापत्तिः तिङ्समानाधिकरणे प्रथमेत्यादिना तिङर्थसामानाधिकरण्येनान्वययोग्यमेव प्रथमान्तं
साध्विति एतावद्बोध्यते अन्ततो लट्परस्यास्तेः सत्त्वात् ननु तदन्वयबोधोत्तरं प्रत्ययोस्सत्तिरिति बोध्यते।
एवमन्यैरपि कारकाधिकारस्थसूत्रैर्युष्मद्युपपदे इत्यादिभिश्च अत एवार्थवत्सूत्रे भाष्ये मुक्तमिसु-
क्ते कर्म निर्दिष्टं कर्त्ता क्रिया चानिर्दिष्टे अश्वाजेत्युक्ते क्रिया निर्दिष्टा कर्त्ता कर्म चानिर्दिष्टे देवदत्तेत्युक्ते का-
र्त्ता निर्दिष्ट इतरदनिर्दिष्टमिह इदानीं ग्राममश्वाज क्रमाद्देवदत्तेति उक्ते सर्वं निर्दिष्टं ग्राममेव कर्म देवदत्त ए-
व कर्त्ता अश्वाजेव क्रियेत्युक्तं तत्र कारकादिमात्रप्रयोगे योग्यसर्वक्रियाद्यध्याहारे प्रसक्ते नियमार्थः
तत्तत्प्रयोग इति तत्त्वात्सर्वे एवं समानमतः क्रियाकारकत्वयोग्यताबुद्धिरेव विभक्तिप्रयोजिका ननु विशि-
ष्येति लभ्यते कारकत्वं क्रियाजनकत्वयोग्यताबुद्धिविषयत्वमेव वृद्धिसूत्रे भाष्येप्युक्तं संस्कृत्य संस्कृत्य पदा- १५०

न्युत्पन्नं तेनैषां यथेष्टमभिसंबंधोऽनवस्था हर पात्रं पात्रमाहरेति द्रोणो व्रीहिरित्यादौ पदद्वयोपस्थाप्यव्यक्तो
रेकत्वेन संबंधाभावेपि विशेष्यविशेषणभावो बोध्यः यत्त्वभेदेन संबंधे नान्वय इति तन्न तस्य संबंधत्वे मानाभावात्
संबंधिभेदनियतत्वात् संबंधस्य अत एवाद्यं तत्त्वस्येराहोः शिर इत्यादौ षष्ठ्युपपादनाय व्यपदेशिवद्भाव इतिना।
श्येत्युक्तं किंच तस्य संबंधत्वे नीलो घट इत्यादौ षष्ठ्यापत्तिः भेदमूलकसंबंध एव षष्ठीसमर्थस्य सूत्रतो वाप्रस्याऽ
लाभात् अत एव तार्किकनव्यैरपि कर्मधारयोत्तरभावप्रत्ययस्य पदार्थतावच्छेदकसामानाधिकरण्यवचनत्वं कृत्
द्धितसमासेभ्यः संबंधाभिधाने भावप्रत्यये नेत्यभियुक्तोक्तेरित्युक्तं अभेदस्य संबंधत्वेन भाने तस्यैव तदुत्तरभावप्र
त्ययवाच्यतावश्यकं युक्ता राजपौरुष्यमित्यादौ पूर्वपदार्थोत्तरपदार्थयोः संबंधस्यैवेति दिक् नच प्रथमार्थः सइ
त्यशेषः अनुशासनाभावात् नीलं घटं पश्येत्यादौ तन्नानापत्तेश्च न चाकांक्षालभ्यः सः वाक्ये विशेषणविशेष्या।
भावातिरिक्तस्याकांक्षालभ्यत्वाभावात् राज्ञः पुरुष इत्यादावाकांक्षितसंबंधस्य षष्ठ्या रामं पश्यतीत्यादौ क्रि
याकारकयोः संबंधस्य द्वितीयादिनालाभात् कारकविभक्तीनां तत्तच्छक्तिः तत्तत्क्रियाकारकभावसंबंधस्यार्थ
इति कारक इति सूत्रभाष्यात् समर्थसूत्रभाष्याच्च लभ्यते इत्यग्रे निरूपयिष्यामः न च संबंधसंबंधः आकांक्षा।
लभ्यस्तज्ज्ञाने मानाभावात् अनवस्थापत्तेश्च यदपि वीरः पुरुष इत्यादौ गुणभेदे नैकस्यापि द्रव्यस्य भेदारोपेण।
भेदाभेदरागे तादात्म्यं संबंध इति तदपि न वास्तवभेदमूलकेऽवारोपितभेदमूलके संबंधेपि षष्ठ्यापत्तेः त

त्रिविभक्तिवाच्यस्याविभंबंधस्य संसर्गत्वेनैव भानं अत एवार्थवत्सूत्रे भाष्ये एषां पदानां सामान्ये वर्तमानानां य-
दि विशेषेऽवस्थानं स वाक्यार्थ इत्युक्तं विशेषणविशेष्यभावरूपपदार्थसंसर्गरूपः स इत्यर्थः संबंधांतरस्य स-
मर्थसूत्रे भाष्ये षष्ठ्यादिवाच्यतोक्तेः अत एव प्रातिपदिकार्थसूत्रे वीरः पुरुष इत्यादौ विशेषणविशेष्यभावस्याधि-
कस्य प्रतीत्या प्रातिपदिकार्थमात्रस्याभावात् प्रथमा न प्राप्नोतीत्याशंक्य पदद्वयाधिक्यं स वाक्यार्थ इत्युक्तं अत्र कैय-
टः वीरप्रातिपदिकान् वीरः क इत्याकांक्षया प्राप्तिं विशेषणत्वमनपेक्ष्य स्वार्थमात्रनिष्ठात्प्रथमा पश्चात्त्वाकां-
क्षावशाद्विशेषणविशेष्यभावावगतेरिति षष्ठीशेषे इतिसूत्रे भाष्ये विस्फुटमेतत् घटो घट इत्यादौ विशेषणवि-
शेष्यभाववारणाय सोऽपि धर्मभेदमूलकः सोऽपि तद्भेदसापेक्ष इति बोध्यं हरिणाप्युक्तं विशेषणविशेष्यत्वं पदयो रू-
पजायते न प्रातिपदिकार्थश्च तत्रैव व्यतिरिच्यते इति पदयोः संबद्धयोरिति शेषः वीरः पुरुष इत्यादौ परस्परसंबं-
धेन गुणप्रधानभावापन्नार्थकत्वे न वाक्यार्थभूतविशेष्यविशेषणभावयुक्तार्थकत्वात्तद्योरपित्वं एवं राज्ञः
पुरुष इत्यादौ प्रातिपदिकार्थस्य राज्ञो विशेषणत्वं पुरुषस्य विशेष्यत्वं व्याप्तित्वेन स्वस्त्वेन च यथा न योर्व्यतिरेकः
रूपांतरेण परिवर्तनात् न तथा प्रकृते इति तदर्थः अत एव जात्याकृतीतिसूत्रे न्यायवार्तिककारेण य उक्तं वि-
शेषणविशेष्यभावस्यैकविषयत्वात् यदि गोशब्दतिष्ठतिशब्दयोरेकमभिधेयं भवति ततो विशेषणविशेष्यभावा-
पन्नयोस्तिष्ठतिगोशब्दयोः सामानाधिकरण्यं युज्यते इति तत्संगच्छते अन्यथा राज्ञः पुरुष इत्यादौ भेदेऽपि तस्य १५१

सत्त्वे नैकविषयत्वादि संगतिः अत्रैकमभिधेयमित्युक्त्या क्रियाक्रियावतोरभेदः सूचितः अभिधेयपदस्याविशेष्य एव
प्रसिद्धेः तस्मात् द्वयोः समवायोर्धर्मिणोः संबंधेनैकत्वे नवेति एवं च विना संबंधं विशेषणविशेष्यभावस्यैकविषयत्वात्
इति तदर्थो वाच्यः एवं चाभेदस्य संबंधत्वाभावः स्पष्टमेव तदभिमतः यथा प्रवृत्तिनिमित्तयोः साहित्यरूपः संबंध एव
तदाश्रययोः विशेषणत्वादिनियामकः सोपि वाक्यार्थ एव तदेवाभिप्रेत्य कर्मधारयविषये द्वन्द्वाभावाद्वानं चार्थे द्वन्द्व इति
सूत्रे नाख्येकृतं एवं च वीरत्वपुरुषत्वसमूहवान् वीरः पुरुष इति बोधः सामानाधिकरण्यं चैकधर्मिबोधकत्वमेव ए।
तेन प्रकारताविशेष्यते सांसर्गिकविषयतानिरूपिते नैवेति नियम इत्यपास्तं मानाभावात् अभेदान्वय इत्यस्याभे।
देष्यत्वयोर्विशेष्यभाव इत्येवार्थो न तु अभेदसंसर्गको बोध इतीमलं तत्रापि यथा स्त्रीपुमान्नपुंसकमित्यादि शास्त्र
प्रातिपदिकार्थमात्र इत्यस्योदाहरणं कृष्णः श्रीः ज्ञानं तटः तटी तटमित्यादि लिंगाधिक्यस्य द्रोणः खारी आढकमि।
त्यादौ प्रवृत्तिनिमित्तजातिरूपद्रोणत्वाद्यपेक्षया परिच्छेदकत्वस्याधिकस्य तेभ्यो ज्ञानेन प्रातिपदिकार्थमात्रविहितप्र
थमाया अप्राप्त्या परिमाणग्रहणं एको द्वौ बहव इत्यादौ संख्याया उक्तत्वान्न तदप्राप्त्या वचनग्रहणं अत्रानुवृत्तस्यानभिहि
त इत्यस्य संख्याविशेषणत्वात् यथा प्रवृत्तिनिमित्तसंख्यात्र विभक्तिवाच्यान्वयतद्द्वयबोधाननुभवः एकत्वस्याप्रवि।
तस्य ततो बोधात् सजातीयसंवलनेन हि प्रत्ययः द्वित्वाद्युपजननयोग्यत्वं च प्रचितत्वं प्रातिपदिकस्य तु प्रचिताप्रचिता।
साधारणं तदर्थः तत्प्रतीतिश्चैकपुत्र इत्यादौ एवं द्वौ बहव इत्यत्रापि भूतावयवभेदसमूहरूपतीति तद्भिन्नत्वात् तदभावे द्वि

मं०जू०
१५२

पुत्रो बहुपुत्र इत्यादावनुद्भूतावयवभेदसमूहरूपद्वित्वादिभानं । एतन्मूलकमेव संभेदे नान्यतरवैयर्थ्यमिति पतञ्जलेर्य
द्वा न केवले ति नियमे न स्वाभाविकमहाभिधानमत्र लुग्विधिना केवलेनापि तदभिधानं ज्ञाप्यते । एवं च प्रकृत्यर्थानुवादिका
विभक्तिः यद्वा प्रकृतिप्रत्ययसमुदायवाच्यः सोऽर्थ इत्यनुक्तत्वादेव विभक्तिरत्र अन्वयव्यतिरेकाभ्यां तत्र प्रकृतिप्रत्यया
र्थावधारणं । अर्थवत्सूत्रादौ भाष्ये उक्तं एकत्वाद्यादौ च वचनान्तराभावाद् व्यतिरेकाभावेनान्वयस्याप्यनिश्चयात्केवलप्र
कृत्यर्थानवधारणमेवं स्वार्थे स्वनुद्भूतस्वभावादेवान्यार्थसंबद्धउपसर्जनार्थः केवलप्रकृतेरेव गम्यते इति न तत्र विभक्तिः
सैव चानुस्मृतिर्लुकाभ्यां ख्याप्यते यद्वा एकत्वादिविशिष्टः प्रकृत्यर्थो विभक्तिवाच्यो नैकत्वादिना विशेष्यते एकत्वादिविशि
ष्टएवार्थो न तु गुणान्तरविशिष्ट इति । एवं च वचनग्रहणं कार्यं स्पष्टं वेदं सर्वमनभिहिते सूत्रे भाष्ये संख्यासमुद्देशे हरिग्रं
थे चेति दिक् इदमपि सत्त्वं क्रियायोगे एव अन्यत्र तु कर्मणि द्वितीयेत्यादि साहचर्यात् तथैवाकांक्षितत्वाच्च तिङ्समाना
धिकरणे प्रथमेति वार्त्तिकाच्च क्रियान्वयिकर्त्रादौ च नेदान्वयाच्च क्रियायोगो बोध्यः यत्र क्रिया न श्रूयते तत्राध्याहारः अ
ततोऽस्तीत्यस्य प्रसक्तिर्नैवं तीपरोऽप्रयुज्यमानोऽप्यस्तीति भाष्यात् संबोधने चेत्यनेन संबोधनाधिके प्रातिपदिकार्थे व
र्त्तमानात्प्रातिपदिकात्प्रथमा तत्र संबोधनमभिमुखीभावः तत्फलं प्रवृत्तिनिवृत्ती तेन संबोधनविभक्तिरनुवाद्यवि
षयाः संबोध्यतावच्छेदकरूपेण संबोध्यस्य सिद्धिं विना तत्त्वासंभवात् तेन राजा न व युध्यस्वेत्यत्र उर्वर्शत्ये स्यादौ न सं
बोधनविभक्तिः राजत्वादेरसिद्धत्वेनानुवाद्यत्वाभावात् अत एव राजन्युध्यस्वेत्यस्य कुमारावस्थायां राजा न व युध्य १५२

स्वेस्य स्वराजावस्थायां न प्रयोगः केचित्तु संबोधनं सम्यक् ज्ञापनं संबोध्य ज्ञापनार्थमेव संबोधनविभक्त्यंतपदा-
घटितवाक्यप्रयोगात् तत्फलं प्रवृत्तिनिवृत्ती इति पूर्ववत् ज्ञापनेन सम्यक्त्वं चावश्यकर्तव्यत्वादिविषयकज्ञाना-
नुकूलत्वं तादृशज्ञानानुकूलव्यापारश्च तद्विभक्त्यंतपदघटितवाक्यप्रयोग एव यत्तु प्रयोक्तृइच्छाविषयत्वं ज्ञाने सम्य-
क्त्वमिति तन्न तस्य वाक्यप्रयोगानुमेयत्वेन विभक्तिबोध्यतावच्छेदककोटौ निवेशे मानाभावात् संबोधनपदाघटि-
तवाक्यप्रयोगे विबोध्यबोधे प्रयोक्तृइच्छाविषयत्वानुमानात् अन्यथा तस्य तत्प्रयोक्तृत्वमेव न स्यात् त्वं पचेस्यादौ प्रयो-
ज्यप्रवृत्तेरुत्तरदिष्टत्वस्य प्रवर्त्तनानुमेयत्वदर्शनाच्च हेग्राव्याद्रिसंबोधन तात्पर्यग्राहकं अचेतने तु चेतनत्वारोपेण गौणः
प्रयोगः संबोधनं चाभिमुखीकृत्य ज्ञातार्थज्ञानानुकूलव्यापारानुकूलो व्यापारः तद्व्यापारजन्यज्ञानानुकूलव्यापा-
राश्रयत्वं संबोध्यत्वं तत्वेन वृत्तिनिष्ठज्ञानविषयज्ञेयसाकांक्षः इति ज्ञेयेऽर्थे तस्यान्वयः स एव चलाप्यार्थः तेन राम
ज्ञायस्वेत्यादौ राम संबोधनविषयस्त्वामिति बोधः अभिमुखीकरणं स्ववचनार्थग्रहणे सादरत्वकरणं तद्योजकं च प्र-
त्वपरावृत्त्यादि हे राम त्वं सुंदर इत्यादावसीत्यध्याहारः एवं च धिङ्मूर्खेत्यादौ क्रियाध्याहारे प्रथमा तदभावे द्वितीयेत्या-
हुः तत्र सिद्धस्याभिमुखीभावे स्यादित्यस्य माणहरिग्रंथविरुद्धं संबोधनपदं यच्च तत्क्रियाया विशेषणं व्रजानि देवद-
अत्र त्तेति निधातोऽत्र तथा सतीति हरिः पुंजराजः अन्यथा तस्य विशेषणं वाक्यमिति समर्थसूत्रभाष्योक्तवाक्यलक्षणस्य
संबोधनपदार्थे क्रियाविशेषणत्वाभावेन व्रजानि देवदत्तेत्यादावेव न समानवाक्ये इति प्रकृतस्य विहितो निघातो न स्या

द्विति संबोधनविभक्तेरनुवाद्यविषयतयाऽनुवाद्यस्य च विधेये एवान्वयेन विधेयतायाश्च क्रियानिष्ठतया तस्य।
मेवान्वय इत्युक्तं एतच्च नञ्जीतिसूत्रे नाप्येध्वनित्तमिति समानाधिकरणसमासप्रकरणे समासवादे निरूपयि
ष्यामः तदुक्तं हरिणा सिद्धस्याभिमुखीभावमात्रं संबोधनं विदुः प्राप्ताभिमुख्यो ह्यर्थात्मा क्रियासु विनियुज्यते
संबोधनं न वाक्यार्थ इति वृद्धेभ्य आगमः इति एवं च केचिन्मतोक्त संबोधनपदार्थफलभूताभिमुखीभाव एवा
त्र संबोधनपदार्थः ननु सर्वः तदुक्तं अभिमुखीभावमात्रमिति एवं च क्रियासु विनियोगफलकोऽभिमुखीभा
वः संबोधनमिति सूचितम् अत्र सिद्धस्येत्यनेन तस्यानुवाद्यत्वं विनियुज्यत इत्यनेन क्रियासंबंधः प्रवर्तनाविष
यत्वस्येति बोधितं एवं चाभिमुखीभवद्रूपमाद्युद्देश्यकं प्रवर्तनाविषययोर्लक्षणमिति बोध्यः व्रजानि देवदत्तेत्यादा
वपि जानीहि इत्यध्याहारो वाक्यैकदेशन्याये तत व्रजनस्य कर्मत्वाद्देवदत्तस्योद्देश्यत्वादनयोः समानवा
क्यस्थत्वं उद्देश्यविधेयभावो वाक्यार्थः अभिमुखीभवनानुकूलस्य संबोधनविभक्त्यर्थस्य प्रयोगरूपव्या
व्यापारस्येतरनैरपेक्ष्येणैव प्रतीतिः तन्न वाक्यार्थ इति तदर्थ इति बोध्यं तत्र वाक्यैकदेशन्याये न व्रजानि
देवदत्तेत्यनेनैव जानीहीत्येतद्बुद्धिर्न वाक्यार्थबोध इति एकतिङ् वाक्यमिति वाक्यलक्षणमपि तत्रास्ये
वेति निघातसिद्धिः एतन्मूलक एव संबोधनस्य कर्तृकारकत्वव्यवहारो वृद्धानां तस्यैव तत्पदार्थत्वे न वि
नियोज्यक्रियाकर्तृत्वात् अत एव तिङ्समानाधिकरणे प्रथमेति वार्त्तिकमते प्रथमासिद्धिः संबोधने ना।

ष्यामे हि प्रातिपदिकार्थो इति सूत्रवदस्याप्यकरणमेव अत एव संबोधने चेति सूत्रं कर्मादिविशिष्टे प्रथमाभावे ज्ञापक
मामन्त्रिस्य प्रातिपदिकार्थसूत्रे मात्रग्रहणं प्रत्याख्यातं तेन हि संबोधनविषयेपि प्रातिपदिकार्थ इत्यनेन सिद्धिः स्यादि
तेति तत्त्वं इन वार्त्तिकेनैव तत्र सिद्धि कृचितेति वोध्यं वार्त्तिकनये सूत्रसत्त्वेपि संबोधनाधिके तिङ् समानाधिकरणेर्थे।
वर्त्तमानात् प्रथमेत्येव तदर्थस्योचित्यात् तस्मात्कर्तृकारकत्वं संबोधनस्येति हृद्योक्तं साध्वेव व्रजानिदेवदत्तेत्यादौ।
व्रजनक्रियान्वये नैवैकवाक्यत्वमिति न युक्तं तस्यां तस्य नियोगाभावेन क्रियासु विनियुज्यते इति हरिग्रंथविरोधा
पत्तेरिति दिक् यत्तु संबोधनस्य प्रकृत्यर्थविशेषणत्वेनोक्तं ब्राह्मणस्त्वं पचेति प्रयोगापत्तिरिति तन्न शाब्दशक्तिस्वा
भाव्येन संबोधनविशिष्टं तत्पदसमभिव्याहारे युष्मदस्मद्बोध्यावस्थापरामर्शकत्वस्य व्युत्पत्तिसिद्धत्वेनैकवचन।
स्यासाधुत्वात् इत्यलं इति प्रथमा द्वितीयादयो द्विविधाः कारकविभक्तय उपपदविभक्तयश्च कारकं क्रियाजनक
त्वशक्तिः साध्ये करोतीति क्रियां निर्वर्त्तयतीति व्युत्पत्तिप्रदर्शनात् ब्राह्मणस्य पुत्रं पंथानं पृच्छतीत्यादौ ब्राह्मणस्य न
कारकत्वं पुत्रेणान्यथासिद्धत्वान्नाभावात् हरिरप्याह स्वाश्रये समवेतानां तद्वदेवाश्रयांतरे क्रियाणामभिनिष्प
त्तौ सामर्थ्यं साधनं विदुरिति द्रव्यगता क्रियाजनकता शक्तिरेव कारकं साधनमिति चोच्यते सिद्धस्य द्रव्यस्य च
रूपतः क्रियाजनकत्वानुपपत्त्या शक्त्याविशिष्टस्यैव तत्त्वं वाच्यम् इति प्राप्तासामविवेके तच्छक्तिरेव साधनं तदु
क्तमन्तर्निहितसूत्रे साध्ये गुणः साधनमिति शक्तिर्वात्र पारतंत्र्यात् गुणत्वेनोक्तात्र कर्तृकर्मणोः स्वाश्र।

मं॰ चू॰ १५४ यत्समवेतक्रियाजनकता करणादीनामाश्रयांतरसमवेतक्रियाजनकता किंच ऽस्य कारकत्वे तस्यैकरूपत्वे
न कार्यवैचित्र्यानुपपत्तिः स्वरूपते च घटं पश्य घटेन जलमाहर घटे जलं निधेहीत्यादौ कार्यवैचित्र्यं सर्वस्य च सर्वश्रा-
त्याश्रयते इति कदाचित्कस्यचित् क्वचिदवस्थानात् न विचित्रानेककार्योपपत्तिः क्वचिद्वस्त्वाविष्टऽस्यापि साधन
त्वे न व्यवहारः शक्तिशक्तिमतोरभेदस्यापि सत्वात् शास्त्याकरोतीत्यादौ शक्तिरपि ऽध्यायमाणतया शस्त्रं तत्र योगः
अत एव विभक्त्यर्थे केनाप्यभावः संगच्छते ऽस्यैव साधनत्वे तु तस्य शब्दे नैवोक्तत्वाद् अयमप्रयोग एव ने-
ति कथं तेन समासः स्यात् पञ्चौ कर्त्तरीत्यादेश्च कर्तृशक्त्याश्रये इत्यादिप्रकारेणार्थ इत्यलं सर्वेषां कारकाणां
च स्वस्वावांतरक्रियाद्वारा प्रधानक्रियानिष्पादकत्वं अत एव तेषां भावनायामेवान्वयः क्रियाजनकत्वावगतौ क-
मा क्रियेत्याकांक्षोदयेन तत्रैवान्वयौचित्यात् असंनिहितसंप्रदानस्यापि दानबुद्धिस्थत्वे मतिदानं तज्ज्ञानपूर्वकाल
त्वेनैव जनकत्वं तावतैव दानक्रियानिष्पत्तेः घटं स्मरति घटं करोतीत्यादौ बौद्धघटादेः पूर्वकालत्वात् स्मरणा
दिनिष्पादकत्वमित्याहुः स्वं क्रियान्वयित्वं कारकत्वमिति तु न कारकाणां भावनान्वय ऽसस्य क्रियान्वयिनां क्रि-
यान्वय ऽत्यर्थाप त्याऽसंगत्यापत्तेः अधिकरणस्य कारकत्वेन क्रियान्वय इत्यादिनवद्रीय व्यवहारासंगत्यापत्ते-
श्च कश्चित्तु प्रसक्तादिनार्थेना त्वापरं प्रतिसंस्कृतेन बोधनेच्छायां संस्कृतस्य व्याकरणत एव प्रकृतिप्रत्ययविना-
गद्वारा यस्य ज्ञानं तेन पूर्वं क्रियान्वयानवगस्याकारकत्वज्ञानाभावात् तदीयसंस्कृतव्यवहारानुपपत्त्या न्याय्यो १५४

क्तमेव साधयितुमाह यत्तु क्रियान्वितत्वं स्वार्थान्वयित्वं कारकत्वमिति तन्न पचत्योदनमित्यादौ धात्वर्थे कारक
त्वकर्मत्वव्यवहारापत्तेः कारकाणां भावनान्वय इत्यस्य भंगापत्तेश्च अत एव दोषाच्च न च कारकत्वं स्वकर्तृपर्याय
त्वेन कारकं करणमित्यादि विरुद्धं कारकं कर्तेति पुनरुक्तं चेति वाच्यं हरिणैव समाधानात् तथाहि निष्पत्तिमात्रे कर्तृत्वं
सर्वत्रैवास्ति कारके व्यापारभेदापेक्षायां करणादित्वसंभव इति तेनोक्तं सर्वेषां स्वस्वव्यापारदशायां स्वातंत्र्येणैव क्रियाज
नकत्वात् कर्तृत्वेन कारकत्वं ततः कः केन किं पचतीति विवक्षायां स्वस्वव्यापारविशेषेण करणादित्वं तत्र साधनांतरा
नियोगव्यापारः कर्ता तद्व्यापार एवं सर्वत्र प्रधानधात्वर्थः कर्तुः क्रियया ऽऽप्तुमिष्टतमव्यापारं कर्मकारकांतरसाधकव्या
पारं करणं प्रेरणानुमत्यादिव्यापारं संप्रदानं अवधिभावोपगमव्यापारमपादानं कर्त्रादिव्यवहितक्रियाधारोऽधिकरणं
स्वतंत्रप्रेरयन् हेतुः तत्र सामान्यस्वार्थकत्वादिहो षस्य कारकत्वमनुवृत्तमिति करणं कारकमित्याद्युपपत्तिः यथापु
त्रजन्मनि पित्रोः कर्तृत्वेऽपि विवक्षायामस्याभियमस्मात्पुत्रं जनयतीति व्यवहारस्तथा एवमीदृशो स्थलेऽपादा
नस्य कर्तृत्वेऽपि ग्रामादागच्छतीत्येतद्विषये ग्रामः आगच्छतीति प्रयोगस्तु न अनभिधानात् करणत्वाद्यवस्थायां क
र्तृसंज्ञा तु न कारकत्वादेव स्वातंत्र्येण लब्धे स्वतंत्रः कर्तेति पुनः स्वतंत्रग्रहणं स्वातंत्र्यमेव यस्य तस्य कर्तृत्वार्थं न तु पा
रतंत्र्ययुक्तस्य स्वातंत्र्ययुक्तस्य साकारकसंज्ञा तु वस्तुमत्त्वात् तं अस्य स्थितिमात्रेण करणादीनां विधानसामर्थ्या
त्स्ववर्तितेऽस्तत्वं यद्वा प्रधानक्रियाजनकस्वर्वोक्त स्वस्वव्यापारे कर्तारः प्रधानकर्त्रपेक्षया करणत्वेऽपि स्वगतमन्तव्या।

मं०जू० १५५

पारेस्वातंत्र्यमस्त्वात् अकुर्वतः साधनत्वानुपपत्तेः एवं च तत्तद्व्यापारलब्धकरणत्वादिमंत एव कर्तृपारतंत्र्येऽपि स्वस्वव्या
पारे स्वातंत्र्यमस्त्वात् तद्द्वारा मुख्यक्रियायामपि स्वतंत्रा इति प्रधानक्रियाकर्तृत्वं चैवं तोविति नानुपपत्तिः विभक्तिस्तु करण
त्वादिनिमित्तैवानवकाशत्वात् करणत्वादेरेवोद्भूतत्वात् कर्तृवियोगेन तदीयव्यापारस्यैव धात्वर्थेनोद्भूतत्वात् अविव
क्षायां तु कर्तृविभक्तिरेव सर्वत्र क्वचित् संप्रदानयोस्तु नमाऽनभिधानादिस्तुक्तं यथा युद्धकर्तारो वियोधारो राजनियोगा
पेक्षणादस्वतंत्रा अपि नियोगोत्तरं पुनः स्वतंत्रा एव नियोगमात्रात्तु तल्लिंगजयादिनाशाज्जाता तथा कर्तृनियोगोत्तरं च करणा
दिषु स्वस्वव्यापारद्वारा क्रियानिष्पादने स्वातंत्र्यं तत्करणत्वादिकालेऽप्यबाधितमेवेत्यदोषात् नियोगमात्रेणैव तत्रैव कर्तृ
त्वव्यवहारो भवतीति दिक् यद्वा ज्वलनादिरूपस्वस्वव्यापारे स्वातंत्र्यात् तेषां धात्वर्थत्वेऽपि धाः पचंतीत्यादेर्दर्शनाच्च तत्कालिकस्वा
तंत्र्येण कारकत्वं स्वस्वव्यापारद्वारा प्रधानक्रियानिष्पादकत्वे न च करणत्वादिसंप्रदानापादानयोरपि स्वव्यापारस्वातंत्र्य
मादायैव ग्राममागच्छतीति विप्रो ददातीति प्रयोगान्नावेपि कारकत्वं बोध्यं तदुक्तं नाक्षेपपर्यायं करणाधिकरणकर्मणां
कर्तृत्वं निदर्शितं अपादानादीनां कर्तृत्वनिदर्शनायेति वृक्षो वधिनावमुपगच्छतीति विप्रोऽनुमन्यते इत्यादौ स्वस्वव्यापा
रप्रवृत्तयोः कर्तृत्वं द्रष्टव्यं पतिददधातुवाच्यतानु नतद्व्यापारस्यानभिधानादिति बोध्यं कारकत्वं चोपलक्षणं सदेव
तत्तत्संज्ञोपयोगीति स्पष्टं चेदं सर्वं भाष्ये सद्वस्तु दृश्यते तु क्रियान्वयित्वं कारकत्वं वदंति तेषां कर्तृसमवायेऽपि कर
णं कारकमित्यादेरनुपपन्नत्वाभावात् तत्र तदाशंकासमाधानपरभाष्यासंगतिः तदर्थकारकशब्दस्य साधुत्वात्

पपत्तिश्चेति बोध्यं तत्र कर्मणि द्वितीयेति सूत्रं तत्र कर्मत्वं व्याकरणशास्त्रबोधितकर्मसंज्ञकत्वं तत्र कर्तुरीप्सिततमं कर्मेति सूत्र
बोधितकर्मत्वं कर्तृगतप्रकृतधात्वर्थव्यापारप्रयोज्यव्यापाराधिकरणफलाश्रयत्वेन कर्तुरुद्देश्यत्वम् तंडुलं पचतीत्या
दौ विक्लित्याश्रयत्वात्कर्मत्वं विक्लित्तिरूपफलस्यापि यदेच्छाविषयत्वेन फलाश्रयत्वात् तत्त्वमत एव तत्समानाधिकर
णे स्तोकं पचतीत्यादौ कर्मत्वं उद्देश्यत्वं च सन्नांगीकृतं अत एव कर्मण्यमनिवेशेतीतिसूत्रे कर्मणोनस्याभावे कर्मण ए
व संप्रदानसंज्ञापर्यायेण स्यादिति आपादितं भाष्ये उद्देश्यत्वं च साक्षात्फलरूपे धात्वर्थे क्रियायाः फलेच्छापूर्वकेच्छावि
षयत्वात्तदाश्रयत्वात्तंडुलादीनामपि तत्त्वं फलस्यापि क्रियाजनकत्वं तज्ज्ञानपूर्वकं क्रियोत्पादनात् रथो ग्रामं गच्छ
तीत्यादावुद्देश्यत्वारोपेण निर्वाहः तस्य न च कालिकादिसंबंधेन फलाश्रये तिव्याप्तिः फलतावच्छेदकसंबंधेन तदाश्र
यस्य ग्रहणात् यद्वा तस्य नोद्देश्यत्वे तिन दोषः गच्छतियोगे गम्यर्थसंयोगरूपफलाश्रयस्यापि कर्तुर्न कर्मत्वं परत्वात्क
र्तृसंज्ञया बाधात् आत्मनात्मानं हंतीत्यत्र तु शरीरांतःकरणरूपावच्छेदकभेदेनात्मनि भेदमारोप्य कर्मत्वकर्तृत्वोप
पादनं भाष्ये कृतं कर्तृगतप्रकृतधात्वर्थव्यापारप्रयोज्यफलेत्युक्तेरश्वेर्माणवकं वारयतीत्यादावश्वादेर्न कर्मत्वं अश्व
व्यापारणार्थानामिति सूत्रमस्यापवादः स्यादिति माणवकस्यापि कर्मत्वं न स्यात् वारयतेश्च संयोगाद्यनुकूलव्यापा
राभावानुकूलो व्यापारोर्थः एवं ग्रामं गमयतीत्यादौ ग्रामस्य कर्मत्वाय प्रयोज्यत्वनिवेशः प्रयोज्यत्वं च जन्यजन्यसा
धारणी विषयताया अजन्यत्वे च स्वविषयज्ञानसामग्रीप्रयोज्यज्ञानविषयसाधारणी च निवेश्या भावेषु अश्वं वा

ध्नातीत्यादौ बंधनप्रयोज्यजनकत्वाश्रयमाषाणां तत्त्ववारणाय प्रकृतधात्वर्थेति फलस्यापि विशेषणं बोध्यं पयसौदनं भुंक्ते इ
त्यत्र पयसः करणत्वस्यैव विवक्षणेन प्रकृतधात्वर्थफलाश्रयत्वेनाविवक्षणे न च न कर्मत्वं अन्यथाविवक्षायां तु परत्वात्कर्म
त्वमेव न च पयसः कर्तुरुद्देश्यत्वाभावादेव न तदाप्तिः पदाकृतभोजनोपि पयोलाभेन भोजने प्रवर्तते तदा तत्क्रियायाः प
यउद्देश्यकत्वसत्त्वात् फलत्वं च कर्तृप्रत्ययसमभिव्याहारे तद्धात्वर्थनिष्ठविशेष्यतानिरूपितप्रकारताश्रयत्वरूपत्वा
र्थत्वं पश्य मृगो धावतीत्यादौ धावनादेः फलत्ववारणाय तद्धात्विति अन्यथा प्रधानानुरोधिकर्मत्वस्य बलवत्त्वात्
मृगस्य कर्तृत्वं न स्यात् कर्मणि विहितद्वितीयायाः कर्मत्वशक्तिमानर्थः कर्मणीति सूत्रस्वरसात् एवं सर्वविभक्तीनां
तत्तत्कारकशक्तिमद्धर्मिबोधकत्वं बोध्यं तत्र च प्रकृत्यर्थो विशेषणं विशेष्यं धात्वर्थस्तत्त्वशक्तिनिरूपकत्वसंबंधेन
एवं च हरिं भजतीत्यादौ हरिरूपं यत्कर्म तन्निष्ठशक्तिनिरूपकः प्रीत्यनुकूलो व्यापार इति बोधः प्रीत्यनुकूलो व्यापारश्च
भजेरर्थः यत्तु फलाश्रयः कर्म तत्र फलस्य धातुनालाभात् आश्रयो द्वितीयार्थः तत्र प्रकृत्यर्थो विशेषणं आधेय
तया फलं विशेष्यं आश्रयत्वं शक्यतावच्छेदकमखंडोपाधिरूपमाश्रयतात्वं तदनुगमकं आश्रयत्वस्य निरूप
कतया फलेन्वय इति तन्न युक्तं कर्मणीति सूत्रस्वरसभंगात् न चाधेयत्वस्य संसर्गत्वांगीकारे तंडुलः पचतीत्यतोपि
बोधापत्तिरिति वाच्यं विभक्त्यर्थव्यभिचारी कृत्स्नप्रातिपदिकार्थधात्वर्थयोः साक्षाद्भेदेनान्वयाव्युत्पत्तेः अन्यथा कर्मत्व
संसर्गकबोधस्याप्यापत्तिरिति तन्न सप्तमीपंचम्यो कारकमध्येऽस्य त्र कारकशब्दस्य शक्तिपरत्वेन शक्तिशक्तिमतोश्चाभेदेन श

क्तिमत एव द्वितीयाद्यर्थतायां भाष्यादिसंमतत्वात् किं च त्रयीशब्दानां प्रवृत्तिरितिभाष्यसंमतमुख्यपक्षे संज्ञाशब्दे शारोवि
नस्य प्रवृत्तिनिमित्तबोधो यथा डित्थादिपदैः पूर्वपूर्वडित्थादिगुणारोपेण नतु डित्थादिबोध इति हल्सूत्रे कैयटे स्पष्टं एवं
चात्र स्वसंज्ञाशास्त्रेषु तत्तत्प्रवृत्तिनिमित्तशक्तेः संज्ञिनि बोधनमेवोचितं तद्वृत्पतावच्छेदकस्यैव तत्तत्संज्ञाशब्दप्रवृत्तिनिमित्त
त्वे फलाश्रयत्वात् कर्मत्वमित्यादिव्यवहारासंगत्यापत्तेः न चास्मतलात्कर्मसंज्ञे स्वार्थे लक्षणापत्तेः संज्ञामजानतामा
पि तथाव्यवहाराच्च त्रयीपक्षे कर्मादिसंज्ञाशब्दानां पदप्रवृत्तिनिमित्तकत्वाभावेन तदुत्तरत्वप्रत्ययेन पदानभिधानाच्च अना
दित्वात् व्यवहारस्य पूर्वपूर्वव्यवहारेण कर्मादिपदानां तत्तच्छक्तिमति शक्तिग्रहः वृद्धिरादैजित्यादावपि एवमेव तत्तत्प्रवृ
त्तिनिमित्तं च क्वचिद्वास्तवं क्वचिदारोपितमित्यपि व्यवहारतो निर्णेयं यत्र डित्थादिषु प्रवृत्तिनिमित्तज्ञानाभावस्तत्र पद
प्रकारक एव बोधो नलपदादाविवेति प्राञ्चः किं चाश्रयत्वस्यातिप्रसक्तत्वान्न तत्त्वस्य तावच्छेदकमुचितं न च फलनिरू
पितत्वविशिष्टमाश्रयत्वं तथा तद्रूपेणावच्छेदकत्वे गौरवात् वैकुंठमध्यास्ते इत्यादौ तदभावेन तस्य न्यूनवृत्तितया द्विती
याशक्यतावच्छेदकत्वानौचित्याच्च तत्र मुख्याश्रयत्वस्य शक्यत्वे मादेनीनार्थत्वापत्तिः हरिपदात्तस्य लाभेऽपि शक्तिम
त्वेनालाभान्न दोषः कर्मादिपदवत्त्वे न शक्यत्वे तु गौरवं आकृत्स्यधिकरणेऽपि स्यात् शक्तिरेव वाच्येत्यस्य रेतन्न परे तु कर्म
त्वादिशक्तिमान् तत्कृतं विशेषणत्वं क्रियाकारकभावः संबंधश्च द्वितीयाद्यर्थः तद्योग्यो वा प्रातिपदिकार्थप्रवहिनाता
शक्तियोगात्कर्मादिशब्दवाच्य इति स एव विशिष्टशक्तियुक्तो विभक्त्यंतवाच्य इति प्राशस्त्यस्य इति सूत्रे कैयटोक्तेः किं च।

स्यं तत्र वाच्य इति पाठे विग्रहमात्रातिरिक्तविभक्त्यर्थं न वाच्य इत्येवार्थः अर्थाद्विभक्तिविपरिणामो भविष्यतीति भाष्यमुपादाय
विभक्तिशब्देन विभक्त्यर्थो नार्थ अत इत्युपक्रमात् कष्टंश्रितो भवतीत्यत्र क्रियाकारकयोरभिसंबंधस्य द्वितीया वाचिका भवतु।
ति समर्थसूत्रभाष्याच्च यत्तु तत्र कैयटेनोक्तं अत्राभिसंबंधपदेन शक्तिरेवोच्यते तयोरभिसंबंधनिमित्तत्वादिति तन्न राज्ञः पु
रुष इत्यत्र राजा विशेषणं पुरुषो विशेष्यस्तयोरभिसंबंधस्य षष्ठी वाचिका तथा कष्टंश्रित इति क्रियाकारकयोरिति संदर्भेण
षष्ठीवदस्या अपि संबंधवाचकत्वस्यैव प्रतीतेः भाष्यस्थसंबंधपदस्य लाक्षणिकत्वे मानाभावाच्च क्रियात्वकारकत्वसमू
हः संबंध इति तद्भाष्यार्थः भेदसमानाधिकरणविशेषणत्वज्ञाने एव संबंधाकांक्षेति तद्वि द्वितीयावाच्यविशेषणत्वं च श
क्तिमत्त्व एवेति भाषितवाच्यश्लोके अपंचकं प्रातिपदिकार्थ इति पक्षे विभक्तिद्योत्यतया विशेषणत्वमुचितं कारकस्य वि
भक्त्यर्थत्वपक्षेपि तथैव संख्यावत् सत्त्वप्रधानानि नामानीति निरुक्ताच्च विभक्त्यर्थश्चाश्रयत्वमत इति तद्धितश्चेति सूत्रे भा
ष्येप्यष्टं तत्र हि विभक्त्यर्थप्रधानाद्य यस्य विभक्त्यर्थप्रधानत्वादसत्त्वभूतत्वमुक्तं विशेषणभूतत्वेपि कर्म हरीतिवत्
हरिकर्मकेत्यप्युल्लेखः कर्मशब्दस्य समासघटकस्य संज्ञाशब्दत्वे न तत्र विशेष्यविशेषणभावे कामचारात् कांडे इत्या
देविभक्त्यर्थप्रधानत्वोक्तिस्तु तदर्थसंबंधे प्रकृत्यर्थस्य प्रकारत्वमात्रेण संसर्गभाने संसर्गविशेष्योभयनिरूपितत्वा-
स्य प्रकारतायां स्वीकारात् अत एवानेकमन्यपदार्थ इति सूत्रे भाष्ये विभक्त्यर्थमुपक्रम्य तत्र हि सर्वपक्षा सद्वंचलतेड
सुक्तं अत्रद्योतकतापक्ष एव सूत्रः पंचकं प्रातिपदिकार्थ इति पक्षे तत्त्वस्यैवोचितत्वात् कुत्सित इति सूत्रे भाष्येपि स्वार्थ

मभिधायशब्दो निरपेक्षोऽस्य माह समवेतं समवेतं तस्य च वचने लिंगं संख्यां विभक्तिं च अभिधाय तान् विशेषानपेक्षमाणः स्वा-
कृत्स्नमात्मानं प्रियकुत्सनादिषु तनः प्रवर्त्तते ऽसौ विभक्त्यंतरस्य तेन पंचकं प्रातिपदिकार्थ इत्येवोक्तं सर्वत्र स्वार्थाभि-
धायकशब्दस्यैवाभिधानकर्तृत्वप्रतीतेः कर्मणि द्वितीयाद्येकयोरित्यादीनां भाष्ये नियमलोक्त्यापि पंचक प्रातिपदिकार्थ
पक्ष एव लभ्यते तदा ह्यनिर्दिष्टार्थाः प्रत्ययाः स्वार्थे भवंतीति सर्वत्र सिद्धे तेषां नियमत्वं युज्यते तदुक्तं बहुष्विति सूत्रे भाष्ये सुपो
ऽविशेषेण प्रातिपदिकमात्राद्विधीयंते इति कैयटेन च स्पष्टमेवोक्तम् अत एव दधिराजेत्यादौ प्रातिपदिकमात्रात्सर्वबोधः संग-
च्छते लुप्तस्मरणं तु लोपमजानतोऽसंभवि एकशेषसूत्रे प्रत्ययलक्षणकार्यं लोपफलं वदता भाष्यकृता तिरस्कृतं च अत ए-
व क्रीतात्करणपूर्वादिति सूत्रे ऽगवां ङीत्वे स्वार्थातिप्रसंगमाशंक्य विभक्त्या अवधानान्नेत्युक्तम् अन्यथा विभक्त्यंतस्यैव क-
रणवाचकत्वेन तदसंगतिः स्पष्टैव संबंधस्तु वाच्य एव अत एव प्रकारीभूतविभक्त्यर्थसंबंधेन नामार्थधात्वर्थयोरन्वय इ-
ति वृक्षः हरिकर्मकप्रीतीत्यादिक्रमेण बोधः प्रकारीभूतो विभक्त्यर्थः कर्मत्वादिशक्तिस्तत्र घटितेन क्रियात्वकारकत्वसम्-
हत्त्वसंबंधेन तयोरन्वय इति स्फोटोऽस्त्यर्थः प्राकारीभूतस्यापि संबंधघटकत्वं दृष्टं राज्ञः स्वमित्यादौ अत एव घटमित्येतावा-
न्मात्रोक्तौ क्रियाविशेषजिज्ञासा तत्रापि वाक्यैकदेशन्यायेन घटकर्मकमित्येव बोधः यदा तु प्रातिपदिकार्थ इतरविशे-
षणत्वेनैव विवक्षितः शक्तिश्च तदन्वये नैव विवक्षिता तदा घटः कर्मेत्याद्येव यदा शक्तिरन्वये न विवक्षिता तदा द्वितीया
द्यः स्पष्टं चेदं षष्ठी शेषे इति सूत्रे भाष्ये तदुक्तं स्वशब्दैरभिधाने तु स धर्मो नाभिधीयते विभक्त्यादिभिरेवासौ न प्रकारः प्र-

मं.जू.० १५८

तीयत इति सधर्मः शक्तिरूपः विभक्त्यादिभिरिति स्यादीनां तदेस्यायत्ययग्रहणं दधितिष्ठतीत्यादौ प्रातिपदिकग्रहणं
च उपकारश्चाष्टे इ॰ आद्यं जं भत्वेन प्रातिपदिकार्थस्य स्वावेशेन विशेषणत्वनियामकत्वादुपकारकइत्यर्थकः क्रिया
याइत्तिशेषः कर्मकर्त्रादिपदवत् पाचकादिपदानि अपि तद्योग्यताविशिष्टद्रव्यवाचकानि न तूद्भूतकारकशक्तिप्रतिपा
दकानीति गतिकारकोपपदादिति सूत्रे भाष्यकैयटयोः स्पष्टं अत निहितसूत्रं नु अनुद्भूतशक्तिककर्मादिग्रहणं ने स्पेन
स्यात्स्यर्थकमेव तिङो स्त्ववपि घटोस्तीत्यादौ प्रातिपदिकस्योद्भूतकर्त्रादिशक्त्यावृत्ते शक्तावुद्भूतत्वं च सर्वत्र प्रतीयमान
प्रातिपदिकार्थेन प्रतीयमानत्वं तद्वैपरीत्ये निमित्तं चाकांक्षादिप्रतिपाद्यत्वं ततु समानाधिकरणत्वं च नञ्समासनिहि
तः सोर्थो तन्मूलः प्रातिपदिकार्थः संपन्न इति ग्रंतन्मूलत्वं भेदेनाप्रतीयमानत्वमेव प्रथमापि विशेषणत्वेवाधिकाश्र
स्तिक्रियायाः सर्वत्रमत्वात् अत एव प्रथमायाः कारकविभक्तित्वव्यवहारो भाष्ये इत्याहुः कारकान्वययोग्यक्रियायाश्च
धातूपस्थित्यैव न तु निपाततद्धिताद्युपस्थितायाः स्पष्टं चेदं कर्तृकर्मणोरिति सूत्रे भाष्ये अत एव ज्ञातेन क्रीतइत्यर्थके ज्ञा
तपदोपात्तक्रियायां न कारकान्वयः ज्ञातो देवदत्तेनेत्यादिः अधिकारवारीशेणेनेत्यत्र तु हेतुतृतीया विषवृत्तोपि
संवर्ध्य स्वयं छेत्तुमसांप्रतमित्यत्र तु मुनः साधुत्वायेष्यते इत्यध्याहाररूपकत्वे न तेन कर्मणा उक्तत्वेन न दोषः विष
वृत्तोपि संवर्ध्य छेत्तुमिष्यते इति यत्तदसांप्रतमत्राप्यमिस्मर्थो नारदेछाया अप्याप्यत्वं च तद्विषयस्यानाप्यत्वेन
एवं चेच्छार्थेषु इति तु मन्न अमुं नारद इत्यवोधीत्यादौ नारद इति तिष्ठीक्कस्मीयज्ञानानुकरणं नारद इत्येतच्छब्दा। १५८

निलष्यमाणाकारो बोधोऽस्यर्थ इति प्रथमांतस्याप्रातिपदिकत्वान्न द्वितीये समस्यत्र विस्तरः तंडुलानोदनं पचती
त्यत्र विक्लेदनं निर्वर्तनं पचेरर्थः तंडुलान् विक्लेदयन्नोदनं निर्वर्तयतीत्यर्थ इत्यनेनैव द्वयोः कर्मत्वं तंडुलानो
मोदनं पचतीत्यादौ विकारयोगे षष्ठी निर्वर्तने च पाकस्य करणत्वं तंडुलविकारमोदनं पाकेन निर्वर्तयतीत्य
र्थः शेषषष्ठ्यंतार्थस्य स्वान्वययोग्यनामसमभिव्याहारे तेनैवान्वय इति मुख्यत्वेन तदर्थस्य क्रियान्वय इति
कर्तृरीत्यैवेति मिश्रैर्व्याख्येयस्पष्टं काष्ठं भस्म करोतीत्यादौ विक्लित्त्यनुकूलव्यापारनिर्वर्तने धात्वर्थेऽन्वयः
प्राग्वत् अथ प्रधानकर्मणि त्वादयः प्रधानकर्मण्याख्येये लादीनाहुर्द्विकर्मणामिति व्याख्येते प्रधानकर्मत्वं
च कर्तृत्वस्य समभिव्याहारे प्रधानीभूतव्यापारविशेषणफलाश्रयत्वं एषं तद्विषये ईदृशप्राधान्यस्यैव ग्राह्य
त्वात् अजां कोटाहरणयोर्निर्विशेषमानोदनत्वस्य मनोरथे तत्त्विष्टफलविशेषणकव्यापारस्यैव तत्तत्रस्थ नाख्य
णानुपपत्तिः प्राधान्यस्य प्रतीतेः तंडुलरूपे कर्मणि लादय इति तु नव्यानां प्रमाद एव दुहादिषु व्याख्येगण नाज्ञावाच्य
तीत्यत्र गोनिष्ठ अमुत्र देशसंयोगानुकूलव्यापारानुकूलव्यापारार्थकानामनेनैव द्विकर्मकता संयोगस्य फल
तावच्छेदकः संबंधो ग्रामनिष्ठस्तदनुकूलव्यापारस्त्वजानिष्ठः प्रधानव्यापारजन्यफलाश्रयत्वादजा प्रधा
नं तत्र लादयः अजा नीयते ग्राममित्यादि गामात्रयति मावेश्म देवीश्राद्धमित्यादाश्यत्र दध्यानयनेन पयसः संस्का
ये तथा पर्थप्राधान्यमादाय तत्रेष्टेन पयसः परामर्श इति मीमांसकग्रंथानेयाः दधिनिष्ठसंयोगानुकूलव्यापा

र्थकत्वान्न धातोः पयसः सप्तमी ड्हरेण्यन्तःस्थितद्रवद्रव्यविभागानुकूलव्यापारानुकूलव्यापारार्थत्वे गां
दोग्धि पय इत्यत्र गोपयसोरन्यतरस्य नेन कर्मत्वं गोः कर्तृव्यापारजन्यफलाश्रयत्वात् पयसस्तत्प्रयोज्यफला
श्रयत्वात् गोर्विभागाश्रयत्वे न तु न कर्मत्वं पयोनिष्ठविभागीयसंबंधस्यैव फलतावच्छेदकत्वात् तत्त्वेना
नुद्देश्यत्वाच्च अत एव प्राधान्यं चलोरिति तत्र लादयः एवमन्येषामपि दुहादीनां जिदंड्यादीनां च द्विकर्मकत्वं बो
ध्यं गर्गाः शतं दंड्यंतामित्यत्रोक्तं प्राधान्यं गर्गाणामिति तत्रैव लादयः उद्देश्यत्वरूपमार्थप्राधान्यं तु शता
स्येत्यनुद्देश्यत्वेनाप्राधान्ये गर्गानुरोधेन न शतानुरोधेन वृत्तिरिति न वृद्धिसूत्रस्थभाष्यविरोधः अमन्तमं वुनिधिमी
मं थेऽस्याद्युक्तेवमेव मासमास्तेऽस्यादौ आस्याद्देशासनादिकरणके व्यापनेवृत्तिर्धात्वाप्तिमीमांसादिनिष्ठफलं
मासमासनेनाप्नोतीत्यर्थः यद्वा व्यापनपूर्वके आसने वृत्तिः मासं व्याप्नुवन्नास्ते इत्यर्थः उभयथापि कर्तु
रितिसूत्रेण कर्मत्वम् आसनजन्यत्वस्य आत्मावच्छेदेन तस्याः फलत्वं अनयारीत्या मासमोदनं पचतीत्यपि
न वत्स्येव आसनादिमात्रे वृत्तौ त्वधिकरणत्वात् सप्तमी समायां समायां विजायते इत्यत्र यथा ननु यद्यपि प
राधीनतया विषं भुंक्ते इत्यादौ भुजिक्रियाफलाश्रयत्वे नोद्देश्यत्वाद्द्वेनमिष्टं आनन्ख्य विषमीप्सितं यत्तदन
न्वयतीतिव्याख्यातेः तथापि चौरान्पश्यति ग्रामं गच्छन् तृणं स्पृशतीत्यादौ कर्मत्वं न स्यात्तेषामनुद्देश्यत्वा
त् चौरविषयेन्द्रियसंबंधात् द्वेष्यमाना अपि न दर्शनोद्देश्या अपि त्वनिष्टदर्शनाएवेति द्वेष्याः तृणे औदासी

सिध्यादावुद्देश्यत्वमिति चेन्न तथायुक्तं चानीप्सितमित्यनेन सत्त्वात् अनीप्सितत्वमनुद्देश्यत्वं तत्त्वं च प्र
सामस्त्या यद्धात्वर्थफलाश्रयत्वेन कर्मत्वं तद्धात्वर्थकर्तुरेव बोध्यं तेन न वारयतियोगे ऽग्न्यादेर्नानापि।
कर्मता तथायुक्तत्वं प्रकृतधात्वर्थप्रयोज्यफलाश्रयत्वं यत्तु परसमवेतक्रियाजन्यधात्वर्थफलाश्र
यत्वं कर्मत्वं परसमवेतेति विशेषणाच्चैत्रश्चैत्रं गच्छतीति न प्रयोगः तत्र द्वितीयायास्तत्प्रकृत्यर्थापेक्षया पर
त्वं बोध्यते आख्यातेन तु स्वार्थसंख्यान्वय्यपेक्षया परसमवेतत्वं च धात्वर्थक्रियान्वयि गमिपत्योः पूर्व
देशोत्सर्जनोत्तरदेशसंयोगदेशश्च तत्र परयोः कर्मत्ववारणाय धात्वर्थेति तत्र क्रियायाः फलस्य च धात्वर्थत्वेनैव ला।
भात् आधेयत्वं नेदं च द्वितीयार्थः तत्र फले आद्यान्वयोऽस्य सामानाधिकरण्येन व्यापारे नेदं प्रकृत्य
र्थस्य फलान्वयि भक्तिविशेषावच्छिन्नप्रतियोगितयाऽन्वयः एवं चैत्रो ग्रामं गच्छतीत्यादौ ग्रामाधेयफला
नुकूलग्रामभेदसमानाधिकरणव्यापारवानिति बोधः एतेन प्रतियोगितासामान्येनान्वये द्वित्वावच्छिन्नप्रति
योगिताकचैत्रभेदस्य चैत्रे सत्त्वेन चैत्रश्चैत्रं गच्छतीत्यस्यापत्तिः अन्वयितावच्छेदकावच्छिन्नप्रतियोगितया
न्वये देवदत्तोऽश्वं गच्छतीत्यस्यानापत्तिरिति निरस्तं इति तन्न परयाकर्तृसंज्ञया बाधेन तत्प्रयोगापत्तेरसं
भवेन नेदे शक्तिकल्पनस्य व्यर्थत्वात् न च ततो बोधस्याद्दृस्यार्थे तत्कल्पनं तथायुक्तमिति ततो बोधस्य
दुर्वारत्वात् किंच द्वितीयार्थाधेयत्वान्वितफलप्रकारकबोधं प्रति द्वितीयान्तार्थवृत्तिभेदप्रतियोगिता।

वच्छेदकव्यापारोवच्छिन्नेतेहि तुल्यकल्पनेनतत्कारणात् फलान्वयानुरोधेनतत्वाप्यावश्यकेकार्यकारणभावे
नादृशव्यापारप्रवेशोननमेगौरवंचतत्वतुमेदेशाक्तेः समानाधिकरणत्वेनतत्प्रकारकबोधेधातुजोवच्छि-
तिः कारणमितिकार्यकारणभावांतरस्यचकल्पनेगौरवंस्पष्टमेवचैत्रमैत्रोपरस्परंगच्छतइतिनृत्ययोः
समंतव्यचैत्रमैत्रयोः परस्परपदार्थेनेदवनुमम परस्परपदार्थव्यापारवङ्कदस्यसत्वात् किंचघटंजानाती
त्यैद्वितीयानापत्तिः उक्तकर्मत्वाभावात् नचतत्रविषयत्वेलक्षणा कर्मत्वेवद्वितीयेत्यादिनियमेरन्यत्र
लक्षणयाप्यसाधुत्वात् अतएवमुहूर्तविनक्षोनलक्षणेतिलघुव्यवहारः वैकुंठमधितिष्ठतीत्यादावप्याधि
ष्ठत्वउक्तलक्षणस्य संज्ञायाएवतन्नियामकत्वेतुकिंनेदनिवेशोनन्यनयापरीत्याव्यापारमधिकरणधा
त्वर्थफलाश्रयत्वंकर्मत्वमित्याद्यपिखंडनीयमित्यलं यदपिमीमांसकाः साध्यत्वंद्वितीयार्थः व्रीहीनवा-
हंतीत्यस्यावहननेनव्रीहीन् भावयेदित्यर्थः यद्यपिव्रीहयः सिद्धाएवक्रियायाः साधनानितथाप्यदृष्टवि-
शेषसाधनत्वरूपसंस्कार्यत्वमेवात्रसाध्यत्वंवोध्यं सक्तून् जुहोतीत्यत्रतुसक्तूनां भूतभाव्युपयोगाभावेनप्रा
गुक्तसाध्यत्वासंभवेनतत्रव्यत्ययोवहुलमितिवचनात्तृतीयार्थेद्वितीया सक्तुभिर्भावयेदित्यर्थइत्याहुः ते
षांमयंभावः चेदेकर्मत्वशक्तिः प्रागुक्तसंस्कार्यत्वसमानाधिकरणेवेसेतावतातस्यद्वितीयार्थत्वमितिदु-
ह्याचिरुधिप्रछिभिक्षिचिञ्ब्रूञ्संयोगंपादानत्वसंप्रदानत्वाधिकरणत्वानां विवक्षाभावेकारकंकर्मकं १६०

अकथितं चेति सूत्रात् तद्विषयाभावश्च सर्वथा तद्भाष्याप्रामाण्यापत्त्या वित्तयाचेति बोध्यं तत्रत्यानां योगे कर्त्तुरि
तिविहितकर्मसंज्ञकेन धात्वर्थव्यापारात् प्रागपि यत्संबद्धं तदेव कर्म तेन कंसपादं गां दोग्धि पयः इत्यादौ कं
सपादादेर्न कर्मत्वं भूत्रामिति योगे तु तद्धात्वर्थव्यापारेण यदुक्तकर्मणा संबद्धं तत्कर्म एतद्विहितं कर्म गौणकर्मे
त्युच्यते पूर्वोक्तप्रधानस्यानाश्रयत्वात् न तस्य फलानाश्रयत्वात् गां दोग्धि पयः इत्यस्य विभागानुकूलव्यापारो दु
हेरर्थः आपादानत्वं गोः तदविवक्षायामनेन कर्मत्वम् अत्र गौणे कर्मणि गवादौ लादयः बलिं याचते वसुधां स्वा।
मित्वनिवृत्तिस्वस्वत्वोत्पत्त्यनुकूलो दीयतामित्याद्यभिलापादिरूपो व्यापारो दिदापयिषाव्यंजको याचेरर्थः
अत्र बलौ पूर्वं विषयस्य कस्यापि न प्राप्तिरिति कर्मत्वं याचनमात्रादपायाभावेन बलेर्वसुधां याचते इति नेष्टमि
ति स्पष्टं भाष्ये इत्यस्य सूत्रनिरूपितं यत्तु स्वोद्देश्यकदानेच्छा याचनमिति तन्न पुत्रार्थं कन्यां याचते इत्यस्यानापत्तेः स्व
संप्रदानकदानेच्छाव्याप्तिफलान्तरं कन्यादेर्हीस्ववदसपितत्वाप्रयोगापत्तेश्च अविनीतं विनयं याचते स्वीका
रानुकूलो व्यापारो याचेरर्थः स्वीकारश्चेदमवरूपं करिष्यामीत्याद्यभिलापादिजनको ज्ञानविशेषः फलतावच्छेद
कसंबंधो विषयता अत्रापादानादिविवक्षाभावादनेन कर्मत्वं याचनमात्रेण विनयसंबंधाभावान्नात्र संप्रदा
नत्वमिति स्पष्टं भाष्ये विनये न च तद्विषयज्ञानवत्त्वं संबंधः व्रजमवरुणद्धि गां निर्गमप्रतिबंधद्वारा व्रजाद्यधिकर
णकस्थिरस्थ्यनुकूलव्यापारो रुधेरर्थः व्रजे गौस्तिष्ठति तत्र तां निर्गमप्रतिबंधे न स्थिरं स्थापयतीति संप्रत्ययात्

तस्याधिकरणत्वाविवक्षायामनेन कर्मत्वं माणवकं पंथानं पृच्छति जिज्ञासाविषयार्थज्ञानानुकूलः के न यथा
गंतव्यमित्यभिलापादिरूपो व्यापारः पृच्छेरर्थः माणवकस्य व्यापारे संबंधः सामान्येनान्वयः ज्ञानविषयत्वेन पा
थः कर्मत्वं माणवके न च तन्निष्ठज्ञानाश्रयत्वं संबंधः कस्यापि पूर्वविषयस्याप्राप्त्यानेन कर्मत्वं निरिद्वियोचिनात्यापाद्य।
तः वृक्षमवचिनोति फलानि विनाशपूर्वकमादानं चेरर्थः वृक्षात्फलान्यादत्ते इत्यर्थात् अवधित्वाविवक्षायामने
न कर्मत्वं माणवकं धर्मं ब्रूते शास्ति वा ब्रूञो विषयत्व्याज्ञानानुकूलशब्दप्रयोगरूपो व्यापारोऽर्थः प्रशास्तिर्यव
मायीमच्छासेरर्थः स च धर्मं कुर्वित्यादिविधिघटितोपदेशरूपः अत्रोभयत्रापि कर्त्तृव्यापारानंतरं तज्ज्ञानाश्र
यत्वरूपो माणवके तत्संबंधः वचनादिकर्मणा धर्मेण माणवकस्याभिप्रेयमाणत्वात् प्राप्तसंप्रदानत्वा
विवक्षायामनेन कर्मत्वमिति स्पष्टं भाष्ये अनयोर्योगे सर्वथा विधिविषयाप्राप्तियोग्ये विषये नानेन कर्मत्व
मनभिधानात् तेन माणवकाय धर्मोपदेशकाले शूद्रेणापि श्रवणे शूद्रं धर्मं ब्रूते इति न प्रयोगः अनभिधानं चा
तत्तः शिष्टलोकस्य बोधाभावरूपमिति तन्निदर्श्य तदस्मिल्लितिसूत्रे भाष्ये स्पष्टं तत्र हि द्व्यादिविवक्षाप्रयोगे शीलो
कि कीचेत्युक्तं प्रयोक्तृशब्देन व्यवहारार्थं प्रयोगकर्त्तारः तेषां वचनं शास्त्रेण न विप्रयुंजते ऽनत्पादिविवक्षा न शास्त्रप्र
वृत्तौ नियामिका लोकशब्देन शिष्टलोकः स हि यथार्थयंत्रार्थं धर्मं बुद्ध्वा शिष्टबोधनाय प्रयोक्तुमिच्छतीति तद्वि
वक्षा शास्त्रप्रवृत्तौ प्रयोजिकेति तदर्थ इति कैयटे स्पष्टं शिष्टाप्रशब्दत्वविरहः साक्षात्कृतपरावरा इति शिष्टो

दृशादिसूत्रे भाष्ये स्पष्टमिति भाष्यप्रदीपोद्योते विस्तरः अत्राविकर्मत्वशक्तिमत्त्वेनैव द्वितीयाबोधः कर्मसंज्ञाविधायक
शास्त्रेस्तदर्थे कर्मत्वशक्तिमत्त्वबोधनात् अत एवाकथितं चेति सूत्रशेषे भाष्ये अनेनैव सर्वत्र कर्मत्वे सिद्धे आद्यसूत्रद्व
यवैयर्थ्यमाशंक्यैवं मतिवारणार्थो नामिति सूत्रस्यानवकाशत्वेन माणवकादिपि पंचमी स्यादितीप्सिततममिसा
रव्धव्यामिसुतरितं एवं वैकुरमधितिष्ठतीत्यादावपि बोध्यं अधिशीङ्स्थासामित्यादिनाधार इत्यनुवृत्त्या तस्य
कर्मत्वशक्तिमत्त्वं बोधनात् दिवधातुयोगे दिवः कर्म चेति सूत्रात् साधकतमस्य कर्मत्वकरणत्वोभयशक्ति
मत्त्वं बोध्यं शतं शतेन वा दीव्यति एवं च सर्वसाधारणकर्मत्वकर्मतांशक्तिमत्त्वं धात्वर्थानां सकर्मकत्वमविकर्मत्वश
क्तिमदर्थान्वय्यर्थकत्वमिति दिक् उपपदविभक्तीनां संबंधोर्थः विशिष्य व्युत्पत्तिरुक्ता षष्ठ्यपवादत्वाच्च अनयः कृष्णं
गोप्यः कृष्णसंबंधिया अस्य वयवस्थिता इति बोधः धिक् कृष्णाभक्तं कृष्णाभक्तसंबंधिनी निंदेत्यर्थः धिगर्थो निंदा
उपर्युपरि अधोधः अध्यधि वा लोकं हरिः द्विरुक्तोपर्यादेः समीपोर्ध्वभागसमीपाधस्तनभागसमीपदेशवृत्तित्वाति
क्रमेणार्थः सामीप्यरूपः संबंधो द्वितीयार्थः सामीप्यं तत्षष्ठ्यर्थः इति त्वत्र चयितपदावाच्यं सामीप्यं न षष्ठ्यर्थ इत्ये
वं परं अत एव वृत्तस्य समीपमित्यादौ तत्र संबंधे षष्ठी लोकसमीपोर्ध्वभागवृत्तिरित्यादिक्रमेण बोधः अभितः
परितो वा कृष्णं गोपाः अनयोः समीपसर्वदेशावच्छेदेनेत्यर्थः सामीप्यरूपः संबंधो द्वितीयार्थः अभित इत्याभिमुख्ये
पि कृष्णमभिमुखे इत्यर्थः समया निकषा वा ग्रामं इत्यत्राद्यये समीपे इत्यर्थके अधिकरणशक्तिप्रधाने द्वितीयार्थः

मं.मू.० सामीप्यरूपः संबंधः यामममीपदेशा इति बोधः हा कृष्णाभक्तं इत्यत्र हा शब्दः शोके तत्संबंधी शोक इत्यर्थः बुभुक्षितं।
१६२ न प्रतिभाति सादौ बुभुक्षितसंबंधीयत्किंचिद्विषयप्रतिभाभाव इत्यर्थः प्रतिभा जरितिस्फूर्तिः अंतरा त्वां मां च हरिरित्य
त्रांतरेति मध्ये इत्यर्थकं अवधित्वसंबंधो द्वितीयार्थः त्वन्मदवधिकमध्यवृत्तिर्हरिरिति बोधः अंतरा हरिं न सुखं इत्यत्रा
भाववाचकद्द्वार्थः हरिशब्दस्तद्भक्तिलाक्षणिकः द्वितीयार्थः प्रतियोगित्वं हरिभक्तिप्रतियोगिकाभाववद्वृत्तिः सुखसत्ता
भाव इति बोधः एवमंतरेणशब्दोपि अन्ययार्थः तद्योगेपि द्वितीया तव मम चांतरा कमंडलुरित्यत्र त्वन्मत्संबंधी कमंडलु
र्मध्ये इत्यर्थात् दं तराशब्दयोगाभावेन न द्वितीया किंच यासामुपपदविभक्तीनां तत्तद्विशेषसंबंधे विधानं तत्र तेषां सं।
बंधानां विशेषरूपेण विवक्षायां संबंधत्वेन विवक्षायां षष्ठ्येव स्पष्टं चेदं चतुर्थी तदर्थार्थेति सूत्रे भाष्ये तत्र हि ना।
प्यस्य संबंधत्वेन विवक्षायां षष्ठ्युक्ता गुरोरिदं गुर्वर्थं इति विशेषसंबंधे विधानं च क्वचिद्विशेषोक्त्यैव यथा तुलैस्तुले
इत्यादौ क्वचित्तु तत्तदर्थस्य तत्तत्संबंधेन संबंधिनि नियतत्वात्स्यात् यथा प्रकृतेऽवधित्वप्रतियोगित्वयोः एवं च त्व
न्मत्संबंधिमध्ये कमंडलुरित्यर्थे न द्वितीया इहशब्दस्य लोके वलोताक्षमध्यस्यावधिभूताश्रितिनिलयः किंच
न्मसहितयोरपि तत्त्वप्रतीतिरिति नात्र द्वितीयेति हलोनंतराः संयोग इत्यत्र कैयटे स्पष्टं जपमनु प्रावर्षद् इत्यत्र द्वितीया।
र्थो लक्षणभावः संबंधो नु शब्दस्य कर्मप्रवचनीयसंज्ञत्वात् हेतुतृतीयाबाधकत्वादत्र विभक्तेर्हेतुरपि द्योत्यः
लक्षणत्वं च ज्ञानजन्यज्ञानविषयत्वं जपज्ञानेन हि जपकालज्ञानद्वारा तदुत्तरकालवर्त्तिवृष्टिर्ज्ञायते अ १६२

तएव कटाकृष्ट इति ग्रंथैर्द्दस्मुन्नरं जयामिन्महे तुलक्षणकं वर्षणमिति बोधः उक्तंच क्रियाया द्योतको नायं संबंधस्य न वाचा-
कः नापि क्रियापदाक्षेपी संबंधस्य तु भेदक इति अस्यार्थः अपचतीत्यादौ उपसर्गवन्नायं क्रियागतविशेषद्योतकः विभक्त्यैवो-
क्तत्वात्संबंधस्य न वाचकः नापि प्रादेशं विपरिलिखतीत्यादौ विशब्दवत् क्रियापदाक्षेपी तत्र हि विनामानक्रियाक्षिप्यते ता-
था सति तत्क्रियानिबंधनाकारकविभक्तिरेव स्यादिति कर्मप्रवचनीययुक्ते द्वितीयेति सूत्रं व्यर्थं स्यात् किंतु विशिष्टक्रियाजनितो
यं संबंधो विशेषस्य दि इति तद्द्योतकः यथा प्रकृते निशमनक्रियाकृतः संबंध इति लक्षणपदार्थे लक्षणं तु हरिणोक्तं आश्रि-
तावधिभावं तु लक्षणे लक्षणं विदुरिति लक्षणे लक्ष्यवस्तुप्रकाशो आश्रितावधिभावं आश्रितमर्यादारूपं अनुहरिं सुराः
स्वावधिकापकर्षरूपहीनत्वसंबंधो नुद्योत्यो द्वितीयार्थः हरिप्रतियोगिकापकर्षवंतः इत्यर्थः उपहरिं सुराश्चाप्येवं उपः स्वा-
वधिकाधिकत्वसंबंधस्यापि द्योतकः उप सुरान् हरिरित्यादौ वृक्षं प्रति विद्योतते विद्युदित्यादौ लक्ष्यलक्षणभावः प्रत्यादि-
द्योत्यः वृक्षप्रकाशेन हि तत्समीपदेशविशेषावच्छिन्ना विद्युत् ज्ञायते भक्तो विष्णुं प्रति अत्र भक्तत्वादिप्रकारविशेषरूपः सं-
बंधः प्रत्यादिद्योत्यः भक्तपदार्थे विशेषणस्यापि तस्य संबंधत्वं लक्ष्मीर्हरिं प्रति हरिः स्वामिकेति बोधः वृक्षं वृक्षं प्रति सिंचति
अत्र वीप्साविषये व्याप्यत्वं द्विर्वचनद्योत्यं व्याप्यत्वविशिष्टवृक्षादीनां च व्यापकत्वसंबंधेन सेचनेन्वयः प्रत्यादिद्योत्यः सेचने
वृक्षादीनां कर्मत्वे विवक्षितत्वे नाविवक्षायां कर्मप्रवचनीययुक्तत्वात् द्वितीया अत एव प्रसंख्ये शब्दनिवृत्त्या इत्याशयाद्वर्थस्य नि-
वेशनक्रियानिरूपिताधिकरणत्वे प्रयुक्तमर्थं प्रतीत्येव विग्रहो भाष्यादौ दर्शितः यदत्र मम भाति ष्यान्तदीयतां अत्रयवृक्षे

मं जू० बुद्धिस्थत्वेन नागवाचीमत्संबंधीयज्ञानकर्त्तृकाधिकरणिकासत्ताप्रेरणाविषयत्वात्कर्मकं दानमिति बोधः संविधेवि
१६२ ध्यात् अत्रापि ज्ञाघ्रवलादिद्वपदाध्याहारेणाच्यो पदार्थद्योतकता संभावनायां लिङ्‌ विंदो सर्पिषश्च स्याववयवावयविभा
वेनान्वयः पिंडं आस्यानार्थकर्त्तयेन्वेति अपिः क्रियायां द्योत्यस्य विंदुशैर्लस्य प्रयुक्तो लेस्यापि द्योतकः शाघ्रशक्तिस्व
भावत् एवं सर्पिरवयवविंदुकर्त्तृकान्तद्विंदुदौर्लस्यप्रयुक्तदौर्लस्यवती संभावनाविषयः सत्तेति बोधः अपिस्तुयाद्वि
ष्णुं संभावनेति लिङ्‌ अपि र्लिङ्‌र्थ संभावनायां क्रियागतशाक्यत्वस्य विषयताद्योतकः विष्णुकर्मिकैतत्कर्त्तृकाशक्या।
त्वेन संभाव्यमानास्तुतिरिति बोधः विष्णुविषयायाः शाक्यत्वसंभावनेचान्यविषयानिश्चयेन शाक्येति फलति एतेना
पि वेदांतपारगमिसादावपियोगे स्वार्थेनतात्पर्यमितिधर्मज्ञाप्रग्रंथाभ्यारव्यानाः ईदृशेषु संभावनाविषयतयाक्रि
यागतसोपि संद्योसंभाविंतोपि स्वस्याज्ञुस्थानमयुक्तमिति स्वार्थे तात्पर्यभावः मासमधीते अत्यंतसंयोगेव्याप्ति
रूपे द्वितीया मासपदेनावयवानतिरेकेण त्रिंशद्दिनसमूह उच्यते व्यापकत्वं द्वितीयार्थः तत्त्वं च त्रिंशत्त्ववन्निष्ठप्रति।
योगिअधिकरणसंतानाभावप्रतियोगितानवच्छेदकावच्छिन्नत्वं प्रतियोगिअधिकरणे सुक्तेर्दिनानां तरदंडादावध्य
यनाभावेपि न दोषः एकदिनाध्ययनेच न तथा प्रयोगः तद्घटकदिनपदेनचावयवातिरेकेण सूर्योदयावधिसूर्योद
यांतरपर्यंतक्षणसमूह उच्यते एतेनैकैकक्षणव्यक्तेरपि समासत्वाधिकरणतया तत्प्रतियोगिअधिकरणाध्ययना
भावसत्वेन वाधः इसमपास्तं दिनं स्वपिती सादैर्दिनपदमवयवानतिरेकेण त्रिंशत्तरदंडकूटपरमतोनैकदंडस्वप्नेन याप्र १६२

योगः अवयवानतिरेकेणानेपि एकवचनांतत्वमेव शक्तिस्वभावेनत्वेपि अवयवगतसंख्यायाः समूहे तारोपा-
त् त्रिंशत्वादिकं च तात्पर्यवशात्तत्र त्रिंशत्वादिकमेव भासते एतेनैकमासव्यापकतया अध्ययनेबाध इत्यपास्तं एवं क्रो-
शं कुटिलानदीत्यादौ यत्किंचित्क्रोशत्ववन्निष्ठप्रतियोगि अधिकरणासंतानाव प्रतियोगितावच्छेदकावच्छिन्नत्वं कु-
टिलादौ भासते क्रोशत्वादिकं तत्र संख्यावद्दंडादिपरिच्छिन्नदेशत्वमेवेत्यन्यत्र विस्तरः इति द्वितीया॥ ॥तृती-
यायाः कर्तृकरणे अर्थः कर्तृकरणयोस्तृतीयेति सूत्रात् कर्तृत्वं च कर्तृसंज्ञाबोधितकर्तृत्वशक्तिमत्त्वं सा शक्तिश्च का-
र्त्रंतरप्रत्ययसमभिव्याहारे व्यापारतावच्छेदकसंबंधेन तच्च तत्वर्थनिष्ठविशेष्यतानिरूपितप्रकारतानाश्रयतद्धात्वर्थाश्र-
ये वर्तते स्वतंत्रः कर्तेति सूत्रस्वरसात् उक्तधात्वर्थाश्रयत्वमेव स्वातंत्र्यं स्थालीस्थेयत्नेकथ्यमाने स्थालीस्वतंत्रेति का-
रक इति सूत्रे भाष्योक्तेः कालिकादिसंबंधेन व्यापाराश्रये अतिप्रसंगवारणाय संबंधविशेषनिवेशः एतेन सामग्रीसाध्यायां क्रिय।
यां सर्वेषां स्वस्वव्यापारे स्वातंत्र्यात् सूत्रे स्वतंत्र इत्यस्यावर्तकमित्यपास्तं प्रागुक्तस्वातंत्र्यस्य युगपत्सर्वेष्वभावात् रूपवंतं गच्छ-
तीत्यादौ उत्तरदेशसंयोगरूपेफले रूपादेश्चेतनतादृशधात्वर्थत्वमिति तदाश्रये रूपवति नातिव्याप्तिः कर्तृप्रत्ययसमभिव्या-
हारे इत्यनेन पक्वस्तंडुलो देवदत्तेनेत्यादौ फलस्य विशेष्यत्वेपि देवदत्तस्य कर्तृत्वसिद्धिः तत्र मतिसंतनवे तद्धात्वर्थकृतिव्या-
पारो तयाश्रयत्वसमानाधिकरणैककर्तृताशक्तिरतो गुरुतरनाशे तोलनादिविषयकयत्नसत्वेपि तत्क्रियायाअनिष्पा-
त्तेनतत्र कर्तृत्वव्यवहारः तत्र यत्नसत्वेनमानमित्यस्य धात्वर्थकृतिसाध्यत्वात्स्वविषयतया क्रियाविषयेव ग्राह्या अतो

मं.ज्र.०
१६४

मतोन्नतंननुमया कृतं इति व्यवहारस्य नानुपपत्तिः नांतरीयककृति साध्यापि इष्टकमश्रम्य शार्करा जो कृरिचन तत्कर्तृत्वव्य
वहारः एतेन कृतिर्नाम नकाचिद्व्यापारातिरिक्तेत्यपास्तं आंतरचेष्टाविशेष एव वा कृतिरिति दिक् तत्र व्यापारस्य धातुनैवोक्त ।
त्वात् कर्तृशक्तिमत्वेन कर्ता तृतीयार्थः तत्र प्रकृत्यर्थस्याभेदान्वयः स च धात्वर्थे आधेयतयान्वेति तेन चैत्रेण स्वपितीत्यत्र चै
त्राभिन्नकर्तृवृत्तिः स्वाप इति बोध इति प्राञ्चः द्वितीयाप्रकरणोक्तदिशा कर्त्रे चैत्रीयः स्वाप इति चैत्रकर्तृकः स्वाप इति वा बोध इ
त्युचितं यत्तु तत्तत्क्रियानुकूलकृत्याश्रयः कर्ता कृत्त्रः कृत्यर्थकत्वेन कृप्रकृतकर्तृत्वातथैव लाभात् तत्राश्रयस्य प्रकृत्या लाभा
त् कृतिः तृतीयार्थ इति तन्न कृतेरपि धातुलभ्यतायाः उक्तत्वात् रथेन गम्यते इत्यादावचेतने ऽसंभवाच्च विभक्तौ लक्षणातो
पि समस्यापि निवेदितत्वात् तत्राश्रये लक्षणेत्युक्तं कृतः कृतिमात्रवाचकत्वाभावाच्चेति दिक् यत्तु धात्वर्थ एव तन मात्र
वर्तवत चाचेतनस्य कर्तृत्वं चेतनत्वारोपेण तन्निष्ठक्रियारोपेण वेति दामहायनांतच्चेति सूत्रे भाष्ये स्पष्टं परे तु तत्स्वा
तन्त्रीयकारकचक्रप्रयोक्तृत्वं सूत्रे स्वातंत्र्यं तदुक्तं कारक इति सूत्रे भाष्ये प्रधानेन समवाये स्थाली परतंत्रा व्यवाये स्वतं
त्रा किं पुनः प्रधानं कर्ता कथं ज्ञायते कर्ता प्रधानमिति यत्सर्वेषु कारकेषु संनिहितेषु कर्ता प्रवर्त्तयिता भवतीति एवं स्वत ।
धीनप्रवृत्तिनिवृत्तिकत्वमपि स्वातंत्र्यं तच्च प्रयोजकसंनिधानेपि प्रयोज्यस्य तत्संनिधानेपि स्वार्थसत्वे प्रवृत्तेः तदभावेऽप्र
वृत्तेश्च गत्स्वच्छतंत्रः कर्तेति सूत्रे भाष्ये तत्वारोपितमचेतनेपि तच्च संज्ञानिमित्तं आद्यं स्थाल्यादौ अंत्यं पुरुषे यस्य च स्वातं
त्र्यविवक्षा तद्व्यापार एव च धातुना प्राधान्येनोच्यते शक्तिस्वभावात् स्थाली स्वतंत्रेति भाष्ये आरोपितस्वातंत्र्यवती

स्यर्थः तथात्वं विना न व्यापारे धातोः प्राधान्येन वृत्त्यसंभवात् प्रधानधात्वर्थव्यापाराश्रयत्वमेव न तत्त्वं स्वतंत्रपदस्य तत्रा-
परिभाषणात् लोके तु कार्थयोरेव तस्य वृत्तेरिति अत एव प्रयोज्यस्यास्वतंत्रत्वात् कर्तृसंज्ञा न प्राप्नोतीतिश्चेदपेतस्यापि
स्वेच्छाधीनप्रवृत्तिकत्वरूपं स्वातंत्र्यं साधितं कर्तृसंज्ञासूत्रे भाष्ये इति दिक् हरस्त्वाह प्रागप्यतः शक्तिलाभात् अयं भावः प्रा-
दानादपि तदधीनप्रवृत्तित्वात् प्रवृत्तानां निवर्त्तनात् अदृष्टत्वात्प्रतिनिधेः अविवेके च दर्शनात् आराद्युपकारित्वे स्वातं-
त्र्यं कर्त्तुरुच्यते इति करणादिव्यापारात्पूर्वमेव करणादिसंपादकतया शक्तिमत्त्वेन करणादीनामात्माधीनत्वसंपादनेन
च तेषां तदाश्रयत्वव्यापारवत्त्वे नातिप्रवृत्तानां तेषां निवर्त्तनेन च कर्त्तुः फलप्राप्तौ सत्यत एव निवृत्त्या कर्त्तुः प्रतिनिधिभावेना-
च कारकांतराभावेपि अस्मादौ कर्त्तुर्दर्शनेन च दूरादुपकारित्वेपि कर्त्तुः स्वातंत्र्यमिति तदर्थः वस्तुस्थित्या एषां धर्मीण ।
मभावेपि शब्दे न यस्यैते प्रसाप्यं तेन मक्तो घटो भवतीत्यादौ बोद्धघटस्य कर्तृत्वं यद्वा घटपदेनोपादानकारणं मृदेव का-
र्यात्मना भवतीत्यर्थः कार्यकारणयोरभेदस्य स्वीकारात् यद्वा ब्रह्मण एवाविद्यावशादुपचरितनानात्वभावाभावरूपं
त्ववतद्रूपगतजन्मनाशव्यवहारोपि अविचारितरमणीयः सिद्ध इति बोध्यं पाचयति चैत्रेण मैत्र इत्यादौ प्रयोज्यस्य प्र-
योजकव्यापाराधीनत्वेपि साधनानां तद्विषये उक्तस्वातंत्र्यात् कर्तृत्वमव्याहतं प्रेरणापारतंत्र्ये उक्तस्वातंत्र्यस्यापायत्वा-
त् धातुवाच्यक्रियाकृतस्वातंत्र्यस्यैव विवक्षणात् कर्तृपरतंत्रकरणादेर्नैव व्यापारमाश्रित्य कर्तृत्वं किंच करणादीनां
कर्त्रधीनत्ववत् प्रयोज्यस्य प्रयोजकाधीनत्वं प्रयोज्यस्य स्वार्थसिद्ध्यर्थं प्रवृत्ते नहि

करणादीनां तादृशी प्रवृत्तिः तदुक्तं निमित्तेभ्यः प्रवर्तन्ते सर्व एव स्वभूतये अभिप्रायानुरोधोऽपि स्वार्थस्यैव।
प्रसिद्ध्ये इति निमित्तं तत्स्यादित्यत्र मितापि स्वार्थसाधनफलिकैव सेति स्वाम्यभिप्रायानुवर्तनमात्रेण तु प्रयो
ज्यत्वमिति दिक् इत्याहुः केचित्तु धात्वर्थव्यापाराश्रयत्वं अनभिहितसाक्षात्परंपरया वा· तत्राद्यं प्रसिद्धं द्वि
तीयं पचिर्हलैः कर्षतीति तत्र हि स्वाश्रयप्रयोजकत्वसंबंधेन कर्तृधर्मत्वर्थव्यापाराश्रयत्वम् अन्यथा प्र
योज्यव्यापारस्य धात्वर्थत्वे तदाश्रयाणां बलीवर्दानां कर्तृत्वापत्तेः प्रयोजकव्यापारस्यापि धातुवाच्यत्वे तु
णिजापत्तिः अत्र नभिहितण्यर्थोऽइति पचादृस्यापयमेवार्थ इत्याहुः तन्न अंतर्भावितण्यर्थत्वेन सकर्मका
त्वोच्छेदापत्तेः इष्यते चांतर्भावितण्यर्थत्वेन सकर्मकाणामपि द्विकर्मकता तस्माद्धातूनामनेकार्थत्वात् ण्यर्थो
तर्भावेणापि धातोर्वृत्तिः परंतु यत्र णिचो नावेपितदर्थद्योतकमस्ति तत्रैव यथा प्रकृते पंच निर्हलैरिति केचित्तु ए
कां तेन तूष्णीमासीनत्वादिकं तदुद्योतकं यदि तु द्वितीयकर्मरहितोऽपि तत्र प्रयोग इष्टस्तदा योजकव्यापारस्यैव धा
त्वर्थत्वमाश्रित्य समाधेयः कर्तृत्वं च विवक्षानिबंधनं तेन स्थाल्यादिव्यापारस्य धात्वर्थत्वे स्थाली पचती।
त्याद्यपि तदुक्तं कारके इति सूत्रे भाष्ये स्थाली स्थेयत्वे कथ्यमाने स्थाली स्वतंत्रेति यत्तो व्यापारः एवमेकस्यैवोपा
धिभेदेन कर्तृत्वकरणत्वकर्मत्वानि नवंती यथात्मानमात्मना सृजसीति तदुक्तं हरिणा एकस्य बुद्ध्यवस्थाभि
र्भेदेन परिकल्पने कर्मत्वं करणत्वं च कर्तृत्वं चोपजायते इति यो विरोधेणावि स्यादेहो नाख्येयारीरात्मांतरात्मेसा

दिनेदमुक्तः सोपिव्यावहारिको वौद्ध एवेति वुद्ध्यवस्थापितेरित्युक्तं वुद्धिकल्पितावस्थापितेरित्यर्थकं करणत्वं च करण
ताशक्तिमत्वं साचशक्तिः यद्व्यापाराव्यवधानेन क्रियानिष्पत्तिर्विवक्ष्यते तन्निष्ठा अधिकरणादिव्यापाराव्यवधानेनापिय
दाक्रियानिष्पत्तिर्विवक्ष्यते तदा तेषामपि करणत्वमिष्टमेव तदाह हरिः क्रियायाः परिनिष्पत्तिर्यद्व्यापारादनंतरं विवक्ष्यते
यदा यत्र करणं तत्तदा स्मृतं वस्तु तस्मादनिर्देश्यं न हि वस्तु व्यवस्थितं स्थाल्या पच्यतइत्येषा विवक्षा दृश्यते यतइति विवक्ष
तेऽस्यैव विवक्षैव व्याकरणेगं न वाह्यवस्तुमतेत्युक्तं अतएव दात्राद्यनादरेण वलस्य तत्वविवक्षायां वलेन लुनाती।
स्याद्भवति न हि वस्तुतइति इदमेव वस्तु करणमिति न नियमः निष्पित्ताधिकरणत्वापि स्थाली तत्तुतरकपालत्वाद्दृशी
घ्रतरपाकसाधनत्वेनानुभवतिवैवक्षिकं करणत्वमित्यर्थप्रकर्षश्च कर्तृपराधीनस्यापि न करणांतरापेक्षः किंतु क।
रणांतरापेक्ष एव कारकसामान्यवाचिनः साधनशब्दादुत्पद्यमानेन तमपा तत्त एव प्रकर्षवोधनात् अतएवाश्वेन
यष्ट्यादीपिकया व्रजतीति भवति करणं तृतीयार्थप्रकृत्यर्थस्य तत्राभेदेनान्वयस्तस्य च स्वनिष्ठव्यापाराव्यवहितो
त्तरोत्पत्तिकत्वसंवंधेन धात्वर्थेऽन्वयइत्येके करणवाचीयो वधइति वा एकरणकइति वार्थइति तत्वं अत्र
वहवः करणस्य व्यापारएवान्वयो न फलांशेशाब्दशक्तिस्वभावात् अतएवोद्भिदायजेतेत्यादौ मत्वर्थलक्ष
णानियानामधेयत्वं सिद्धांतितं अन्यथा व्यापारं प्रतिकरणत्वेनान्विते धात्वर्थफलांशे करणत्वेनान्वयो।
पपत्तौ लक्षणाया अप्रसंग एव अतएव सोमेन यजेतेत्यादौ छांदसी मत्वर्थलक्षणेति मीमांसकाः व्या।

मं.गु.२० पारेतदन्वयेतुफलस्यकरणत्वेनान्वयात् अस्मिन्निष्टकरणावच्छेदककरणांतरस्यान्वयायोग्यतयासाव
१६६ श्यकीतिवदंति फलेप्यन्वयेयुगपत्फलांशस्यभावनानिरूपितंकरणत्वं स्वकरणनिरूपितंसाध्यत्वंचेतिवै
रूप्यंस्यादितिसावश्यकीसप्तमे प्रकृत्याचारुरित्यादौ प्रकृत्यादिभ्यउपसंख्यानमितितृतीया साचसर्वविभक्त्य
पवादइतिभाष्येस्पष्टं प्रकृतिर्यौवनाश्रयवर्ती धर्मविशेषः तेनतत्संबंधिचारुत्ववानितिबोधः प्रायेणया
ज्ञिकइत्यत्रप्रायशब्दोकर्थः वऊच्चारादिः वक्राचारज्ञाप्ययाज्ञिकत्ववानितिबोधः यद्वाप्रायशब्दः संज्ञा
वनार्थः संज्ञावनाविषययाज्ञिकत्ववानितिबोधः प्रायेणात्रयाज्ञिकाइत्यादौबहवोयाज्ञिकाइतिबोधः
नाम्नासुतीक्ष्णइत्यत्रनामसंज्ञाप्यसुतीक्ष्णत्ववानितिबोधः एवंचरितेनदांतइत्यादौ सुरथोनामराजेत्या
दौनामेतिप्रसिद्धौसुरथइतिप्रसिद्धोराजेत्यर्थः यद्वानामनत्रसुरथशब्दाभिन्नोराजेतिबोधः नाम्नाचं
द्रकलेत्यादौ नामनूतनचंद्रकलाशब्दाभिन्नेत्यर्थः एवमवच्छेद्यत्वादीनांसंबंधत्वविवक्षायांपरत्वेनज
न्यत्वंप्रकारत्वेनाभावइत्यादिप्रकृत्यादित्वात्साधुः अत्रसर्वत्रकथंचित्करणत्वहेतुत्वान्यतरारोपे
णतृतीयेतिभाष्यसंमतं अन्वाकोशेनवानुवाकोधीतइत्यत्रतृतीयार्थः संबंध्यतीतमध्ययनमितिबो
धः तेनफलसाध्यपूर्वकस्तत्रभागोप्रज्ञायते पुत्रेणसहागतइत्यादौसहयुक्तेप्रधानेइतितृतीयासहा
र्थश्चसमभिव्याहृतपदार्थसमानकालिकत्वरूपसाहित्यंतत्समभिव्याहारखंडोपाधिरूपंवातृतीयार्थे १६६

श्चक्रियासमभिव्याहारे सहार्थबलात् प्रतीयमानतत्क्रियाकर्तृत्वादिकमेव तद्गुणसमभिव्याहारे सहार्थ
बलात् प्रतीयमानस्तत्तत्सहार्थसंबंध एव एवं च पुत्रेण सहागतः पुत्रेण सह पितुर्गौः पुत्रेण सह स्थूल इत्यादौ पुत्रक
र्तृकागमनसमानकालिकागमनवान् पुत्रस्वामिकत्वसमानकालिकपितृस्वामिकत्ववती गौः पुत्रवृत्तिस्थौल्यसमा
नकालिकस्थौल्यवानित्यादिक्रमेण बोधः तदुक्तं काव्यप्रकाशे सा सहोक्तिः सहार्थस्य बलादेकं द्विवाचकमितिग्रन्थ
स्यास्या एकार्थाभिधायकपदं यत्सहार्थान्वयबलादनेकार्थाभिधायकं यथाकथंचिद्बोधकं सा सहोक्तिरिति तदर्थः
तत्रैकस्यार्थस्य वाचकमन्यस्याक्षेपकमिति बोध्यं उदाहरणे आगत इत्यत्र नयवृत्त्यागमनबोधकमिति तथा
ख्यातमः पुत्रकर्तृकागमनसहितागमनवानितित्वा बोधः पुत्रादेः सहार्थयोगश्चागमनादिद्वारक एव बोधः
क्वचित्समानदेशत्वरूपं तत्समभिव्याहारं तत्रैव तदर्थः यथा माषवापोत्तरं तत्रैव क्षेत्रे तिलवापेऽपि तिलैः सह माषा
न्वपतिस्मेति नवतिस्य एवं चेदं ज्ञाप्यं यद्यपि सहागतः पुत्रेणेत्यादौ सहार्थसामर्थ्यात्प्रतीयमानक्रियाकर्तृत्वेन
पुत्रा तृतीयाभिधानं च के नाभिधानं इतरसमभिव्याहारं विनापि प्रतीयमानस्य प्रकृतस्यार्थक्रियाकर्तुरेव ते
नाभिधानात् एवं पुत्रेण सहागमनं देवदत्तस्येत्यादौ वृक्षरीत्या प्रतीयमानाकृत्यसमर्थान्वयिनोः कर्तृका
भिलोरेव षष्ठी न तत्र प्रतीयमानतदन्वयितोरिति न दोषः तथापि पुत्रेण सह स्थूल इत्यस्यापर्थ्यसत्त्वं स्वान्वयि
गुणद्वारा सहयोगस्य पितापुत्रयोर्विशेषेऽपि न पितुस्तृतीया प्रधानत्वात् अप्रधानग्रहणप्रसाख्याने वि

मं॰जू॰
१६७

पितुर्नमः उपपदविभक्तेरिति न्यायादिति सर्वं भाष्ये स्पष्टं गुणक्रियाद्रव्यैर्गुणप्रधानभावेन द्वयोः संबंधे स
हशब्दप्रयोगो भवति तत्र प्राधान्यं नाम शब्दगुणायत्वयित्वाभावः अक्तेश्चागमनादिभिः पितृशब्दः पुत्र
स्य सहार्थबलात्प्रतीयमानैस्तैः संबंधात्सार्थः इतरसंबंधिनाप्रतीयमानत्वं चार्थस्य शब्दत्वं तत्रोक्तसाहि
त्यवाचिसहशब्दप्रयोगे शब्दत्वरूपविशेषणाभावकृतो विशिष्टाभावः विद्यमानतावच्चि सहशब्दयोगे तु वि
शेष्याभावात्सः सहैव दशभिः पुत्रैर्भारं वहति गर्दभीत्यादौ दशसंख्याकपुत्राणां विद्यमानत्वेपीत्यर्थः पुत्रेण
सह यः समगतस्यावशिष्टादिरूपं साहित्यं सहार्थः पुत्रसाहित्यवान्यः समागत इति बोधः एवं तृतीयान्तार्थ
स्य शब्दात्प्राधान्येऽपि प्रथमान्तार्थस्याध्याधीनत्वरूपमार्थं प्राधान्यं प्रतीयते अत एव समकक्षयोर्भाष्ये
ऽन्यतरस्यापरेण सहागतत्वमित्युक्तेः दुःखं दृश्यते यत्तु प्रधानत्वं मुख्यत्वमत्र न गौरेयं प्रधानमित्यादिवत् तद्
भावरूपं चाप्रधानत्वं तृतीयार्थ इति तन्न राज्ञा सह सेनागच्छतीत्यादौ तृतीयानापत्तेरित्यत्र विस्तरः
पादेन खंज इत्यादौ विकारप्रयुक्तस्वरूपसंबंधस्तृतीयार्थः पादविकारप्रयुक्तसंस्थानवैरूप्यवच्चर
णवानिति बोधः कायेन दृशा वक्रो मुखेन त्रिलोचन इत्यादौ प्रकृत्यादित्वात्तृतीया अक्ष्णा काण इत्यत्र च
क्षुर्नाशवान्समचक्षुष्कः काणपदार्थः अक्षिपदार्थो गोलकं गोलकविकारप्रयुक्तचक्षुर्नाशवान्समचक्षु
ष्क इति बोधः अतिशायने तमबिष्ठनाविति सूत्रे भाष्ये अंधानां काणानां काणतम इति कलिर्यं सोऽस्मेपवर्त्तते सर्व इमे किंचि १६७

चित्स्वत्वं निप्रत्ययमेवाकारणं नमस्स्युक्तं स्वधा नाम पितृणामित्यत्र काणत्वं वर्णितेन तत्रादर्शनप्रकर्षादिति अथ ः प्रा
प्यपत्तथा च प्रसिद्धिर्यथा नाकाणो राजेति केयटः नु राज्ञि स्वाप मत्स्यादौ ज्ञाप्यत्वं तृतीयार्थः जटाज्ञा
प्यतापसत्व विशिष्ट इति बोधः दंडेन घट इत्यादौ हेतुस्तृतीयार्थः हेतुत्वमखंडोपाधिः दंडनिष्ठहेतुजा
न्यो घट इति बोधः हेतुदंडीय इति बोध इति तु चिंतं अध्ययनेन वसतीत्यादौ फलस्याध्ययनजन्यज्ञानस्य
हेतुत्वं उक्तं च हरिणा अनाश्रितेतु व्यापारे करणं हेतुरिष्यते इति इत्यादिविषयो हेतुः करणं नियतक्रियं इ
ति च व्यापारानावेशेऽपि योग्यतामात्रेण हेतुत्वं आदिना गुणक्रियेक्रियाविषयं त्वनाश्रितव्यापारमेव शास्त्रा
संयच्छते संयच्छते दीनः पूर्वको योगोऽर्थः दास्यै दत्वा तां चुम्बेऽर्थः इति तृतीया कारकचतुर्थ्याः संप्रदा
नत्वमनुशक्तिमानर्थः साच शक्तिः प्रत्यसत्यासन्नत्वं अर्थः कर्मनिष्ठफलनिरूपकत्वेनेच्छाविषयो यत्तन्निष्ठा कर्मणा
यमभिप्रैति स संप्रदानमिति सूत्रेण कर्मनिष्ठस्य नेन कर्मणा स्वचतुर्थीनिमित्तत्वप्रदर्शनात् कर्मण्यः सवेद्यस्या
चतुर्थी श्रुते वलवत्त्वं वोध्यते अत एव क्रीते सोमे मैत्रावरुणाय दंडं प्रयच्छतीत्यादौ दंडदानेन प्रतिपत्तिः किं
तु द्वितीयापेक्षया वलीयस्या चतुर्थ्याः श्रुत्या मैत्रावरुणसंस्कारकमिति मीमांसकाः यत्तु तत्प्रत्ययार्थं कर्म
संबंधजन्यफलभोगेलाभः कृतसुखादिनिष्ठाभिलाषेन यदिच्छाविषयः स संप्रदानमिति तत्र स्वत्वाद्यर्थं यत्तद्
स्योक्तार्थालाभान् तथात्वे शब्दबोधानावाश्च परपीडाविषयत्वमेवोद्देश्यत्वमिति तदपि न देवोपहवानि।

मं.जू० स्याद्दौ उद्देश्यविधेयभावेनान्वयात् देवे उद्देश्यत्वप्रतीतावपि स्वत्वाविषयत्वाप्रतीतेः तस्मादुद्देश्यत्वमुद्देश्या
१६८ दिपदज्ञाप्यतावच्छेदकतया सिद्धं पदार्थांतरमेव क्वचिदिच्छाविषयत्वसमानाधिकरणमिस्यमन् विप्राय गां द
दातीत्यादौ विप्रादिन्नसंप्रदानविष्टोद्देश्यतानिरूपकं दानमिति बोधाः स्वत्वस्य तु उद्देश्यतानिरूपकत्वं संबंधः
संप्रदानविप्रीयमिति विप्रसंप्रदानकमिति बोधः क्रियाकारकभावः संबंध इति द्वितीयोक्तदिशोचितं पितृभ्यः
श्राद्धं दद्यादित्यादौ स्वत्वेपितृनिष्ठापितत्वस्य बाधेपि स्वत्वनिवृत्तिपूर्वकं परमात्रस्वत्वापस्यनुकूलत्यागरू
पेदानार्थे पितृणामुद्देश्यत्वसत्वान्न दोषः परस्वत्वहेतुत्यागएव अतएव विदेशस्थपात्रमुद्दिश्य संक
ल्पनेस्वीकारमंतरेणैव पात्रस्य मरणेपि उद्देश्यपुत्रादिभिः स्वीकारेपि तत्स्वत्वापत्तेर्न तद्धनं विना स्वामिदत्तेनाश्वेशितिव्य
वहारः प्रतिग्रहस्य फलस्यास्वर्गुणं पुण्यमिसुक्ते: प्रतिग्रहीतृनवदानेफलातिवायजनकः अदृष्टार्थो दत्त
स्वीकारएव प्रतिग्रह इतिपरितोषक्षतिलतुरगादिस्वीकारेन दोषः संस्पृष्टिस्थले साधारणस्वत्वोत्पादेपि द
दातीत्यप्रयोगात् परमात्रस्वत्वानुकूलेत्युपात्तं तत्रापि मत्वर्थतिमत्वानुस्वसापूर्वस्वत्वनाशांगीकारात् उपेक्षा
तु न नियमतः परस्वत्वोत्पादिकेति न तत्र ददातीति प्रयोगः विक्रयोपि न तथा मूल्यदानपूर्वकस्वीकाररूपा
क्रयस्यैव स्वत्वजनकत्वात् स्वत्वं च दानादिना जन्यप्रतिग्रहादिजन्यमतिरिक्तपदार्थरूपं स्वस्वर्गादिरिंडियवेद्य एवं
मीत्यादिव्यवहारात् तस्मात्साक्षात्कारस्वतरीय स्वत्वव्याप्यतरीयपर्यायेष्टविनियोज्यत्वरिति मिति ज्ञानेहेतु १६८

संप्रदानमनेकधोक्तं अनिराकरणात्कर्त्तुस्त्यागांगं कर्मेप्सितं प्रेरणानुमतिभ्यां च लभते संप्रदाननामिति आद्यं
देवता प्रेरणया याचकः अनुमत्योपाध्यायः खंडिकोपाध्यायस्तस्मै चपेटां ददातीत्यत्र संयोगविशेषानुकूलो व्या
पारो ददात्यर्थः चपेटा प्रसृतकरतलं नम्रत्वाय मतिं दद्यादित्यादौ बोधनार्थः मः मतिशब्देन तज्जनकं वेदादिरू
पं शास्त्रमुच्यते रजकाय वस्त्रं ददातीत्यादौ स्वाधीनीकरणं तदर्थः शेषस्तु विवक्षायां रजकस्य वस्त्रमित्यपि भवति
अजां ग्रामं नयतीत्यादौ परया कर्मसंज्ञया बाधात्तद्दोषः पत्ये शेते इत्यादौ शयनादिक्रियाया अपि संदर्शनप्रा
र्थनव्यवसायजन्यारंभक्रियानिरूपितं कर्मत्वं पिंडीमित्यादौ भासमानक्रियापेक्षकारकत्वदर्शनात् हरिरप्याह संद
र्शनं प्रार्थनायां व्यवसाये त्वनंतरा व्यवसायस्तथारंभे साधनत्वाय कल्प्यते पूर्वस्मिन् या क्रिया सैव परस्मिन् साधनं
मतेति संदर्शनं फलविषयः संकल्पः तत्प्रार्थनायां फलोपायविषयेऽभिलाषे साधनत्वाय कल्प्यते व्यवसायः क्रि
याविशेषस्य फलसाधनत्वेन निश्चयः तत्रानंतरा प्रार्थना साधनं अभिलाषे सति निश्चयकरणात् व्यवसायस्त्वारं
भे मानस्यां धात्वृत्तौ साधनं तेन चाप्यमानत्वेन प्राकृतक्रियाकर्मत्वं लभते पूर्वस्मिन् काले या क्रिया सा परस्मिन्नु
त्तरकालभाविनि साधनं त्वापेक्षया सिद्धस्यैव च साधनत्वात् संदर्शनं तु न क्रियासाध्यं फलाभिलाषयोग्यतादिवि
शिष्टचैतन्यस्यैव तत्साधनत्वात् एवं च कर्मणायमिति सूत्रेण संज्ञानत्वं पति संप्रदानकमारंभकर्मन्नतेन पत्नीक
र्तृकं ज्ञायनमिति बोध इति स्पष्टं नाख्ये कटं करोतीत्यादौ तु नैवं रीत्या तत् अनभिधानात् क्रिययायमभिप्रैति स संप्रदा

नमितिवार्त्तिकमतेनुपत्तिसंप्रदानकं ज्ञायनमिति बोधः तत्संज्ञात्वस्यैतत्तदर्थे तत्तत्कारकशक्तिमत्त्वबोधनात् पशुना
रुद्रं यजत इत्यत्र फलाश्रयः करणत्वशक्तिमान् रुद्रः कर्मताशक्तिमान् कर्मणः कर्मसंज्ञासंप्रदानस्य कर्मसंज्ञेति
वार्त्तिकात् पशुकरणको रुद्रकर्मको याग इति बोधः अग्नौ किल पशुः प्रक्षिप्यते तदुद्देश्यो पक्रियते इति भाष्यं हरये
रोचते भक्तिः विषयतासंबंधावच्छिन्नप्रीत्यनुकूलस्तत्समानाधिकरणो व्यापारो रुचेरर्थः तत्फलस्य प्रीतेः समवा
येनाश्रयो हरिः संप्रदानत्वशक्तिमान् रुच्यर्थानां प्रीयमाण इत्यनुशासनात् समवायसंबंधावच्छिन्नप्रीत्यनुकूल
व्यापारः प्रीधातोरर्थः अत एव हरिं प्रीणयतीत्यादिसिद्धिः एतद्भावे हि हरेः षष्ठी प्राप्नोति शेषे षष्ठ्यपवादो ऽत्र चतु
र्थीः केचित्तु प्रीतिविषयतामापद्यमानं मोदकं लौ? देवदत्तं प्रयुङ्क्ते तदा तु युष्प माचरतीति हेतुत्वप्राप्ते इदं एवं च हे
तुसंज्ञाभावे णिचोभावाद्धेतुगतव्यापारप्रतीतेर्मोदकः स्वक्रियायां कर्ता भवति न तु देवदत्तः उपात्तक्रियायां तस्य
स्वातंत्र्याभावात् इत्याहुः हरिसंप्रदानिका भक्तिकर्तृका रुचिरिति बोधः हरिनिष्ठा या भक्तिविषया प्रीतिस्तदनु।
कूलो भक्तिनिष्ठो व्यापार इति यावत् ये तु प्रीसमानार्था रुचिः कर्मसंज्ञापवादश्चेदं संप्रदानत्वमिति तेषां तु प्री
यमाण इति सूत्रे निर्देशात् प्रीधातुयोगे स्यात् प्रवृत्तिः कल्प्येतेति गौरवं अभिलषते विषयतासंबंधावच्छिन्नप्रीत्यनु
कूलः प्रीतिरधिकरणो व्यापारोर्थ इति न तस्य रुच्यर्थत्वमिति हरिर्भक्तिमभिलष्यतीत्यादौ न हरेः संप्रदानत्वं गो।
पीस्मरात् कृष्णाय श्लाघते अत्र श्लाघतेर्बोधविषयानुतिरर्थः बोधस्य फलतावच्छेदकः संबंधो वृत्तिता स्तुति।

अगुणत्वप्रतिपादकत्वात्‌ प्रयोगादिः स्मरादिति हेतौ पंचमी बोधाश्रयस्य श्लाघह्नुङ्स्थाशपां ज्ञीप्स्यमानः इति संप्र
दानत्वं ज्ञीप्स्यमानपदेन प्रधानभूततरायथो कर्मणो ग्रहणं मनूस्वारस्याघटिविषयकज्ञानानुकूलव्यापारानुकूलव्यापारः
तस्य प्रकृतस्यार्थकर्मणो वितेनपदेन ग्रहणं अन्यथा ज्ञाप्यमानस्येव वदेत्‌ तत्राद्ये गोपीकर्तृका स्मरहेतुका कृष्णसंप्रदानिका
अर्थात्‌ कृष्णवृत्तिबोधविषयात्मस्तुतिरिति बोधः स्तुतिश्चात्मनः परस्य वेति तुष्टकरणादिगम्यं अत एव कृष्णाय गोप्यात्मानं प
रं वा श्लाघ्यं कथयतीत्यर्थ इति प्रांचः कर्मसंज्ञापवादोयं कृष्णस्यैव स्तुत्यत्वे तु परत्वात्‌ कर्मत्वमेव यथा गुणो कृष्णेन श्ला
घमानः कृष्णो गुणवत्तया तस्य मर्यादाचरणेनाध्यारोपितप्रेरणत्वाद्वृत्तिरिति हि तु त्वापवादस्य उक्तेऽस्मत्र नैमित्ते बोधविषा
यमित राद्दृज्ञी नयोगपदे ज्ञास्थापनमर्थः आत्मानमिस्यादेरध्याहारः सपत्नीनियोचात्मादेस्तथा स्थापनं बोध्यं एवं
च गोपीकर्तृका कृष्णसंप्रदानिका अर्थात्‌ कृष्णवृत्तिबोधविषयात्मकर्मकतथावस्थानानुकूला क्रियेति बोधः तिष्ठते ः
स्वाभिप्रायबोधानुकूलास्थितिरर्थः शपेः स्वाभिप्रायबोधानुकूलशपथकरणमर्थः कृष्णसंप्रदानकबोधानुकूलास्थि
तिः तत्संप्रदानकबोधानुकूलं शपथकरणमिति बोधः यद्यश्लाघ्यादेस्तु सादिपूर्विका बोधनार्थः स्तुत्या कृष्णमात्मनु
रागं बोधयति ह्नुस्ता तं कृष्णं बोधयति स्थि स्वाशपथेन तं कृष्णं बोधयतीत्यर्थः प्रकृतस्यार्थकर्मणो ग्रहणे तु स्तुस्था ह्नुस्थि
स्थाज्ञापथेन कृष्णं स्वसखीजनं ज्ञापयतीत्यर्थः न स्थाय धारयति मोक्षं हरिः धङ्‌ वस्थाने इति धातोर्णिज्यवस्थानानुकू
लो व्यापारो धारेरर्थः तदर्थावस्थित्याश्रयसंबंधी संप्रदानं धारेरुत्तमर्ण इति सूत्रात्‌ हरिकर्तृको भक्तसंप्रदानको

मोक्तकर्मकावस्थित्यनुकूलो व्यापार इति बोधः शेषषष्ठ्यपवादोयं अत्रोत्तमर्णो दानक्रियया धारणस्य निमित्तं यतोसौ ऋ
णं ददाति अन्नभूय तद्दस्य भूयं माणक्रियत्वात् शेषषष्ठी प्राप्ता सर्वत्र विशेषविवक्षायां अभावे क्रियानिमित्तत्वमात्राश्रयेण
णेन शेषत्वं प्राप्तमिति बोध्यं तदुक्तं हेतुत्वे कर्मसंज्ञायां शेषत्वे वापि कारकं रुच्यर्थादिषु शास्त्रेण संप्रदानाख्यमुच्यते इति
ननु ऋणं नाम सजातीयद्रव्यान्तरदानमंगीकृत्य परदत्तपरकीयद्रव्यादानं तज्जन्योधमर्णनिष्ठः परिशोध्यतनाशयोः
दृष्टविशेषोव उभयथापि नेह प्राप्तिः मोक्षस्यो ऋणरूपऋणत्वाभावेन ऋक्तस्योत्तमर्णत्वाभावादिति चेन्न अवश्यकर्त
यत्वेन तत्रापि ऋणव्यवहारात् पुष्पेभ्यः स्पृहयति स्पृहयतिरिच्छामात्रवाचीच्छानुकूलमनःसंयोगादिव्यापारवाची
च फलावच्छिन्ने व्यापारवाचीत्वा आद्ये स्पृहेरीप्सित इति संप्रदानत्वं तत्र हि ईप्सितत्वं धात्वर्थव्यापारजन्यफलाश्रयत्वं
ननु फलस्य धात्वर्थत्वाग्रहः कर्मसंज्ञा तु धात्वर्थफलाश्रयस्येत्युक्तं शेषषष्ठ्यपवादेन तत्संप्रदानविभक्तिः पुष्पसं
प्रदानिकेच्छेति बोधः अंते कर्मत्वं पुष्पाणि स्पृहयतीति संप्रदानस्यापि तत्त्वेनाविवक्षायां षष्ठ्येव हार्ये क्रुध्यति द्रुह्य
तीर्ष्यसूयति तत्र क्रोधाद्यनुकूलो व्यापारजनकचित्तवृत्तिशेषः क्रोधः क्रुधेरर्थः दुःखजनकक्रियारूपापकारजन
नकचित्तवृत्तिविशेषो द्रुहेः धात्वर्थोपसर्गहीनत्वादेतावकर्मकौ विषयत्वे सधात्वर्थमूलभूतकोपसंबंधितो हरेः
क्रुधद्रुहेर्ष्यासूयार्थानां यं प्रति कोपः इत्यनेन संप्रदानत्वं हरिसंप्रदानको द्रोहः क्रोधः इति बोधः अत्र शेषषष्ठ्यपवादत्वं
तत्कर्षविरोधिधर्मारोपानुकूलव्यापारजनकचित्तवृत्तिविशेष ईर्ष्या शौचाचारादिगुणविषये दंभादिकृतत्वरूपदो। १७०

घारोपानुकूलश्चित्तवृत्तिविशेषोऽसूया एतेद्विष्टवृत्तिविशेषरूपकोपमूलकाः प्रकृतस्य वाक्चक्षुरादिविकारानुमे
यस्य कोपस्य विषयः क्रोधपदार्थत्वेन तस्यापि कोपमूलकत्वं कुप्यक्रोध इत्यनुक्त्या घ्नकोपत्वसामान्यमादाय कर्मसंज्ञापवा
दोऽत्र हरिं संप्रदानकोत्कर्षविरोधीत्यादि क्रमेण बोधः तद्धात्वर्थमूलभूतकोपविषयत्वे सति तद्धात्वर्थफलाश्रयस्या
त्र संप्रदानत्वं मसं तेन नार्यामीर्ष्यतीमे नामन्योऽद्राक्षीदित्यादि प्रत्युदासः मित्राय द्रुह्यति प्रतापोऽपीत्यादौ द्वेतनत्वारोपो बो
ध्यः द्वेषस्तु बलवद्दुःखसाधनताज्ञानजन्योऽप्रीतिजनकश्चित्तवृत्तिविशेषः औषधं द्वेष्टीति यथा एतद्देवानिमित्तिनंद
नं तद्योगे तु नैतस्य वृत्तिः क्रुधाद्यर्थत्वाभावात् कृष्णाय राध्यतीक्षते वा अत्र प्रश्नविषयशुभाशुभपर्यालोचनं धा
त्वोरर्थः तदर्थप्रश्नः विषयसंबन्धिनः कृष्णस्य राधीक्ष्योर्यस्य विप्रश्न इत्यनेन संप्रदानत्वं कृष्णसंप्रदानकपृच्छा
तत्कृष्णसंबन्धिप्रश्नविषयशुभाशुभपर्यालोचनमिति बोधः विप्राय गां प्रतिशृणोति वा आशृणोति वा अत्र प्रवर्त्तनाजन्या
भ्युपगमो धात्वर्थः स्वार्थप्रवर्त्तनाश्रयस्य प्रत्याङ्भ्यां श्रुवः पूर्वस्य कर्तेत्यस्यानेन संप्रदानत्वं होत्रेऽनुगृणाति प्रतिगृणाति
वेत्यत्र शंसनविषयहर्षानुकूलव्यापारलक्षणं प्रोत्साहनं धात्वर्थः धात्वर्थशंसनाश्रयस्यात्रानुप्रतिगृणश्चेत्यनेन संप्र
दानत्वं शतेन शताय वा परिक्रीत इत्यत्र करणस्य पक्षे संप्रदानत्वं ज्ञानव्यापारस्य दानं फलेभ्यो याति अत्राहर्तुमिति
तुमन्तं तादर्थ्यकर्मवतु चतुर्थ्यर्थः फलकर्मकाहरणफलकं यानमिति बोधः एतद्बोधोपपत्तिराकांक्षावादं तेन विना यत्तु फ
लेभ्य इत्यस्योदाहरणक्रिया चतुर्थ्यर्थः कर्मत्वप्रयोजकत्वे पूर्वपरयोः संसर्गो विवितितन्न क्रियार्थोपपदस्य च कर्मणि स्था

मं॰ ल॰
१७१

नि न इति सूत्रमत्त्वे नेदृशार्थे साधुत्वे मानाभावात् यागाय यजति अत्र प्रातिपदिकार्थे प्रथमापवादश्चतुर्थी घञयं तु मुनाम
मानार्थः यागफलकं पानमिति बोधः न त्वां तृणाय तृणं वा मन्ये अत्र कर्मद्वितीयाचतुर्थ्योरर्थः तृणपदं तृणसदृशपरं
त्वकर्मकतृणसदृशकर्मकमदुक्तिज्ञानाभाव इति बोधः द्वित्वे द्विशेष्य तृणसदृशप्रकारे निपातवत् एवं चास्य तापकर्षः फ
लति तत्रैव चेयं चतुर्थी साधुरिति भाष्ये स्पष्टं ग्रामं ग्रामाय वा याति अत्र द्वितीयाचतुर्थ्यौ कर्मैवार्थ इति सूत्रमतं भाष्ये तु या
नेरेवारंभपर्यंतमनारंभप्रतिपात्याद्यर्थस्य कृत्रिमकर्मतया तेनाप्सि प्रेप्स्यमाणत्वात् ग्रामस्य संप्रदानत्वं फलाश्र
यत्वेपि तत्त्वस्याविवक्षा एवं च ग्रामसंप्रदानकोत्तरदेशसंयोगानुकूलव्यापारविषयकव्यापारं न इति बोधः अतिप्रसंगा
त्तु न निधानाद्धारणीयः ग्रामं यातीत्यादौ तदर्थभावः कर्मत्वविवक्षा च विप्राय दानं इत्यादौ तादर्थ्ये चतुर्थी तादर्थ्यमु
पकार्योपकारकभावसंबंधः विप्राय दधीत्यादौ विप्रकर्तृकभोजनोपकारके विप्रोपकारकत्वारोपाद्विप्रोपकार्योपकार
कं दधीति बोधः मुक्तये हरिं भजतीत्यादौ मुक्तिरूपोपकार्योपकारकं हरिकर्मकं भजनमिति बोधः एवमध्ययनाय वसती
त्यादिष्वपि तादर्थ्यस्यापि संबंधत्वेन विवक्षायां षष्ठ्येव यथा गुरोरिदं गुर्वर्थमिति स्पष्टं भाष्ये तादर्थ्यस्य हेतुत्वानुगत
त्वेपि कारणवाचकात्तृतीया कुंडलाय हिरण्यमित्यादौ कार्यवाचकादुच्यमानचतुर्थ्यैव कारणगतसंबंधस्य बोधना
त् तस्मै इदं तदर्थं तत्र चैतदुपकार्यवाचीदं सर्वथं उपकारकं तत्रोत्तरपदार्थस्य कारणरूपस्य ज्ञापनीयत्वेन प्राधान्यात्ता
दृष्टवाच्ये गुणे संबंधेऽध्वन्वयः सुखाय पुण्यं नरकाय पापं इत्यादि साध्येव तु मर्थद्य ज्ञं तेपाकाय यत्यादौ घञा वा १७१

दर्थ्यमोक्तत्वादेतत्तदर्थाख्यानुमर्थांश्च भावबचनादिसारस्थं भक्तिर्ज्ञानायकल्पते क्लृपेरुपसर्जनिरत्रार्थः प्रथमापवादो
त्रक्लृपिसंपद्यमानेचेत्यनेनविकारवाचकाच्चतुर्थीविकारेचप्रकृतिरूपारोपः भक्तिरूपाज्ञानकर्तृकोत्पत्तिरिति बोधः
भक्तिरत्रनिर्दिश्यमानरूपा प्रकृतिविकृतिसोऽर्थेदर्शितज्ञानायांतु प्रकृतिविकृतिभावप्रतीतेर्जनिकर्तुरित्यनेनापादानत्वा।
ननक्तिपदात्पंचमीनक्तेर्ज्ञानंकल्पतेइतिज्ञानस्य कर्तृत्वेन कारकविभक्तेर्बलवत्त्वेन च ततः प्रथमेतिकैयटेस्पष्टं भक्ति
र्ज्ञानात्मनापरिणमतइत्यादावात्मशब्दस्तद्विधर्मपरः ज्ञानत्वविशिष्टरूपांतरप्राप्तिर्भक्तिकर्तृकेबोधः अत्रप्रकृति
विकृतिभावाप्रतीतेर्नचतुर्थी किंतु प्रकृत्यादित्वात्तृतीया वातायकपिलाविद्युत् उत्पातेनज्ञापितेचेत्यनेनचतुर्थीप्रा
णिनांशुभाशुभसूचकोद्भूतविकारउत्पातः ज्ञाप्यज्ञापकभावश्चतुर्थ्यर्थः वातरूपज्ञाप्यज्ञापिकाकपिलाविद्यु
दितिबोधः विप्रायहितं इष्टसाधनंहितपदार्थः संबंधश्चतुर्थ्यर्थः विप्रसंबंधिहितमितिबोधः एवंसुखयोगेपिविप्रा
यसुखंइत्यादौ हरयेनमः अत्रनमः स्वाहास्वधेतिचतुर्थी अपकृष्टत्वज्ञानबोधनानुकूलो व्यापारः स्वरादिपठितन
मः शब्दार्थः तत्रापकर्षः प्रयोक्तृपुरुषविशेषनिष्ठेनमस्कार्यावधिकएवप्रतीयतेव्यापारश्चप्रयोक्तृनिष्ठः प्रतीयते।
शब्दशक्तिस्वभावात् अग्नेमध्वादितेननमः पदमात्रेणस्वदीपनस्यबोधनात् सचव्यापारः करशिरः संयोगादिरीदृशा।
शब्दप्रयोगश्चचतुर्थ्यर्थः उद्देश्यत्वं एवं चहर्युद्देश्यकउक्तव्यापारइतिबोधः एषोर्थः शिवायनमइत्यादौत्यागोनम
शब्दार्थः त्यागश्चस्वस्वत्वनिवृत्त्यनुकूलोव्यापारः उद्देश्यत्वंचचतुर्थ्यर्थः शिवोद्देश्यकत्यागविषयोर्थइतिबोधः उ

द्देश्यत्वंविषयताविशेषरूपंसागम्यवेदबोधितोद्देश्यकत्वस्यप्रयोगकर्तृकर्तृकत्वोपरक्तएवप्रतीयतेशब्दशक्तिस्वभावा
त् अन्योन्वारितनमःशब्देनास्मदीयद्रव्यस्यागाप्रतीतेःजातिविशिष्टयजमानीयद्रव्यद्वये स्वीयत्वमारोप्यैवनमःशब्दःप्रयु
ज्यते वेदबोधितेतूक्तेर्निर्दिष्टोद्देश्यकेयागेनमःशब्दप्रयोगः अहंममेत्यभिमानरहितानांशिवादीनांद्रव्येस्वत्वाभावेविशिष्ट
स्वनंगृह्णीयादित्यादेःशिवोद्देशेनत्यक्तमित्यर्थोबोध्यः संप्रदानचतुर्थीस्वत्वननमःपदार्थक्रियात्वाभावात् उद्देश्यत्वस्यसं
बंधत्वेनविवक्षायांषष्ठ्यपिनमस्कारोतिदेवानित्यत्रोपपदविभक्तेःकारकविभक्तिर्बलीयसीतिन्यायात् कर्मणिद्वितीयेति
शब्देन्दुशेखरेस्पष्टं अत्रायंनमःशब्दोनिपातोद्योतकः उक्तोनमःपदार्थोत्रकृधातोरेवार्थः स्वविषयविषयावधित्वममा
नाधिकरणसमवायरूपेणफलतावच्छेदकसंबंधेनस्वनिष्ठापकृष्टत्वज्ञानबोधःरूपंफलंनमःशब्दद्योत्यार्थान्वयमात्रेण
चात्रनमःस्वस्तीत्यस्यापिप्राप्तिःपदात्वत्रापिनमःशब्दस्यवाचकत्वंतदाचतुर्थ्येवतेननमस्कुर्मोनृसिंहायेतिसिद्धं ।
नमःस्वस्तीतिसूत्रेचोभयोरपिनमःशब्दयोर्ग्रहणमितिदिक् प्रजाभ्यःस्वस्तीत्यादौस्वस्तिशब्दोमंगलार्थःसंबंधश्चतुर्थ्य
र्थः प्रजासंबंधिमंगलमित्यर्थः मंगलाशंसायांतुस्वस्त्यस्तुगोभ्यइत्यादौस्वस्तिशब्दार्थएवान्वयेनचतुर्थ्येवगोसं
बंधिमंगलकर्तृकमाशंसाविषयोभवत्वितिबोधः यत्वाशीःस्वस्त्यर्थे साचपराहितेत्वाहितात्वयीसंबंधश्चतुर्थ्यर्थ
इति तन्नचतुर्थ्यादिस्याशीर्लिङादेःप्रयोगानापत्तेःप्रसन्निवादइतिसूत्रस्यभाष्यात् भूदेआशिषोऽभावेनस्वस्तिश
ब्दलायेत्यादौचतुर्थ्यनापत्तेश्च मंगलाद्योतिहितत्रस्वस्तिशब्दःमंगलांगीकारार्थत्वस्यैवप्रामाणिकैरुक्तत्वेतिदिक् १७२

स्वाहास्वधावषट्शब्दस्यागार्थकत्वमः अष्टेन व्याख्याताः दैत्येभ्यो हरिरलंप्रभुः समर्थः अलमाद्यर्थैः सामर्थ्यवान्
मारणादिसंबंधित्वरूपः संबंधश्चतुर्थ्यर्थः दैत्यमारणादिसंबंधिसामर्थ्यवानिति बोधः॥ ॥इति चतुर्थी॥ ॥पंच
म्याः अपादानत्वशक्तिमानर्थः अपादाने पंचमीति सूत्रात् सा शक्तिश्च प्रकृतधात्वर्थविभागजनकव्यापारानाश्रय-
त्वे सति प्रकृतधात्वर्थविभागाश्रयो यस्याः वृत्तिः ध्रुवमपायेपादानमिति सूत्रात् कर्तृवारणाय सत्यंतं अयमेव तम
त्रे ध्रुवपदार्थः विभागश्च न वास्तवसंबंधपूर्वक एव किंतु बुद्धिकल्पितसंबंधपूर्वकोपि अत एव जुगुप्सापूर्वकनिवृत्ति
लक्षकतामाध्रिस जुगुप्साविरामो स्यादि अस्या व्याख्यानं भाष्योक्तं संगच्छते सूत्रे ध्रोदेश संयोगानुकूलव्यापाररूपं-
पातमात्रं तु नापायः वृक्षमजहत्स्वपिपर्णेनु मिस्त अतिवृक्षात् पर्णं पततीत्यप्रयोगात् गतिर्विभागत्ववधिनानापाय
इति कथ्यते इति हर्युक्तेश्च अत्र च अन्वययोग्यविभागं विनेति तदर्थः तत्र मानं तूक्तं वृक्षस्य पर्णं पततीत्येवं भाष्ये
निदर्शितमिति तत्र हि भ्रष्टः पर्णविश्लेषणमिस्यपायस्याविवक्षणात् षष्ठी भाष्ये तूक्तेति हेलाराजः धावतोऽश्वात् पत
तिकुड्यात् पततोऽश्वात् पततीत्यादौ पततीत्यु पातक्रियानाश्रयत्वेन तांऽशस्याश्वस्यापादानत्वमक्षतं तदुक्तं हरिणा
अपायेयदुदासीनं चलं वा यदि वाचलं ध्रुवमेवातदावेशात्तदपादानमुच्यत इति परेत्वेवं सति धावतः पततीत्या
दावपादानत्वं कथमित्याशंक्य ध्रौव्यस्याविवक्षितत्वात्ततोऽप्यविवक्षावशाद्भवतीति समाधानपरभाष्यासं
गतिः पतधात्वर्थव्यापाराश्रयत्वरूपस्य त्वदुक्तस्य ध्रुवत्वस्यात्रासत्वेन सतो ध्रौव्यस्याविवक्षेत्यस्यासंग

तेः तस्मादवधित्वावोपगमातिरिक्तावधित्वोपयोगिव्यापारानाश्रयत्वमस्तीति वक्तव्यं: अपाये गतिविशेषे सतिउ
क्तध्रुवत्ववदपादानमिति सूत्रार्थः ग्रामादेरवधित्वोपयोगित्वाभिमाने न शंका वृक्षात्पर्णमित्यादौ तदभावान्न तस्य त
दुपयोगित्वं तस्मै सुतरं इत्याहुः नचाद्यपक्षे परस्परस्मान्मेषावपसरत इत्यत्र दोष इति वाच्यं तत्र मेषपदोपात्तयोरे
वक्रियाश्रयत्वं परस्परपदोपात्तयोर्विभागाश्रयत्वमेवेति दोषात् अत एव वदेवदत्तयज्ञदत्तावन्योन्यमाश्लिष्यत इ
त्यादौ तयोः कर्मत्वसिद्धिः अन्यथा परत्वात्कर्तृत्वमेव स्यात् आत्मानमात्मना हंतीत्यादावंतःकरणाद्युपाधिकृता
भेदवत् पक्षे तत्राप्युक्तरूपोपाधिभेदेन भेदः आश्लिष्टलिंगितार्थस्यैकत्वाभावात् स्पष्टा चेयं रीतिः कर्मवत्कर्मणेतिसूत्रे भा
ष्ये हरिणा तु उभावप्यध्रुवौ मेषौ यद्यप्युभयकर्मके विभागे प्रविभक्ते तु क्रिये तत्र विवक्षिते तत्राध्रुवक्रियत्वेन वि
भागस्य तु ध्रौव्यविभागे तत्तद्विभागानुकूलक्रियायास्तस्यापरत्राभावात् उभयोरपि ध्रुवत्वमित्यर्थः तदेवोक्तं मेषां
तरक्रियापेक्षमवधित्वं पृथक्पृथक् मेषयोः स्वक्रियापेक्षं कर्तृत्वं च पृथक्पृथक् इति उक्तम् अत्र वदंति वस्तुतस्ता
भ्लिष्टयोर्द्वयोरपि स्वधातुनानिवृत्तभेदस्यैवोपादानात् उभयोरपि तत्क्रियाश्रयत्वेन परत्वात्कर्तृत्वापत्तेः अत
एवैकशेषस्तेनाप्युक्तं नवेतिङ्स्तान्येकशेषास्तं प्रयोजयंति क्रियाया एकत्वादिति अपसरणं विभागपूर्वकं दे
शतो गमनमित्यस्य त्रविस्तरः धात्वर्थप्रकृतत्वं च न शब्दोपात्तत्वं किं तु विवक्षितत्वमात्रं अत एव धनुषा विध्यती
त्यत्रापादानसंज्ञाबाधित्वा करणसंज्ञेति भाष्यं संगच्छते अशनिः मरणं वस्य वधित्वावोपगमे नैवमध्यने करणो १७२

पगमे तोन्नयोरपि निमित्तनिमित्तिभावेन स्थितयोर्युगपदन्वयविवक्षायां विप्रतिषेधोपपत्तेः एवमन्यत्रापि बोध्यं कंसपा
त्रामन्नं भुंक्ते इत्यस्य तत्रस्थितमन्नं ततउद्धृत्य भुंक्ते इत्यर्थ इति तत्रापुनर्यविवक्षा अपादानत्वं शास्त्या अत्र एवावधि
रित्युच्यते यत्तु विभागः पंचम्यर्थः आश्रयत्वं प्रकृतिप्रत्ययार्थयोः संसर्गः विभागस्य च जन्यजनकभावेन धात्वर्थेऽन्व
यः यद्वा विभागाश्रयत्वं पंचम्यर्थ इति तन्न वृक्षापादानकेऽस्यैव बोधानुभवात् वृक्षाद्विभजतेऽस्मादौ विभागस्य बोधाप
त्तेश्च तत्रापादानस्यैव पंचम्यर्थत्वे किमर्थं जरतीयेन आद्ये प्रकृत्यर्थविभक्त्यर्थयोस्तत्वबोधक भस्मानेदान्वयस्य
त्यागापत्तिश्च वृक्षात्पर्णं पतति पतेर्विभागजन्यः संयोगोऽर्थः तत्र विभागे पंचम्यर्थो विशेषणं प्रकृत्यर्थ आश्रयस्यार्थे
वृक्षरूपापादानकविभागेऽस्याद्रिरीत्या बोधः वस्तुतोपादानवृत्तीयं पर्णकर्तृकं पतनं इति बोधः वृक्षात् भूमिं पर्णं प
तति अत्र विभागजन्यसंयोगानुकूलव्यापारोऽर्थः वृक्षं त्यजतीत्यादौ विभागानुकूलव्यापारोऽर्थ इति कर्मत्वमेव
वृक्षात्फलं त्यजतीत्यादौ विभागजन्यसंयोगानुकूलव्यापारोऽर्थः स्पंदने विभागोऽर्थ इति वृक्षे स्पंदतेऽस्यैव चलते
स्त्वासनाच्चलित इति प्रयोगाद्दस्से व विभागार्थत्वं वृक्षाद्विभजतेऽस्मादौ विभागजन्यपूर्वदेशसंयोगनाशोऽर्थः
वलाहकाद्विद्योतते विद्युदित्यत्र विद्योततेर्विभागजन्यसंयोगानुकूलक्रियारूपनिःसरणपूर्वके विद्योतने वृत्तिः
वलाहकापादानकं विभागजन्यसंयोगानुकूलक्रियोत्तरकालिकं विद्युत्कर्तृकं विद्योतनमिति बोधः इदमुपा
त्तविषयमित्युच्यते वलाहको नाम धूमज्योतिःसलिलमरुतां संघातः ततोवयवत्वज्ज्योतिषो नेद्दविवक्षया

मं.जू.० विभागविवक्षणात्सोवधिः यदा तु तेजस आधारत्वेन मम विवक्षितं तदा बलाहके विद्योतते इति सप्तमी यदा त्वनेदेन
१७४ विवक्षा तेजोमयत्वात् प्रकाशनसामर्थ्यं मूत्रदकधूमादेस्त्वप्रकाशप्रतिबंधकत्वाविवक्षणात् तदा बलाहको
विद्योतते इति यदा तु प्रसक्तसिद्धमागमनं मनसि निधाय कुतो भवानिति प्रश्ने पाटलिपुत्रादित्युत्तरयति तत्राकां-
क्षावाक्यांतोक्तरीत्या वाक्यैकदेशाध्याहारेण बोधः एतदपेक्षितक्रियः सिद्ध्यते वृक्षात्पततीति तु निर्दिष्टविषयं धरा-
द्विश्लिष्टः स्यादिष्यपनेनैवापादानत्वं सूत्रेऽपायपदशिष्टेन न चेदस्माद्विग्रहणं पंचमीविभक्ते इत्यत्र विभक्तशब्देनेव तत्-
न्मूलकसंबंधविवक्षायां घटीयो भेदः इत्यविनिर्दिष्टविदारणे इत्यत्र भेदज्ञानविषयत्वमपि विदारणं एकत्वेन गृहीत-
स्य तथा बोधे बुद्धिविदारणस्य तत्रापि सत्त्वादित्यन्यत्र विस्तरः अधर्माज्जुगुप्सते अत्रानिष्टसाधनताज्ञानरूपा
निंदा जुगुप्सतेरर्थः विषयता पंचम्यर्थः जुगुप्साविरामप्रमादार्थानामुपसंख्यानमिति वार्त्तिकात् अनिष्टसा-
धनताज्ञानपूर्वकं ततो निवर्त्तते इत्यर्थ इति भाष्यकृन्मतं तेनक्रमणमपायेऽस्येवापादानत्वमाश्रित्य वार्त्तिकप्रत्या-
ख्यानात् धर्माद्विरमति प्रागभावसाधारणकृत्स्नाभावानुकूलो व्यापारो विरमतेरर्थः योगक्षेमसाधारणी चात्रा-
नुकूलता स्वव्यापाराधर्मविषयोपेक्षाविशेष एव तदुक्तं भाष्ये य एष मनुष्ये नास्तिकबुद्धिर्भवति स पश्यति नेदं
किंचद्धर्मो नाम नैनं करिष्यामीति स बुद्ध्या संप्राप्य ततो निवर्त्तते इति तेन हि कदापि धर्मानाचरणेऽपि तथाऽप्र-
योग इति लभ्यते एतेन जीवनकालावच्छिन्नः कृत्स्नसमानाधिकरणकृतिध्वंसो विरमतेरर्थः कृतिध्वंसे सर्वत्रे- १७४

कविषयेव जीवनमपि कर्तृसंबंधो व सामानाधिकरण्येन समभिव्याहृतकर्तृरूपदबोधशरीरजातीयशरीरघ
टितत्वे चैत्रादिपदैः शरीरविशिष्टात्मबोधनात् सा जातस्य च चैत्रादिपदोपस्थापितचैत्रत्वादिजात्यैवतेन जाविदेहा।
तरावच्छेदेन धर्मकरणेपि वर्तमानशरीरावच्छिन्नवरमकृतिध्वंसमादाय विरमतीतिप्रयोगसिद्धिः युवशरीराव
च्छेदेन धर्मं कुर्वस्यापि वलाशरीरावच्छिन्नकृतिध्वंसमादाय न विरमतीतिप्रयोगः नापि पूर्वापरकालयोर्धर्मकर।
णे मध्ये मुहूर्तमात्रमकरणे विरमतीतिप्रयोगः तत्कृतिध्वंसस्य कृतिसमानाधिकरणत्वात् पंचम्यर्थो विषयते
तिपरास्तं धर्माद्विरतोपि पुनः प्रवृत्त इत्यादेरनापत्तेश्च धर्मात्प्रमाद्यतीत्यत्रेष्टसाधने वस्तुनि समानदेशत्वसमान
कालत्वोभयसंबंधेनाधिकारविशिष्टेष्टसाधनत्वाभावज्ञानमनिष्टसाधनत्वज्ञानं वा धात्वर्थः पंचम्यर्थो विषय
त्वं ज्ञानान्वयि जुगुप्सादीनां यद्विषयकत्वेन विवक्षा तदपादानं तत्पूर्वकनिवृत्तिपर्यंतं सर्वत्र धात्वर्थ इति ज्ञा।
पमतं चौराद्बिभेति त्रायते वा अनिष्टज्ञानं भयं अनिष्टपरिहारस्त्राणं भ्रू अनिष्टहेतुरत्रापादानं भीत्रार्थानां
भयहेतुरिति सूत्रात् चौरापादानकानिष्टज्ञानं तदपादानकानिष्टपरिहार इति बोधः सूत्रे भयहेतुरित्यस्य भ
यैकदेशानिष्टहेतुरित्यर्थः यज्जन्यं भयमेव न प्रसिद्धं तत्र पंचमी न तु न वत्स्येव तस्मादिष्टत्वे तु हेतुत्वारोपेण सा
एवमेवां तरिक्षे न जुहोति परमाणुं न पश्यतीत्यादेरुपपत्तिः आरोपितस्यैव निषेधात् दोषाच्च शाब्दानुमयपूर्वि
कात्राणपूर्विका च निवृत्तिर्निवर्तना चानयोरर्थः बुद्धिप्राप्तचौरापादानिकापस्मात्समस्मात्तद्भयपूर्विका निवृत्तिस्तद

पादानिकाः निष्टपरिहारफलिकानिवर्त्तनेतिच बोध इति लभ्यते चोरमध्यगतो पि तत्संपर्कफलवधादिनिवर्त्तनात्तेभ्यो नि
वर्त्तित इत्यस्तु अत एतद्विषये पि हेतुत्वापादानत्वाविवक्षायां षष्ठी न वत्से चेति बोध्यम् अध्ययनात्पराजयते कृत्समाध्यत्वधी
समानाधिकरणतद्विषयकोत्साहाभावो धातोरर्थः विषयोत्रापादानं पराजेरसोढ इति सूत्रात् अध्ययनापादानकोदेवद
त्तकर्तृकउत्साहाभाव इति बोधः तत्पूर्विकानिवृत्तिरिति वा शत्रून्पराजयते इत्यत्र तिरस्कारानुकूलो व्यापारो धात्वर्थः आद्ये
ऽनिष्टं धात्वर्थः अध्ययनजन्यमनिष्टमिति बोध इति तु न युक्तं तथा बोधानुभावात् अमोदृशाब्देन तदर्थालाभाच्च प्रेक्षापूर्व
करी मनुष्योध्ययनस्य दुःखत्वदुर्धरत्वादिपर्यालोचनबुद्ध्या प्राप्य ततो निवर्त्तते इति भाष्येण सर्वथाध्ययनाप्रवृत्तावपि अ
स्य प्रयोगस्येष्टतया तत्रानिष्टस्याध्ययनजन्यत्वासंभवाच्च यवेभ्यो गां वारयति अग्नेर्माणवकं वारयति कूपादन्धं वारयति भक्ष
णसंयोगादिजनकव्यापाराभावानुकूलो व्यापारो धात्वर्थः अभावप्रतियोगिव्यापारजन्यफलाश्रयोत्रापादानं वारणा
र्थानामीप्सित इति सूत्रात् वारणार्थधात्वर्थफलाश्रयत्वमत्रेप्सितत्वं तेन भक्षणसंयोगाद्याश्रयत्वाद्यवादीनामपादानत्वं अ
नुकूलता चात्र योग्यतारूपैव तेन प्रतिबिद्धे गवि नष्टयस्यपि अयं वारयति तथापि न निवर्त्तते इति प्रयोगसिद्धिः अप्रवृत्तवा
रणेपि अयं प्रयोगः पदी मा गा वत्स त्वं गच्छेति ध्रुवं समस्तानाश्रमन्तात्राश्रो ऽधर्मो राजनयं च बुद्ध्या प्राप्य निवर्त्तयतीति भाष्यात्
नेऽकृव्यापाराभावानुकूलानिवर्त्तनाच्च तन्मते धात्वर्थः अंसेऽसि सुखदेशागमनत्वेनांधस्य कूपपतनमिच्छाविषयः एवं तां
नरीयकविषभोजनप्रसक्तौ तद्वारणकर्त्री चैत्रं विषाद्वारयतीति प्रयोगो न वस्येव विषस्य विषत्वेनेच्छाविषयत्वाभावे पि नस्ते

नेत्राविषयत्वात् मातुर्निलीयते कृष्णः स्वकर्मकदर्शनाभावप्रयोजकदेशविशेषस्थितिर्धात्वर्थः धात्वर्थदर्शनकर्त्री चापा-
दानं तत्पूर्वकनिवृत्तिर्धातोरर्थः तत्र मातुरपादानत्वे नान्वय इति भाष्यमतं दर्शने मातृकर्तृकत्वं प्रत्यासत्तिलभ्यं उपाध्या-
याद्धीते अध्वोरणोत्तरकालिको नियमपूर्वको ग्रंथस्वीकारानुकूलो व्यापारो धात्वर्थः उच्चारणाश्रयोत्रापादानं अपादानत्वेनै-
व बोधः सर्वत्र उपाध्यायान्निःसरंतं ग्रंथमधीतेऽत्यर्थः ग्रंथिसंगत्वनिधानाभावाधारणीय इति भाष्यमतं ब्रह्मणः प्रजाः
प्रजायंते उपादानकारणमत्रापादानं जनिकर्तुः प्रकृतिरिति सूत्रात् सूत्रे प्रकृतिरुपादानकारणं ब्रह्मापादानिका प्रजाक-
र्तृको त्पत्तिरिति बोधः ब्रह्मणो निःसरमाणा जायंतेऽत्यर्थः निःसरणं लोकप्रसिद्धमप्ययं यद्यस्माज्जायते तत्ततो निःसरती-
ति लोके व्यवहारात् स च व्यवहार उपादानकारणविषय एवेति भाष्यमतं पुत्रात्प्रमोदो जायतेऽस्मादावुपादानत्वारोपेण
पादानत्वं बोध्यं हिमवतो गंगा प्रभवति प्रथमप्रकाशोत्र धात्वर्थः तदाधारो हिमवदादिरत्रापादानं हिमवदपादानको गंगा-
कर्तृकः प्रथमः प्रकाश इति बोधः हिमवतो निःसरमाणा प्रकाशत इति वार्थः प्रासादात्प्रेक्षतेऽस्यादौ वाक्यैकदेशस्या-
येन बोधः पंचम्यर्थो ल्यबंतार्थक्रियाकर्म प्रासमारुह्य प्रेक्षतेऽस्यादावुपविश्येत्याध्यर्थाधिकरणं पंचम्यर्थः प्रासादादितो-
निःसरता चक्षुषा नद्यस्यावा प्रेक्षतेऽस्यार्थः प्रासादस्थपुरुषाभिनिष्क्रमणमेव प्रासादावधिकत्वेनोपचर्यत इति भाष्यमतं
वनाद्ग्रामो योजने योजनं वा अत्राव्यवहितोत्तरत्वं पंचम्यर्थः स्वाव्यवहितोत्तरवृत्तित्वं प्रथमासप्तम्योरर्थः एवं च वनाव्यव-
हितोत्तरयोजनाव्यवहितोत्तरदेशवृत्तिर्ग्राम इति बोधः कार्त्तिक्या आग्रहायणी मासेऽस्यात्रत्यावयवकत्वं पंचम्यर्थः स्वाव्यव

हितोत्तरकालवृत्तित्वं सप्तम्यर्थः कार्त्तिक्या अवयवकत्रिंशत्तिथ्यात्मकमासावधिहितोत्तरकालवृत्तिराग्रहायणी त्यर्थः वनान्निः
सृत्य योजने गते ग्राम इत्यत्र प्राप्य इत्यध्याहारेण बोधः निःसृत्येति परावरयोगे चेति क्त्वा वनावधिकविभागानुकूलव्यापारसं-
बन्धे योजने गते ग्रामः प्राप्य इति बोधः योजनमित्यस्य प्रथमान्तत्वे गतं चेदिति विशेषः कार्त्तिक्या इत्यादेरपि ततः प्रभृति गते मासे
आग्रहायणीत्यर्थ इति भाष्यमतं अत्र सर्वत्र भाष्यसम्मतेन एवार्थे साधुत्वं यथोत्तरं मुनीनां प्रामाण्यात् सर्वत्र तत्तत्कारकत्वा-
विवक्षायां षष्ठ्याः साधुत्वमिष्टमेवाभिनिधानं वेति तत्त्वं घटाद्भिन्न इत्यादौ स्वप्रतियोगिकभेदसंबंधः पंचम्यर्थः तेन प्रकृत्यर्थ-
स्यान्यस्मिन्नन्वयः एतेन घटादितरो व्याख्यातः अन्यारादितरर्त्तेदिगिति पंचमी अन्ये त्वर्थग्रहणमिति तु भाष्यादुक्तत्वादितर-
ग्रहणं व्याख्यातं इत्यत्र निरूपितं घटाद्भिन्न इत्यादौ तु गतिरुक्ता वनादारात् आराद्दूरसमीपयोः ऋते कृष्णान्नोत्पद्यते सुखं
अत्र ऋते शब्दार्थः संसर्गाभावः प्रतियोगित्वं पंचम्यर्थः कृष्णशब्दस्य भक्तिलाक्षणिकः कृष्णभक्तिप्रतियोगिकाभावप्रयो-
ज्यः सुखकर्तृकोत्पत्त्यभाव इति बोधः कृष्णादृते दुःखं अत्र ऋते शब्दार्थस्य सामानाधिकरण्येन तत्रान्वयः कृष्णभक्त्य-
भावसमानाधिकरणं दुःखमिति बोधः कृष्णादृते नरः शोच्यः अत्राभाववान् तदर्थः कृष्णभक्त्यभाववान् नरः शोच्य इति बो-
धः कृष्णादृते न धनुर्धर इत्यत्र भेदवान् तदर्थः कृष्णभिन्नो न धनुर्धर इति बोधः एतद्योगे द्वितीयापि यथा ऋते वातं वृक्षः पा-
ततीति वाताभाववान् वृक्षः पततीति बोधः वृक्षपतने वातजन्यत्वाभावलाभस्त्वार्थः पूर्वो ग्रामात् उदयाचलसंनिहितदेशः
पूर्वपदार्थः पंचम्यर्थोऽवधित्वं पूर्वत्वं च तद्रूपे द्योरवच्छेदोपाधिः एवं परत्वाद्यपि ग्रामावधिकपूर्वत्ववानित्यादिक्रमेणान्वयः चै-

त्रात्पूर्वः फाल्गुनः प्रतियोगितत्तद्ध्वंसानधिकरणकालवृत्तिः पूर्वपदार्थः तत्तदवधिबोधकपदसमभिव्याहारवशाच्चैत्रा-
रूपप्रतियोगितद्ध्वंसानधिकरणकालस्य तत्त्वेन भानं चैत्रावधिकपूर्वकालवृत्तिः फाल्गुन इति बोधः प्रतियोगितद्ध्वंसा-
नधिकरणकालत्वस्य शक्यतावच्छेदकत्वे गौरवं प्रत्येकं खण्डशः शक्तौ शक्त्यानन्त्यं चैत्ररूपप्रतियोगिचैत्रध्वंसे तदुभयाना-
धिकरणं चैत्रावधिककालवृत्तिः फाल्गुन इति बोधांगीकारे एकस्य चैत्रस्यानेकधान्वयांगीकारे गौरवं अस्तु सन्निश्च एवम
न्यत्रापि बोधः कालस्य क्रियामात्रपरिच्छेदकत्वात् तद्ध्रुवपर्यंतं पूर्वादिशब्दानां दिग्देशे बुलक्षणालक्षणाभावे तु चैत्रात्पूर्वः
फाल्गुन इत्येव प्रयोगः अस्मीत्यादेरध्याहारः पूर्वमित्यधिकरणशक्तिप्रधानं चैत्रात्पूर्वो माघ इत्यादौ तात्पर्यवशात् तथा-
यथं त्रिंशद्दिनव्यवहितत्वोक्तकालस्य तत्त्वेन भानं चैत्रात्परः अत्र तत्तदवधिसमभिव्याहारवशात् तद्ध्वंसाधिकरणकालः
परशब्दार्थः कुम्भात्परो वृन्दः तत्र कुम्भोस्ति कालध्वंसाधिकरणकालः परत्वेन परशब्दार्थः तत्रैव कुम्भस्यावधित्वं ता-
त्पर्यव्यवहारात् प्रयागादुत्तरं काशीत्यादौ संयुक्तसंयोगवद्देशत्वमुत्तरत्वेनोत्तरमित्यधिकरणशक्तिप्रधानाव्ययार्थत्वस्य च
पूर्वदक्षिणपश्चिमादेस्तात्पर्यवशात्तत्त्वेन तत्तत्प्रयोगेषु भानं गृहात् ग्रामम् अपरकालपाः सेनापरा ममेत्यादौ विप्रकृष्ट
देशस्यः संनिकृष्टदेशस्य अपरत्वादिना परापरशब्दार्थः अवधिः पंचम्यर्थः गृहावधिकमत्संबंधिपरत्ववती गंगे
त्यादिक्रमेण बोधः ममेत्यत्र फाल्गुन पंचमी प्रस्तावस्य प्रयत्नोत्थितानां कान्तातदाचकादेवतत्परनिमित्तविभक्तिस्वीका
रात्परादिपदं चावधावेव नियतनाकांक्षं तं नसंबंधिनीति स्मर्तव्यम् प्राक्प्रत्यग्वाग्यामात् इति पूर्वादिशब्दे व्याख्यातं तंत्र

वीन प्रभृत्यारभ्य वा मेघोद्धृहिः अत्र प्रभृतीत्यारम्भे त्वर्थकमव्ययं तदर्थयोगे पंचमी अपादाने पंचमीति सूत्रेयत स्याध्वका
लनिर्माणं ततः पंचमी कार्त्तिक्या आग्रहायणीमासे इति वार्त्तिक प्रभृत्याख्यानाय नाभ्ये उक्तमिदमत्रप्रयोक्तव्यं सन्न प्रयुज्य।
ते कार्त्तिक्याः प्रभृत्याग्रहायणीमासे इति तेन तदर्थयोगे पंचमीति वचनमत्वं सूचितं अतएव तद्प्रयोगेपि पंचमीसिद्धिः
अवधिमादायेति तदर्थः आरम्भे त्वस्यचैतदर्थकत्वादितस्यावधित्वं च समभिव्याहृतपदार्थापेक्षं यथा प्रकृते मरणांत
कालस्यैवावधिः मरणांतकालावधिं नवकालमादाय तावत्कालं हरिः सेव्य इति बोधः आरम्भेस्य गृहीत्वेसे तन्मात्रा
र्थकत्वे आयत्तेन मारम्भेस्यादौ कर्मत्वाद्द्वितीया प्रभृतिशब्दस्य त्वधातुत्वात्तदर्थस्य क्रियात्वात्तद्विशेषणे द्वितीया तद
र्थकस्यारम्भे त्वस्यापि वाक्यैकदेशन्यायेन तदर्थकत्वेति न तद्विशेषणस्य तत्त्वं यद्वा नवावधिके मरणांतकाले नव
कालमादाय हरिः सेव्य इति बोधः तत्र गम्यमानक्रियापेक्षं नवस्यावधित्वमित्यपादानत्वादेवात्र पंचमी तथावधिमा
दायेत्यस्यार्थयोगे न तद्बोधक प्रभृत्यादियोगे तच्च गम्यते अप्रयोगेपि वाक्यैकदेशन्यायेन तत्प्रतीयते पंचमीवलादेवा।
त्रात्सर्यवशाच्च एवं कार्त्तिक्या आग्रहायणीमासे इत्यत्रापि कार्त्तिक्यवधिके आग्रहायणीघटिते मासे कार्त्तिकीमादा
यगते सति आग्रहायणीति बोध इत्यलं यदा त्वारम्भेस्यस्य प्रथमक्रियारूपमारंभकत्वं स्यर्थस्तदा तद्योगे समम्य
पि आरभ्यतस्य तस्यां दशम्यां भृगुयाभवत्स्पृजये क्षितियथा ग्रामाद्वहिः वहिः शब्देन समभिव्याहृतपदार्थसावच्छेदकान
धिकरणस्त सन्निहितदेशस्तत्स्थं वस्तु च वहिः शब्देनोच्यते वहिर्योगे पंचमी समासविधानसामर्थ्यात्तद्योगे पंचमी

वहिश्चंचनियतमवध्याकांक्षमितिसपंचम्यर्थः अपहरेःपरिहरेसंसारइत्यत्रापपरीऋतेशब्दसमानार्थौ हरिशब्दस्था।
नतद्भक्तिपरः आमुक्तेसंसारः अत्रमर्यादाङोर्थः तत्रमर्यादाद्विविधाकालरूपादेशरूपाच कालगतमर्यादात्वंचस्व
स्वोत्तरकालोत्पत्यप्रागभावाधिकरणकालत्वंवोध्यः समभिव्याहृतपदार्थस्तदनधिकरणत्वंमुक्तिपदंतत्कालपरं मर्या
दामर्यादिनावःसंवंधःआङ्योगेसःपंचम्यर्थःआङ्मर्यादाभिविध्योरितिसूत्रस्वरसात् मुक्तिमर्यादिकः संसारइतिवोध
संसारेमुक्तिकालप्रागभावाधिकरणनिरूपिततद्भिन्नकालावृत्तित्वविशिष्टव्यापकताबोधस्त्वार्थः एतदर्थद्योतकयावा।
द्यर्थयोगेनुततोन्यत्रापिदृश्यतेइतिद्वितीया कार्त्तिक्यावैशाखींयावद्गीतमितियथा प्रभृत्यर्थयोगेपंचमीकार्त्तिकी
प्रभृतिवैशाखीमर्यादिकंगीतमित्यर्थः गीतेकार्त्तिक्यादिवैशाखीपूर्वावधिध्वंसकालनिरूपिततद्भिन्नकालावृत्ति
त्वसमानाधिकरणव्यापकताबोधस्त्वार्थः व्यापकत्वमत्रोक्तदिशोह्यंप्रयागात्प्रत्याकाश्यपवृष्टोदेवइत्यादौदे
शोमर्यादा देशगतमर्यादात्वंचस्वस्वोत्तरदेशयोः प्रयागतदाद्यंतरालदेशावृत्तिसमभिव्याहृतपदार्थदृष्ट्याद्यनधि
करणत्वंप्रयागादिकाशीमर्यादकवृष्टिकर्त्तादेवइतिवोधः वृष्टोप्रयागादिकाशीपश्चिमदेशनिरूपितस्वभिन्नावृत्ति
त्वसमानाधिकरणव्यापकताबोधस्त्वार्थः आसकलाद्ब्रह्मआङ्द्योत्योभिविधिरूपःसंवंधःपंचम्यर्थःसकलव्यापक
व्रह्मेतिवोधः सोपिद्विविधःकालिकोदैशिकश्च आद्योयथाकार्त्तिक्याश्चैत्रंयावद्गीतंकार्त्तिकीप्रभृतिचैत्रांतकाल।
व्यापकंगीतमितिवोधः चैत्रपदंतदंतकालपरं अंत्यंयथा काशीतःपाटलिपुत्रंयावद्वृष्टोदेवः काशीप्रभृतिपाटलि

शां तद्देशाव्यापकत्वं दृष्टौ प्रतीयते अनयोरात्मा सूर्यवंशात्क दाचिद्व्यापकत्वं तद्भिन्नकालावृत्तित्वविशिष्टं तद्भिन्नदेशा-
वृत्तित्वविशिष्टं च प्रतीयते इति बोध्यं षष्ठ्यां मः कुसुमात्तिमरन्दः प्रसर्पति कुसुममकरन्द इति बोधः तिलेभ्यः प्रतियच्छा-
ति माषान् अत्र ग्रहणपूर्वकं प्रत्यर्पणं प्रतिमम निद्याहृतयच्छतेरर्थः तिलग्रहणपूर्वकं माषप्रतिदानमिति बो-
धः शताद्बद्धः हेतुहेतुमद्भावः पंचम्यर्थः शतहेतुकबंधनकर्मेति बोधः एवं जाड्याद्बद्ध इति बोध्यं धूमादग्निमान्
इत्यादौ ज्ञाननिष्ठजन्यजनकभावस्य विषये प्रायो बोध्यः पृथग्विनानानाराभंशनाद्यमेण वा पंचम्यादीनां प्र-
तियोगित्वमर्थः पृथक्त्वं गुणविशेष इत्येके भेद इत्यन्ये अंसे इमौ भ्रातरौ पृथक् जानाविति अवहारो गौणो
बोध्यः विनानाने रूते शब्दसमानार्थौ लोके न लोकायामुक्तः करणमत्र विनत्यर्थः स्तोकशब्दः स्वप्रवृ-
त्तिनिमित्तास्यत्वधर्मपरः शुक्लादिवदेते केवलधर्मपरा अपि एवं चासत्ववचनतासत्वत्वं च सर्वनामपरा-
मर्शयोग्यत्वं करणत्वं च तस्य परंपरया ईदृशार्थे एव साधुत्वं करणे च स्तोकाल्पकृच्छ्रकतिपयस्यासत्ववचनस्ये-
ति सूत्रात्तेन ह्यत्र तृतीयातीयापंचम्यो एवं कृच्छ्रादियोगे पित्रामस्य दूराद्दूरेण दूरं वा गतं अत्र पंचम्याद्यर्था प्रातिपदि-
कार्थे दूरदेशावृत्तिदूरशब्दार्थः षष्ठ्यर्थः संबंधः ग्रामसंबंधिदूरदेशावृत्तिगमनमिति बोध्यः एतेन ग्रामस्यान्तिकादि-
त्यादिव्याख्यातं समीपदेशावृत्त्यंतिकार्थः इति पंचमी षष्ठ्यर्थे ॥ ॥संबंधत्वेन तत्तद्रूपेण वस्तुस्वामिना-
वादिसंबंधः संबंधत्वेन क्रियाकारकभावश्चान्नतरेण वानेकसंबंधसत्वेपि सत्वादिसंबंधविशेषतात्पर्येण चैत्र-

स्यनेदं वास इति प्रयुज्यते अत एवैकत्रान्तं षष्ठ्यर्थो इति षष्ठी स्थाने योगे इति सूत्रस्थं भाष्यं संगच्छते द्वितीयादिना च क्रि
याकारकभावस्य तत्तद्रूपेणैव बोधः तथैवानुभवात् मातुः स्मरतीत्यादौ च तत्तद्रूपेण बोधे द्वितीयादीनां बाधिकानां
सत्त्वात् संबंधत्वेनैव बोधः मातृसंबंधिस्मरणमितीति नव्याः शेषं च स्तु यत्रापि क्रियाकारकभावमूलकं विशेषणत्वरू
पं विषयत्वमेव निमित्तत्वमेव वा तत्त्वेन संबंधत्वेन वा विवक्षितं तत्र एव हि शेषसंबंधः कारकेभ्योऽन्यः क्रियाकारकपूर्वकः
श्रुतायामश्रुतायां वा क्रियायामभिधीयते इति क्रियाकारकत्वपूर्वकत्वमेव संबंधस्योक्तं क्रियाकारकसंबंधः कारणं शे
षसंबंधस्य फलमूलः यथा राज्ञः पुरुष इत्यत्र राजपुरुषयोः कर्तृसंप्रदानरूपो ऽभिमतं राजा पुरुषाय ददातीत्यन्मूलका
स्वस्वामिभावादिप्रतीतौ कर्मादिविशेषरूपतानवगमः कारकशब्देन च श्लोके करणत्वादिशक्तय उच्यन्ते अत्राश्रू
यमाणानादादिक्रियासंबंधलक्षणकार्यानुपपत्त्यानुमीयमानानां संनिहितेनैतन्मुखेन समन्वयः सिद्धस्वभावानां
ऽश्रमाणां तां विना परस्परसंबंधाभावात् क्रिया हि निश्चयलीव संबंधं करोति एवं च संबंधिनोरपि अनुमीयमानक्रिया
निमित्तरूपं कारकत्वमस्ति मातुः स्मरतीति श्रुतायां तत्र हि क्रियाकर्मत्वमूलक उक्तः संबंधः सामीप्यादिरपि
वृद्धिस्थैकदेशेऽधिकरणकस्थितिक्रियाकर्तृत्वनिमित्तकमित्याघूह्यं अत एव पर्वतस्य वृक्षादिति न वृक्षपर्वत
योराधाराधेयभावमूलकसंबंधाभावात् संयोगो हि नाधाराधेयभावमूलको विपरीतं तस्यैव तन्मूलकत्वात्
किंच संयोगो न संबंधः संबंधस्य पदार्थयोजनामात्रहेतुत्वात् संयोगस्य स्वतः पदार्थत्वात् सांसर्गिकवि

मं॰मू॰
१७९

पयतयातस्याभावात्संबंधस्यषष्ठ्यादिभिरेवाच्यते संबंधपदेनापिसांसर्गिकविषयतानोच्यते इतिसंबं
धः सर्वथायदागम्यः संयोगस्तुतकद्वाविषष्ठ्यादिभिस्तयाविषयतयोच्यइमौसंयुक्तौइत्येवतत्रव्यवहारात् तत्रसं
बंधव्यवहारात् तत्रसंबंधव्यवहारात् तत्रसंबंधव्यवहारात् तत्रसंबंधव्यवहारस्तुभयाश्रितत्वरूपसंबंधधर्मेवा
त्वाद्गौणः अतएवमनुस्मृतेवृत्तवान्पर्वतइत्याद्यर्थेसमम्युपादानंगोमान्देवदत्तइत्याद्यर्थेचषष्ठ्युपादानमिति
भाष्ये उक्तंषष्ठ्यर्थेच्यसांसर्गिकविषयतयैवभासते अतएवषष्ठीशेषेइतिसूत्रेभाष्ये राज्ञःपुरुषइत्यत्रराजावि
शेषणंपुरुषोविशेष्यइत्युक्तं अन्यथासंबंधंविशेष्यतयाविशेषणतयाब्रूयात् इतिप्राहुः राज्ञःपुरुषइत्यत्रस्व
स्वामिभावःषष्ठ्यर्थः सच्चसत्वस्वामित्वसमूहरूपः यत्तुस्वामित्वंवाषष्ठ्यर्थइतितन्नतस्यैकमात्रवृत्तितयासंबंधा
त्वायोगात् संबंधोहिसंबंधिभ्यांभिन्नत्वेसतिउभयसंबंधिनचतदभ्येकत्राश्रयतयापरत्रनिरूपकतयास्येवेतिवाच्यं
निरूपकत्वस्यवृत्तिनियामकत्वेनोभयत्रसंबंधत्वप्रतीत्यनापत्तेः उक्तंचहरिणाद्विष्ठोप्यसौपरार्थत्वाद्गुणेषु
व्यतिरिच्यतेतत्राभिधीयमानस्तुप्रधानेप्युपयुज्यतेइतिपरार्थत्वात् गुणानांपरप्रतिविशेषणत्वेनविवक्षिता
त्वादित्यर्थः अयंभावः भेदेसतिविशेषणतयाविवक्षितस्यसंबंधंविनाविशेषणत्वासंभवेनतदाकांक्षितत्वात
त्रसंबंधोव्यतिरिच्यते उद्भूततयाप्रतीयतइतितत्रैवषष्ठीविशेष्यस्यतुपदांतरासमभिव्याहारेस्वार्थेनिरूपिता
विशेष्यत्वेनभासमानत्वरूपस्यनिराकांक्षत्वेनविशेष्यतानियामकसंबंधाकांक्षाभावात्तत्रविशेषणेनाष्टेनषष्ठ्यादि ७९

तो ज्ञातः प्रतीयमानः प्रधानेष्वपयुज्यते तस्य द्विष्टत्वस्वभावत्वाद्राजादिनिरूपितविशेष्यताश्रयराजादिपदसंनिधाने प्रतीय
मानो यावदुपकारको भवती स्वर्थः राज्ञः इत्यादेस्तु पदान्तरमभिधाहरं विनाप्यध्याहृत्य संबंधिसमान्यनिरूपितविशेषणत्वप्र
तीतिरिति विशेषः राज्ञ इति हि स्वामित्वमवगम्यमानमन्यथानुपपत्त्यैव पुरुषे स्वत्वमवगमयति अतः संबंधस्य बहिरंग
त्वात्पुरुषादंतरंगप्रथमैवं वराजस्वामिकमिति ततो बोधः अत एव राज्ञे किं तदिति विशेषजिज्ञासा पुरुषादिपदेभ्यस्ता
न्निवृत्तिः एवं च सर्वत्र संबंधिद्वयवृत्तिधर्मसमूह संबंधिनोर्भेदे संबंधः स्पष्टश्चेदयं स्मादधिकं यस्य चेश्वरवचनमिति सत्वे
नाप्येतत्र हि अधिब्रह्मदत्ते पंचालाः इसत्रानेन ब्रह्मदत्तं समम्यां पंचाला तृद्धितीया प्राप्नोति अधेद्यौ स्मस्य ब्रह्मदत्तनिष्ठसं
बंधस्य सप्तम्योक्तत्वेपि दृष्टो सस्य पंचालनिष्ठसंबंधस्य तया संघस्यात् इत्युक्तं उपपदविभक्ते कारकविभक्तिर्बलीय
सीति समाहितं भिस्यमन्त्र विशेष्यपरात्व ष्टी कारकयुक्त्यापि तद्धारणं बोध्यं अत एव स्वस्वामिभाव अवयवावयवि
भाग आधाराधेयभाव प्रतियोग्यनुयोगिभावो विशेषणभावः संबंध इत्यादिव्यवहारः तत्राभावप्रतियोगिनोः प्रति
योग्यनुयोगित्वसमूहः संबंधघटाभावभूतलयोः स्वाश्रया अपि भावः एवं कालादिनिरविएवं च षष्ट्या कृत्सर्थे किम
स्येवाकांक्षा दर्शनः षष्ठी निर्षेधावूए तोन वि जानीया कांक्षा प्रदर्शनातिङ्. प्रकृत्सर्थकर्मत्वात् कृत्स्य कृत्सर्थकर्मत्वं
विजातीयमित्यपास्तं क तर्प्वोंकरामित्यादौ तु तत्र कर्तृकर्तृकर्मणोरिति षष्ठी तत्र कृतस्यस्य सामर्थ्येन कृदंतशक्ति
ज्ञानसहकारेणोपस्थितकस्य स्वस्य प्रकृत्यर्थक्रियायाः कर्तृकर्मणोः षष्ठीति तदर्थात् अन्यथा तिङ्.योगे निषेधेन कृ

मं.वृ.० योगे एव षष्ठी सिद्धौ वैयर्थ्यं स्पष्टमेवेत्यस्मात्रनिरूपितं प्रकृते च हन्तइत्यस्यात्र न कर्मेति क्त द्वितीयानापत्तेः किंतु फलांशोपा
१८० हार्यो भावारोपमात्रेणास्या कर्मकर्तृत्वे स्वीकृत्य भावे कार्यः यद्यपि कर्मविशेषस्य तन्तद्रूपेण प्रागन्वयावि वक्षयाकर्मकत्वाद्भ ।
वेक्तः स च कृतष्टब्धी अधीती सारिद्वृत्तिविषये एव तदुक्तं भाष्ये यदा वाक्यं न तदा प्रत्ययः पदा प्रत्ययः सामान्येन तदा प्रवृत्तिरि
ति न तदा प्रत्ययः न तदा भावे प्रत्ययः सकर्मकत्वात् यदा प्रत्ययः भाव इति शेषः तदा प्रवृत्तिरेव सा च न कदापि कर्मक्तान्ते नेत्याह
सामान्ये नेति उक्तरीत्याकर्महीनार्थकधातुप्रकृतिकक्तान्तेनेत्यर्थः अनेनेनाद्ग्राक्तान्तस्य वाक्ये न प्रयोग इति स्पष्टमेवोक्तं
किं च यो सौ कृतकटयोरस्ति संबंधः सामानाधिकरण्यरूपः स तु स्यन्नेतद्धिते प्रत्यये निवर्त्तते इति च भाष्ये उक्तं तेन न तद्धितेऽ
कृते कृतः कटइत्येवेति ध्वनितं अत एव कटः क्रियते इति न ततः पूर्वं कृतमनेनेत्यर्थे पूर्वादिनिरिति तद्धिते कृते पश्चात्फलाः
स्याश्रयांकटमित्यादेर्विशेषककर्मणोन्वयः एतेनासामर्थ्यात्तद्धितोत्पत्त्यादि समपास्तं तदुक्तं सन्निकालेऽसामर्थ्याभावात्
कारकान्वयो गुणीभूतक्रियायामपीति स्पष्टमेव तदुक्तं हरिणा विशेषकर्मसंबंधिधेनिर्युक्तेपि कृतादिभिर्विशेषनिरपेक्षो
न्यः कृतशब्दः प्रवर्त्तते अकर्मकत्वे मस्यैवं क्तान्ते भावाभिधायिनि ततः क्रियावता कर्त्रा योगो भवति कर्मणा अविग्रहगतादि
स्याद्यथा ग्रामादिकर्मभिः संबंध्यते क्रिया तद्वत् कृतपूर्वीत्यादिषु स्थितिरिरिति निर्युक्ते प्रासे वाक्ये इति शेषः कर्मनिरपेक्षोन्यः
भावक्तान्तः प्रवर्त्तते वृत्तिघटको भवति सामान्यकर्मतु नान्तरीयकतया विवक्षितं तदाह अकर्मकत्वेऽस्यादि ततः वृत्तेरनंतरं
क्रियाकारकसंबंधेन तद्धितार्थकर्त्रा कटमित्यादेः संबंधः प्रकारांतरमाह अविग्रहेति कर्त्रे पृथक् चेत्यहणरहिते त्यर्थः एवं च । १८०

प्रधानार्थकर्त्रासंसृष्टयापिक्रिययासाधारणमन्वयइतितदर्थःप्रकृतेत्वकृधातुक्तप्रत्ययइष्टएवेतिप्रत्ययशक्तिज्ञा
नसहकृततद्धितांतशक्त्यैवपूर्वकालक्रियाकर्तृणांपरस्परविशिष्टानांबोधोनतुकृदंतशक्तिःज्ञानमपितत्रसहकारि
अन्यत्रकृतःकृत्स्नस्यभावार्थकत्वाभावेनतदंतमात्रेपृथक्शक्तिग्रहेमानाभावात् चतुर्णामेकार्थीभावेद्वयोरपिसो
त्सेवेतिनात्रकृते साधुत्वंतंडुलानांपाचकतरइत्यादौतुनदोषःतत्रपाचकादिशक्तिज्ञानसहकारेणैवसमभिव्याहारादुपस्थि
ते एतेननिष्ठांतत्वात्तत्रकृद्ग्रहणाभावेविषष्ठीनिषेधेनतद्प्राप्तिरितिसमाप्तं निष्ठांतपदशक्तिज्ञानसहकारेणोपस्थित
क्रियान्वयिनोरेवतेननिषेधात्॥ ॥इतिषष्ठी॥ ॥अधिकरणसप्तम्याअधिकरणत्वशक्तिमन्नार्थःअधिकरणे
सप्तमीतिसूत्रात्साचशक्तिकर्तृकर्मद्वाराक्रियाश्रयनिष्ठाआधारोधिकरणमितिसूत्रबलादितिअन्यत्रनिरूपितंतदुक्तं
हरिणाकर्तृकर्मव्यवहितामसाक्षाद्धारयत्क्रियामुपकुर्वन्क्रियासिद्धौशास्त्रेधिकरणंस्मृतमितिलोकेद्रव्यगुणक्रियावि
षयमधिकरणंशास्त्रेकारकाधिकारात्क्रियाविषयमेवतत्रसाक्षात्क्रियाश्रययोःकर्तृकर्मणोस्तत्संज्ञेवाधिके व्य
तत्सद्व्यवहितामिति यद्यपिकालःसाक्षात्क्रियाधारस्तथापिकारकाधिकारेतरतमसयोगोनास्तीतिपरंपरयाक्रियाधार
स्यापिग्रहणंकिंचतस्यतत्त्वविवक्षायांकालःपचतिभूतानीतिवत् व्यवहितामित्युक्तेऽप्यसाक्षादित्युक्तिर्लोकानुसारेण।
न्वयोपिपरंपरयैवेतिसूचनायकटेआस्तेस्थाल्यांपचतीत्यादावधस्तेकर्तृकर्मणीक्रियांनसंपादयतइत्यधिकरणं
क्रियाधारमुपकुर्वन् तत्स्यांक्रियामुपकरोतीत्यर्थइतिहेलाराजःयद्यपितंडुलंपचतीत्यादौधात्वर्थफलरूपकर्मद्वा

मं०जू०
१८१
राक्रियाश्रयत्वं तंडुलादेरस्ति तथापि धापारजन्यफलाश्रयत्वस्य सत्वेन परत्वात्कर्मसंज्ञया बाधान्न दोषः फलस्य
निष्ठात्वेन क्रियाश्रयत्वाभावे तंडुलस्य सुतरां तदाश्रयत्वाभावाच्च न च मोक्षे इच्छास्तीतिवन्मोक्षे इच्छतीति भवति इत्यस्याप
त्तिः अंतरंगत्वेन परत्वेन च कर्मत्वस्यैव प्रवृत्तेः मोक्षे इत्यादौ प्रमयोपात्तमिच्छाद्वारा स्वक्रियाया मन्वयस्य विवक्षित
त्वेनाधिकरणत्वं प्रकृत्यर्थस्याश्रय्च्छाद्वारा तत्रान्वयेन तु कर्मत्वात् षष्ठ्येव बोध्या अधिकरणं त्रिधा औपश्लेषिकं वैष
यिकमभिव्यापिकं चेति तदुक्तं हरिणा उपश्लेषस्य चाभेदस्तिलाकाशकटादिषु उपकारास्तु भिद्यंते संयोगिसमवायि
नां अविनाशो गुरुत्वस्य प्रतिबंधे स्वतंत्रता दिग्विशेषादवच्छेद इत्याद्याभेदहेतव इत्यादौ औपश्लेषिकवैषयिकाभिव्या
पकेषु त्रिषु विउपश्लेषोस्त्येव उपकारः संबंधस्तद्भेदात्तु त्रित्वे न व्यवहारः कटे आस्ते इत्यादौ संयोगिन्याधारे कतिप
यावयवव्याप्त्यैव संबंधः तिलेषु तैलमित्यादौ समवायिनि समस्तावयवव्याप्त्या सः खे शकुनय इत्यत्राकाशस्य तात्त्विकाव
यवाभावात् कल्पितदेशत्वाद्वैषयिकत्वं कल्पितदेशापेक्षया व्याप्युक्तमन्यतर उपश्लेषः गुरौ वसतीत्यत्र शिष्य
स्य गुर्वधीनत्वात्वृत्तौ वैषयिकमधिकरणं गुरुः उपश्लेषो त्वबौद्धः युद्धे संनह्यतीत्यत्र युद्धोद्देशेन कवचादिसंनहनप्र
वृत्तेर्युद्धं विषयः गंगायां घोष इत्यत्र गंगाः शब्दः सामीप्यात् देशवृत्तौ औपश्लेषिकमेव तत् अत्र गंगायां सामीप्यादे
शवृत्त्यधिकरणत्वारोपो बोध्यः शब्दोऽन्यावे सुखमित्यादौ बौद्धमेव तत् उपकारानाह अविनाश इत्यादिना अविना
शस्तिलक्ष्यत उपकारस्तैलस्य तिलविनाशे हि तैलं विकीर्णं नश्येत् पर्यंके शेते इत्यादौ शायितुर्गुरुत्वस्य प्रतिबंधेप १८१

र्थे कस्य स्वं तत्रतोपकारः खे शकुना इत्यादौ विश्लेषसंबंधात्स्थापरिवर्त्तेनमुपकारः गुरुणा शिष्यस्य संस्कार इत्येवमा
द्यनुपकारा ऊह्या इति हेलाराजः केचित्तु औपश्लेषिकमित्यस्योपसमीपे श्लेषः संबंधः तत्कृतमित्यर्थः तत्र च दीयते का
र्यमिति सूत्रे भाष्ये धमासेऽतिक्रांते दीयते तत्र मासस्यौपश्लेषिकमधिकरणमित्युक्तेः तदस्मिन्नधिकमिति सूत्रे संहित ।
यामिति सूत्रे च भाष्ये स्पष्टमेतत् तत्रौपश्लेषिकपदार्थ्याहारेण सप्तमीसमापितत्रैव भाष्ये स्पष्टं यत्तु किंचिदवयवावच्छेदेनाधा
रस्याधेयेन व्याप्तिरप्युपश्लेषः यथा कटे आस्ते इति एवमेव गंगैकदेशे तरंतीषु गोषु कूपैकदेशे स्थिते गर्गकुले गंगायां गावः
कूपे गर्गकुलमित्यादौ बोध्यं वैषयिकं तु अप्राप्तिकपूर्वकसंयोगसमवायेतद्भिन्नसंबंधेन यदाधिकरणं तत् यथा खे शकु
नय इत्यादि अभ्यंतु यत्र सर्वावयवावच्छेदेन व्याप्तिस्तत् यथा तिलेषु तैलं दध्नि सर्पिरिति अस्यमेव मुख्यमधिकरणं आचा
र्यैः किमधिकरणं नाम यं प्रसन्ते यत्र कृत्स्न आधारात्मा भवतीति स्वरितेनाधिकारः साधकतमं करणमिति सूत्रभाष्योक्तेः
अस्य साध्यत्वं च यत्र कृत्स्नस्यैतावच्छेदकविशिष्टेन्नानात् न चैकदेशस्य छिद्रिष्टः आद्ययोश्च गौणमाधारत्वं तत्रैव भा
ष्ये उक्तं अव्यवहितसामीप्यमेवाधारत्वनियामकं ननु व्यवहितमिति संहितामिति सूत्रे भाष्ये ध्वनितं अव्यवहितसामीप्ये ता।
गंगायां घोष इत्यादौ गंगाशब्दस्य तीरे लक्षणा च तदापि गौणमेवाधारत्वं सर्वावयवावच्छेदेन तीरस्य घोषसंबंधाभावा
त् कारकाधिकारे गौणाधारादीनामपि स्वरितत्वगुणभावेनाधिकरणसंज्ञादिबोधनात्सर्वत्र तत्र विभक्तेः शक्तिरेवेति बो
ध्य वर्णानां रूपादिमत्त्वेइष्टत्वात् संयोगवत् पूर्वपरयोर्वर्णयोराधारत्वस्याप्युपश्लेषनिरूपितस्य स्वीकारेणेको यणचीत्या

दौ वौपश्लेषिकेऽधिकरणे सप्तमीति संहितायामिति सूत्रस्थभाष्यसंगतिः कटे शेते इत्यादौ कटाधिकरणकं शयनमित्यादिक्रमे
णबोधः इत्याहुः परे तु अधिकरणस्य कर्त्रादिद्वारैवान्वय एव कटाधिकरणचैत्रकर्तृकं शयनमित्यादिरीत्या बोधः तद्वारकमेवास्य क्रियान्व
यित्वं कारणे कारणानां नावनान्वयसुत्पत्तिरप्येतद्वाक्यबलादीदृशपरंपरयान्वयविषयापि अत एवान्तर्गतोऽस्यादौ समासः अत
एव भाष्ये तत्रासामर्थ्यशंकां न कृताऽऽएवं चात्रांतर्भूतक्रियाद्वारा सामर्थ्यमिति कैयटादयस्त्विमाएव अन्तर्गतोंऽशस्त्रप्रवीण इत्यादौ
दध्योदनादाविव क्रियांतर्भावेण बोधस्याननुभवात् अत्र विषयप्रावीण्यवानित्येव प्रतीतेः ध्वनितं चेदं हरिग्रहेपीत्युक्तं इत्या
हुः मूले वृक्षः कपिसंयोगवानित्यादावव्याप्यवृत्तिधर्मवत् कर्तृकक्रियासमभिव्याहारे मूलाधिकरणकविशिष्टवृक्षकर्तृकास
त्तेति बोधे मत्रावयवे तद्विशिष्टवृक्षस्याभावप्रतीतेः कपिसंयोगेन तद्वत्वेऽप्यत्वे फलतीति बोधः ग्रामं प्रविशतीत्यादौ कर्मणो ग्राम
स्य न कटादाव्यधिकरणत्वं परत्वात्कर्मसंज्ञया बाधात् कर्तृद्वारा क्रियाश्रयत्वविवक्षायाः संयोगरूपफलाश्रयत्वं विनाऽसंभवा
त् एवं ग्रामं गच्छतीत्यादावपि मंडूकानाकडारसूत्रे हृद्युम्नां चेत्यत्र च भाष्ये स्पष्टं अधीती व्याकरणे अत्र कर्मसप्तम्यर्थः क्तस्येन्वि
षयस्य कर्मण्युपसंख्यानमिति वार्तिकात् अत्रापि कृतपूर्वी कटमितिवत् भावक्तान्तात् अधीतमनेनाऽस्ति इष्टादिभ्यश्चेतीनिः व्याकरणक
र्मकाध्ययनकर्त्तेति बोधः चर्मणि द्वीपिनं हंतीत्यादौ फलं सप्तम्यर्थः चर्मणः फलत्वं च हननक्रियायाः स्वत्वाभावादिविषयकेच्छाधी
नत्वादिति बोध्यं ब्राह्मणेष्वधीयानेषु गतः गोषु दुह्यमानासु गतः इत्यत्र यस्य च भावेन भावलक्षणमिति सूत्रे सप्तमीयस्य भावेन क्रियया क्रिया
न्तरं लक्ष्यते ततः सप्तमीति तदर्थः गोऽदुह्यमानादिपदयोरुभयोरपि तद्वाचकत्वाद्गुणानामपि सप्तमीनयतिदेशाकांक्षि १५२

या अनिज्ञतिदेशकालक्रियासंबंधिदेशकालपरिच्छेदकत्वेलक्षणमतिबोध्यं एतेनसूर्योदर्शनाश्रयत्वात्ज्ञापकत्वमस्यादि
त्येतमोतष्टमित्यादावेवस्यात्ननुअत्रकदाचिद्विगोषुउह्यमानास्वसौगतइत्यपास्तं तत्रकाचित्क्रियासाधारकालेनान्यांपरिच्छि
नत्ति यथागोषुदुह्यमानासुगतइत्यादौकश्चित्तुसाधारकालाव्यवहितपूर्वकालेनयथागोषुधोक्ष्यमाणास्वित्यादौकाचित्सा
धारकालानंतरकालेनयथागोषुदुग्धास्वित्यादौज्ञापकत्वंचनतत्स्वरूपबोध्यत्वेनविवक्षितमेवैव्याख्यस्वप्रवृत्तौ निमित्तं ननु
तस्यमानांतरेणभावेद्वेतिनेदंसूर्योदर्शनाश्रयं सदेशोदाहरणंसतिगुणेद्रव्यत्वमस्तीत्यादि ज्ञाप्यज्ञापकभावःसप्तम्यर्थः
अस्यचक्रियायाभेवान्वयेसाधुत्वंउक्तसूत्रात् नियमतोग्रह ब्राह्मणानांअधीयानानांदुह्यमानानांचगवांशाष्ठतुप्रतीयमा
नंलक्षणत्वंविशेषणीभूताध्ययनादिक्रियाकालघारकंविश्राम्यति अधीयानब्राह्मणज्ञापकगमनाश्रयइतिक्रमेणबोधःगो
षुधोक्ष्यमाणास्वित्यादौनविष्यद्दोहनारपि त्वध्ययात्कृदस्यस्वपूर्वकालादिघारकंज्ञापकत्वंबोध्यं इदंसूत्रंयत्रभावांतरसिद्ध्या
र्थस्यकालविशेषसंबंधादिप्रतिपादनायप्रयोगस्तत्रैवप्रवर्त्तते तथैवमतउत्ताष्ठेमरमान् विवाहेनांदीमुखंकुर्यादित्यत्रविवा
हपदेनतत्क्रियाकालोलक्ष्यते अधिकरणेसप्तमीतेचास्यकर्माणितस्मिन्दृष्टेपरावरेइत्यत्रपरंहिरण्यगर्भादिअवरंयस्मात
त्रब्रह्मणिदृष्टेतद्विषयेदर्शनेदर्शनोत्तरकालेकर्माणिक्षपइत्यत्रक्षीयंतइत्यादि कर्मकर्त्तरिरूपंकर्मस्थक्रियारूपस्यशरीरा
दिगतावयवापचयरूपक्षयादेःकर्मस्थारोपात् हृदयग्रंथिशब्देनाविद्यारागभयद्वेषशोकवासना यद्दर्शनेइतिचमीलिवि
पिनमितिवत्सप्तमीतेनतद्दर्शनार्थेतदपरोक्षार्थेतत्परोक्षज्ञानादविद्यादीनांशिथिलीभावोभिद्यते इत्यादिनोच्यतेआख्यास्य

मं.न्नू.० मपिशांकरभाष्यादिषुस्पष्टं रुदतिरुदितोवाप्राव्राजीदित्यत्रज्ञाप्यज्ञापकभावःषष्ठीसप्तम्योरर्थःधातोश्चानादरविशिष्टंप्रव्रज
१८३ नमर्थःअत्रषष्ठ्यादिनासप्तम्यग्राहकंअनादरश्चश्रमासस्यापुत्रादिविषयएव ज्ञाप्यमानादरविशिष्टंप्रव्रजनमितिबोधःवैशिष्ट्यं
चसामानाधिकरण्यसत्त्वोत्तरकालिकत्वाभ्यांएवंचरोदनपुत्रादिनृणांनृषुवाद्विजःश्रेष्ठइत्यादौयतश्चनिर्धारणमितिसूत्रेणष॥
ष्ठीसप्तम्यौयतःस्वेतरेभ्यःस्वघटितसमुदायघटकेभ्योव्यावृत्तेनधर्मेणसमुदायादेकदेशस्यजातिगुणक्रियासंज्ञाविशिष्टस्यपृ
थक्करणरूपनिर्धारणंततःषष्ठीसप्तम्याविति तदर्थःपृथक्करणंचव्यावृत्तधर्मप्रकारकज्ञानविषयीकरणं अस्मिंश्चना॥
राणांविप्रःश्रेष्ठइत्यादौविप्रत्वादिविशिष्टस्यराहूपरागेस्नायादित्यादौराहूपरागपदेनतदाश्रयःकालउच्यतेगवांदोहेआग
तइत्यत्राप्येवमेव अवच्छेदकावच्छेदेनान्वयस्यौत्सर्गिकत्वात् राहूपरागकालावच्छेदेनस्नानविधानस्यनिमित्तत्वंफलतिए
वमेवांगादिदेशागमनस्यपुनः संस्कारनिमित्तता यत्तुराहूपरागपदंनकाललाक्षणिकंसतीत्यध्याहारात् यस्यचभा।
वेनेतिसप्तमीराहूपरागादेर्निमित्तत्वंतुसिद्धसाध्यसमभिव्याहारेसिद्धंसाध्यायोपदिश्यते इतिन्यायेनफलतीति तत्र
प्रवर्तनारूपविधिविषयत्वंक्रियाया एवनतद्भ्यादेरितिदध्नाजुहोतीत्यादौदध्नःकथंविधेयत्वमित्याशंक्यानेना॥
न्यायेनविधेयत्वमुक्तंन्यायविद्भिःसिद्धंसाध्यायोपदिश्यतेइत्यस्याज्ञातंज्ञाप्यते इत्यर्थश्चव्याख्यातःएवंचतेनन्याये॥
नइत्यस्याज्ञातज्ञाप्यत्वंरूपंविधेयत्वंस्वक्रियोपरागेणचप्रवर्तनाविषयत्वमुक्तंइतिप्रकृतेनन्यायविषयाभावात्॥
स्नानस्यमानांतरादप्राप्तेरेतत्सूत्राप्राप्तेश्चराहूपरागस्यनिमित्तिकालत्वाभावाच्च निबध्यतेहृदयग्रंथिश्छिद्यंतेसर्वसं १८[illegible]

त्र्या याः स्त्रीयं विप्रघटितसमुदायघटकविप्रेतरमात्रवृत्तिश्रेष्ठत्ववत्तया प्रतीतिः एवं च निर्धारकधर्मे निर्धारणावध्योर्व्या
वृत्त्याख्यः संबंधो निर्धारणविभक्तेरर्थः नरादिपदं च समभ्यस्तरूपेण विप्रेतरघटितसमुदायोपस्थापकं तथा च वृ
त्तिश्रेष्ठत्ववानिति क्रमेण बोधः नराणां क्षत्रियः शौर्यमिति अत्र क्षत्रियेतरनरादिघटितसमुदायमात्रवृत्तिक्षत्रियवृत्तिशौ।
र्यमिति बोधः बहूनामवयवभेदविवक्षया तद्विषये एकवचनमेव साधु स्पष्टं चेदं कारके इति सूत्रे भाष्ये तत्र हि निर्धारणे का
रके षष्ठीति ब्रूयादित्युक्तं मिदं चोक्तं साहित्यादिषु तोत्र प्रयोगः द्वंद्वः सामासिकस्य चेद्धारणेऽ इति सूत्रेण निर्धारणस्य विभक्त्या
र्थघटकत्वबोधनात् तस्माद्यतः स्वसजातीयघटितसमुदायादेकदेशस्य जात्यादिभिः पृथक्करणरूपं निर्धारणं तत्र
षष्ठीसप्तम्यौ इत्यर्थः सूत्रस्य निर्धार्यमाणनिर्धारणावध्योः परस्परमन्वयः निर्धारणावधित्वेतरसमुदायघटकमा।
त्रवृत्तिकरणकनिर्धारणविषयविषयिभावरूपोऽवयवावयविभावरूपश्च संबंधो विभक्त्यर्थः तत्समुदायावधिकद्वि
जेतरमात्रवृत्तिश्रेष्ठत्वकरणकनिर्धारणविषयो नसमुदायावयवो द्विजः श्रेष्ठ इति बोधः संसर्गघटककरणं च श्रेष्ठ
त्वरूपमेव प्रसाध्यं ते नृणां मध्ये द्विजः श्रेष्ठ इत्यादौ मध्ययोगे षष्ठी नेयं नृषु मध्ये इत्यस्मात् ध्येव तत्समुदायमध्यवर्त्ती।
द्विजः श्रेष्ठ इति बोधः श्रेष्ठ इत्यादौ द्विजेतरनरावधिकश्रेष्ठत्वबोधस्तु मानसो देवदत्तो वामेनाक्ष्णा पश्यतीत्युक्ते
दक्षिणेन न पश्यतीतिवत् गोमंडले वत्सेमानाया कृष्णा गोसावकुत्रै क्षीरे साधारससमीघटितवाक्ये प्रयुक्तन्यायेन
तथा प्रतीतिः ननु जलपृथिव्योर्जलं स्नेहवदित्यादौ जलभिन्नयोर्जलपृथिव्योः पृष्टसिद्धेर्जलपृथिव्योर्नयमाह

तत्त्वस्य स्नेहे बाधेऽप्य्च निर्धारणासंभव इति चेन्न तत्रापि समूहे जलभेदस्य तद्व्यावृत्तत्वस्य स्नेहे चाबाधात् समू
हावयवयोश्च भेदाभेदाविति न पंचमीविभक्तेः इत्यस्यात्र प्रवृत्तिः इतरेतरद्वन्द्वेऽपि समूह एव विशेष्य इत्यग्रे वक्ष्य
ते एतेन सांकाश्यकानां पाटलिपुत्राणां च पाटलिपुत्रकाः अभिरूपतमा इत्यादिनाभ्यप्रयोगा व्याख्याताः तत्स
मूहे पाटलिपुत्रभेदस्य सत्त्वेन तदवयवानां भेदस्य च तत्र सत्त्वेन पंचम्याः प्राप्तेः समुदायोऽवयवेभ्यो भिन्नाभिन्न
इति सिद्धान्तात् निर्धारणावधिनिर्धार्यमाणनिर्धारणहेतूनां संनिधान एव निर्धारणप्रतीतिरिति तत्रैव निर्धार
णविभक्तिः समासनिषेधश्च तेन पुरुषाणामुत्तम इत्यादौ शेषषष्ठीति पुरुषोत्तम इत्यादौ समासो भवत्येवेति
द्विवचनविभज्योपपदे इति सूत्रे कैयट इत्याहुः माथुराः पाटलिपुत्रकेभ्य आढ्यतरा इत्यत्र निर्धार्यमाणनिर्धा
रणावधयोर्भेदस्यैव सत्त्वेन पंचमीविभक्तेरित्येन पंचमीविभक्तेरित्यनेन पंचमी अत्र निर्धारणावधिव्यावृत्त
करणकनिर्धारणविषयतावद्रूपः संबंधः पंचम्यर्थः पाटलिपुत्रकावधिकतद्व्यावृत्ताढ्यतरत्वकरणकनि
र्धारणविषया माथुरा आढ्यतरा इति बोधः नाप्यत्र तस्मु माथुरपाटलिपुत्रकयोराढ्यत्वेन साम्यज्ञानव।
नेतत्रायुक्ते तत्र तत्र भेदरूपविश्लेषसत्त्वेन विभक्त्यध्याहारेणापादाने एव पंचमीविभक्तेर्भेदः
पाटलिपुत्रकावधिकभेदवंतो माथुरा आढ्यतरा इति बोधः भेदे प्रयोजकं चाढ्यतरत्वेनोपस्थितेः गवां
कृष्णेत्यादौ तु संपन्नक्षीरात्वेन गोत्ववत्त्वावच्छिन्नेभ्यो विश्लेषप्रतीतिः अत्र नामार्थान्वयं वि १८५

वक्तयाषष्ठी तु नन्नवति स्म न निधानात् एव मयाऽऽदानत्वाविवक्षायामपि षष्ठी नन्न तएव अत्र पत्तपक्ष्मदात्तर
त्वे पाटलिपुत्रकस्मात् स्न्नत्वमाधीमिसारुः मूलेनावाहयेद्देवीं श्रवणेन विसर्जयेत् मूलेश्रवणेवा अत्र मूलश्रव
णशब्दौ नन्न नक्षत्रकालबोधककौ आधाराधेयभावः संबंधो विभक्त्यर्थः मूलनक्षत्रयुक्तकालाधारकं देवीकर्मकं
मावाहनमित्यादि क्रमेणबोधः अत्र तु त्वायं द्विहेद्विहोऽवाभोक्ता अत्र विभक्त्यर्थः स्वानंतरकालवृत्तित्वं एतद्दिवसा
धिकरणकभोजनोत्तरकालिकमेतद्दिवसानंतरद्व्यहानंतरकालवृत्तिभोजनमित्ययमर्थः द्यएहएतद्दिवसानंता
रत्वं सममभिव्याहारबललभ्यं इहस्योयंकोशात्कालस्यंविधेयत् अत्र स्वानंतरदेशवर्त्तित्वंविभक्त्यर्थः एतद्देशाधिक
रणकस्थितिसाश्रयकर्तृकर्म तद्देशानंतरदेशस्थितलक्ष्यकर्मकं व्यवधानमितिबोधः॥ ॥इति सप्तमी॥ ॥
एषां सुपां एकवचनत्वादिना तत्तद्रूपेण वा एकत्वद्वित्वबहुत्ववाच्या संख्याप्यर्थः येकयोर्द्विवचनैकवचने बहुषु ब
हुवचनमिति शास्त्रात् तत्र संख्या प्रकृत्यर्थे गतावुध्यते संपन्नो व्रीहिरित्यादौ व्रीहित्वादिगतसंख्याया व्रीहिषा
गेपवैकवचनप्रयोगः प्रकृत्यर्थतावच्छेदके संख्यान्वयः इति तु न युक्तं लक्षणस्य प्रसयाद्धीविशेष्यान्वयित्वस्य सा
गेमानानभ्यवात् वेद्यः प्रमाणमित्यादौ प्रमाणपदेन प्रमाणत्वगतसंख्यारोपवतामेव प्रतीतिसंस्कारलं एकजातीय
प्रमाणत्वोपपादने एवमेव गावो धनमित्यादावपि तत्तु रूपं पंक्तिविंशतीति सूत्रे नाभ्ये गावो धनमित्यादौ प्रतिज्ञे तु
धनमेको गुणः सर्वप्राधान्येन विवक्षितो तोद्भवाणां बहुत्वेपि मध्यनशास्त्रादेकवचनमिति समुदायस्य प्रतीतिज्ञे तु त्वाभ्य

मं.जू.०
१८६

नेत्वं नत्वैकस्य गोर्विंशत्येति वन्नमेकं गोभिर्विशेष्यत इति कैयटः तत्र गुणस्य प्राधान्यं नाम न विशेष्यत्वं नापि सामानाधिकरण्यान्ना
पत्तेस्तस्माद्यथा लोके येषां धनादिना धनादिफलं लभ्यते तस्य तद्रूपेणया गुणत्वं धनिकस्य प्राधान्यं तथा धनत्वादिगत
संख्यायास्तदाश्रयस्यैकत्वादिव्यवहारात्तस्य प्राधान्यं प्राप्त्रि तसंख्याविशेषणोपि ज्ञानांविशेषणत्वे एव समुदाये एकजाती
यप्रतिहेतुत्वावगम इति तत्र नैकवचनं आरोपेपि नैकत्वे न बहुत्वस्य विरोधाभावात् विरुद्धविभक्तिराहित्येनाभेदान्वयो
पपत्तिः सदा तु स्वगतसंख्यावैशिष्ट्येन भानं तदा गावो धनानीत्यपि यदा धर्मिभेदे न जातेः प्राधान्यमिति न सामानाधिक
रण्यानुपपत्तिः दारा इत्यादयो द्रव्याभेदेनैव संख्याबोधकास्तद्भेदादेव नहुतसंख्याविरूपधर्मप्रतिपादकाः यदापि भेदेन तदा
पि स्वाश्रयद्रव्यगतसंख्याविशिष्टमेव धर्मं प्रतिपादयंति अत एव किंसंबंध्येकत्वे किंसंबंधिद्वित्वे किंसंबंधिबहुत्वे इत्या
र्थे कस्मै कस्मिन् कयोर्द्वयोः केषु बहुष्विति प्रयोगो बहुषु बहुवचनमिति सूत्रे भाष्ये संख्यायाश्रये इति सूत्रभाष्योक्तमादृश
तः संख्यासंख्येये इति तु प्रायोवादः द्व्येकयोरित्यादौ समासआरोपितसंख्याज्ञाने मानाभावेन धर्मिणं प्रत्येकमेकत्वाद्
द्विवचनमेवमेवास्ते जसीत्यादिप्रयोगोपपत्तिः दारा इत्यादौ त्ववयवगतारोपेपि न बहुवचनमेव न तु स्वनैकत्वाश्रयमेक
वचनं कोशादिप्रामाण्यात् प्रेमादिना प्रत्येकं सर्वेषु अवयवेषु दारत्वारोपात् अत्र कोशाद्युदासीनं तत्र प्रत्येकमेकस्मि
न् अप्यावायाप्रागताश्राचार्यप्रागत इत्यादिप्रयोगात् यत्तु दारा इत्यादौ साधुत्वार्थं बहुवचनमिति तन्न अनुशासना
भावात् तत्र गौणी मुख्या वोत्तरा संख्या पूर्वा संख्याबाधकत्वेन हि द्वित्वत्रप्रानीयतामित्युक्ते त्रित्वत्रप्रानीयत इति बाद १८६

र्थेष्वुपसर्गेतिसूत्रे भाष्यात् कैयटस्य संख्यांतरोपजनने आश्रयाविनाशेपि पूर्वसंख्याविनाशः संख्याशब्दानामेष भावो यत्संख्यांतरस्योत्तरस्य गौणस्य मुख्यस्य वा विषयेन प्रवर्त्तंते इति अदङ्सूत्रे अचः परस्मिन्निति सूत्रे च भाष्ये ध्वनितमेतत् आद्ये अकारादीनामेकत्वपक्षे घटेन तरनिघरिकस्मत्रद्धजलस्तरणदनोष्ट्रासिमाशंक्याव्यावृत्तिसंख्यानात् सिद्धमित्युक्तं अत्ते पूर्वविधिग्रहणस्य नैधेय इति प्रत्युदाहरणं दत्तं निष्पूर्वाद्दाञः किप्रत्यये आतो लोपे सत्यस्यानिवत्त्वेन अचूरनेन वृत्वाभावात् तदाश्रयोत्कर्षस्यादिति तद्भावः अत एव द्व्यादिषु तत्सु एकोस्तीत्यादिर्न प्रयोगः बाधश्च पूर्वसंख्यानाशेन निवृत्ताव्यवहाराश्रयो जकत्वं वा द्वितीयाद्युपसारणे द्व्यासंख्यानाशादिवत् एते पंचाशदस्मीति तु ततोधिकानुत्पन्नसंख्या संपादकाभ्यदार्थान्बुद्धिस्थान्कृत्वा तेषां अबुद्धिस्थत्वे त्वाहार्यो भावप्रतियोगित्वारोपेण एवमेव द्वादशकपालस्यार्थः एककपालाद्यनुवाद इति बोधः वक्तृत्वं तु आदिपरार्द्धांतसंख्याव्यापको धर्मविशेषः नन्वेवं कपिंजलानालभेतेत्यादौ चतुरादीनामप्यालंभापत्तिः पर्यग्निकृतानारण्यानुत्सृजतीत्युक्तं हिंसाप्रसक्तेर्भावात् आलंभनेन कृतार्थं शास्त्रं हिंसाविपानाधिकालंभनं बोधयतीति वक्तुमशक्यमिति वाच्यं यावत् कपिंजलत्वव्याप्यत्वान्नामंनवेन क्वचिद्विश्रोतोस्वीकर्त्तव्यायां प्रथमातिक्रमे कारकाणां भावे न व्यक्तित्रयस्यैवालंभात् तदुक्तं जैमिनिना प्रथमं वा नियम्येत कारणादतिक्रमः स्यादिति न च चतुराद्यालंभे फलविशेषः तत्कल्पकाभावात् अत एव यत्र ब्राह्मणभोजनादावपि वा ब्राह्मणभोजने फलविशेषः स्फुटस्तत्र ब्राह्मणान्भोजयेदिति नोदनानां व्यक्तित्रयभोजनेन शास्त्रार्थनिष्पत्तावपि फलविशेषार्थं अधिकभोज

नं नरसेव लोकव्योदकां तमसुव्रजेदित्यादौ करणत्वावे प्रथमसुदकांतमेव गच्छतीत्येहादिरूपकारणमसत्वे द्वितीयं त्वती।
यबोदकांतं गच्छतीति प्राग्गीश्वरादितिसूत्रे नाष्येस्पष्टं आकरे एतु आस्तिन्यायस्यैवाश्रयणं निजांत्रयाणामितिसूत्रे त्रयाणांग्र
हणात् आद्युदात्तश्चेतिसूत्रे आदिग्रहणं च द्वितीबोध्यं पशुनायजेतेत्यादौ पश्वंतरालंभे प्रयोगः पाशुनावाबाधे नयथावै
गुण्या पशुगुणानुरोधेन प्रधानयागावृत्तौ प्रधानत्वभंगापत्या च यावस्य पशुयागासंभवे न चोपस्थितविभक्त्यर्थवि
शिष्टस्यैव विधानमिति न दोषः विभक्तेः संख्याच वोधकत्वस्य ज्ञातत्वसिद्धत्वात् विभक्त्युत्पत्तये आश्रितसंख्याया विधिविष
यतायाएवौचित्यात् किंच यथाकृतगमीधानार्थसंस्काराथीयाः पुनः संस्कारो व्यर्थः तथैकेन पशुना क्रियासिद्धौप।
श्वंतरस्यानर्थक्यं तदुपादानेच तस्साधनं तत्क्रियांतरमेव किंच पशुनेत्यस्य विधेयसमर्पकत्वयानउपस्थितार्थानां
मध्ये कस्य चित् त्यागेमानाभावः प्रकृतिप्रत्यया भ्यांविशिष्टस्यैव बोधेन विशिष्टविधिसंभवेन नवाक्यभेदः तदुक्तं।
सार्वधातुकेयगिसूत्रे कर्त्तरि शप् नचकर्मणियगित्यस्यापि प्रकृतिप्रत्ययौ प्रत्ययार्थं सह ब्रूतइतिज्ञापकत्वाभ्यामन
यानवच्छिन्नत्वेन प्रतीयमानमर्थं तौ सह ब्रूतो न भेदेनेति तदर्थः एवं चैकस्य धातोर्युगपद्विरुद्धार्थप्रत्ययाभ्याम
र्थवोधनेसहायत्वासंभवेनैतद्व्युत्पत्तिविरोधात् न तथेति भावः इत्थं युगपदुपस्थितौ हि राज्ञः पुरुषोश्वश्चेत्यादाविव
स्यादेवैकस्य विनिगमनाविरहात् उभयान्वयः एकोपस्थितौ हि राजपुरुषोश्वश्चेति वन्न तथा प्रयोगः एकविशे
षणत्वेनोपस्थितस्यास्य विशेषणत्वायोगात् आकरेणं नुयोगिकस्थले कल्पितावयवशक्तिबोधनाद्वारा विशिष्ट १८९

शक्तेरेवबोधकं समर्थानामितिसूत्रेचभाष्येकिंपुनःसमर्थेऽभिधानेयच्चुक्तंपुनस्तत्कृतवर्णानुपूर्वीकिंपदंसोत्थितिरिसु
क्तंअनर्थकादीयमानावोपिसुशास्त्रोत्थितिशास्त्रयोःस्वार्थोपस्थापकत्वमतएवडर्वोऽनयाकृतवर्णानुपूर्वीकस्यैवाभिधान
शास्त्रत्वोक्त्यासंगतिःसंख्यायाअतिशायनेतायाइतिसूत्रेपिभाष्येकिंनहिलोकेकेवलेपिनप्रत्ययेनार्थोगम्यतेकेनतर्हि
सप्रकृतिकेनेतिवासरूपसूत्रेपिभाष्येउक्तंनहिकेवलाप्रकृतिःप्रष्ठ्यादियुक्ताप्रकृत्यर्थेवर्त्ततेअन्येनवशास्त्रेनप्रत्यया।
र्थोभिधीयतेकस्त्रप्रकृतिर्नकेवलाप्रकृत्यर्थेवर्त्ततेनाप्ययःशास्त्रोस्तियस्तमर्थमभिधीयतेति प्रकृतिप्रत्ययसमुदायेप्रयुज्य
मानेऽन्वयव्यतिरेकाभ्यांप्रकृतिःप्रकृत्यर्थेवर्त्ततेप्रत्ययस्तुप्रत्ययार्थेइत्युच्यतेऽनुपपन्नंप्रत्ययानुगतंकंचिदर्थंगमयति
केवलायाःप्रकृतेःप्रत्ययस्यवास्वार्थमात्राभिधानेसामर्थ्यंनास्तीतिकैयटःस्वार्थेऽअर्थवत्तोग्रहणमित्यादिनुशास्त्रव्यव।
ल्पकल्पान्वयव्यतिरेकगम्यशास्त्रकल्पितार्थवत्त्वस्यशास्त्रव्यवस्थाहेतुत्वेननासंगतंकुत्सितेइतिसूत्रेकैयटेचस्फु
टमेतत् विभक्त्यंतैःकार्थीनाव्यवहारस्तुनलोकेपृथगुपस्थापकतयादृष्टानांसमुदायशक्तिसहकारेणैकोप
स्थितिजनकानांतत्स्वीकारात् नहिविभक्त्यंतस्यलोकेपृथगुपस्थापकत्वंदृष्टंपचतिदेवदत्तइत्यादौदेवतादेः
पचत्यर्थविशेषणत्वेनोपस्थितेकत्राशाब्दबोधान्वयःकारकाणांक्रियाविशेषणानांचगुणभूतक्रियायामिवकारका।
विशेषणानामपिक्रियाविशेषणकारकेष्वन्वयस्वीकारात् सामान्यरूपेणैवकर्त्रादेराख्यातार्थतयातत्रनियमेन।
विशेषाकांक्षायाःसत्तेनतथास्वीकारात् प्रत्ययार्थकर्त्तृविशेषणेनसंबंधवत्क्रियांतरेणतुनसंबंधःप्रत्ययानांस्व

मं०जू०
१८८

प्रकृत्यर्थ एवान्वयेन तत्रान्वयानाकांक्षतयाऽदोषात् एतेन पचति पचतीत्यादौ एककर्तृकपाकक्रियासंबंधिकर्तृकाप।
वक्रियेतिबोधापत्तिर्निरस्ता स्पष्टं चेदं कुत्सनेव सुपीत्यत्र कैयटे इदं च प्रथमांतवाच्यकर्त्रादेः प्रत्ययांतवाच्यकर्त्रादिविशेष
णत्वमिति वादिनां मते क्रियायां वाभेदान्वय इति मते तु न काप्यनुपपत्तिः एतेन समानप्रत्ययोपात्तत्वप्रत्यासत्त्या।
विभक्त्यर्थकारके संख्यान्वयः तत्राकृत्याधिकरणन्याये न प्रथमं विभक्त्यर्थस्य क्रियान्वयः पश्चाद्विभक्त्यर्थेन एवं च
पश्वेकत्वोन्नयकरणको यागः इति बोधः पश्वेकः इति तु पार्ष्ठिको बोधः एवं चैकत्वस्य यागांगत्वात् नानेकपशु
न्नियोग इत्यवाच्यं प्रकृत्यर्थं विहाय प्रत्ययार्थस्यान्यान्वयेऽसाधुत्वात् किंच स्वादिसूत्रस्य कर्मणि द्वितीया इत्या-
दिभिः संख्यावाक्यैकवाक्यतायां प्रातिपदिकादेकस्मिन्कर्मणि द्वितीयैकवचनमित्यादिक्रमेणार्थः
एवं च संख्यायाः क्रियायां कारकत्वेनान्वये विभक्तेरसाधुत्वं स्पष्टमेव किंच भिन्नपदोपस्थितक्रियान्वयापेक्ष-
या समानपदोपात्तत्वेन प्रथमं प्रकृत्यर्थान्वयस्यैवौचित्यं तदन्वितस्यैव क्रियाकांक्षादर्शनात् केवलप्रत्ययानद-
नुपस्थितेश्च नहि नापदमात्रेण तदुपस्थितिः प्रातिपदिकात्कर्मणि एकत्वे चैकवचनमित्यर्थेपि प्रत्यासत्त्या
प्रकृत्यर्थान्वय एवोचितः किंच प्रकृतेस्तु स्वार्थे प्रत्ययोन्नवतीसुत्त्या प्रत्यासत्त्या परस्परसंबद्धार्थबोध एव न
तद्ज्ञानेन तयोः साधुत्वबोधनं एतन्मूलिकैव प्रत्ययानां प्रकृत्यर्थान्वितस्वार्थबोधकत्वव्युत्पत्तिः ताभ्यां पर
स्परसंबद्धार्थस्यैव बोधनं केवलस्येति तदर्थः विभक्त्यर्थस्य प्रकृत्यर्थं प्रति विशेषणतैवेत्युपपादितं कर्मणि च नी- १८८

मानएकत्वेऽस्यार्थेऽपितस्यधर्मत्वप्रतीतेः षष्ठ्यंतादासममनियाहृतपदोपस्थितेर्धर्मिणोधर्मस्यविशेषणतायाएवदृष्टत्वे
नतस्यप्रकृत्यर्थंप्रतिविशेषणत्वेनोपस्थिताः एवंचप्रकृतिसुबर्थयोरेकांशाकारणत्वाद्विचारः परेषामस्मदीयानां।
चन्नांतिमूलकएवेतिध्येयं सर्वथासंख्यायाः करणत्वेनान्वयोयुक्तः तस्मात्पशुनेत्यादौविशिष्टविधिसंभवान्ने
कत्वविवक्षायामापिपाश्चमेदः स्पष्टंचेदंहेलाराजीयेनन्वेवमेकत्वस्यपशुविशेषणत्वयायागांगत्वाभावत्तदश्रा
वेपियागवैगुण्याभावादविवक्षितमेवस्यात् तदुक्तंजैमिनिना तत्रैकत्वमयज्ञांगमर्थस्यगुणभूतत्वात् इतिचेन्न।
वेविशिष्टस्यपशुत्वांगबोधनेनपशुत्वादिविशेषणवैकल्येइतितद्विशेषणवैकल्येसत्यपिविशिष्टानुष्ठानान्नवैगुण्यो:
पपत्तेः पशुत्वादिवच्छब्दबोध्यस्यास्यापिविशेषणत्वेनतस्ययागांगत्वोपपत्तेः तदुक्तंजैमिनिना शब्दवत्तूपलभ्यते
तदागमेहितद्दृश्यते तस्यज्ञानंयथान्येषामितिशब्दवत्तुशब्दबोध्यंयथाभवतितथोपलभ्यतेएकत्वंहियतस्तदाग
मेएकवचनागमेदृश्यते तत्तस्यांगत्वज्ञानंयथान्येषांविशेषणानांपशुत्वलोहित्यादीनामितितदर्थः एवंचजैमि
नेरपिसंख्याविशिष्टप्रकृत्यर्थबोधएवतात्पर्यं हरिरप्याह यजेतपशुनेत्यत्रसंस्कारस्यापिसंभवेयथाजातित्वस्थैक
त्वंसाधनत्वेनगम्यतेइतिनकेवलाप्रकृतिरितिन्यायाद्विनक्ते: शब्दसंस्कारार्थमनवेपिजातिवदेकत्वमपिक्रियासा
धनमविशिष्टस्यैवोपस्थितेरितितदर्थः हेलाराजः अपिचसंख्यायाअमूर्तत्वात्करणत्वासंभवः नचपरंपरयात
स्याः करणत्वं अयोग्यतया परंपरयाक्रियान्वयकल्पनापेक्षयोक्तमुक्तिनिष्प्रकृत्यर्थान्वयस्यैवकल्पयितुमौचित्यात्।

मं॰ज॰ त्र अरुणयेत्यादौ तु गुणस्यापि तत्तोयामकृत्स्नर्थत्वात्स्पदं परस्याकरणत्वमुचितं एवं च विधेयविशेषणमर्वमविवक्षाकार
१८९ णानावात् विवक्षितमितिसिद्धं ग्रहं संमार्ष्टीत्यादावुद्देश्यग्रहगतमेकत्वमविवक्षितं तथाहि प्रजापत्यान्नवग्रहा इत्या
दिवाक्यविहितग्रहोद्देशेन संमार्गो विधीयते तत्रैकत्वविवक्षायां ग्रहोत्पत्तिवाक्यगतसंख्यया तद्वाक्यगतैकत्वस्य विरो
धात् सयोर्वाक्ययोर्भेदापत्तेः यत्तु परस्परानपेक्षैकविधानानाकारकान्वयः क्रियायामभ्युपगन्तव्यं अन्ये न यथा दीपिकया
व्रजतीत्यादौ साधकतममिति सूत्रस्य कैयटादिसंमते प्रयोगे तद्दर्शनात् एवं चानुवादवाक्यगत्यास्तिवाक्यगतधर्मविरुद्धं
विशेषणमविवक्षितं अत एव व्रीहीनवहन्तीत्यादावुद्देश्यविशेषणमविवक्षितं विवक्षितमेव तत्र ग्रहानुवादेन संमार्गः
समस्यमानग्रहानुवादेन चैकत्वं विधेयमस्त्विति वाच्यं एकपदार्थयोरुद्देश्यविधेयभावेनान्वयाभावात् संमार्ग
स्यानुवादकोशावलान्बवाक्यभेदापत्तेश्च किं चोत्पत्तिवाक्ये नवत्वादिसंख्याश्रवणात् विधेयगतत्वेन नवादिपदोपा
त्तत्वेन तस्याविवणात् तत्र तत्संख्याविशिष्टानामेवानुमत्वात् ग्रहशब्देन तेन रूपेण सप्तशेषु विनत्वैकत्वबोधनतु
पक्षमस्थवाद्य इत्यस्य मीमांसकोक्तवाक्यभेदपदार्थत्वं स्पष्टं चैतद्वेलाराजीये पशौ न तथापि रूढसंख्यायाः श्रवणं
तस्मात्सुत्वविशिष्टस्यैव संख्याविशिष्टस्यैव तत्र विधानं अपि च ग्रहमिति द्वितीयया ग्रहस्य संस्कार्यत्वलक्षणं प्रा
धान्यं प्रतीयते एवं च प्रतिप्रधानं गुणानां वृत्तिरिति न्यायात् विनिगमनाविरहाच्च सोमाभावसेकनिर्हरणफलक सं
मार्गस्य सर्वग्रहैरपेक्षणाच्च विधेयपश्वादिविशेषणवत् क्रियांगत्वाभावेन तदेकस्य प्रयुक्तक्रियावैकल्याप्रसक्ते

अ सर्वत्र ग्रहसंमार्गे सिद्धाऽविवक्षाभावेन तदविवक्षा तदुक्तं जैमिनिना एकत्वमुक्तमेकस्य श्रुतिसंयोगादिति पूर्वपक्षे
सर्वेषां हेतुलक्षणत्वादविशिष्टं हि लक्षणमिति सर्वेषां संमार्गः कार्यो ग्रहत्वजातेरुपलक्षणत्वात् इत्यबोधकत्वात् इ
त्यबोधकत्वान्न लक्षणं इत्यबोधनमविशिष्टं यत इत्यर्थः भगवता शबरस्वामिना तु श्रोहिवाद्येन संख्यायाः अधिकारकत्वेन
क्रियान्वयः पश्चात्त्वमुत्सर्थेन पार्ष्टिकः संबंधः उक्तस्तथा ग्रहं संमार्ष्टि त्वं चैकमिमादिरीत्या वाक्यभेदः संख्याविवक्षायाद
श्रितइति न तत्र तस्य भारः न अस्मीमांसकैस्तु स एवार्थो गास्तत्वेन गृहीतः वाक्यार्थविचारार्थमेव तच्छास्त्रस्य प्रवृत्त्या पदा
र्थविचारस्य तत्रानुचितत्वात् पदार्थविचारप्रवृत्तव्याकरणशास्त्रनिर्णीतपदार्थस्यान्यथाकरणेऽप्रौढरेव निमित्ता
त्वात्तं विना जैमिनिवाक्यानुपपत्तेश्चाभावाच्च एकत्वयुक्तमिति जैमिनिसूत्रस्वारस्याच्चेसलं इदं ग्रहसंस्कारार्थत
योपात्तविशेषणविषयमेव इदृशो न विषये जातावेकवचनं बोध्यं यद्वा न केवला प्रकृतिरिति न्यायाच्छिष्टसंस्कारार्थ
वक्षेपायय त्रुअनान्तरीयकं प्राप्तोपात्तं तद्विवक्षितमेव यथा प्रकृते तेग्रहत्वं यथा च दशाम्यां सन्ततिचतुर्भिरात्तेषड्भिर
रतीत्यादौ द्वाभ्यामित्यादियस्रोत्रयं हविरार्त्तिमार्छेत्स पंचशरावमोदनं निर्वपेदित्यादौ प्रवयवद्ध्यारब्धः संघ उत्ना
यत्राप्युद्वाद्यो न तु संश्लेषे एकावयवनाशोपि समुदायस्य नाशान्निर्वापः क्रियत एवेति हरिग्रंथे स्पष्टं अपादानसंज्ञासू
त्रे नाप्येनुधावतः पतित इत्यादौ अश्ववत्वादपादानत्वाभावमाशंक्य सतोप्यविवक्षा भवतीति तेन पदोपात्तमपिधा
वनमविवक्षितमित्युक्तं इदं च दर्शपूर्णमासागमानाप्यप्रकरणे पठ्यते तत्र हि सायं दोहप्रातर्दोहात्मकहविद्वयं

मं.जू.॰ कल्पसूत्रकारास्तु प्रत्येकनाशे पृथक्प्रायश्चित्तमाम्नाता नाड्द्विविधस्यापि नाशे इदं प्रायश्चित्तमित्युभयत्वं विवक्षितमेवे-
१९० त्याहुः यत्तु नयत्वविवक्षायां वाक्यभेदः तथाहि नामपदानां परस्परमसंबद्धानामाख्यातान्वयोऽरुणाधिकरणसिद्ध इ-
ति ह विरान्नौ निर्वपेत् तत्र हविरुभयमिति ग्रहैकत्वन्यायेन तु न गतार्थता पृथक्पदोपात्तत्वादिति तत्र पदोपादानवै-
यर्थ्यात् तु न ह्यर्थलाघवानुरोधेन तदुपादानस्य यथाकथंचित् अनुवादत्वकल्पनायुक्ता अकर्तृकेवेदेवक्तुमिच्छा-
निच्छारूपे विवक्षे आरोपितेवोध्ये वस्तुतः परस्परासंबद्धानां नामार्थानामाख्यातान्वयो न त्वस्मन्न्यऽस्य गेवक्ते उपेयि-
वान् नाम्नामन्वाच्यानश्च साधौ उपेयस्याविवक्षा नञो विवक्षाच लक्ष्यानुसारत्व एवक्वचिदुद्देश्यगताविवक्षार्थसंख्या
पि तिविवक्षितैव यथा गर्गाः शतं दंड्यन्तमित्यादौ गर्गा इति बहुत्वं ग्रहैकत्वस्येवाविवक्षावीजाभावात् एतदेवाभिप्रेत्य सं-
ख्यायागुणत्वे इति सूत्रे गुणत्वे इति संख्याविवक्षिते त्युक्तं भाष्ये अत एवाश्रमसमुदाये वाक्यपरिसमाप्तिरिति वृद्धिसूत्रे भाष्यं
किं चैकवचने नैव प्रयोगोपपत्तौ बहुवचनकरणेन बहुत्वसंख्या विवक्षिता अत एव यूयं श्चिनक्ति पचनं नक्ति अधीन।
द्धीते स्मादौ उद्देश्यगतमपि बहुत्वं विवक्षितमेव एवं विधेयविशेषणमप्यविवक्षावीजसत्त्वेऽविवक्षितमेव यथा स्वर्गका-
लमेनं भोजयेदिति फलविधेयतापरनोदनायां भोजनफलस्य तद्भेदेऽनेकफलभोजने ऽसंभवेन तस्यानुपपत्त्या विधे-
यगतैकत्वस्याविवक्षा क्वचिद्बहुदोपात्तस्याप्यनुवाद्यविशेषणस्याविवक्षा यथाग्नौ चेष्टाधितौ स्यातां तादृयं स्यादिद-
मोषधमित्यादौ रुद्राभ्यां निष्ठातो नः पूर्वस्य च द इत्यस्य नडस्य कत्वविवक्षायामपि चकारेण वाक्यभेदकल्पना दृष्ट्या १९०

स्थाने प्रत्येकैकं प्रकारत्वात् । न: अस्य श्लस्य कटं कुरु अस्य पूलस्य कटं कुरु इत्यादौ वाक्यभेदेनैककटकरणकप्रतीतिश्च तत्र
आकृण इत्यादौ तु पूर्वपरयोरिति द्वंद्वनिर्देशे नैकवाक्यतयैवोभयोः स्थाने एकगुणविधानस्थानिभेदे तानेककोगुणः
विधेयत: संख्याया अविवक्षायां वीजाभावात् यथा तयोः पूलकेयो कटं कुर्वित्यादावेकवाक्यतयैव बोधः उभयसंबंधिन
एककटस्यैव करणप्रतीतिरित्येकः पूर्वपरयोरिति एकग्रहणं भाष्ये प्रत्याख्यातं तत्तु यथाधाने नाग्नीसंस्कुर्यादित्याद्यर्थ
कं वसंते ब्राह्मणोग्नीनादधीतेत्यादिवाक्यमग्न्यादिसंस्कारमात्रफलकं प्रतिब्राह्मणं सकृदेवार्थबोधकं सकृदेव स्वविधि
षये प्रवर्त्तकं चात एव पुनः पुनरग्न्याधानादिसंकरः तथा कृण इत्यादेर्व्याकरणस्य वर्णद्वयविषये पूर्वपरयोर्गुणो भवति गुणव
द्रूपं च साधु भवति तत्प्रयोक्तव्यमित्येतदर्थं तथा पारे पितव्योस्य प्रतिपुरुषमेकवाक्यतया सकृदेव बोधकमि
ति तत्सकृत्तस्यैकस्य खट्वेन्द्रस्य प्रयोगेणार्थस्यैकरणात् मालेंद्रादिप्रयोगो न स्यात् तदस्तत्त्वलक्ष्यविषयभिन्नत्वस
त्रोपलक्षणेन वाक्यभेदो वाच्यः तदत्र पूर्वपरविषये विस्यादिति एकपदमावश्यकमिति चेन्न एतच्छास्त्रबोध्यस्य तत्व प्र
योक्तृभिसंज्ञास्य नित्यकाम्यत्वेन नित्यनैमित्तिककाम्यधर्मोपदेशकशास्त्रस्येवासकृत्प्रवृत्तिसंभवात् साना
वेपापजनकनित्यं यथा ब्राह्मणो हिंसात्व बोधकं तत्र ब्राह्मणं हन्यादिति ब्राह्मणमात्रविषयं नैमित्तिकं राहूपरागा
दिस्नानं तत्प्रकरणे दोषश्रवणाद्राहूपरागमात्रविषयः काम्यं ज्योतिष्टोमादि तद्बोधकं वाक्यं कामानां तत्सादा
तृत्वाद्वाक्यभेदे पुनः पुनः प्रवर्त्तत एवमर्थबोधनाय प्रवृत्तं शास्त्रं प्रयोगे साधुत्वं बोधितमत्र साधुभिरित्यसाधुप्र

योगे पापश्रवणात् नित्यसमत्वं साधुप्रयोगस्य एकः शब्दः सम्यक् ज्ञातः शास्त्रान्वितः सुप्रयुक्तः स्वर्गे लोके कामधुक्
भवतीति भाष्यपठितश्रुत्यास्य तावाकाम्यत्वमप्यस्य अनेन प्रयुक्तिलाघवाद्यर्थवादार्थबोधनाय प्राप्ते प्रयोगे फल
संबंधबोधवचनं दर्शपूर्णमासयोरिव एतेनैकस्यैव पुनः पुनः प्रयोगेनानेककामनाफलसिद्धिरित्यपास्तं अत्र सम्यग्ज्ञान
एकोप्यर्थबोधनाय सुप्रयुक्तः शिष्टाश्रितमार्गेण प्रयुक्तः कामधुग्भवति किं वक्तव्यं सर्वे यदीति सर्वेषां तथा प्रयोगः का।
र्य इति बोधनात् सर्वशब्दानां आवृत्त्या वाक्यभेदेन शास्त्रविषयता सूचिता शास्त्रान्वित इत्यनेन शास्त्रस्मरणपूर्वकस्य प्र
योगे धर्मस्सूचितः तत्त्वस्य विषयोपलब्धवाक्ये गुणो भवतीत्यंशाध्याधानादिवत्त्वस्य संस्कारक एवं सावृत्तौ मानाभावान्ना।
न्नैकस्यास्यैवर्थपरादिभेदेन पुनः पुनरस्य प्रवृत्तिः तत्प्रयोक्तव्यमित्यंशस्य नित्यकाम्यबोधकस्य नतत्त्वस्य विष
यानंतस्य काम्यबोधकस्य तत्त्वस्य विषयानंतवाक्यापत्त्वे नस्सजातीयानां द्विजातीयानां पुनः पुनः प्रयोगसिद्धिः
रिति बोध्यं एवं पशुनायजेतेत्यादयोंगविधियोपि नैमित्तिका एव भाविनापि प्रधानस्य बुध्यारूढत्वेन निमित्तत्वमिति वि
ध्यावृत्त्या प्रतिप्रयोगं एकैकपशुलाभः एतदेव पदार्थे संग्राहकवाक्यात्त्वस्य संस्काराणि वाक्यानुपपन्न वर्तेऽस्ति प्रति।
प्रधानं गुणावृत्तिरितिच अत एव विधिवाक्यान्नेते न पुरुषेण स्वस्व प्रवृत्त्यनुकूलव्यापारस्य चिविषयत्वस्य स्वीयस्वी
यया गेग्रहात् तत्रमद्दिष्टसाधनत्वस्य सत्कृतिसाध्यत्वस्य ग्रहे तत्तत्स्त्रवृत्त्युपपत्तिः आकरणे च वालान्प्रतिप्रतिया
गं तत्तत्संयोजनं कार्यं इतिव्यवहारात् आवृत्तिः सिद्धैव भवाद्यो दाधवद्साद्दोऽपेकं धानुत्वपर्याप्तिबोधना १९१

यवञ्चवचनं हरिरप्याह एकं ग्रहणकं वाक्यं सामान्येनाभिधीयते कर्त्तरीति यथा ह्युपस्थादि सुविभज्यते एकरूपमने
कार्थं तस्मादुपनिबंधनं योनिर्विभागवाक्यानां तेभ्यो नन्यद्विवस्थितं इति ग्रहणवाक्यानामेवेयत्किंचिद्योगे न परिसमा
णत्वात्क्लित्वादन्येन प्रत्यविधायकेन कर्त्तरि कृदिस्मादिन संबध्यते अत एव पञ्चौ कर्त्तरीत्याद्युपपत्ते उपनिबंधनं बहूनां
वाक्यानां निबंधनं स्थानं तेभ्यो विभागवाक्येभ्यः अनेकार्थे यथा एवं तत्कर्त्तरीत्याद्येनेकार्थबोधकमिसमर्थं पुंजराजः एवं च वि न
क्यार्थसंस्थारूपमनुवाद्यविशेषणं विरोधे समस्यार्थापरिच्छेदकमेवाविरोधे तु समस्यपरिच्छेदकतया तत्रान्वय्येव एतेन सुप्सुपेत्यादाण।
कत्वं विवक्षितं तेन सुबंतसमुदाये न समास इति कैयटाद्युक्तं अपास्तं किंच तत्रैकत्वविवक्षायां सर्वसुबंतैः समासालाभः सर्वप्राति
पदिकाद्युत्पत्त्यालाभः सर्वप्रातिपदिकाद्युत्पत्त्यालाभः किंच सुप्सुपेति वाक्ये तेषां बहुत्वसंख्यागमेन तद्विरोधाः इत्येकत्ववि
वक्षा नयुक्ता यद्यपि हेकत्ववन् सुबंतसमुदायेन समासस्तु भाष्यकृतेत्थं वारितः सुप्सुपेति वर्त्तते न तु चस्मोः आकृतौ ज्ञानस्थाणिश
वर्त्तिते प्रातिपदिकात्सुप्सुपेत्युक्ते ऽन्यस्मादन्यस्माच्च प्रत्ययः क्रियते ऽन्येनान्येन च समासः क्रियते नैष दोषः अप्रकृति सुप्रत्येकं स।
माप्यते यावद्भ्यः ततः समाप्यते प्रातिपदिकादिति सुप्सुपेति वतावतः प्रमयोः समस्या तावतां समासेन च भाष्ये प्रत्येकं च समाप्यते प्रा
तिपदिकादिति द्वयोश्चैतत्समाप्यते सुप्सुपेति इति आकृतावसमस्तञ्जातस्याश्रयेमवत्रे समर्थः अत एव समरूपसत्त्वे भाष्ये जाते
पदार्थत्वे गौरनुबंध इत्यत्र सर्वानुबंधनाभावेनैव गुणभावमात्रं प्रक्षय यद्यपि तत्पन्देन वध्वे तस्मात्कल्पेन वोध्यते तथापि जातिः
प्रत्येकं समाप्यते ऽस्मकानुबंधनेपि कर्मावेगुण्यमुक्तं न तु जातौ अक्तं कार्ययत्र कृचिद्यक्तौ करणेन ज्ञाप्यस्यकृतत्वात् व्यक्त्यां

मं.जू.६ तरेण प्रवर्त्तत इत्युक्तं तथा नित्यवीप्सयोरिति सूत्रे आम्रेडितप्रतिपिपादयिषारूपवीप्सोपादाने किंप्रयोजनमिति प्रश्ने साकल्ये
१९२ न द्रव्याणां क्रियागुणादिसंबंधः प्रतिपादनरूपमनवयवाभिधानं तदुपादाने प्रयोजनमित्युक्तम् यद्येवं जात्याख्यायां द्विवे
नं प्राप्नोति व्रीहिर्यव इति जातौ पदार्थे साकल्येन सर्वद्रव्यप्रतिपत्तिरिति च कैयटः नैवैकार्थत्वाज्जातेरनेकार्थाश्रया च वी
प्सेति परिहृतमित्यन्यत्र अयं भावः यथा स्वांगत्वस्य जनपदत्वस्य च प्रत्येकं समाप्त्या स्वांगसमुदायजनपदसमुदा-
योर्न स्वांगग्रहणे न जनपदग्रहणे न च ग्रहणं तथा प्रातिपदिकादिपदप्रवृत्तिनिमित्तप्रातिपदिकत्वसुबंतत्वादीनां प्रत्ये
कं समाप्त्या न तत्समुदायस्य ताभ्यां पदाभ्यां ग्रहणमिति न च स्वांगादित्यादावेकत्वविवक्षया तदर्थलाभः तत्रैकत्वस्य
स्वबोधकप्रत्ययप्रकृत्यर्थस्वांगवाचकवाच्यसंख्यान्वितत्वेपि स्वांगानन्वितत्वेनैकस्वांगवाचकादित्यर्थालाभेन सुंदरप।
णिपादेत्यादौ ङीप्वारणासंभवात् स्वांगवाचकपाणिपादशब्दस्यैकत्वात् किंच ङ्याप्प्रातिपदिकादित्यादौ समासे
संख्याया अन्वयानेन प्रातिपदिकसमुदायस्य प्रत्ययोऽनिर्वार्यः श्रूयमाणविभक्त्यर्थैकत्वं तु तत्समुदायान्वयि तस्माद्व्याख्यो
क्तसमाधानमेव युक्तं किंचैवं स्त्रीभ्यो ढगित्यादेः स्त्रीप्रत्ययांतसमुदायादापत्तिः यथा च तत्र बहुवचनसत्वेपि एकैक
स्त्रीप्रत्ययांतादेव प्रवृत्तिर्न तत्समुदायादेवमन्यत्रापि पशुना यजेतेत्यादौ त्वविरोधादेकत्वस्य प्रकृत्यर्थान्वयित्वमिति
तावता विवक्षाव्यवहारः केचित्तु तत्तद्यागव्यक्तिविषयेणानेन पश्ववयवसाध्यसकलयागव्यक्त्युद्देशेन पशोर्विधा
नं तत्र यावत्पशुत्वं समाप्यते प्रत्येकं तस्य विधानं प्राप्नोति अनेकयागानामुद्देश्यत्वात् तद्वारणायैकत्वविवक्षा: १९२

अन्यथा शब्दाभ्यामित्यादाविवोद्देश्यानेकत्वेनानेकपशुविधानं स्यात् यद्यप्येकेनैव सकलावयवलाभात् तथापशु
वधनियानानेकपशोर्विधानं तथापि तत्र विवक्षायां मांसलोभेनानानेनवानेकपशुकयागकरणे कर्मवैगुण्यं न स्या
त् पशुत्वपर्याप्त्यधिकरणे तदनुष्ठानात् अतस्तद्विवक्षा न चात्रैकत्वविवक्षायामेकपशोरेव यागः स्यान्न पश्वन्तरस्ये
तिशंकापि प्रतियागसमुदायात्मकयागव्यक्तिं एकैकपशोर्विधानेन यागत्वावच्छेदेनैकपशोर्विधानासंभवादित्याहुः
एवं लिंगस्यापि विवक्षाऽविवक्षे बोध्ये ॥ ॥इति सुबर्थविचार अथ वृत्तिविचारः तद्विषयं समर्थः पदविधिरिति सू
त्रं सामर्थ्यं चात्रैकार्थीभावः पृथगर्थानामेकार्थीभावः सामर्थ्यं राज्ञः पुरुष इति वाक्ये पृथगर्थानि राजपुरुष इति समा
से एकार्थानीति भाष्यात् एवं च यत्किंचित्पदजन्यपृथगुपस्थितिविषयार्थकत्वेन लोके दृष्टानां शब्दानां विशिष्टविषयैक
शक्त्यैकोपस्थितिजनकत्वमेकार्थीभाव इति फलितं तेषां तत्त्वं च सामर्थ्यात् बोध्यं कार्येण शिष्टं भज्जानानां वाक्यादेव वृत्ति
निष्पत्तिर्बुद्धेर्वा एकार्थीभाव इति द्विर्निर्दिष्टो गौणमेकार्थत्वं समासघटकपदानां बोधयितुं यथापदानामसत्त्वात्तस्य
त्वाद्व्यवहारो गौणस्तथा तेषामेकार्थत्वव्यवहारोपीति बोध्यं विभक्त्यन्ते एतद्धारणाय दृश्यनामि संतं तेषां लोके तत्त्वेनाद
ष्टत्वात् औपगवादौ प्रत्ययानां तथा दृष्टत्वाभावेन यत्किंचित्पदजन्ये सुपस्थितिविशेषणं अपसमूहार्थस्योपगो
रुपस्यमत्ती स्यादौ तथा दर्शनसत्त्वात् विभक्त्यर्थस्य तु न तथात्वं तद्वाच्यार्थवाचकस्य शब्दान्तरस्याभावादिति निरू
पितं विशिष्टविषयैकशक्त्येति हेतुवचनं अत एव कैयटः अन्य एवाच यवार्थान्वितः समुदायार्थः प्रादुर्भवतीति तदपे

मं॰जू॰ १९३ स्या एकार्थीभावश्च अनेपांसुरस्कवदविनाभावापन्नत्वात् इति। अयं भावः वाक्ये यथा पदैः पृथक्पदार्थानां बोधेष्वा
कांक्षामूलकवाक्यशक्तिवशात् विशेषणविशेष्यभावापन्नविशिष्टार्थप्रतीतिर्नैवं वृत्तौ किंत्ववयवशक्तिभ्यामाकां
क्षामूलकसमुदायशक्तिसहकृताभ्यां नियतोद्बोधकवशात् स्वार्थे बोध एव जायमानो विशेष्यविशेषणभावापन्न
विशिष्टविषयो भवति तत्र विशिष्टशक्तिग्रहः इत्थं राजपुरुषादिपदं राजसंबंधवत्पुरुषादौ शक्तमिति तत्र सा विशिष्टशक्तिः
प्रागभावप्रभविवेकन्यायेन संबंधांशे विशेष्यविशेषणत्वांशे च पर्यवस्यति। राजादेः कृत्स्नावयवशक्त्यैवोपस्थितिसंभा
वात् आकांक्षामूलकेति विशेषणात् नित्यघटइत्यादेर्नैकार्थीभावेन साधुत्वं विशेषणत्वेनोपस्थितघटत्वादेः स्वविशे
षणाकांक्षाभावात् अतो नित्यो घटः इत्यादिवाक्यमपि न अत एव राजपुरुषैकदेशे राज्ञि वाक्य इव ऋद्धस्येत्यादिविशे
षणान्वयो न तस्य पदार्थैकदेशत्वात् यद्यपि तस्य राजपदार्थत्वमस्ति तथापि विशेषणान्वयो विशेष्यस्येतरविशेषण
त्वविषयकशक्तिग्रहाविषयत्वस्य तंत्रत्वेन तथा विशेषणत्वेन ज्ञानस्य तंत्रत्वेन वा दोषाभावात्। एतन्मूलैव पदार्थः प
दार्थेनान्वेति न तु तदेकदेशेनेति व्युत्पत्तिः दर्शनीयाया मातुः दर्शनीयामातेत्यादावेकविशेष्यकप्रतीतिजनकत्वरू
पसामानाधिकरण्यसत्त्वेपि न पुंवत्त्वं वृत्तेः प्रागपि तत्र सामानाधिकरण्यं तत्रैव पुंवत्त्वप्रवृत्तेर्नेष्यसंमतत्वात्। शक्ति
विशेषणान्वयस्तूपविशेषस्यैकार्थीभावकृतत्वं भाष्ये दूषितं एकार्थीभावसत्त्वेपि देवदत्तस्य गुरुकुलमित्यादौ त
दभावादिति इदमुपलक्षणं घटादिपदे एकार्थीभावाभावेपि तदेकदेशे घटत्वादौ विशेषणान्वयाभावादिसंवितो १९३

ध्वंसानंतः पुरुषोऽस्त्वश्वेतिवत् राजपुरुषोऽस्त्वश्वेत्यस्य प्रयोगे एवं न एकत्रविशेषणत्वेनगृहीतशक्तिकस्य ज्ञानस्यवापरत्रवि
शेषणत्वायोगात् घटः पटश्च द्रव्यमितिवत् तदर्थे द्रव्यपदस्य घटरूपविशेषपरतायां द्रव्यं पटश्चेत्यप्रयोगात् एवं राज्ञः
पुरुषो भार्यायाश्चेतिवत् राजपुरुषो भार्यायाश्चेति न एकविशेषणवैशिष्ट्येन गृहीतशक्तिके ज्ञाने वा विशिष्येतत्स जातीय
संबंधेन विशेषणं तत्र संबंधस्याप्युपसत्तेः घटो द्रव्यमिसर्थे घटो द्रव्यत्वमेत्यस्य प्रयोगात् तदुक्तं भाष्ये राजा पुरुषस्या
न्यंतरेभ्यो निवर्तयति पुरुषोपि राजानं स्वांतरेभ्यो निवर्तयतीति राजसंबंधविशिष्टे भार्यायाः प्रीतिविषयत्वादिसंबंध
बोधको राजपुरुषो भार्याया इति प्रयोगस्तु राजपुरुषः सुंदर इतिवद्दिष्टः तत्र सुंदरमित्यध्याहारेणानिरूपित पुरुषनि
ष्ठविशेष्यतायाश्च बले दर्कं पुरुषत्वमेव न तु राजासंबंधोपीत्यभिप्रायेण प्रधानस्य सविशेषणत्वे वृत्तिरितिव्यवहा
रः एवं सर्वत्र विशिष्टविषयकज्ञाने विशेष्यतावच्छेदकत्वादि विशेष्यनिष्ठधर्मे एवेति बोध्यं विशिष्टस्य विशेष्यान
तिरेकादिति कर्मधारयप्रकरणे स्फुटीभविष्यति एकार्थीभाववत्त्वादेव वृत्तावुपसर्जनपदार्थे संख्याबोधकत्वा
तिपदिकाभावेन कत्वादिरूपसंख्याविशेषानवगति तेन द्विपुत्रादौ न दोषः मासजातादावविशिष्टान्न तद्बोधः
किं त्वनेकमासजाते द्वित्रिशक्त्यादिः पूर्वं मासजातस्यैव प्रयोगादेकमासजातविषयः एवायं प्रयोग इति निश्चय
त्वस्तु त्रोयुष्मत्पुत्र इत्यादावपि प्रयोक्तुरहंकारानास्पदत्वेन पुत्र इत्येव बोधः विग्रहवाक्यायैकवचनत्वाद्येवेत्यादेशाः
अयं चारोपोऽन बोधफलकः किं तु शास्त्रप्रवृत्तिमात्रफलकः वृत्तेस्तथाबोधे भाष्ये कृताऽसाधुत्वबोधनात् यत्वादेशा

मं०जू० तदन्वयाभावात्तत्र संख्याविशेषावगतिर्न स्यात्तात्पर्यग्राहकाभावे सतीति पूरणीयमिति तल्लतद्विधायकशास्त्रा
१९५ नामवतरणात्तदबोधानापत्तेः विग्रहे द्विवचनबहुवचनान्तत्वेपि एकार्थीभावबलात्तदबोधानापत्तेः अत एव प्र
गृह्यसंज्ञासूत्रभाष्ये प्रयुक्ते कुमार्योरगारं कुमार्यगारमित्यादौ द्विवचनान्तेन विग्रहेपि वृत्तौ द्वित्वाबोधः किंतु
कुमारीत्वेनैव कुमारीद्वयबोधः अन्यथासिद्धान्ते प्रगृह्यत्वाभावेन द्वित्वस्य जकाभावादस्य प्रयोगस्यासाधुत्वे
नासाधुप्रयोगे भगवतोऽभ्युपेयतापत्तिरेवं च वृत्तौ संख्यानवगमेप्यनेकार्थप्रतीत्यानयाविग्रहे बाधकाभावः
अत एव च संख्याविशेषानवगतिरेवोक्ता न त्वनेकार्थानवगतिरुक्ता चित्रगुरित्यादौ गोत्वेनैव विग्रहः ए
वं चाविरोपितबहुत्वाश्रयो बहुवचनरूपसंस्कारो न तु तत्र कस्यचिदन्वयिपर्यायाश्वघटाइत्यादिर्बहुत्वेन कदा
चित्त्रयाणां कदाचिद्बहूनां ज्ञानं न तु कदाचिदपि द्वित्वचतुष्ट्वादीनां तथा वृत्तौ राजत्वादिनैवैकानेकव्या
क्तिज्ञानं तात्पर्यवशात् न त्वेकत्वद्वित्वादिना दन्तोष्ठस्पर्दन्ता स्निग्धतरा इत्यादावयवसंख्यायाज्ञानात्
दन्तत्वेनोष्ठत्वेनोष्ठत्वेन दन्तोष्ठलक्षणार्थद्वयप्रतीतेस्तस्य चानेकव्यक्तिमत्त्वेपि तासामनेकत्वेन शब्दतोऽज्ञा
नाभावात् इति बोध्यं एतद्ध्वनयन्नेव श्लोकान्त्यां मुक्तः इत्याद्यलुकि नसाधुत्वमभिधानादिति स्पष्टं भाष्ये जातौ बहु
वचनमिति कैयटोक्तं तु तत्युक्तं जात्याख्यायामिति सूत्रप्रत्याख्यानावसरे भाष्यकृता जातौ बहुवचनस्यासाधुत्वा
बोधनात् यथोत्तरं मुनीनां प्रामाण्यात् अत एव भाष्यकृता तस्य विशेषस्योपसर्जनविशेषणाभावरूपविशेषस्या १९५

गुरुकुलमित्यादाविव मासजातावच्छेदकत्वं नोक्तं संख्याविशेषानवगमेपि वाक्ये दैकत्वसंख्या पदेनोच्यते नेह
सहचरितद्वित्वादेरेकत्वस्य चावगमनमिति तदर्थः संख्याविशेषप्रतीतौ ह्यथगुणस्यापकपदस्यज्ञानं कारणमिति तत्प्रती
त्यभाव एवैकार्थीभावकृतत्वमन्यथा घटो घटपटाविव्यादौ घटत्वादेरपि संख्याविशेषावगत्यापत्तिः तदुक्तं हरिणा वा
चिकाद्योतिका वापि संख्यानां या विभक्तयः तदद्वुकावयवेवृत्तौ संख्यानां न निवर्त्तते इति यत्त्वत्रानेदैकत्वसंख्याभास
ते परित्यक्तविशेषं संख्यासामान्यमेवानेदैकत्वसंख्या यथा एकत्वं द्वित्वादीनां निमित्तं तथेदमनेदैकत्वं सर्वेषामेकत्वा 1
दीनां निमित्तमिति सापि संख्येत्युच्यते द्वित्वाद्यनुस्यूतैकत्वादेकस्य भावत्वेनाभिन्नमिवेति तेन पदेनोच्यते इति हेलारा
जः यथा शृणशृराद्रूपमात्रं गृह्यते न तु शुक्लकृष्णादिविशेष एवं राजपुरुष इत्यादौ मत्वन्तत्वान्न संख्यावानत्रार्थ इत्ये
तावत्प्रतीयते न त्वप्रयार्थवत्संख्यो नापि घटादिवत् विशेषसंख्यावच्छिन्न इति विशेषपरित्यागश्च तदज्ञानमेव यथा
राजपुरुष इत्युक्ते राजकर्यादिसंबंधिनोपि ज्ञानानन्तं सर्वविशेषाणां सामान्यरूपेण ज्ञानं मधुनि रसानामिव अत एवा
नवगतो राज्ञो राज्ञां वेति जिज्ञासा विशेषजिज्ञासायाः सामान्यज्ञानपूर्वकत्वकं नियमान्नसति तु निमित्ते मासजातादौ त
त्प्रतीतिर्नवस्येव उक्तं भाष्ये तु राजपुरुष इत्यादिप्रयोगविशेषविषयमेव तदुक्तं हरिणानेदैकत्वं संख्यावा तत्रान्ये
वोपजायते संसर्गरूपं संख्यानामविभक्तं तदुच्यते वृत्तावुपसर्जनपदार्थानामपि सत्त्वभूतत्वात्संख्यायोगा
वच्छेदकत्वेन विशेषसंख्याऽनानेन च सामान्यसंख्यारूपं सर्वसंख्याविशेषाणां संसर्गरूपं तदिति तदर्थः यथोष

धिरसाः सर्वैं मधुस्माहितन्द्राक्तयः अविभागेन वर्त्तते नासंख्यानां तादृशीं विदुरित्यनेन यद्वेतिपद्वतक्तः आद्यमाहभे
दानां वा परिस्पागानुसंख्यान्त्मासमतथाविधः आपाराज्ज्ञातिभागस्य भेदापोहेन वर्त्तते पूर्वं समस्तभेदसंसर्गरूपं तदि
सुक्तमूद्दानीं तु समस्तभेदापोहरूपं तदिति विशेषः अर्थस्य सामान्यविशेषरूपानेकधर्मवत्त्वेपि विवक्षितत्वाच्छ।
क्तीनामुपसर्जनपदेन सर्वविशेषसंसर्गभानं सर्वविशेषाणां संख्यात्वेन वाभानं अगृहीतविशेषेण यथा रूपे
ण रूपवान् प्रख्यायते न शुक्लादिभेदरूपं तु गृह्यत इति तत्र तथा बोधानुभवात् द्रव्यस्य संख्याऽभिप्रायेण तत्।
ज्ञानसंभवात् तत्र तादृशजिज्ञासायाः स्वरसतः सिद्धत्वाभावेन स्ववासनाकल्पितत्वाच्च अत एव हेलाराजेनै।
तन्मतद्योपपादकहरिकारिकाभ्यन्तरमाहस्थवतारिताः तस्य चाकस्थिरत्वं तन्मतेनाप्यसंकोचेन व्याख्यांकु
र्वता गोषु चरार्थप्रमाख्यानमपि जात्याख्यायामिति सूत्रं आवश्यकमिति वदता हरिणा कैयटेन च बोधितं न च तत्र्यसा
ख्याने इत्याभिप्राये एवं वचनस्य साधुत्वं वाच्यं तत्र चैकशेषार्थेन कत्रोषसूत्रं गौरवमिति वाच्यं द्वयेपि पदा
र्थे तत्संख्यानस्य भाष्ये कृतत्वेनाग्रतः निरूपयिष्यते चेदमुपरिष्टात् अत एव भाष्ये भेदैकत्वसंख्येति व्यवहारो
भासत इति च नास्ति वृत्तौ संख्याविशेषो न भवतीत्येतावदेवमस्मदर्थस्तत्रे भाष्यं तेन रूपेण संख्याभानस्याभावत्र दृष्टत्वा
च अत एव कालाः परिमाणिनेति सूत्रे एकवचनान्तानामुपसंख्यानं मासौ जातस्येत्याद्यर्थे मासा दिति वार्त्तिकमनभि
धानान्नेत्युक्तमिति तत्र साख्यानमेवमस्तु कृत्सूत्रे पि भाष्ये द्विवचनान्तानां मासमासोऽनभिधानादित्युक्तं अनभिधानादि १९५

त्यस्यसमासे न द्वित्वादिसंख्यावैशिष्ट्येनानेकमभक्तेनाभिधानादिसामर्थ्यः द्विवचनेस्यादेशद्वित्वादिवैशिष्ट्येन वोधका
नामिसामर्थ्यः किं चार्द्धनपुंसकमिति सूत्रेऽर्द्धंपिप्पलीनामिसामर्थ्यं समासमाशंक्यैकाधिकरणेऽस्यानुवृत्त्या समाहितं तद्वा
मुक्तपक्षे जैनपदार्थे एकत्वस्यैवांगीकारे तत्समासप्रसंग एव नास्ति समनुपिप्पलीत्वेनानेकव्यक्तिभाने समासशंको
चितैव किं चास्मिन्पक्षे गोषु चरे जातास्याख्यायामनेनैकत्वे बहुत्वातिदेशाद्बहुवचनमुक्त्वा स्तोकान्मुक्त इत्यादावेकव
चनमुत्सर्ग इत्येकवचनमित्युक्तं तत्परस्परविरुद्धं तदेकत्वे बहुत्वातिदेशवदेकवचनस्यापि प्राप्तेरिति दिक्॥ एवं चा
कारयोगो वा क्वेराज्ञो गोश्वाश्वपुरुषश्चेत्यादौ भवति न तु राज्ञो भार्याः पुरुषा इत्यादौ समासे वृत्तौ समूहलक्षणैका
र्थ्यप्रादुर्भावात् भेदस्य निवृत्त्या भेदनिबंधनसमुच्चयरूपस्य द्योत्यस्याभावेन द्योतकस्याप्यप्रयोग इति कैयटः पृथगु
पस्थितिकयोरेव समुच्चयस्य द्योत्यत्वेन तयाविधयोगाभावस्यापि समासे एकार्थीभावरूपत्वं लोकेपि पृथक्ज्ञातयोरे
वैकदेशस्थत्वे समूहव्यवहारात् न च समासेन चार्थस्याभिहितत्वात्तदप्रयोगः समासेन समस्तत्वेन तस्य विशेष्यतयाभि
धानेपि प्रथमत्वेन तस्य विशेषणतया वोधार्थं चाद्यप्रयोगस्यावश्यकत्वात् चार्थे द्वंद्व इति सूत्रात् स्याच्चार्थे रात्वारोपेणेना
यमिति दिक्॥ अन्ये त्वेकार्थीभाववशात्पृथगुपस्थितेर्वृत्तौ नोद्देश्यविधेयभावेनान्वयः पृथगुपस्थितेस्तथान्वये
तंत्रत्वात् अविमृष्टविधेयांशदोषनिरूपणावसरे यद्योद्देश्यविधेययोः पदाभ्यां पृथगुपस्थितिस्तत्रैवान्वयः न च
समासे पदात्पृथगुपस्थितिः अपृथगुपस्थितौ च न तथान्वयः इति काव्यप्रदीपाद्युक्तेरत एव वचनं दुर्धीचाशिषी॥

तिसूत्रविहितचतुर्थ्या न समासः आशीर्विषये हि उद्देश्यविधेयभावो गम्यते समासे तदवगमाभावात् इति हरदत्तादयः
अयमेवैक प्रसरतां भङ्गो नाम यद्विशिष्टैकोपस्थितिजनकत्वरूपसामर्थ्यभङ्गः उद्देश्यविधेयभावेनान्वये पृथगुपस्थि
तेस्तन्त्रत्वेन तथान्वये तद्भङ्गादिति तन्न भाष्यकृतानुक्तत्वात् किंचोद्देश्यत्वविधेयत्वयच्छष्टत च्छष्टोपवंधश्यंगेवृत्तौ
स्फुटत्वादिवत्तदन्वयासंभवात्तथान्वयः एकार्थीभावाभावे विघटमित्यादौ तथान्वयाभावेन अस्यासलोपश्चेत्या
दौ समासेपि तथान्वये न च तस्यतत्कृतत्वाभावाच्च तथान्वयानिशायेण समासप्रयोगेपि प्राप्ताप्राप्तत्वादिपर्यालोचनो
त्तरं लोहितोष्णीषा इत्यादौ तथा बोधो भवत्येवेति नासाधुत्वं तस्याशये नायं भाष्ये नोक्तः विशेषणं विशेष्येणेति सूत्रे अन्य
यविशेषणत्वाऽभयोश्च विशेष्यत्वादुपसर्जनाप्रसिद्धिरिति वार्त्तिकेन भयमुद्देश्यविशेषणत्वस्य विधेयताप्रतीतेश्चास
तएव प्रकाशाकृतेदृशसमासवाक्यानि श्रुतसंस्कृतिदोषे नोदाहृतानि किंत्वविमृष्टविधेयांश एवं च पृथगुपस्थितयोस्त
थान्वय उत्सर्गस्य त्यागेन समुदायसमुदायस्यैव मुख्यं तस्य दूषकताबीजं प्रदीपे पि तत्र तथान्वय इत्यस्य उत्सर्गेणेति शेषः
आशीर्विषयचतुर्थ्या यद्यपि न समासः विप्राय भद्रं भूयादित्यादौ विप्रभद्रार्थयोरुभयोरपि तिङर्थान्वयेन परस्परम
सामर्थ्यात् चतुर्थी चाशिषीत्यस्य चाशीर्विषयार्थान्वय्यर्थकात् द्वारकभद्रादियोगे चतुर्थीषष्ठ्यौ विस्पष्टयोः तत्
त्रैकं विप्रसंबन्धि आशंसाविषयो भवतु नमित्यादिक्रमेण बोधः राजकुलस्य भद्रं भूयादिति तु साध्वेव किंच समासादावा
पि तथाश्रुतस्य तद्बोधो दुर्वारः भवासाधुत्वं भाष्याद्युक्तेः विशिष्टोपस्थितावपि विशेषणादौ प्रकारत्वादिस्वी

कारे बाधकाभावादधिकमग्रे वक्ष्यामः अत एव कैश्चिद्वृद्धत्रपत्वादिरूपमेवोक्तं अन्ये तु तत्समाधिकरणं किंचान्यादेशा
स्य किं विकार्यं विधातुमुपात्तस्य कार्यान्तरविधानाय पुनरुपादानरूपस्य समासे त्वदुक्तरीत्या संभवाभावेनैतद्भिन्नतकद
स्याद्येण नाद्यादेशाशंका अप्रयुक्तत्वेन तत्समाधानपरस्य द्वितीयादेरेस्त्वेनऽतिसूत्रस्य नाष्यस्यासंगतिरित्याहुः यत्तु नि
क्षोत्राधिर्घतप्रसोगुडधानाः केशचूडः स्वर्णालंकारो दिदृक्षाः सप्तपर्णो गोरखर इत्यादिष्वक्रान्तयुक्तश्रेणिमिश्रसंघात
विकारसुच्प्रत्ययलोपवीप्साजातिविशेषाद्यभिधानमेकार्थीभावकृतमिसुक्तं तन्न भाष्याद्यनुक्तत्वात् निरादिपूर्व
पदानांक्रान्ताद्यर्थवृत्ति त्वयोक्तार्थानामिति न्यायेन तत्प्रयोगसिद्धेश्च गोरखरादेश्च समुदायस्य जातिविशेषत्वदि
स्वीकारेणान दोषः पंकजादिवत् एकोपस्थितिजनकत्वरूपैकार्थीभावकृतत्वस्य क्रान्तादिलोपे संभवाभावाच्च
अत एव संख्यायाव्ययेति सूत्रे समासे नाभिहिते सुजर्थं इति कृत्वा समासे सुजन्न भविष्यति किं च सोः सुजर्थ इ
ति समासश्चाने न खलु सुजर्थस्तु अतेगम्यते सुजर्थ इति भाष्ये उक्तं तत्र समासेनैतस्य समासघटक पूर्वपदे
नेसार्थः पूर्वपदस्य तदर्थे त्वद्योतकश्च समासइति समासेनोक्त इत्युक्तिः द्योतकविषयेपि उक्तार्थानामिति न्या
योऽस्त्येव अतिप्रसंगस्त्वनित्यत्वद्वारणीय इत्युंगतश्चैत्रः कृष्णं श्रितयोः परस्परमसंबंधेनाकांक्षामूलके
कार्थीभावस्यासंभवान्न विशिष्टशक्तिस्वीकारादेव समासस्यार्थवत्वात्प्रातिपदिकत्वसिद्धिः अत एव वृत्तौ विशि
ष्टएवार्थो राजपुरुषपदाभ्यामभिधीयते इति कैयटः भाष्ये चैकार्थीभावपक्षे संसृष्टार्थं समर्थमिति समर्थ

मं.जू.० मितिसमर्थपदसूत्रतिरूक्ताविशिष्टबुद्धिंप्रतिविशेषणविषयकस्यैवहेतुत्वमितिनविशिष्टबुद्धौविशेषणज्ञानस्यका-
१९१ रणत्वेव्यभिचारः अतएवघटपदान्घटत्वविशिष्टज्ञानोपपत्तिः यत्तुनविशिष्टेशक्तिः किंत्वयवशक्तिज्ञानसह-
कृतात्वृत्तिरूपपदश्रवणरूपाद्बोधकाद्राजसंबंधीपुरुषश्चित्रागावास्ययमित्यादेविग्रहवाक्यतोऽनुभूतस्या-
विशिष्टार्थस्यस्मरणमथयमेवैकार्थीभावोनामातोनोक्तदोषः अतएवजरद्गवादेस्तेषामेवविग्रहत्वंस्वीकृतंस्माव
यववृत्तिज्ञानसहकारेणार्थोपस्थापकत्वस्याप्यर्थवत्सूत्रेयग्रहणाच्चसमासस्यप्रातिपदिकत्वंयत्त्वावाक्यवत्समासे
पिपृथगुपस्थितयोरेवपरस्परान्वयः अयंतुविशेषः वृत्तिघटकपदोपस्थितयोः प्रथमंपरस्परमेवैकरूपेणा-
न्वयोवृत्तिस्वभावात् अतोनतत्रविशेषणान्वयादिकं वाक्येतुपदैर्विशेषेणान्वयस्तदेवराजिऋद्धत्वान्वयः
तदास्येकदेशत्वज्ञानाभावात् एकरूपेणोपस्थितेनार्थान्तरस्यविधेयभावेनान्वयः यद्वाविशिष्टलक्षणयास्तौविविशि-
ष्टोपस्थितिरिति षष्ठीतत्पुरुषलक्षणायाःसंबंधरूपाधिकविषयत्वेनषष्ठीतत्पुरुषात्कर्मधारयस्यलघुत्वंबोध्यमि-
तितन्न आद्येतादृशविग्रहवाक्यमजानतांविशिष्टोपस्थितेः शक्तिंविनोपपादयितुमशक्यत्वात् द्वितीयेवृत्तिपदंतादृ-
शबोधकारणमितिज्ञानस्यतद्बोधकारणत्वकल्पनापेक्षयाशक्तिकल्पनायालघुत्वात् बोधकारणत्वस्यसंबंधवि-
नानुपपत्त्याशक्तिसिद्धेश्च किंचैवंसमासादीनांवृत्तित्वासिद्धिः वृत्त्याश्रयत्वेनैवतेषांवृत्तित्वव्यवहारात् तृतीयेबोधज्ञा-
नंविनाबोध्यसंबंधरूपलक्षणायाअज्ञानेनतयाविशिष्टोपस्थितेर्वक्तुमनौचित्यात् किंचपंकजपदादेरपिपद्मत्व १९१

विशिष्टलक्षणायाएवापत्तेरुक्तदिशा कुत्र खेदः वाधादिप्रतिसंधानंविनाविवोधात् तत्रशक्तिसिद्धेश्च स्वरूते विसमं
किंचकर्मधारयेवाक्यान्वबोधाभावेन लक्षणानयुक्तानाकपसंबंधवाक्यार्थबोधोहि सर्वत्रलक्षणयाऽऽप्यते विशेष्यवि
शेषणभावस्यायेतिचेद्वाक्येपितद्बोधनंतत्राप्येकोपस्थितेरापत्तेः एवंचप्रथमतद्दसमादौत्वदसंमतस्योद्देश्यविधेयभा
वेनान्वयस्यापत्तिरिसलं इदंतुते विशिष्टशक्तिमत्वंलोकसिद्धमेव शास्त्रेर्थविधानाभावात् अत एव तुरेसादावदर्शनात्
वृत्त्यादीनामर्थविधानाभावश्चार्थेइत्यादि तु चार्थेवृत्तिमनूद्यद्वंद्वसंज्ञामात्रविधायकमन्यथानेकसुबंतंचार्थेवर्त्ततेतद्द्वं
द्वसंज्ञमितिवाक्यान्नेदापत्तेः किंचसमानार्थकवाक्यानिवृत्तयेविभाषाधिकारस्याशूर्वस्यकरणेगौरवं समस्तेकार्थी
भावेसमासो व्यपेक्षायांवाक्यमिति शास्त्रकृत्कल्पितसिद्धार्थानुवाद एवमः इयंचैकार्थीभावोपपादिका विशिष्टशक्तिः
समर्थाश्रितः पदविधिरिसाद्यर्थकसमर्थः पदविधिरिसाद्यर्थकसमर्थः पदविधिरितिश्रवणात् अलौकिके।
विग्रहेप्यारोप्यते अत एव तत्रसमाससंज्ञायामर्थवत्त्वनिबंधने प्रातिपदिकत्वे विभक्तिलुक्सिद्धिः षष्ठीसादिज्ञा
नबलेनन्नेशोपस्थितिनिबंधषष्ठ्यादिनिर्वाहाय पृथगर्थत्वमप्यारोप्यते अनयोरपिकाल्पनिकत्वे नविरोधाभाव
शास्त्रप्रामाण्यात् नन्वेकार्थीभावनिर्वाहकविशिष्टशक्तिवादे बहुव्रीहेस्तत्पुरुषोतरंग इसादि व्यवहारोच्छेदः
वहिर्भूतपदार्थविषयकबोधजनकत्वंहि बहुव्रीहोवहिरंगत्वं नचाउपन्नेत दर्शितश्रमपदार्थेपि प्रसेकातिरि
क्तविशिष्टशक्यत्वसत्वेन स्वपदार्थत्वस्यैवसत्वादितिचेन्न स्वघटकपदघटितवाक्यदृष्टार्थमात्रविषयक

मं०ज०
१९८

तत्पुरुषीयशक्तिग्रहापेक्षया बहुव्रीहिसंज्ञकपदसमुदायीयशक्तिग्रहस्य त्वघटकपदघटितवाक्यदृष्टार्थातिरिक्ता
र्थविषयकत्वेन बहिरंगत्वात्तते: एवमेव षष्ठीतत्पुरुषात् कर्मधारयस्य लघुत्वं बोध्यं कर्मधारयसंज्ञकपदसमुदा
यजशक्तिग्रहापेक्षया षष्ठीतत्पुरुषसंज्ञकतज्जन्यशक्तिग्रहस्य षष्ठ्याद्यर्थरूपाधिकविषयकत्वेन गुरुत्वात् एवंच
निषादस्थपत्यादिशब्दानां षष्ठीसमासकर्मधारयबहुव्रीहिभिन्नार्थत्वेन कृतान्तर्गतसर्वेदिति संदेहे शक्तिग्रहलाघ
वानुरोधेन कर्मधारयार्थतात्पर्यं कल्पते संभवति सामानाधिकरण्ये वैयधिकरण्यस्यान्याय्यत्वात् तदुक्तं जैमिनिना
स्थपतिर्निषादः स्यात् शब्दसामर्थ्यादिति निषादस्थपतिशब्दस्यांतरंगत्वेन निषादरूपस्थपतौ शीघ्रोपस्थितिजन
कत्वानुकूलात्सामर्थ्यात् शक्तिरिति तदर्थः अतएव बहुव्रीह्यर्थकोनसः अन्यथा बहुव्रीहौ मीमांसावार्तिककारैः शा
क्तिकथनेन निषादपरस्य तत्रालाक्षणिकत्वेन च तदभावस्य स्वतो न लाभः स्यात् एतेन शब्दसामर्थ्यादित्यस्य नि
षादशब्दस्य निषादबोध एव सामर्थ्यात् शक्तेः षष्ठीतत्पुरुषे तु पूर्वपदस्य लक्षणेति न तस्य ग्रहणं जघन्यत्वादिति शबर
स्वामिकृतं व्याख्यानं प्रोद्धृतेव रसमाणभाष्यसंमतेमपेक्षावादेतत्रापि लक्षणाभावाच्चेति दिक् ननु स्थपतिशब्दः
स्वामिश्रेष्ठमतरपर्याय इति तस्य गुणशब्दत्वात् निषादस्य जातिशब्दत्वात् कर्मधारयोऽस्यपत्ते: एवं निपाताप
त्तेः किंच स्थपसर्वस्य संबंधिनि नित्यसाकांक्षत्वात् षष्ठीपुरुष एवान्याय्योनरपत्यादिष्विवेतिचेन्न लिंग
दर्शनाच्चेति जैमिनिसूत्रेण हेत्वंतरोक्तेः रोषात् लिंगं च दृश्यते कूटं च दक्षिणेति कूटं हि निषादानामेव सचिति १९८

शबरः स्वामिनः एवंचराजदंतादित्वात्कर्मधारयेप्यपतेः परनिपातः संबंधाकांक्षानिवृत्तिरप्यर्थतो निषादानां
मेव तत्तत्वाभादुपपन्नालिंगंचानेकार्थस्यशब्दस्यार्थनियामकं दृष्टं तस्मादनेकार्थनिषादस्थपतिशब्दस्यार्थ
नियामकं शीघ्रोपस्थितिजनकशक्तिकत्वंलिंगं चेस्येवस्त्वत्रतात्पर्यं वक्तुमुक्तं किंचषष्ठीतत्पुरुषादिशब्दतो नरसु
रयोरेवेश्वरत्वेन प्रतीतिः अश्वपतिगजपत्यादौत्वगत्यातात्पर्यानुपपत्त्या चोत्सर्गस्यत्यागः अतएवशंकरभग
वत्पादैरैहराधिकरणे ब्रह्मलोकशब्दे कर्मधारयसमासः सर्वाः प्रजा अहरहर्गच्छंत्य एवं ब्रह्मलोकं नविंदंती
तिलिंगेनसाधित इत्यलं तत्रत्याभाविरुत्वपत्तेश्चो क्रियाद्विवृद्धं अनिरवयवान्नित्याः शब्दान्तरन्वाख्याना
यकल्पितेरेषामवयवत्यानीयेत्याप्रवृत्तिः तदुक्तं अबुधं प्रत्युपायाश्च विचित्राः प्रतिपत्तये शब्दांतरत्वाद
सत्वं भेदोवाक्यसमासयोरिति अतएवगोरथादौयुक्तादीनांलोपाविधानं गवोरथ इत्येवं वाक्यस्यकल्पनात्
क्रियामंतरेणानन्वयात्तत्रतदवगतिः गोयुक्तोरथ इति लौकिकंतुसमासस्यपर्यायरूपंतथापरं तथैवत्रसादि
विशिष्टेर्थेअवस्थितं नीलोत्पलाद्यपिपदं भागाभ्यांवर्ततेतथैवेति भागाभ्यां कल्पिताभ्यां सादृश्यमत्रकतुवाक्य
स्येरत्रसानोअभेदभ्रमो बालानां तन्मूलकएवैकार्थीभावव्यवहारो उपपत्तेर्वास्तवाः संज्ञातुनोपपत्तेपरा नो
दयगार्थत्वस्यभावत्वेन स्वभावभंगापत्तेः तथाहि गुरूदधिमागोविक्रियते प्रतिपत्तये इति शाब्दे रूढिरबुधा
नामितिशेषः पंकजादिपदं योगरूढं स्वश्वपर्णादिपदं रूढं राजपुरुषादि यौगिकं मित्यादिरपि कात्यायनिकः प्र

तिपादनोपायत्वेनेतितदर्थः तत्रवाक्यार्थानुगमाद्राजपुरुषादिर्यौगिकः सप्तपर्णादौच्चिदर्थानुगमेविशीर्णप
र्णत्वरूपभावात् रूढिरेव पंकजादौवाक्यार्थानुगमार्थांतरानुगमाच्चयोगरूढिरितिदिक् परेतुवाक्यादृत्तिः
शास्त्रनिष्पाद्यात्र्यर्थाभिधानमतिशास्त्रकृतमेव एवंचानेकमुक्तं चार्थेवर्त्तते चार्थेवर्त्तमानंचद्वंद्वसंज्ञक
मित्यर्थात् घटकपदानामेव चार्थेवृत्तेरुक्तार्थत्वाच्चकाराप्रयोगः सिद्धइतिनैकार्थीभावस्यसफलं नचतन्म
तेशब्दवदर्थोविशास्त्राधीनः शास्त्रकार्यतयाशब्दानांलोकतोर्थज्ञानासंभवइतिवृत्तिमत्समुदायत्वंवृत्तित्व
मित्यस्यवक्तुमशक्यतयाकिंवृत्तिलक्षणमितिवाच्यंपरार्थाभिधानंवृत्तिरित्यस्यभाष्येदेवोक्तत्वात् परस्यशब्द
स्योपसर्जनार्थकस्यपदत्रशब्दांतरेणप्रधानार्थकपदेनार्थाभिधानंविशेषणत्वेनग्रहणंसावृत्तिरितितदर्थः
यद्वा परार्थस्यप्रधानार्थस्याप्रधानपदेर्थेत्रस्वार्थविशेषणत्वेनग्रहणंसावृत्तिरित्यर्थः राजपुरुषइत्यत्रपुरुष
पदेनवाक्यावस्थायामनास्कन्दितोराजार्थोराजपदेनवापुरुषार्थत्रस्कन्द्यतेतत्संवलितः स्वार्थउपस्थापितेइ
तियावत् एतावतैवैकार्थीभावइतिव्यवहारः बहुव्रीहावपिप्रधानंपदंसमुदायएवघटकेपदेचाप्रधानेत
त्रप्रधानपदेनावयवार्थालिंगनेनैवस्वार्थबोधनं अवयवैर्वांतरर्थालिंगनेनसमुदायस्यप्राधान्यंचाव
यवाप्रतिपाद्यप्रधानभूतान्यपदार्थबोधकत्वात् द्वंद्वेपिप्रधानपदसमुदायोपस्थाप्यसाहित्यस्यावयवा
र्थालिंगनेनबोधः समाहारेतरेतरयोरुभयोरपिसाहित्यंसमहोविशेष्यं आद्येअनुद्भूतावयवभेदोंसेउद्भू

तावयवभेदरहितवसते न चेदमसंभवि प्रधानेन सर्वथा स्वार्थत्यागे इतरत्यागे चासंभवात् अंशे तेनैवार्थ
बोधे सिद्धे प्रधानेन तदभिधानासंभवात् यद्वा स्वार्थबोधनद्वयस्य परार्थाभिधायकत्वासंभवात् किंचा
द्येशद्वार्थसंबंधानियतापत्तिः राजपुरुषादितः पुरुषादिमात्रबोधापत्तिश्चेति वाच्यं गुणभूतपदे प्रधानप
दार्थविशेषणत्वेनोपस्थितिविरोधिनः स्वार्थभूतस्य राजाद्यर्थगतविशेष्यत्वस्य त्यागेन जहत्स्वार्थत्वांगीकारे
णारोपात् यद्वा सर्वथोपसर्जनपदेन स्वार्थस्य त्यागः इष्टो राजपदसंबंधमात्रेण पुरुषपदमेव राजसंबंधि
पुरुषबोधकं प्राचीनोदाहरणमादाय चंपकपुटइत्यादिव्यवहार यत्र राजपदार्थः पुरुषे विविशेषणमित्या
दिव्यवहारः अत एव जहत्स्वार्थापरस्य जहत्सुपसर्जनपदानि स्वार्थं यस्यां सेत्यर्थ उक्तो हेलाराजेन यद्वा भे
दसंसर्गौ सामर्थ्ये तथा हि वृत्तौ राजपदसंनिधानात् पुरुषपदेनैव राजसंबंधिनी राज्ञा नित्याभिसंबंधाभाव
वती च या पुरुषव्यक्तिः सोपस्थाप्यते अतो न राज्ञः स्वांतरेण संबंधः राजपदस्यार्थाभावात् नापि पुरुषस्य
स्वाम्यंतरेण संबंधः यथा वेदांतिनामखंडार्थबोधो लक्षणावाक्यादौ तद्वत् अखंडार्थत्वं च पदार्थसंसर्गा
नवगाहि प्रतीति जनकत्वं यथा कश्चंद्र इति प्रश्नोत्तरे प्रकृष्टप्रकाशश्चंद्र इति वाक्ये प्रकृष्टप्रकाशपदार्थ
ज्ञानतत्वर्थाश्रयस्य बुभुत्सितचंद्रत्वस्य वस्तुनश्चंद्रत्वेन चंद्रपदवत्वेन च बोधः ननु प्रकृष्टप्रकाशवैशि
ष्ट्यविषयकः मानांतरसिद्धस्याप्युपादानस्यैव व्यक्तिविशेषनिर्धारणोपायत्वमतस्तदुपादानं एवं प्रकृतेपि

राजपदप्रयोगः शक्तिग्रहोपि राजपदयुक्तं पुरुषपदं पुरुषत्वेनोक्तव्यक्तिविशेषे शक्तमित्याकारकः ए
वं प्रकारत्रयं भाष्येस्पष्टं अंशयोर्महाराज इत्यादेः पूर्वपदेनात्वादिभिः तत्पूर्वगत्यार्थ बलमादाय बोध्यं य
द्यपि भेदसंसर्गौ भेदः संसर्गो वा सामर्थ्यस्य लक्षणत्रये तत्ता समर्थं भेदवदर्थोपस्थापकत्वं संसर्गवदर्थोपस्था
पकत्वं वोभयवदर्थोपस्थापकत्वं वेति भेदवदित्यादावधारणमाद्ययोर्बीजं भेदसंसर्गयोः समनैयत्यात्
विनिगमनाविरहस्तृतीये बीजं को भेदः संसर्गो वेत्युपक्रम्य भाष्ये उक्तं वाक्ये प्रसक्तं सर्वं स्वं निर्दिश्यते रा
ज्ञः पुरुषोश्वस्येमा इति या प्रसक्तः सर्वः स्वामी च प्रयुज्यते राज्ञः पुरुषो भार्यायाश्चेति राजपुरुष इत्युक्ते रा
जा पुरुषं स्वाम्यंतरान्निवर्तयति पुरुषो राजानं स्वांतरान्निवर्तयति एवमुभयस्मिन्परस्परेण व्यवछिन्नेय
दित्यादौ जहातिराजपदं तराकांक्षं जहातीति स्वाम्यंतरादित्युक्ता राजरूपस्वामितोः निवृत्तिलाभेन तत्त्वं संसर्ग
उक्तः अनेन च तयोस्तत्तद्रूपेण बोधाविषयत्वमुक्तं बोधविषयत्वे राजपदार्थस्य भेदसंसर्गप्रतियोगितयान्वया
वश्यकत्वेन त्यागकथनासंगतिः अर्थस्य बोधाविषयत्वमेव हि त्यागः तस्मादुक्ता वार्यो भाष्यसंमतः यत्वर्थवत्सूत्रे
के यदेसमासग्रहणं तुल्यजातीयानां नियमार्थं सुवंतानामिति भाष्यप्रतीकमुपादाय सुवंतानामित्युपलक्षणं भे
दसंसर्गद्वारकार्थवत्तायुक्तानां तेन कुंभकारेत्यादिसमासंग्रह इत्युक्तं तत्र वाक्ये पदार्थयोर्विभागेनापि बोधे
सति इतरसंसर्गाकांक्षाभेदसंसर्गः सद्वारभूतोयस्य विशिष्टार्थस्य तद्युक्तानामित्यर्थ इति न तद्विरोधः हरिरपि

भेदसंसर्गशक्ती द्वे शब्दस्यैते व्यवस्थिते इति भेदशक्त्या पृथग्भानं संसर्गशक्त्यैकं भानमिति तदर्थः यत्त्वं सपक्षे भेद
संसर्गौ वाच्यौ राजसंबंधी अराजकीयभिन्नः पुरुष इति बोधः यद्वा भेद एव वाच्यो अराजकीयभिन्नः पुरुष इति
बोधः एतद्विरोधादेव राजपुरुषो भार्याया इति न संसर्गस्त्वनुमेयः यद्वा संसर्ग एव शक्यो राजसंबंधीति बोधः
अराजकीयभेदस्त्वनुमेय इति तत्रानुभवविरोधात् गौरवाच्च द्वंद्वे भेदादेर्वाच्यताया उपपादयितुमशक्य
त्वाच्च किंच भेदसंसर्गयोर्भाने तयोः प्रतियोगिनिरूप्यत्वात् पूर्वपदार्थस्यापि बोधविषयत्वावश्यकत्वेनाने
न ह्यन्योस्ति प्रकारेण पूर्वपदे जहत्स्वार्थत्वोपपादनपरभाष्यविरोधात् किंच राजनिष्ठयोरपि भेदसंसर्ग
योर्भानाभ्युपगमे दर्शितत्वेन तयोरपि शक्तिजबोधे विषयतापत्तिरिति दिक् यद्वोपसर्जनपदेप्यजहत्स्वार्थैव भिक्षुको द्वि
तीयां भिक्षामासाद्य न पूर्वां जहाति संचयायैव प्रवर्तत इति भाष्यात् अयंभावः स्वस्मिन्त्वपदार्थभूतायां
विशेष्यतायां सत्तामेवेतरनिरूपितां विशेषणतामंगीकरोति विशिष्टशक्तिबलात् तत्र सा विशेषणता राजा
दिपदोपस्थाप्ये संसर्गे अविशेषात् एवं च त्वत्पदार्थभूतविशेष्यतायामपि विशेषणत्वेनैव भानेन तत्र वि
शेषणान्वयः स्वरूपतो विशेष्यत्ववैशिष्ट्येनोपस्थितयोरेव तदन्वयात् वाक्ये तु पदजन्मोपस्थितौ स्वरूपतो वि
शेष्यत्ववैशिष्ट्येनोपस्थितएव तदन्वयात् वाक्ये तु पदजन्मोपस्थितौ न भानमिति तदन्वयसिद्धिरित्याहुः
यत्तु सखंडाः शब्दा इति पक्षेप्यवयवमवयवशक्तिं तल्लक्षणं चाजानतां बालानां समुदायशक्त्यैव बोधस्य

सर्वानुभवसिद्धत्वेनावश्यकल्प्यत्वात्तयैवराजविशिष्टपुरुषबोधोपपत्तौतयोस्तद्बोधकत्वंनकल्प्यंवृषभादिपदे
वृषादेरिवआनुपूर्व्यंतरघटकत्वाभावविशिष्टानुपूर्व्याएवशक्ततावच्छेदकत्वात् अतएवरामादिपदान्नाग्निना
रायणादीनांबोधः वाक्येतुपरामर्शबलेनैवराजसंबंधीपुरुषइत्यर्थेराज्ञःपुरुषःपुरुषोराज्ञ इत्यनयोःशक्ति
कल्पनापेक्षयापदशक्तेर्लघुत्वात् आरोपितार्थप्रामाण्यमादायविग्रहवाक्येप्रत्येकंविभक्त्यादिपदत्वंच इति
प्राग्वर्ण्यारोपेणैवसुपंधात्वादावात्वादीति तन्न आरोपितेनैवार्थवत्त्वस्यततोबोधस्यचदुर्वारत्वात् प्रातिपदि
कादीनांसर्वत्रारोपितमेवार्थवत्त्वंकस्यचिद्विशिष्टशक्तिग्रहमात्राद्बोधस्त्ववयवानांनानर्थकत्वंसाधयितुमीष्टे
वाक्यादिविकल्पवित्तयाबोधेनतत्राप्यवयवानर्थक्यापत्तेः केवलशास्त्रप्रक्रियोपयोगिविचारवतांतुज्ञान
स्यविशिष्टशक्तिमात्राद्बोधस्यवक्तुमशक्यत्वाच्च तदुक्तंवृद्धैः जहत्स्वार्थातुतत्रैवयत्ररूढिर्विरोधिनीतिरूढिः
समुदायशक्तिर्यत्रावयवार्थविरोधिनीतत्रैवस्यात्यथारथंतरशालिपर्णीगोरखरादौरहितदर्थः तत्रपदद्वयस
नैरर्थक्येपिरथकरणकत्वरणकर्तृत्वादिकस्याहार्यारोपेणप्रक्रियानिर्वाहोबोधश्च त्वयातुराजादिपदेआहार्यार्था
रोपोवक्तुमशक्यः तदर्थबाधाभावात् किंचराजपुरुषइत्यादौउत्तरपदार्थत्यागेनफलं किंचैवमजहत्स्वार्थान
भाष्यसंमता यदिजहत्स्वार्थापुरुषमात्रस्यानयनंप्राप्नोतीतिभाष्यासंगतेः उभयोरप्यनर्थकत्वेकस्याप्यान
यनंनप्राप्नोतीतिवक्तव्यंस्यात् एवंचवृत्तौआनुपूर्व्यंतरघटकत्वाभावविशिष्टानुपूर्वीशक्ततावच्छेदिकेति

ननियमः पूर्वपदेष्वनर्थकत्वंएकार्थीभावोयथाह्नायशास्त्रकल्पितमेवप्रकृत्यादेरर्थवत् बहुव्रीहिद्वं
द्वयोस्तुउभयोरप्युपसर्जनत्वेनोक्तरीत्यैवजहत्स्वार्थत्वंवक्तुंयुक्तंजहत्स्वार्थविकल्पेचसर्वार्थत्यागमिच्छता
बहुव्रीहिपदार्थस्यत्यागःसर्वस्यदर्शितइतिहर्युक्तेः एतेनजहत्स्वार्थतैवएकार्थीभावोजहत्स्वार्थाचव्यपेक्षेति
भाष्यतोलभ्यमपास्तंभाष्येसंख्याविशेषाभावचयोगाभावरूपमेकार्थीभावकृतविशेषमुक्त्वाअथैतस्मिन्नेकार्थी
भावकृतेविशेषेकिंस्वाभाविकंशब्दैरर्थाभिधानमाहोस्विद्वाचनिकमितिविकल्प्यस्वाभाविकत्वपक्षेव्यवस्था
प अथयेवृत्तिंवर्तयंतिकिंतेआहुः परार्थाभिधानंवृत्तिरितिअथयेनवाचनिकमितिपक्षमुक्त्वा अथतेषामेवं
ब्रुवतांकिंजहत्स्वार्थावृत्तिरुताजहत्स्वार्थेत्युक्तंतद्विरोधात् अनेनहिएकार्थीभावमुपक्रम्योक्तेतत्रैवपक्षद्वय
मितिलभ्यतेवाच्यस्यैवसंज्ञायामितिसमासेजहत्स्वार्थामुपेतिसमासेत्वजहत्स्वार्थेत्याशयेनईदूतौचसप्तम्य
र्थेइतिसूत्रेतत्रजहत्स्वार्थाजहत्स्वार्थेद्वे अपिभाष्यकृतोक्ते इतिनतद्विरोधः यद्वा पूर्वपदेजहत्स्वार्थत्वमात्रेण
तदुपपत्तिरित्यलंव्यपेक्षावादिनस्तुपरस्पराकांक्षारूपाव्यपेक्षैवात्रसामर्थ्यंनत्वेकार्थीभावः तदुक्तंभाष्ये
परस्परव्यपेक्षांसामर्थ्यमेकेसंप्रेक्षितार्थसमर्थमितिचेति अयंभावः राज्ञःपुरुषइत्यादौपरस्परसाकांक्षयो
राजपुरुषयोःसंबंधस्यराजादिपदोत्तरविभक्तिर्वाचिका राजपुरुषइत्यादावपिदृष्टयुपस्थितयोःराजपुरुष
योःपरस्पराकांक्षयोःसंबंधोराजसुंदरइत्यादौविशेष्यविशेषणभाववत्समुदायशक्त्योनत्वयंविशिष्टोप

स्थितिनियामकः उपस्थितयोराकांक्षोत्तरमेव तत्प्रतीतेः शक्तिग्रहस्योपस्थितयोरेवयार्थयोः संसर्गे इदं शक्त
मित्याकारः सत्तमर्थसंबंधस्य विशिष्टशक्यत्वादेव वाच्यम् घटस्यादौ वापीयदस्य सत्तमर्थे ग्रहे तेनं प्रगट इत्वं
अतएव समुदायस्य प्रातिपदिकसंज्ञासिद्धिः अयमपि पक्षो हरि वर्तन वार्तिक एवेति भाष्ये स्पष्टतया वाक्यादे
वेयं हानिर्भिन्नत्वेति मन्यमानस्य वृत्तावपि वाक्यतुल्याकांक्षायामेकत्वेन भेदसंबंधबोधः परभेदेन व्युत्पत्तिभेदादा
कांक्षावशेनैव तत्तद्व्युत्पत्तिकल्पनात् अतएव विभक्तेर्लुक् तदर्थस्यान्यत एव प्रतीतेरतएवाऽनन्तरस्माद्विशेषावगि
तिः वाक्यदृष्टविरुद्धविभक्तिकल्पस्यापि अनुसंधानान्नामार्थयोरभेदान्वयव्युत्पत्तिविरोधः अतएव दधिदृष्टे
त्यादौ भेदान्वयः विभक्तिलोपमजानतोपि अग्रहीतोपदेशात् लोकव्युत्पत्तितथाबोधः तदभावे तु तद्व्युत्पत्तेरज्ञा
नान्न दोषः विभक्त्यर्थस्य च प्रकृतिबोध्यार्थेन्वयाद्राजपुरुषं पश्येत्यादौ कर्मत्वधर्मविशिष्टे पत्युराजपदस्य राजसं
बंधिनि लक्षणा अतएव विशेषणान्वयो न राज्ञि भेदसंबंधेनान्वये तु ऋद्धोदनः पचतीत्यादावन्वयबोधवारणा
य भेदसंसर्गकनामार्थप्रकारकशाब्दबोधे तादृशहितप्रत्ययजन्योपस्थितेर्हेतुत्वावश्यकत्वेन तदसंभवः अत्रय
त्वे संके तद्विशेषसंबंधेन प्रत्ययपदत्वं जातिविशेषो वा न चैवं कर्मधारयत्वापत्तिरिति वाच्यं समासघटकप
दार्थस्य विशेष्यत्वे सति परलौकिके विग्रहे परद्वयेपि एकविभक्तिनिर्दिष्टत्वस्त्रैव कर्मधारयत्वस्वीकारात्
समंते तन्न चित्रगुः पंचपूलीत्यादेर्व्याप्तिरिति तत्र कंठेकालोदास्या पुत्रदस्मादौ लक्षणायां मानाभावेन तत्र

विशेषणान्वयापत्तेः न च तत्रापि दासीपरस्य तत्संबंधिनि लक्षणा दासीसंबंधिसंबंधीति बोधानुभवात्
विभक्त्यंतस्य तु न लक्षणा तस्य तदशक्तिभावात् विभक्त्यर्थस्य संसर्गतयैव भानाच्च भेदसंसर्गकनामार्थप्रका
रकबोधे च संसर्गबोधकत्वेन गृहीतपदज्ञानस्य कारणत्वेनादोषाच्च औपदेशिकपदस्य लक्षणया संसर्गबोधक
त्वमेव नानभिधानात् हृदि प्रयोजनयोरभावाच्च पारांगवद्भावानुरोधाच्चाहत्यैव तैव सामर्थ्यं अन्यथा परां
गवद्भावे एतत्समासादौ एकार्थीभाव इति वाक्यभेदः स्यात् तत्र परिभाषाप्रवृत्तसभावे तु कृते न मित्रावरुणाभ्यां
दृष्टा मृतस्य शोसारो कृतेनेसादेः परांगवत्वेनामंत्रितस्य वैसाधुदृष्टानत्वापत्तिः तत्र हतैनानुकृतेन मित्रावरुणा
विरतनयोरानशाधेरस्यर्थकेनाशाचेदस्यनेनान्वयेन परस्परमसामर्थ्यान्न दोषः मित्रावरुणाधिसेनत्वसंबोध
न प्रथमां तस्पष्टं चेदं वेद भाष्ये कर्मधारये विविशेष्यविशेषणभावेनान्वयोमपेक्षा साध्यः उपकुंभमिसारा
व्ययीभावे तत्र तु समूहे च निपातानां वाचकत्वेन एवौ तरपरयोर्मपेक्षा निपातानां वाचकत्वस्याप्यंगीकारा
त् निष्कौशांबिरित्यादौ क्रांताद्यर्थस्य कांताववृत्तरेव पदैकदेशमायेन भानं न च क्रांता कांताव शक्तसंसर्गस्यैव भानं ना
मस्ये अन्यमानमकत्विवा अदृष्टाकांतानुस्मयाश्वाकांतायाहृतैनायमानत्वेन तदृशाद्वाक्येक देशमायेनान्यत्रापि
बोधः हिरण्यादरस्यारो तु नर्थस्य समुपलेविसायामेवमेव बोधः अन्यथा क्रांताद्यर्थभानस्यैकार्थीभावहृतविशेष
षणत्वेन भाष्यकृतोसंगतापत्तेः एतच्च समथसूत्रे भाष्ये एव स्पष्टं बहुव्रीहावपि समुदायवाच्येनान्यपदार्थेनवि
शेषोपदार्थबोधकोत्स्यापरस्परान्वतयोरन्वयः अन्यपदार्थस्य समुदायवाच्यतावानेक अन्यपदार्थ इत्यादि

बलात् द्वंद्वे विचार्येद्वंद्वइतिशास्त्रबलात् साहित्यसमुदायशक्तमितिवदंतितन्न उक्तानामेकार्थीभावरूपत्वविशेषा
णांविशेषणेसंख्याविशेषानवगमविशेषणसंबंधाभावानांवचनसाध्यत्वेनगौरवात् ऋद्धीमादौभुक्त्यादिसंख्यावि
शेषावगमेनतस्यतदनवगमप्रयोजकत्वाभावात् द्वाविंशादेरन्मतो बोधेपिलुगभावाच्च किंचसमानार्थकवा
क्यस्याभिवहत्तये पूर्वपदावचनारंभेतत्रगौरवं किंच यत्रयुगपदुभयसंबंधविवक्षा परत्वादिना च क्रमेणहितीह
यं यथाब्राह्मणत्वनिसादौनअर्थभावार्थयोर्युगपद्विवक्षायां परत्वात्त्वप्रत्ययेततः समासस्तत्रविशेष्यविशे
षणंतत्रचविशेषणांतरमितिविषयताशाल्येवबोधः तत्रैवयदापूर्वेनअर्थसंबंधविवक्षाततोभावार्थविव
क्षातदाविशिष्टस्यवैशिष्ट्यमितिविषयताशाल्येवबोधः यदातुपूर्वेभावार्थविवक्षातदाविशिष्टवैशिष्ट्यमिति
विषयताशाल्येवबोधइत्येतत्सर्वंतादृशतादृशविषयताशालिबोधेविशिष्टशक्तिस्वीकारादेकार्थीभाव
वादेक्लेशेननिर्वहतिनत्वपेक्षावादे स्पष्टंचेदंतस्यभावइतित्वेभाष्ये किंचाकांक्षितसंबंधस्यनसमुदाय
शक्यत्वंमानाभावात् किंतुशिष्यमाणेलुप्यमानार्थाभिधायीतिन्यायेनपूर्वपदशाक्तत्वमेवोचितं एवंच
वाक्यस्वइस्रादावपिप्रगृह्यत्वापत्तिः सोमोगौरी अधिश्रितइत्यनेनसमत्वात् किंचैवंसमुदायस्यार्थवत्त्वाभा
वात्प्रातिपदिकत्वानापत्तिः नचार्थवत्त्वमर्थबोधकत्वमिवावयवशक्त्याऽर्थबोधकत्वमप्यस्तीतिवाच्यम् अ
शब्दार्थत्वात् यत्तुसमासेसर्वत्रोत्तरपदेलक्षणाप्रातिपदिकत्वमपितस्यैवेति तत्र तन्मात्रस्यप्रातिपदिक
त्वेपूर्वपदस्यसुपोलुगनापत्तेः उत्तरपदमात्रस्यप्रत्ययांतत्वेनतदसंभवाच्च पराङ्गवद्भावेतुनसमर्थपरि

भाषोपस्थितिः आमंत्रितार्थस्य यन्निमित्तत्वं तदेव परांगवदिति सार्थकेन तन्निमित्तग्रहणेन कृते नेसादेः परांगवत्त्व
वारणात् अतएव भाष्ये सत्रेणाग्नेस्त्रायुः संभवत्येसादेरसंत्रेणेसादेः परांगवत्त्वमाभूदिति तन्निमित्तग्रहणं
कर्तव्यमित्युक्तं समर्थपरिभाषोपस्थाने असामर्थ्यादेवाप्राप्तौ भाष्यासंगतिः स्पष्टैव क्रियाकारकव्यपेक्षाल
क्षणसामर्थ्यमिति कैयटोक्तं तु न युक्तं परस्परमपेक्षाया एव भाष्ये सामर्थ्यपदार्थत्वेनोक्तत्वात् किं चैवं सति
कृतः सर्वोऽभ्यतिकयेसादेः समासापत्तिः तादृशसामर्थ्यसत्त्वे ग्रहणफलाभावश्चैवं भाष्यं तु फलिभाष्यविरो
धात् अनादेयमेवेतिदिक् यत्तु समर्थसूत्रेतरनैरपेक्ष्यं सामर्थ्यं परविधिशब्देन पदत्वसंपादको विधिः
कर्तृकरणयोरित्यादिश्चतेन परविधिविधेयतरनिरपेक्षस्वार्थबोधकत्वसामर्थ्यं आवश्यकं तस्यतेन व्रीहिभि
र्यजेतेत्यादौ इतरनिरपेक्षे व्रीहिभिर्यजेतेत्यर्थसिद्धिरिति तत्सजातीयमेव गृह्यते तेन दंडेन चक्रेण घटं करो
तीत्यादीनां नासाधुत्वमितितन्न भाष्यानुक्तेः पश्यमृगो धावतिपचतिभवतीत्यादौ तदुक्तसामर्थ्यप्रत्यायकाभावेपि
विशेषणस्यान्वयेनावच्छेदकत्वेन भाष्यतएवेतरनिरपेक्षकर्मत्वादिबोधस्यैव व्रीहिभिरित्यादावपि त
स्य संभवेन फलाभावाच्चेतिदिक् नन्वेवं देवदत्तस्य गुरुकुलमित्यादावेकदेशे गुरुर्वादौ देवदत्ताद्यन्वयो न स्या
दितिचेन्न सर्वं वधिक पदार्थैकदेशे चैत्रस्य नप्तेत्यादावेकदेशान्वयस्यांगीकारात् न नप्तृत्वं हि तज्जन्यजन्य
पुंस्त्वं तदेकदेशे जन्मले चैत्रस्यान्वयात् यद्वा तत्रापि तज्जन्यजन्यपुंस्त्वसंबंधेन नप्तर्येवान्वयः एवं गुरुद्वारके

णत्वगुरुत्वसाधर्म्यरूपेणसंबंधेनरवेर्देवदत्तस्यकुलेनवान्वयः घटादन्यइत्यादावपिस्वप्रतियोगिकभेदसंबंधेनाम्
भिन्नेवान्वयः अन्यत्रतुतदृशप्रकारद्वयं अनभिधानाद्यत्रनेष्यते यत्रेष्यते तत्रशिवभागवतादौभवस्येवशिवो
भगवानभक्तिरस्येतितदर्थः एवंचसंबंधिशब्दः सापेक्षोपिसमर्थः समस्यते स्वार्थवत्सापेक्षताहितत्त्वापि
नहीयते इतरसापेक्षस्वार्थस्यैवतेः प्रतिपादनात् इत्यर्थः समुदायेनसंबंधोयेषांगुरुकुलादिना संस्तुपावय
वांस्तेनुयुज्यंतेतद्धितासहेतिकारिकायांसंबंधिशब्द इत्युपलक्षणं तस्माद्गमकत्वेभवतिविशेषणसंबंधोऽगमकत्वे
तुनेतितत्त्वंगमकत्वंतथाबोधजनकत्वमिसत्वं तत्रइतिम्बतुर्धासमासतद्धितकृत्सनाद्यंतधातुभेदात् तत्र
समाससंज्ञासंकेतविशेषसंबंधेनसमासपदत्वं यत्वर्थबोधायानुसंधीयमानविभक्तिकपूर्वपदकनामसमु
दायत्वंतदितिं तन्न दधिमधुरामित्यादावतिव्याप्तेः तत्रलुप्तविभक्त्यनुसंधानेनबोधइतिचेद्राजपुरुषादावपितुल्यं
लोपमजानतोबोधस्तस्युभयत्रसमत्वात्कृतेरिवार्थमिसेतद्दृढकेइवार्थमितिसमुदायेऽतिव्याप्तेश्च पर्यवसत् अ
नुगच्छन्तत्पच्चतभज्यतेतितिङंतघटितसमुदायेऽव्याप्तेश्च समासोद्विधा विशेषसंज्ञाविनिर्मुक्तः सुप्सुपेति
विहितस्तद्युक्तश्च अंत्यश्चतुर्धा अव्ययीभावतत्पुरुषबहुव्रीहिद्वंद्वभेदात् तत्पुरुषत्वादिसंकेतविशेषसंबंधे
नतत्पुरुषादिपदत्वंतत्राद्योदाहरणं पूर्वंभूतोभूतपूर्वः सुप्सुपेतिसमासः पूर्वमितिक्रियाविशेषणंपूर्व
कालवृत्तिपरंभूधातोः सत्तोसत्तिर्वार्थः पूर्वकालवृत्तिसत्ताश्रयइत्यादिबोधः द्विर्वहुमितिन्यायेनपूर्वशा

देनोक्तेपिप्रतीतत्वेन ः एवं विस्पष्टं पटुः विस्पष्टपटुः विस्पष्टपटुत्ववानिति बोधः विस्पष्टमिति पटुत्वविशेषण
तया नपुंसकं अथाव्ययीभावः हरौ इत्यधिहरि भक्तिः हर्यधिकरणिका भक्तिरिति बोधः अधिः सप्तम्यर्थवाचकः
उपकृष्णमित्यादौ उपः समीपवाचकः कृष्णसमीपमित्यर्थः अत्राव्ययानां वाचकत्वादेव पूर्वपदार्थप्रधानोव्य
यीभाव इत्युत्सर्गस्य निर्वाहः द्योतकत्वे हि द्योत्यार्थस्य विशेषणताया एव स्वायत्तत्वात्तद्बाधः स्पष्ट एव स्पष्टं चेदमग्रे
वक्ष्ये एतेन कुंभादिपदानां तत्समीपे लक्षणोपादितामर्थ्ययाहकमित्यपास्तं द्योतकस्य प्रजयतीत्यादौ द्यो
त्यार्थविशेषणकबोधे प्रकृतेश्च तद्विशेष्यकबोधे कारणत्वेन कार्यकारणभावद्वयकल्पने गौरवात् नि
द्रा संप्रति न युज्यते इत्यतिनिद्रं युज समाधाविति दिवादेरकर्मकस्य युज्यतेरिदं रूपं अत्र निद्राकर्तृक व
र्तमानयुक्तत्वाभाव इति बोधः अतेः संप्रति न युज्यते इत्यर्थः अतिनिद्रमासीदित्यादौ तथाप्यव्यवहारविषये
लक्षणा इतिहरि हरिशब्दः शब्दस्वरूपपरः इतिः प्रकाशवाची हरिशब्दप्रकाश इति बोधः रूपस्य योग्य
मनुरूपं सलक्ष्मणमिति साहित्ये समभिव्याहृतक्रियाकारकवृत्तिसाकल्यं च सहार्थः लक्ष्मणसहितं सकलं भोज्य
मत्तीति बोधः लक्ष्मणसाहित्यं च भोजनान्वितं प्रतीयते न वा तत्र शब्दशक्तिस्वभावात् सकलभोज्यभोजनप्रतिपा
दकेनैव तात्पर्याच्च सत्रैसाकल्येति प्रवृत्तिनिमित्तनिर्देशः एवं साकल्यपदं परेपि साग्नि अधीते अग्निग्रंथसहि
ते तदंतग्रंथकर्मकमध्ययनमिति बोधः यावत् श्लोकमच्युतप्रणामाः परिमाणपरिच्छिन्नत्वं यावदर्थः

श्लोकपरिमाणसंख्यापरिच्छिन्नाः प्रमाणा इति बोधः एकपदि विपरीतवर्त्तनं परेरर्थः एकहेतुकं विपरीत
वर्त्तनं पराजय इति यावत् सन्नगंगमुन्मत्तगंगं इत्यादौ समगंगा समाहार उन्मत्तगंगाधिकरणमित्यादिक्रमेण
बोधः एतेन पूर्वपदार्थप्रधानत्वमव्ययीभावत्वमित्यपास्तं उन्मत्तगंगमित्यादावव्ययत्वे: उत्सर्गस्त्वं गीक्रियत
एव इत्यव्ययीभावः कृत्स्नश्रितः कृत्स्नकर्मकश्रयणकर्त्तेत्यादिरीत्या बोधः मासप्रमितः प्रतिपच्चंद्र इत्यत्र मास
संबंधिपरिच्छेदारंभकर्त्तेति बोधः आह्निकर्मणि कर्त्तरि तृ: धान्येनार्थो धान्यार्थः हेतौ तृतीया अर्थशब्दो ध
नवाची धान्यहेतुकं धनमिति बोधः मासेन पूर्वो मासपूर्वः अवधुसमति कालावधिमद् इत्यस्ति कालयो मास
स्य मवधायकत्वेयं प्रयोगः पूर्वसदृशेति समासविधानान्नार्थकलहमित्यत्र योग इव पूर्वयोगेपि तृतीया भा
वेनं ऊनशब्दार्थः पूर्णत्वसंपादकवस्त्वभाववान् कलहः क्रोधपूर्वको व्यापारः वाक्कलहः वाग्रूपः स इति
बोधः दध्योदनः दध्युपसिक्त ओदनः गुणितिभावलभ्यमुपसेकः यपरात्परस्परविकारोपकारकं इदा
दि इति बोधः अश्वघासादयः षष्ठीसमासा इत्यन्यत्र विस्तरः उपमानोपमितसमासयोरर्थद्वयं तन्निपातार्थप्र
संगे उक्तं प्रसन्नेन दृग्गवृजेनेत्यादौ मयूरव्यंसकादिसमासः पूर्वपदार्थप्रधानतापरवल्लिंगताच अत एव राजो
तरमित्यादौ तद्धितसमासस्यापि पूर्वपदार्थप्रधानत्वात् नरपमितमिति साधारणधर्मप्रयोगात् न चानुपात्त
धर्मेणात्र सादृश्यं धर्मो वा दानेनुपात्तधर्मत्वेव सादृश्यमित्यर्थस्य प्रकाशो दुर्गमे स्फुटत्वात् परेंदुः सकलकल

इत्याद्यनुपपत्तेः धर्मान्तरितधर्मेण सादृश्यस्याभावाच्च किंचेदं सत्त्वं समानलिंगवचनत्वेनैव प्रवर्त्तते अतएव परव
ल्लिंगमितिसूत्रेण तत्पुरुषस्याधिकः प्रयोजनं स्यात् यः पूर्वपदार्थप्रधानएकदेशिसमासइति भाष्ये द्वंद्वैकदेशिनोरि
तिसमासे च तत्पुरुषग्रहणप्रत्याख्यानपरं भाष्यं च संगच्छते अन्यथा द्विगुद्वंद्वेनेत्यादि पूर्वपदार्थप्रधानस्य द्विगुपमान
परवल्लिंगताप्रसक्त्वेनतरसंगतिः स्पष्टैव द्विगुकृजस्य वीतत्त्वाणान्वयस्तु तस्य पूर्वपदार्थप्रधानत्वान्निबोधः मुखचंद्र इ
त्यादावपि मयूरव्यंसकादिसमासएव तस्य पूर्वपदार्थप्रधानत्वात् चंद्ररूपकव्यवहारः परवल्लिंगताचततएव ए
तेनोत्तरपदार्थप्रधानत्वं तत्पुरुषलक्षणमित्यपास्तं द्विगुद्वंद्वेनेत्यादाववयवैः स्वप्रतीत्याद्यव्ययीभावेतिव्याप्त्यो
सर्गत्वाद्भियतेएव पूर्वत्वात् पश्चाद्नुलिप्तः स्नातानुलिप्तः स्नातो नरकालिकानुलेपनाश्रयइति बोधः ए
वमादिः समानाधिकरणायतत्पुरुषः कर्मधारय इत्युच्यते नीलं च तदुत्पलं च नीलोत्पलं अत्र वाक्ये चकार
प्रयोगेण प्रवृत्तिनिमित्तोत्पलत्वनीलत्वयोर्वैसमानाधिकरणीमानी नीलोत्पलयोर्वा साहित्यं भासते अतएवात्र द्वंद्व
मात्रं वा नवकाशेन कर्मधारयेण बाधान्नेति भाष्ये उक्तं एवं च नीलत्वोत्पलत्वसमव्यवन्नीलमुत्पलमिति बो
धः नीलसमानाधिकरणं तदभिन्नमुत्पलमिति वा तत्र वाक्ये इवशुतो वशब्दाप्रयोगाय एकार्थीभावः एते
न कर्मधारये अवयवशक्त्योपस्थितयोरर्थयोर्विशेष्यविशेषणभावसंभवात् न तत्रैकार्थीभाव इति अपा
स्तं केचित्तु पंडितो ब्राह्मणः इत्यत्र विकारी स्यादिवाक्यस्यैव पंडितब्राह्मणइत्यादिवृत्तावुद्देश्यविधेयभावे

नान्वयवारणायैकोपस्थितयेसः अतएवव्यवघट्टनुः प्रथमभक्तइत्यत्रमत्वान्तरविधिरेवनत्वहीत्यत्रसमसइति
समानाधिकरणात्सामान्यवयट्कर्तृसंबंधिभक्तानुवादेनप्राथम्यविधिरितिमीमांसकाः यद्वृत्तयोगप्राथम्येतदुद्देश्य
तानियामके पश्चात्वतद्वृत्तयोगौविधेयतानियामकावितितुनयुक्तं प्रथमोभक्तः यज्ज्ञो ब्राह्मण इत्यादौ त
थाबोधदर्शनेनतस्यव्यभिचारात् अहंकृएकात्प्रसयइत्यादिसूत्रेषुव्यभिचाराच्च अतएवयद्वृत्तरहितयद्
तत्प्रयोगः प्राथम्यमित्याद्युद्देश्यत्वलक्षणमित्यादिपरोपाद्दानेनाख्यानेपतत्संसचितं नचविशेष्यतयोपस्थिति
र्विधेयतयान्वयेनियामकेतिवाच्यं यद्धि विशेष्यतयैवोपस्थितेः विशेष्यतासमानाधिकरणैवविधेयतेस्य
विनयुक्तं अज्ञातार्थस्यैवविधेयत्वेनतस्यविशेष्यत्ववत्विशेषणत्वस्यापिसंभवेननियमेमानाभावा
त् नचतथाशाब्दबोधंप्रतिउद्देश्यविधेयवाचकघटितेकसमस्तपदभिन्नपदजन्योपस्थितिर्हेतुरितिपर्वो
क्तेपीतवाससंचतुर्भुज इत्यादौचनदोषइतिवाच्यं सकलवृत्तिभेदघटितगुरुतरकार्यकारणभावकल्पना
पेक्षयैकार्थीभावस्वीकारस्यलघुत्वादित्याहुस्तन्न तथान्वयाभिप्रायेणसमासमासप्रयोगप्राप्तत्वादिपर्या
लोचनोत्तरंबोधस्येष्टत्वात् अतएवालंकारिकैरुद्देश्यानंतर्याभावेविधेयाविमर्शउक्तोयत्काराणाम
स्यादौ तत्रविलंबेनतथाप्रतीतिरित्यादर्शोत्सर्गपरित्यागात्सहृदयवैमुख्यंवादुष्टिवीजं तथाप्रकृतेपिवि
लंबेनप्रतीतिः समासेतयाऽप्रतीतिरिमुत्सर्गपरित्यागोनसहृदयोद्वेगोवादुष्टिवीजे तद्वदेवन्यायस्यापि

नासाधुता अत एव कालप्रत्ययोभ्यासलोपश्चेति सौत्रप्रयोगात् अत एव सप्तदश प्राजापत्यान्पशूनालभते वाजपेययाजी य एवं वेद ...

योभवति लोहितोष्णीषाऋत्विजः प्रचरंतिसादौ वाजपेययूपारत्निमुष्टीबंधान्यसप्तदशत्वलोहितादिविधिरिति मीमांसकाः ... प्रथममेवमेयपटरयस्तत्राप्यसौ तापसः सोप्यत्रैव निहंति राक्षसकुले

जीवसहोरावणः धिग्धिक् ... जितं प्रबोधितवता किं कुंभकर्णेन वा स्वर्गग्राममटिकाविलुंठनवृथोच्छूनैः किमेभिर्भुजैः अत्र प्राप्तमरिसत्वमयमिमन(प्राप्त) नचात्रयूपारत्नमुष्टीबंधयोरतिदेशप्राप्ततया

तिदेशादुपदेशस्यबलवत्वेन एवं मेतैरेवविशिष्टविधिरिति वाच्यं यूपऋत्विजामप्यतिदेशप्राप्ततयात

त्पर्यालोचनेनंतरमेवास्यविधेः प्रवृत्तेः प्रथमतोत्रविशिष्टविधिरेव प्राप्ताप्राप्तविवेकेतुविशेषणपर्य

वसानमित्यस्याप्ययमेवार्थः आपाततः प्रतीतावपि प्राप्तत्वादिपर्यालोचनेन तात्पर्यग्राहकत्वाद्वो

धइति उच्चारितशब्दस्यतावत्सर्वं तंतात्पर्यात् वाक्येपि प्राप्तत्वादि पर्यालोचनमेवतथान्वयेतात्पर्य

ग्राहकं अत एव यं इति त्राह्मणप्रत्यादौ यस्येवाप्राप्तत्वं तत्रैव विधेयतापर्यवसानं इष्यते यद्वत्तयो

गादिकमपि प्राप्तत्वादेरेवगमकमेवं च समासेतथान्वयेनैकप्रसरताभंगेनासामर्थ्यात्समासा

नापत्तिरिति मीमांसकनयोः मयात्वं प्रथमभवत्त इत्यत्रतु समासाप्यापेक्षया वाक्यस्थसोर्वलवत्वेन

प्रथमतोनेनैव भवतांतर विधिरिति निरोधः नन्वेवं कठोपिकर्मभीष्मारयोपीति भाष्योक्तपक्षेपरमे

णकारकेणाहृतं परमकारेणाहृतमित्यादौ तत्पुरुषे तुल्यार्थेति सूत्रभाष्योक्तस्य परिनिष्ठितेति विभक्त्यासमा
मस्यानुपपत्तिः विशेषणविशेष्ययोर्द्वयोरपि तत्र प्रत्येकं करणत्वेन क्रियायामन्वयेन सामर्थ्याभावात् न च य
यत्क्रिययाप्तुमिष्टतमं तत्सर्वं कर्म यत्क्रियासाधकतमं तत्तत्करणं द्रव्यं गुणश्चनद्युसौकटमात्रेण संतुष्य
ति एवं च सर्वेषां क्रियायां प्रत्येकं कारकत्वात्सर्वेभ्यः कर्मादावेव न तद्विभक्तिरिति तत्सत्त्वबीजं तद्युक्तं आस
नशायनादिक्रियोपयोगितया द्रव्यस्येप्सिततमत्वेपि गुणादेस्तत्वाभावादिति वाच्यं कारकांतरापेक्षयैव प्रक
र्षस्य विवक्षणात् ननु स्वकक्षायामप्यन्यथान्वेन यथादीविकया व्रजतीत्यादौ सर्वेषां करणत्वानापत्तेः
न च पार्ष्णिकपरस्परान्वयेन सामर्थ्यमिति वाच्यं तस्य दुर्वचनत्वात् तथाहि सन शाब्दः शब्दबुद्धिकर्मणां
विरम्यव्यापाराभावात् न च गुणादेः परिच्छेद्याकांक्षासत्त्वेन द्रव्यस्य च परिच्छेदकाकांक्षासत्त्वेन प्रथमं
द्रव्यगुणयोः श्रौते क्रियासंबंधे विपश्चादुक्ताकांक्षावशात्परस्परं विशेषणविशेष्यभावेन विशिष्टस्य क्रि
यासंबंधविषयो बोधः आकांक्षावशादेव पुनरनुसंधाने शब्दस्य कारकाणां क्रियान्वयपरत्वे च श्रौत
प्रथमबोधेनोपपन्नं द्वितीयमाशयत्व सामर्थ्यमिति वाच्यं एवं हि श्रौतसंबंधस्य बलवत्त्वात्तत्र च प्रत्येकं
साधनत्वबोधात् श्वेतं छागमालभेतेत्यादिविषये श्वेतछागाभावे कृष्णछागेनेव येन केनचित् श्वेते
नापि यागस्य सांगत्वापत्तेः किंच तत्तद्विभक्त्यंतस्यानुसंधाने कारकत्वेन द्रव्यान्वयायोगात् न च विभक्ति

रहितस्यानुसंधानं तस्याबोधकत्वात् न केवला प्रकृतिरितिनिषेधाच्च न च समस्तपदानुसंधानं यत्र

साकांक्षा स्याद्वयस्य अन्वयस्तत्रैव समासानुपगमेन तदनुसंधानासंभवात् किंच समस्तपदानुसंधा

नेन सामर्थ्यवर्णनं सामर्थ्यज्ञानाधीनत्वसमासइ समोमाश्रयापत्तिः किंचैवं सति वाक्ये परस्परमुद्दे

श्यविधेयभावेन परस्परान्वयस्य दृष्टेर्लभ्यापत्तिः समस्तपदे परैस्तथान्वयास्वीकारात् न च यत्र उक्तयोगः

प्राथम्याभिधायित्वमुद्देश्यत्वं तत्राभिसमभिव्युत्क्रमात् वाक्ये प्रथमं क्रियान्वयरूपमेव प्राथम्यमस्मादुद्देश्यत्वातिप्रसक्त

त्वात् एवं च तयोरुद्देश्यविधेयत्वाभ्यां क्रियान्वयस्यावश्यकः न हि समासपदैकदेशस्यास्यातेनान्वय

संभवः आहोसमासघटकपदार्थान्वयेन वतस्य साधुत्वं नकारान्तयमेव समासादावेकार्थीभावो नाम

तोनसमस्तपदे तथान्वयः प्रकृते तु आरादुपात्तसमस्तपदयोः क्रियान्वयसंभवेन पश्चादनुसंहित

समस्तपदे वितयान्वयसंभव इति वाच्यं एवमनुसंहितासमस्तपदे तथान्वयसंभवेनोपात्तसमस्तपदे

वितथान्वयापत्तेः किंचोद्देश्यत्वविधेयत्वाभ्यां तयोः क्रियान्वयस्तुक्तिमात्ररमणीयं तयोः परस्परानि

रूपितत्वेनोद्देश्यविधेययोरेव तद्रूपेणान्वयात् किंच नीलमुत्पलमस्तीत्यादौ सत्तायामुत्पलस्योद्दे

श्यत्वेनान्वये तस्याविधेयत्वं वा संनीलस्यविधेयत्वेनान्वये च तस्योद्देश्यत्वं वा चेन चेदमावृत्तिं विना सं

भवतिवैरूप्यात् वाक्यभेदप्रसंगेनैवं विधेविषयेऽनुभवसिद्धः किंचाभियुक्तोक्तितः उद्देश्यस्य प्राथम्यत्वा

मेपि विधेयस्यानन्तस्त्राभः तद्धितयोगः यन्नात्वं स्याद्विधेयस्य लत्तणमिति तच्छेषात् किंचैकोपालिस्यारा
विक इति षष्ठ्यंतस्यादेशो क्रियान्वयासंभवः स्यामादेशभावसंबंधस्य षष्ठ्यर्थत्वेन तस्य क्रियायामभावात्
एवं राज्ञः पुरुष इत्यादौ स्वत्वामिभावसंबंधाद्यर्थकषष्ठ्यामपि तथान्वयासंभवः किंच भवदुक्तं प्राथम्यम
व्यसंगतं अभियुक्तोक्तवाक्यशेषविरोधात् मद्कारोपमित्यादावुद्देश्यस्य प्राथम्याभावेनाविमृष्टविधेयां
शतेति प्रकाशोक्तेरसंगतेश्च अपि च बहुव्रीह्यादेः कुत्रभाष्ये पूर्वोच्चारितः संज्ञी परोच्चारिता संज्ञेत्यादिग्रंथेन
पूर्वोच्चारितत्वरूपप्राथम्यस्यैवोक्तत्वात् उक्तएकार्थीभावोपि निर्मूलः तत्तत्प्रत्ययविधायकशास्त्रीयप्र
सासत्तिमात्रमूलिकया प्रकृतिप्रत्यययोः सहार्थं ब्रूत इति भाष्यसंमतत्वस्यैव प्रकृतिप्रत्यययोस्तल्लाभेन तत
द्धितविधौ समर्थपरिभाषोपस्थितेर्भाष्योक्ताया वैयर्थ्यापत्तेः अस्मदुक्तैकार्थीभावस्यैव समर्थपदार्थतया
भाष्ये उक्तेश्च न च मानसः पार्ष्ठिकबोध इति वाच्यं शब्दयोरर्थद्वारकपरस्परान्वयाभावेनासामर्थ्यस्य
तदवस्थत्वात् किंच नीलमुत्पलं पश्येत्यादौ दर्शनकर्मत्वस्य साक्षादेव गुणे सत्वेनाकांक्षाभावेन पा
र्ष्ठिकबोधे मानाभावात्तत्र समासानापत्तिः यत्र गुणवाचकानां स्वपरिच्छेद्यद्रव्यद्वारा क्रियाकारकत्वं
तत्र परिच्छेद्यद्रव्यं किमित्याकांक्षायामुपात्तमेवेत्यरुणाधिकरणवार्तिकोक्तेः किंच नीलादिपदार्थानां परिच्छेद्या
कांक्षायां द्रव्यमुपात्तगुणवदेव गुण उपात्तद्रव्यवृत्तिरेवेति भेदसंसर्गविषयकस्य पार्ष्ठिकस्य लाभेन निय

मतोऽभेदविषयकयार्थिकबोधालाभेनसामानाधिकरण्यनिमित्तसमासानापत्तितन्निमित्तपुंवत्त्वानापत्ति
स्मदर्शनीयामातेसारेतद्वारणायमूलेऽनुत्तेः प्राग्भायत्रसामानाधिकरण्यंतत्रैवपुंवत्प्रवृत्तेः एतच्चबहु
व्रीहिप्रकरणेस्फुटीभविष्यति एतेनसमासघटकीभूतंगुलियरमितयापात्तमिति चेदत्राहुः भीष्मंकटंकुर्विला
दौभीष्मादिगुणविशिष्टकटस्यकरोतिक्रियायेसितत्वात्कर्मत्वंतच्चकटपदोत्तरद्वितीययाविशिष्टस्यप्रधा
नात्मतिरिक्तत्वयाप्रधानगतस्यतस्योक्तौविशिष्टगतंतदभिहितमेवेतिभीष्मादिभ्योद्वितीयानस्यादिसाशं
कयमाध्येविशिष्टगतकर्मत्वस्यसमानविभक्तिकविशेषणंविनाप्रत्यायितुमशक्यत्वेनभीष्मादीनामपि
कर्मत्वशक्तिमत्त्वादुक्तत्वेपिद्वितीयेत्येकंसमाधानंकृतंतस्यायंभावः विशिष्टस्यकर्मत्वेविशेषणस्यापित
त्वंप्रमयाविशिष्टंकर्मेत्युक्तिस्याघातः कुंडलीपंडितइत्यादौकुंडलादेः पंडितत्वप्रमात्तुनशोत्वाध्वस्ततइत्या
दौविशेष्येबाधेविशेषणगतस्यतत्रारोपेणप्रतीतिवत् अत्रविशेषणेबाधेविशेष्यगतस्यारोपेणलोप
पत्तेः एवंचतदंशेभ्रमत्वंनानस्यपत्रत्वबाधस्तत्रनारोपितत्वंविशिष्टगतैककर्मत्वंप्रतिपादनंचनोभ
यत्रद्वितीयांविनेतिविशेषणादपिसाप्रत्ययमनंप्रकृत्यर्थान्वयित्वमिवविशेषणाविशिष्टस्यप्रकृत्यर्थान्व
यित्वमपि अत्रविशेषणपदात्कर्मत्वाधनालिंगितैवतदुपस्थितिर्विशेष्यस्यतुतद्वैशिष्ट्यप्रतीतेविशिष्टसे
ककर्मत्वबोधेविशेषणेनरद्वितीयापिसहकारिणी सत्रसामर्थ्येनानुपपन्नं ततोयवाकरोपिकर्मभी

मं०ज०
२०९

ष्मादयोपिमुक्तं तस्यायंभावः उभयोरविकर्मत्वात् कटपदेनेतरद्वितीयाकटगतकर्मत्वोक्तावपिविशेष
णगतकर्मत्वप्रतिपादनायविशेषणाद्पिद्वितीयानत्वोत्पत्तिरपिगुणस्यद्रव्यद्वारैववाच्यारानादिकर्मताव
द्द्रव्यद्वारैवेतिसाक्षात्सकलादेरपिद्रव्यद्वारात्फलाश्रयादेरपिगुणस्यद्रव्यद्वारैव रविकर्मत्वादिकं एवंचविशे
षणांशस्थकर्मत्वादिशक्तिर्विशिष्ट्रेनैवबोधकं द्रव्येणाभेदानुतस्याशक्तेर्वाक्यार्थबोधेविशिष्यास्यहः अत्रापिप
लेविशेषणविशेष्ययोः परस्परान्वयपूर्वकमेवक्रियान्वयनियमहानिः साक्षात्क्रियाजनकानां साक्षादे
वतदन्वयः इतरद्वाराकारकाणांतुतदन्वयपूर्वकमेवक्रियान्वयनियमहानिः साक्षात्क्रियाजनकानां
साक्षादेवतदन्वयः इतरद्वाराकारकाणांतुतदन्वयपूर्वकमेवक्रियान्वयइतिनियमेनतदहानेः एतेनगु
णानांचपरार्थत्वादसंबंधः समत्वस्यादितिमायविरोधः परस्परान्वयेदसपात्तंउक्तरीत्यासमत्वाभा
वात् एवमेवयुक्तंज्ञानद्वयकल्पनेगौरवात् अननुभवाच्च किंचकारकविभक्तिसाधुत्वायप्रथमंक्रियान्व
यः समासस्यपार्ष्ठिकान्वयमादायसाधुत्वमुतसमासस्यैव प्राथमिकपरस्परान्वयेनसाधुत्वंविभक्तेस्तु
पार्ष्ठिकेनैसत्त्वविनिगमनाविरहात् द्वितीयोपपसर्यमेवैयाकरणनाभाष्यकृतसूत्रकृत प्रभृत्यादिविभा
गकल्पनाकन्नत्ववबोधेविशेषः केयरस्याप्यत्रैवतात्पर्यमितिनिरूपितंभाष्यप्रदीपोद्योतेएवंचात्रापि
सामर्थ्याभिधानात्ः स्पष्टएवतत्त्वतवापिस्वेतच्छागदसादौ मेतच्छागाभावेयेनकेनचिद्देनापियागसांगता

कुतोनेतिवाच्यंजातेःशब्देनकथमपिभेदास्पर्शेनद्रव्यात्मकत्वान्नतत्यागः नहिभवतिशावलेयस्यगोरितिगु
णस्तुयदस्मगुक्तइतिभेनप्रतीत्याद्रव्येसत्वेवगुणायगमेनचविजयपद्गष्टेतेननतस्यत्यागात् जातेस्त्यागेवसर्व
थैवसाधनभेदात्तद्धि यांतरमेवस्यात् पंकतेनुसादवपात् बहिरंगुद्देरनपगमस्यदोषात् अतएवनद्ध्युः सं
बुद्ध्योरितिसूत्रेभाष्येसंबुद्धंतानांराजपुरुषादारकेसाद्रेनसमासः इहतावत्समानार्थेनवाक्येनभवितव्यंसमासेन
चयथेहार्थोवाक्येनगम्यते नासौजातुचित्समासेनगम्यते अवयवसंबोधनंवाक्येनगम्यतेसमुदायसंबोधनं
समासेनेत्युक्तं पृथगवयवार्थयोरभिमुखीकरणेपरस्परस्यैकार्थीभावलक्षणसामर्थ्यायोगादितिकैयटः संबो
धनंवाक्येनगम्यतेसमुदायसंबोधनंसमासेनेत्युक्तं पृथगवयवार्थयोरभिमुखीकरणेपरस्परस्यैकार्थीभाव
लक्षणसामर्थ्यायोगादितिकैयटः संबोधनंविभक्त्यर्थस्यापिनुबाधनत्याविधेयान्वयित्वेनोभयोरपिक्रिया
न्वयित्वेनपरस्परान्वयाभावान्नैकार्थीभावइतितद्भावः तवतुनीलघुसलामितादौपार्ष्णिकान्वयेनसामर्थ्या
वश्याविवकुंशक्यत्वेनभाष्यादिसंगतिःस्पष्टैव तस्मान्मुकुन्दरीमानीलघुसलामितादौप्रत्येकंकर्मत्वेपिवि
शिष्टस्यैवेतरान्वयादृत्तिसामर्थ्यंसंबोधनस्थलेप्रत्येकमभिमुखीभावेएवोभयत्रसंबोधनविभक्तिरितितस्या
विशेषणविभक्तित्तुल्यत्वादितिनतत्रान्यस्यप्रकारत्रयसंभवः प्रत्येकंसंबोधनविभक्तौकरादिविशिष्टसंबो
धनविभक्तौकरादिविशिष्टसंबोधनाप्रतीतेर्यथेहार्थइत्यादिनाभाष्येणास्पष्टमेवास्यवाक्यस्याविशिष्टा

मंजू०
२१०

बोधकत्वमुक्तमिहेत्यनेन च भ्रमत्रवादस्य समासस्य समानार्थबोधनसामर्थ्यं च दर्शितमिति भाष्यविदो विभा
वयंतु करणत्वकर्मत्वेनान्वयविहितीयायोग्यसुहृदः स्वयं निर्धनाअपि स्विद्धनेनैव धनफलभाजस्तद्वत् तदे
कयोगक्षेमत्वादिति कैयटः अयं सामानाधिकरण्यं नामैकार्थबोधकत्वं परस्परभिन्नशक्तित्वे सति तदाशक्ति
भेदेनार्थभेदादेकार्थत्वभंगात्तस्माद्विशेष्यसमानशक्तिकत्वं तद्भिन्नविशेषणानामिति तत्समानविभक्तिक
त्वमेव फलाश्रयत्वादिवत् तद्वत् समानाधिकरण्यमपि तत्तत्कौलीनामकमिति एवं च पूर्वोत्तरपदसैकवाक्य
तया मध्यमपदलोपे पुत्रादीनां बोध उचितः अरुणाधिकरणसिद्धांतोऽप्येवमेव अर्थैकत्वे द्रव्यगुणयोरैककर्म्या
न्नियमस्यादिति जैमिनिः सिद्धांतसूत्रात् द्रव्यगुणबोधकशब्दयोरर्थैकत्वे परस्परमभेदान्वयेनैकार्थबोधकत्वे
सति तत्कर्मादिद्धिश्यैकक्रियासंबंधान्नियमः परस्परावच्छेदरूपरतिनिर्णयात् लोकसिद्धाया आरुण्यवि
शिष्टैकहायन्याः क्रियाविधानान्नवाक्यभेदः गुणवचनानां सन्निहितविशेष्यपरत्वं तद्गतलिंगादिग्राहित्वं चेत्ये
ऐलदधिलिंदांतदसलंतत्वेन्द्वेवरीसानीलघटमानयेत्यादौ समावेहलेनीलादिपदोत्तरं द्वितीयाद्याप्तिरुक्तरी
त्याकर्मत्वसत्वात् इति चेन्न जातविभक्तेः सुपो धातुप्रातिपदिकयोरिति लुका स्ते: समासादिद्वितीयस्यैवोपस्थितिसा विशेष्यो
तरविभक्त्येतद्गतसंख्योक्तत्वाच्चेत्याहुः अभेदान्वये च समानविभक्तिकनाम्नोरेव साधुत्वमिति सर्वोत्ति
पत्तेः आख्येयपदं नामपदेन च विशेष्यतत्विरुद्धियितं तदधिप्रदेशेस्मादावपि लुप्ताविभक्तयातत्वं विभक्तिलोप

मजानन्तलुप्तस्य मन्नताधि उपदेशात उभयत्रानमधिपुलभं राजपुरुष इत्यादौ लुप्तविभक्तेरेव विभक्तिद्वविभक्तित्वं
विशेषणविभक्तिरभेदार्थेतितु न युक्तं मानाभावात् लक्षणाया विभक्त्यावभावाञ्च विशेषणविभक्तेः साधुता
र्थमपि विंसमेव तथानुशासनाभावात् समानविभक्तिकत्वं समानार्थकमविभक्तिमत्वं तेन राज्ञः सुतस्य धन
मित्यादौ न दोषः एकत्र षष्ठ्याजन्यत्वार्थत्वे तापरत्र स्वत्वार्थत्वेन तत्वाभावात् समानवचनत्व समानलिंगत्वे
वचनाभेदान्वयेन चैव दाः प्रमाणंगोदौयामाः तेन तु समक्रियाचेत शौसंहि यत्सा प्रकृतिर्जनस्य मेत्यादौ व्यभिचा
रात् सुरूपं समानाधिकरणपंतु वचनलिंगैकत्वे एवेत्याहुः कर्मधारयविधायके विशेषणं विशेष्येण बहुलमिति
सूत्रे विशेषणविशेष्यत्वे विषयता विशेषणत्वेन विशिष्टेन तु परिच्छेद्य स्वपरिच्छेदकत्वे तथा सति नीलम
त्पलमित्यादौ पद्मे उत्पलस्य परिच्छेदकत्वेन विशेषणत्वात् उत्पलनीलमित्याद्यापत्तिः अत एवेतरस्य संधा
नत्वादिति प्रधानशब्दे विशेष्यं भाष्येमवहृतं तत्र विशेष्यभूतेनाप्युत्पलेन नीलस्याश्रयांतरव्यवच्छे
दः क्रियते यथा राजपुरुषस्य विशेष्यभूतो पि पुरुषो राजानं स्वांतरेभ्यो व्यवच्छिनत्ति तेन परिच्छेद
कत्वं विवक्षताविशेषत्वं एव विशेषणता समनियतमित्यपास्तं अत्र सामानाधिकरण्यं विशेषणविशेष्य
त्वे चार्थयोरेवस्तत्रेतु तत्प्रतिपादकशब्दे लक्षणविशेषणादिशब्दानां न चोभ्याभ्यमिक द्रव्यस्यैवाभिधा
नात् भेदाश्रयविशेष्यविशेषणभावानुपपत्तिरितिवाच्यं धर्मभेदेन द्रव्यभेदानित्याधिकं द्रव्यं चा

धिष्ठानचैतन्यरूपंतयोराश्रयइतिसामानाधिकरण्यमप्युपपन्नंविशिष्टशक्तिग्रहकालेतदुपलक्षितेष्व
पिशक्तिग्रहः अतएवकर्मधारयविषयेभाष्योक्तंद्वंद्वापवादत्वंसंगच्छते नीलसमानाधिकरणंनीलमुत्पल
मितिबोधः उक्तंचहरिणाव्यात्मानस्त्वयत्तस्मात्तुद्धोनानाव्यवस्थिताः आश्रयाश्रयिभावेनस्वयंपदेभ्य
आगमइतियत्तुप्रवृत्तिनिमित्तयोरेकद्रव्यवृत्तित्वेसामानाधिकरण्यंविशेष्यविशेषणभावस्तुप्रागवदेवेति
तन्नविशेष्येणसमानाधिकरणेनेतिसूत्रविरोधात् अन्येतुशब्दयोरेकविशेष्यभूतार्थप्रतिपादकत्वरू
पंसमानाधिकरण्यंविशेषणविशेष्यत्वमपितदर्थप्रतिपादकत्वरूपंतयोरेवेत्याहुः तत्रजातिशब्दसं
ज्ञाशब्दार्थयोर्गुणक्रियासमभिव्याहारेविशेष्यत्वस्वभावात् यद्वाजातिसंज्ञाशब्दयोरितरेतरान्वयेरूढत्वाद
योद्गमस्वनाअविसमासेगुणादिमात्रबोधकाः तादात्म्येनगुणादिविशिष्टद्रव्यप्रतीतेश्च गुणादयोवि
शेषणांस्पष्टंचेदंहरिग्रंथे गुणयोः क्रिययोर्गुणक्रिययोश्चानियमएवातोनीलोत्पलमितिव्यवस्थितएव
प्रयोगः खंजकुब्जः कुब्जखंजइत्यादावव्यवस्थितएवव्याप्यव्यापकभावापन्नयोस्तुव्यापकस्यविशेष्य
त्वेवतेनविशिष्यावृत्तइत्येवनैवराक्षषकः समावेशइतिभाष्यादेतत्प्रयोगाभावएवेत्यन्ये एवंचवृद्धिस्थसोम
याजीसाधुरसाधुर्वेदकश्चिरमदेवेसर्वधाद्बहुत्वग्रहणाद्वासाधुसर्वंचेदंभाष्येस्पष्टमित्यलं अमोराजाराजां
तरंमयूरव्यंसकादिसमासः ततएवपरवल्लिंगताभिन्नवाच्यंतरशब्दस्यनपुंसकत्वात् तदर्थस्यपर्वप

दार्थविशेषणं अत्र चरमपदजन्यबोधप्रकाराश्रयबुद्धिस्थयत्किंचित्प्रतियोगिकत्वं च तदर्थे भेदे कुत्सत्ति
विशेष्यलभ्यं पूर्वकायो ईपियस्य कौमारो कायसंबंधी पूर्वो भागः इत्यादिप्रकारेण बोधः एकदेशिसमा
सप्रमाख्यातनाध्यमते कायादिशब्दानां तदवयवपरतया कायावयवरूपः पूर्वो भाग इत्यादिक्रमेण
बोधः मासो जातस्य मासजात इत्यत्र विग्रहे इष्टे सौ चोत्तरपदार्थप्रधानत्वं न च विग्रहे पितत्वे जाता तस्य अनुप
पत्तिः विशेषणादेव तद्विधानादिति वाच्यं तस्य हृत्सर्थबोधकत्वविवक्षायां तथा सातेपि पूर्वजातसंस्कारानिहु
ने दिस्थेनिरूपयिष्यामः मासपरिच्छेद्यो जात इति बोधः जातस्य परिच्छेद्यत्वं तु परिच्छेदजनकनामाश्रयत्वेनास्य जा
तस्य क्रियाकाल इति प्रत्ययो मासजात इत्यस्य सार्थमुत्तरत्वं बोध्यं नञ्समासे बोधस्तु नञर्थनिर्णये निरूपितः क
र्मधारयान्नञ् तत्पुरुषाच्च नमत्वर्थीयः मत्वर्थीयां तेन च नतो इति द्विहुयकल्पते गौरवेण न च बहुव्रीहेरेव सा
धुत्वात् कर्मसतिशिष्टयोगानुरोधेन लाघवानादराद्वस्येव यथार्थं इत्युक्तिः अत्र वाग्मी एकदेशित्यादि प्रत्तग
त्वं आचार्यः प्राचार्यो निष्क्रांतः कौशांब्या निष्क्रांतः कौशांबिः इत्यादौ प्रभृतिशब्दानां गतक्रांताद्यर्थे वृत्तिः इति तत्पुरुषः
चित्रगुः चित्रा गावो यस्येति विग्रहः चित्रगोसंबंधीति समासार्थः षष्ठ्यर्थः संबंधिन्यन्यचित्रा गाव इति विग्रहे बोधः
द्वितीयविशेष्यविशेषणभावविपर्यासः यत्तु बहुव्रीहावन्यपदार्थे उत्तरपदस्य लक्षणा न च गोपदेन गोस्वामिलक्ष
णायां तत्र चित्रपदार्थानान्वय एकदेशत्वादिति वाच्यं चित्रपदस्य तात्पर्यग्राहकतया गोपदेनैव चित्रगोस्वा

मिलक्षणान्तरदोषः एवंग्रामोदकं आहरइत्यादौ उदककर्तृकप्राप्तिकर्मीभूतो लक्ष्यते प्राप्तपदं तात्पर्यग्राहकं
प्राप्तिकर्त्रभिन्नमुदकमिति भिन्नवोधो नतुस्वकर्मकर्तृकप्राप्तिकर्मत्वसंबंधेन तत्संबंधिग्रामलक्षणेति नयुक्तं
उदककर्तृकप्राप्तिकर्मग्राम इति विवक्षितार्थानिर्वाहात् प्राप्तेतिक्तस्य कर्त्रर्थकस्य कर्मणि लक्षणा प्राप्तोचोदक
स्यकर्तृतासंबंधेनान्वय इत्यपि नयुक्तं उदकरूपकर्तुरनुक्तत्वेन ततस्तृतीयायो वैयधिकरण्याद्बहुव्रीह्यनापत्तेः
उदककर्तृकप्राप्तिरिति वोधो नतंतत्कर्मग्रामो लक्ष्यत इत्यपि नयुक्तं प्रत्ययार्थप्राधान्यस्यनाम्नः सत्वप्राधान्य
स्यचभंगापत्तेः विशेषणैकदेशत्वेनोदकान्वयासंभवाच्चेति नव्याशयविरक्तत्र उत्तरपदे एव लक्ष
णायां ननुलकरणे वितिगमकाभावः पुरुषइत्यादौ वहुव्रीहिर्यत्पुरुषेन्वयवारणाय पूर्वपदार्थे लक्षणेति वाच्यं स
र्वेकरत्यादौ व्यभिचारात् दधीयद्दरातीत्यादौ वहुवचनान्वयापत्तेश्च दधिबहुर्ददातीत्यादौ दधिबहुत्वान्वयाप
त्तिः परावनन्वयापत्तिश्च किं चैवमन्यपदार्थे वर्तमानानेकसुबंताभावेन वहुव्रीहिरेवानापत्तिः अपि चैवं घटा
दिपदेऽपि चरमवर्णस्य प्रत्ययरूपस्य लक्षणयैवोपपत्तौ विशिष्टशक्तिकल्पनोच्छेदः अवयवलक्षणाद्यज्ञानदशा
यांबोधात्तत्रसाबेत्स्यतेपितुल्यं कस्यचिदवयवलक्षणाज्ञानादबोधेन तत्र साधुत्वं सत्र अविरोधात् सत्रैला स
णिकार्थान्वाख्यानस्य अदृष्टत्वात् व्याकरणस्मृतेर्लेशेऽग्राहकत्वभंगापत्तेश्च किं चैवं प्रातिपदिकाकर्मत्वादेरप्रा
दृष्टइतिशाब्दिकाः प्रत्ययास्तत्तलक्षणाः प्रत्ययानां प्रकृत्यर्थान्वितस्वार्थबोधकत्वव्युत्पत्तेरस्थस्यपर

रस्मरं प्रकृतिप्रत्ययार्थान्वयेन वतया : साधुत्वस्य च भंगः उत्तरपदस्याप्रकृतित्वात् प्रकृतित्वे प्रत्ययविधानाव
धित्वं तज्जन्यज्ञानविशेष्यत्वं च प्रकृत्यर्थत्वं एतेन प्रासादकोग्रामस्यादौ तदुक्तं नरस्य पात्तं किंचस्ववाच्यार्थ
घटितलक्षणायां नामार्थग्राहकत्वस्य चित्रगुरित्यादौ कृत्वसस्य भंगापत्तिः गुणसंवरस्वीकारे विशिष्टशक्तिरेवो
चिता एवमदरयादावपि विशिष्टशक्तिवादिनां तु नकश्चिद्युक्तिविरोधः सर्वपुसत्तानां भिन्नोपस्थितिजनकश
ब्दविषयत्वात् तत्र विशेष्यविशेषणभावे वैपरीत्यं तन्मां वैणेव संसर्गेऽन्यपदार्थे शक्तिकल्पना चित्रगुरित्या
दौ स्वस्वामिभावादिसंबंधेन चित्रगोविशिष्टः सामार्थस्तत्राश्रयः स्वस्वामिभावादिः संबंध एवं षष्ठ्युभयसमासा
र्थः यद्वा संसर्गातिरेकोविभक्त्यर्थः एवं बहुव्रीहिवाक्यः सच विभक्त्यर्थस्यासत्त्वरूपतया लिंगसंख्याकार्यानुप
पत्तिरितिवाच्यं गुणवचनवत् यद्द्रव्याश्रितो सो संबंधस्तल्लिंगसंख्याभ्यां तस्य योगं गीकारस्य एवं च समासे
नाभिधीयमानः संबंधः संबंधे तदात्म्ये नैवाभिधीयते तत्र द्विष्ठत्वेपि संबंधस्य संबंधस्य विशेषतया
देनैवोपात्तत्वात् प्राधान्याच्चस्वाभिनिएवाश्रयत्वं वस्यापित इति तद्रूपतल्लिंगसंख्ये भवतः संबंधसंबंधि
नोः स्वरूपातिरिक्तसंबंधाभावेन संबंधतादात्म्येन पर्यवसानं बोधं शाब्दशक्तिस्वभावात् परस्पर उक्तद्
सत्रे वचनभेदेनान्वितवक्ता वाक्ये तु भेदेनैवविवक्षेत्यनुमत पक्षद्वयेमपीदं भाष्ये स्पष्टमितिवहवः परेतु एवं
सति प्रासादिपदे तु विशेषणविशेष्यभावविनिमयकल्पने गौरव बहुव्रीहिपदजो बोधस्य कधार्मि बोधकत्वरूप

स्यसामानाधिकरण्यस्य भंगाच्च प्राप्तमार्थ इत्यादौ पूर्वोत्तरपदयोरेकविशेष्यकप्रतीतिजनकत्वरूपसामाना
धिकरण्याभावात् पुंवत्त्वानापत्तिश्च किंचालौकिकविग्रहे एकार्थीभावरूपसामर्थ्यकल्पनया तत्र तन्मते
विशेषणत्वविसर्गे पदयोः सामानाधिकरण्याभावेन समासशास्त्राप्राप्तिः स्वशक्यार्थघटितैकार्थीभाव
स्य चित्रगवादौ रूढस्य भंगश्च तस्मात्प्राप्तिकर्तृदकर्मकेत्यादिप्रकारेण बोधः उदकेत्यादिरूपकत्वबाधेन तु
विशेषणभूतप्राप्तौ तत्पर्यवसानं स्वर्गो ध्वस्त इतिवत् अत एव विशेष्यविशेषणभावमसमासस्यैकार्थी
भावं व्यसमासस्यैकार्थीभावरूतविशेषे प्रवृत्तिर्भाष्ये विभक्त्यर्थस्य प्राधान्येपि धर्मिबोधकत्वमुक्तं तदसैव
यत्तु मीमांसकाः बहुव्रीहौ चित्राणां गवामयमिति विग्रहः उच्यते न तु चित्रा गावो स्येति इति विग्रहेऽर्थयोर्भि
न्नार्थत्वस्यानौचित्यात् प्राप्तोदक इत्यादेरपि प्राप्तमस्योदकस्यायमिति विग्रहः प्राप्तोदकसंबंधीति बोधः
संबंधस्य च सकर्तृकप्राप्तिकर्मत्वादिरिति तन्न एवंविधविग्रहस्य मत्वर्थे बहुव्रीहिः कर्तृकर्मवचनेनाप्र
थमाः अप्रथमाविभक्त्यर्थे बहुव्रीहिः शेषो बहुव्रीहिरित्यतः शेषपदस्य त्रिमुनिवचनविरुद्धत्वात् न
चालौकिके प्रथमान्तानामेव प्रवेशेन तद्विरोध इति वाच्यं अलौकिके प्रविष्टानामेव पदान्तरे समासाभा
वे परिनिष्ठितानां तदर्थबोधनाय प्रयोगसंभवे उपस्थितपरित्यागेनानुपस्थितपदघटितलौकिकवि
ग्रहवाक्यकल्पनाया अनौचित्यात् किंच केवलतदर्थबोधनाय तद्वाक्यप्रयोगः किंतु समासादेर्वैकल्पि

कत्वप्रदर्शनायापि तद्दर्शकं चोक्तरीत्या चित्रागावो यस्येत्यादेर्वचनत्वमीयं अतएवाविग्रहो नित्यसमास
इति वृद्धाः अन्यथा कुंभकार इत्येतत्समानार्थकस्य कुंभस्य कर्तेत्यस्य संभवेन तस्य नित्यसमासत्वं भज्येत क
र्तृपरस्य न समासघटकत्वेति चेत् अलौकिके समासप्रवृत्त्या चित्रगावो मिल्यादेरपि तद्घटकत्वं तुल्यं न च
चित्रागावो यस्येत्यपि विग्रहोस्तु तद्धि कल्पितकत्वबोधकः अर्थनिर्णयार्थमुक्तोपि समासघटकपदघटि
तवाक्यासंभव एव नित्यसमासत्वमिति न बहुव्रीहेस्तत्त्वमिति वाच्यं फलद्वयार्थं युगपद्वाक्यद्वयप्रयोगा
पत्तेः किंच समसनमेकीभाव इत्यर्थकसमासपदघटितद्विविग्रह परस्य समासघटकपदानां विभिन्न
त्वेन ग्रह इत्यर्थकस्य लद्युत्तरप्रयोगासंभवात् अनेन हि वृत्तिघटकपदानां भेदेन स्वरूपज्ञापकस्य विग्रहत्वं
लभ्यते तेन च तत्र तदुक्तेस्तिरस्कृतं इत्यर्थप्रदर्शनार्थं कल्पितेन चित्रगावो यस्येत्यादावपि विशेष्यविशेषण
भावविशेषाच्चित्रगोः संबंधीत्येव बोधः समासबोधनायैव चित्रागावो यस्य स चित्रगुरिति प्रदर्श्यते वृद्धैः
सर्वनामसंज्ञासूत्रभाष्ये विसर्वश्यादिर्येषां तानीति विग्रहो दर्शितः सर्वनाम्नामुत्सर्गतः प्रधानपरामर्शि
त्वात् स चित्रगुरित्यनेन स्वामिप्राधान्यं इति कैयटः अतएव समासजातरसादेर्मासो जातस्य यस्य स
इति विग्रहं प्रदर्शितिचित्रागावो यस्य स चित्रगुरिति वाक्ये चित्रगुपदं तत्सदृबोध्यपरं चित्रगोसंबंधी
यो भवति स चित्रगुपदबोध्य इति बोधः पचतीति पाचक इत्यादेः पाचकपदं पचतीत्येतत्समानार्थ

मितिबोधः पचतिपाकं करोतिस्मतोपचतीतिपदमेककर्तृकपाकक्रियाबोधकमितिबोधः एवमन्यत्रा
पि एवं च वृत्तिविग्रहयोः समानार्थतास्यष्टैव विग्रहश्च वृत्तिर्वैकल्पिकत्ववृत्तिपदकपदस्वरूपबोधनोद्दे
शेन प्रवृत्तं वाक्यं तेन लोके स्वातंत्र्येणार्थबोधनार्थं प्रयुक्ते यथास्थितएव विशेष्यविशेषणभावः त
दुक्तं हरिणा क्वचित्तु गुणप्रधानत्वमर्थानामविवक्षितमित्युपक्रम्याख्यातं तद्धितार्थस्य यस्मिंश्चिदुपदर्शकं
गुणप्रधानभावस्य तत्र दृष्टो विपर्ययः इति द्विमतीत्याद्यर्थे विहित तद्धितानां साधनप्रधानत्वेन सत्त्वप्रधे
दीव्यतीत्यादेर्विग्रहवाक्यस्यैव गुणप्रधानभावो विपरीतो दृष्टान्यथा वृत्तिविग्रहयोः समानार्थकं भमे
तेषिततृर्थः यत्तु तत्र तद्धिते विपर्ययोद्दृष्टः इत्यस्यार्थवर्णनं भावप्रधानतिङन्तार्थे विहितस्यापि सत्वप्रधा
नत्वे त्याशयः इति तत्रास्वरस्वारस्यानुगुणं यस्य दृष्टरामस्य प्रधानस्यैव तच्छब्देन परामर्शात् एकत्रा
धिकरणे पूर्वदृष्टगुणस्यागपूर्वकगुणान्तरांगीकारस्यैव विपर्ययपदार्थत्वाच्च अतएवैतद्व्याख्यायां
तेनदीव्यत्यादौ निर्देशे गुणप्रधानभावो न विवक्षित इत्याह पुंजराजः अनेन तुल्यन्यायात्सर्वत्र वृत्त्यर्थ
प्रदर्शनाय प्रवृत्ते वाक्ये वृत्तिवाक्ययोः समानार्थत्वाय विशेषणत्वादिव्यत्यासः इति सूचितं तथा च त
द्वहतीति सूत्रे भाष्यं वहस्यर्थे रथादिभ्यः प्रत्ययविधिरनर्थकस्तस्येदमिति विहितत्वात् सिद्धं कावहतीत्यस्य
क्रियाप्रधानत्वेन वोढेत्यस्य सत्वप्रधानत्वेन शब्दभेदान्न प्राप्नोतीत्यन्यः शब्दो रथं वहति अन्यो रथस्य

वोढेतीत्याशंक्यार्थसामानाऽसिद्धं य एवार्थो रथं वहति स एवार्थो रथस्य वोढेतीति नद्वैपर्य्यदृष्टकृत्वादिरथ
इत्यादौ यतोऽनुगमनावार्थेनाहिंतीसिद्धांतितं य एवार्थ इत्यादेः रथ्य इत्यस्य विग्रहभूते रथं वहतीति त्रयोर्थः स एव
तद्विग्रहभूते रथस्य वोढेत्यत्रेत्यर्थः एवं च तद्वसामस्तत्रैवस्य इत्युक्त एवं च बहुव्रीहिविग्रहयोर्विषयताविसमाना
अत एव समर्थसूत्रे भाष्ये महत्कष्टंश्रित इति विग्रहे कष्टश्रितयोः समासः कुतो नेत्याशंक्य परह समानार्थेन
वाक्येन भवितव्यं यश्चेहार्थो वाक्येन गम्यते महत्कष्टंश्रित इति न जातुचित्समासेनासौ गम्यत इत्युक्तं तत्र
पदार्थानां वाक्ये समासे च प्रतीतिस्तुल्यैव तथापि महत्कष्टंश्रित इति वाक्ये कष्टपदार्थो विशेषणत्वा
ताक्रांतस्वनिष्ठविशेष्यतया बुध्यते समासे तु श्रितनिरूपितविशेषणत्वाक्रांततये वेति न महत्सदार्थ
स्य तत्र विशेषणत्वं एवं च विषयतया विशेषस्य वाक्ये भासमानस्य समासेन कथमप्यभानमिति तद
र्थः एतदेवाभिप्रेत्य कैयटः यः कष्टंश्रितः स महत्कर्म करोतीत्यादि प्रतीयते न तु महतः कष्टविशेषणत्व
मिति एवं चालौकिक इव बहुव्रीहिविग्रहभूते लौकिकेप्येकार्थीभावरोप्य एतद्भाष्येण बोधित इत्यपि केचित
उक्तं चैतत् अन्यथा कष्टंश्रित इत्यस्यापि विग्रहत्वं न स्यात् तदुदे विषयताभेदात् विशेषणसमभिव्या
हारेनुतसंबंधानुपपत्त्या नश्रितादिरूपप्रधाननिरूपितविशेषणतयोपस्थितिस्तत्समभिव्याहारे तु
तथैवोपस्थितिरेवं सर्वत्र द्रष्टव्यं समासतद्घटकपरमात्रघटितविग्रहयोः समानार्थत्वे एतद्भाष्य

तात्पर्यं अन्तरावत्यत्वाः परिमाणेनेतिसूत्रे किंप्रधानोयंसमासः उत्तरपदार्थप्रधानइत्युक्तं नायंप्रश्नः स
मासमात्रविषयः उचितः नपुरुषस्योत्तरपदार्थप्रधानतायाः अस्मयं विभक्त्यादिसूत्रेषु भाष्येउक्तत्वेन
समासजातोदृश्यतामित्यादौजातस्यैवकार्यसंबंधदर्शनात्प्राधान्यनिश्चयेन चतन्मात्रविषयप्रश्नानुप
पत्तेः तस्माद्वृत्तिविग्रहयोः समानार्थत्वनिर्वाहमपश्यतोविग्रहसमासोभयविषयप्रश्नः उत्तरंचेतिभाति समा
सपरंचसमासविग्रहोभयपरं नचविग्रहे द्विजातस्यप्राधान्येजातस्यवाक्यसहतमर्थबोधकत्वरूपविग्रह
द्विवत्तायांविशेषणविशेष्यभाववैपरीत्येपिपूर्वजातसंस्कारानिवृत्तेः एवंचविग्रहेतदुत्तरषष्ठ्यैवसमासवि
शेषणकसंबंधप्रतीतिवत्समासेपिविशिष्टेतरषष्ठ्यातत्प्रतीतिसंभवइत्याशयेनयद्येवमन्येपदाप
दार्थप्रधानेषुयेवासावुत्तरपदेप्रधानेतस्यवर्त्तिनीविभक्तिस्तस्याः समासेश्रवणंभवतियथाराजः
पुरुषोराजपुरुषइतिइहपुनर्वाक्येषष्ठीसमासेप्रथमाकेनैतदेवंभवतिइत्याशंक्ययोसौसमासजातयो
रभिसंबंधः ससमासेनिवर्त्ततेअभिहितः सार्थोन्तर्भूतः प्रातिपदिकार्थः संपन्नइतिप्रातिपदिकार्थेप्र
थमेति अन्यथाविशेषणविभक्तेः षष्ठ्याः प्राधानबोधकसमासादायस्यसंगतेः केचित्तुवृत्तिविग्रहयोः
समानार्थत्वंन्याय्यमत्रतुवाक्येजातोविशेषणंसमासेतुसमसजातोदृश्यतामित्यादौजातस्यैवकार्यसंबंधा
दागमात् प्राधान्यमस्योत्तरपदार्थप्रधानत्वेधर्म्मेचलक्षणत्वइतिमत्वा पृच्छतीति प्रश्नहृदयाशयंतदन्

उत्तरेणतयोःसमानार्थत्वमभिप्रैतिः तत्रसंबंधस्यसमासेनिवृत्तिः षष्ठ्यानिमित्तत्वेनतत्रहेतुःअभि
हितःसमासेनातएवांतर्भूतः संबंधविषयकोपस्थितिविषयत्वमन्तर्भावः अतएवजाक्षिपरकार्थः
मघन्यइतिप्रथमोत्पत्तिनिमित्तकथनंषष्ठ्यभावनिमित्तकथनंचप्राकारकप्रातिपदिकार्थव्यतिरिक्त
स्यशेषत्वात् नचमासस्यजातइत्येवविग्रहोस्तुएवंचरतिकाक्रयोः समार्थताविभवतिषष्ठीप्रसक्तस्य
नषष्ठीतिसूत्रेणासिद्धेः कालाःपरिमाणिनेत्येतत्तुकालाःपरिमाणिमाणेनासभ्यंतेनतुपरिमाणीका
लेनेसर्वेनजातमासइत्सेतेंनिवृत्यर्थमितिवाच्यं एतद्वाक्यप्रामाण्येपरिच्छेद्यपरिच्छेदकसमभिव्याहा
रेपरिच्छेद्यादेवषष्ठीस्वीकारेणतथाविग्रहासंभवात् एवमवयवावयविसमभिव्याहारेऽवयवत्वादि
संबंधेवयविवाचकादेवषष्ठीतिबोध्यं तत्त्वांपरटइत्यादैतुजन्यजनकभावेसंबंधेषष्ठी विशेष
णत्वादिव्यासेचशब्दस्वभावएवबीजं यत्वेकार्थीभावबलात्तत्रौविशेषणत्वादिविमासइतितन्त्व
णकार्थीभावफलेषुमध्येःव्यागणनात् इतिविग्रहयोःसमानार्थत्वमगायतेष्ठएवमेववहुव्रीहिवाक्ये
विषष्ठीस्थितिर्वहुव्रीहौप्रथमार्थस्यविबोधनित्यमत्रविस्तरइत्याहुः बहुव्रीहिर्द्विधातद्गुणसंविज्ञानो
ऽतद्गुणसंविज्ञानश्चलंवकर्णमानयेत्यादावयः तस्यान्यपदार्थस्यगुणानांविशेषणानांकार्यान्वि
यितयासंविज्ञानंयत्रेत्यर्थात् विधेयान्वयिस्वघटकावयवार्थकत्वंचतद्गुणसंविज्ञानत्वमितियावत्

मंज० चित्रगुमानयेत्यादावेवम्ः विधेयानन्वयिस्वघटकावयवार्थकत्वंलंबकर्णभोजयेत्यादावप्ययमेव यदि
२१६ विधेयान्वयित्वमिवविधेयक्रियाकालेसंनिहितत्वमपितद्गुणसंविज्ञानत्वमित्युच्यतेतदालंबकर्णभोज
येत्यादावप्याद्यएवसंयोगसमवायान्यतरसंबंधेनसंबंधीयत्रान्यपदार्थस्तत्रतद्गुणत्वंप्रायोन्यात्रान्य
इत्यलंबहुब्रीहौविशिष्टशक्तिस्वीकारादेवारुणाधिकरणमुपपद्यतेतत्रह्यरुणयापिंगाक्ष्यैकहायन्या
सोमंक्रीणातीतिवाक्येऽग्निष्टोमप्रकरणपठितेकिमरुणिमावाक्यात्भिन्नप्रकरणेसर्वद्रव्येषुनिवि
शतेउतक्रीणातिनासंबध्यतइंगमेकहायन्यांनिविशतइतिसंशयः तत्रगुणस्यामूर्तत्वात्क्रयरूपक्रि
यासाधनत्वासंभवेन पृथग्भूतोविशेषान्प्राकरणिकद्रव्यमात्रेनिविशते अरुणादिशब्दाश्चगुण
वचनाएव ननुतदाश्रितद्रव्यस्यक्रयसाधनत्वसंभवोऽन्यथाप्रकर्णेपिनिवेशोतस्मात् अमूर्तत्वाधि
याभिःकारकत्वाच्चद्रव्यैःसंबंधासंभवादितिचेन्न श्रौतैकहायन्यवरोधेनक्रयेनद्रन्वयासंभवात्
नचसत्यपिदलावलेद्रव्यस्यवस्तुतएकत्वेनविरोधाभावात् अयुक्तमेतत् अंतरंगवहिरंगभावेनक्र
येणान्वयेद्रव्यस्यैवाभावात् एवंचाविशेषादरुणापदलक्षितंरक्षणीतिसंवादद्रव्यंप्राकरणिकंसर्वमेवे
तिपूर्वपक्षःसोयुक्तःस्यात् एकहायनीतिसमस्तस्यापिविलाक्षणिकत्वेनश्रौतत्वाभावात् निरपेक्षो
रवःश्रुतिःइतरपदार्थान्वयानुपपत्तिज्ञानसापेक्षप्रतीतिकंहिलाक्षणिकंअन्यथारुणापदलक्षितं

द्रव्यमपिस्रौतमेवतस्मात् नचलक्षणादिकंविनैवप्रकरणकल्पितश्रुतानुमितैकदेशनिष्पन्नेनारुण
याज्योतिष्टोमापूर्वसाधनीभूतद्रव्यपरिच्छेदंभावयेदित्याकारेणवाक्येनप्राकरणिकसर्वद्रव्यांगत्वमिति
वाच्यं द्रव्यपरिच्छेदंभावयेदित्यंशस्यप्रकरणतोप्युपलाभात् तस्माल्लक्षणयाप्रकरणेनिवेश इतिवृद्धोक्त
मेवमायत्तत्रचानुपपत्तिरेवअरुणयेतिदापृनिर्देशस्तुछांदस इतिपूर्वपक्षीमन्यते आश्रयलिंगत्वादि
त्वादिचगुणवचनानांपूर्वपक्षीनजानीते आश्रयानिर्णयाच्च नचक्लीबद्रव्यलक्षणयाटाप् अरुणाप
दस्यक्लितंद्रव्यमितिस्यमीमांसकग्रंथेषुविद्यमानस्यासंगतेः प्राकरणिकद्रव्यमात्रेनिवेश इत्यसंगतेश्च
पनुटाप् साधुत्वार्थइतितन्न एकवचनांतस्वार्थिकप्रत्ययातिरिक्तप्रत्ययानांसाधुत्वार्थतायाभाष्य
कारादिभिरनभ्युपगमात् किंचसमासशक्त्यनंगीकारेएकहायनीपिंगाक्षिपदयोरप्यरुणापदवत्स्यात
यातत्रपूर्वपक्षसाधकरणेवीजानापत्तिर्मीमांसावार्तिककृतोप्येवमेवसर्वत्रयौगिकेः शब्दैर्द्रव्यमे
वाभिधीयतेनहिसंबंधवाच्यत्वंसंभवस्यति गौरवादित्तितदुक्तेः तन्मात्रवाच्यत्वमित्यर्थः संबंध
स्यसांसर्गिकविषयतयैववाच्यत्वेतस्यसंबंधांतरभानंविनाभानायोगात् विशेषणंचगावोत्र
नसंबंधः कथंचनेतितदुक्तेः अत्रचिंत्रगुरिसादौ संबंधस्यसत्वं इत्वेनतत्रवाच्यत्वंकस्यं
संबंधिनम्बासेपाद्गानंस्वीकार्यमित्यर्थोतिगौरवादित्यस्यशक्तिमदवयवकत्वेसतिसंसर्गबोध

मं०न्न०
२१७ कशब्दत्वंयौगिकशब्दत्वं शक्तिमदवयवकत्वंचराजपुरुषादौलोकसिद्धंयाचकादौशास्त्रसिद्धंजातेस्तुअ
नयभेदेनगोपदादिभ्योभानमिति अजेत्यादौटाप्सिद्धिः अतएवशावलेयस्यगौरितिकदाचिन्नसिद्धांत
स्तस्यगुणितादात्म्येनगुणबोधकत्वंगुणद्रव्यंचवाक्येऽश्रुतत्वेनसन्निहितत्वादेकहायन्येवेतिविशिष्टवि
धिरयं अतएवटाप् न्यायेनतस्मिन्नसंभवतिछांदसत्वकल्पनायाअयुक्तत्वात् अतएवगुणेशुक्लाद
यः पुंसिगुणिलिंगास्तुतद्वतीतिकोशः संगच्छतेभेदेनभानेत्वाश्रयलिंगग्राहितावागुणवचनानामा
श्रयतोलिंगवचनानीत्युक्तेः एकहायनीत्वगौरेवक्रमप्राप्तत्वात् गवातेक्रीणातीतिमंत्रलिंगात्
एतदभिप्रायेणैववार्त्तिके उक्तं गुणस्यैवास्यद्रव्यपरिच्छेदद्वाराक्रयसाधनत्वमित्यरुणादीनांयोग्य
त्वाद्द्रव्यपरिच्छेदएवव्यापारस्तत्रैषांकर्तृत्वादितरत्रकरणत्वंभविष्यतितत्रारुणापदादेतावद
वगतंकिंचिद्द्रव्यंपरिच्छिंद्यतारुणगुणेनक्रयः साधयितव्यइतिएकहायन्याविकेनचित्गुणेनमेपरि
च्छेदः कार्यइत्येतावदपेक्षते उभयापेक्षालक्षणश्चसंबंधः शीघ्रतरंनिर्वर्त्तते तेननष्टाश्वदग्ध
रथवत्तयोरेवाविनाविशिष्टसंबंध इतिसंनिहितातिक्रमेकारणाभावाच्चैवमेवज्ञायतइति परिच्छे
दकसुतादात्म्येनग्रहणं स्वाश्रयत्वेनग्रहणंवा एतदधिकरणसिद्धांतस्त्वमपिकटंभीष्मंकुर्वि
त्येतदुपपादनावसरेतन्त्ररूपप्रकरणेउक्तंव्याख्यातंचेतिदिक् अतएवेदंरूपीताधिकरणंसंगच्छ

ते तथाहि प्रातःसवनस्यगायत्रछंदसोग्निहुतइंद्रपीतस्योपहूतस्योपहूतोभक्षयामीति मंत्रइंद्रदे
वत्यसोमभक्षणएवनाम्नदेवत्यसोमभक्षणे इंद्रपीतस्येतिलिंगात् नचैंद्राग्नेतुलिंगाभावात्स्यादिति
सूत्रात् ऊर्ध्वऊर्ध्वंयोमीतरिऊर्ध्वमात्रत्ववादिंद्राग्निपीतेइंद्रपीतत्वरूपलिंगस्यसत्वेनेंद्राग्निदेवत्य
सोमभक्षणेमंत्रापत्तिरितिवाच्यं अग्नौभस्मीकृतस्यपानासंभवेनेंद्रपीतशब्दस्यतृतीयातत्पुरुषेण
सोमपरत्वस्याप्युक्तत्वेनदानलक्षणपासाधनत्वोक्तेति चतुर्थीतत्पुरुषेण सोमपरस्येंद्रोद्देशेन दत्तस्ये
त्यर्थकतयाइंद्राग्न्युद्देश्यकस्येंद्रोद्देश्यकत्वाभावेनादोषात् यत्तुइंद्राग्निविषयेइंद्रस्याग्निसापेक्षत्वे
नासामर्थ्यादिंद्रपीतइतिसमासोनस्यादितिशाबरस्यावितोक्तं तन्नोद्या उपात्तपदजप्रतीतिविषय
सापेक्षएवसापेक्षत्वस्यसमर्थ्यवदिसमप्रवृत्तेः पतंजलिनोक्तत्वात् विशेषणस्यायोगान्ययोगव्यवच्छे
दफलकत्वेनव्रीहिभिर्यजेतेत्यादाविवेंद्रायेवदत्तइत्यर्थेनेंद्राग्निदेवत्येमंत्राप्रसक्तेश्च तथाचसूत्रं
एकस्मिन्नपिदेवतांतराद्विभागवदिति एकेंद्रदेवत्यएवायंमंत्रः यथादेवतांतरसोमादस्यविभागोऽसं
बंधस्तद्वदग्न्यर्थइतिपूर्वपक्षेसोमपरत्वेहुतशेषस्यभक्षणार्थमुद्धृतस्येंद्रपीतत्वाभावेनतत्संबंधिलक्षणा
सोमपरोपहूतत्वादेनअधिकरणान्वयोवास्यात्एतच्चोक्तस्येवदेवदत्तायेत्यादिनाऽनंतसर्वस्येतिभाष्यम
तेस्यहृत्मेव इंद्रायवसुमतेग्रहं यहणामितिमंत्रलिंगादिंद्रस्यसमुदायसंबंधबोधनात्सर्वस्ये

वदानंप्रत्येपत्त्वंशस्यांशान्तरस्पत्त्वमोविनियोगोवचनवलादितिवार्त्तिकमतेप्येतदावश्यकं अवशिष्ट
मात्रस्य तदृत्तित्वाभावात् नचसमुदायदानेवयवस्यापिदानान्नलक्षणादिभ्रमथासमुदायदानेततः
पुनर्दातुरेकदेशास्वीकारेप्रसवायोनस्यादितिवाच्यं इंद्राग्न्यादेर्दानोद्देश्यत्वस्यसमुदायेपर्याप्तिवत्त्व
त्कर्मत्वस्यापिसमुदायेएवसत्वात् स्वत्वध्वंसपरस्वत्वोभयसाश्रयत्वेन क्रियोद्देश्यतायाः समुदायेएवस
त्वात् नांतरीयके पुनः स्वत्वनिवृत्तिस्वतो स्यती अवयवेष्वपीत्येकदेशास्वीकारेप्रसवोयोपपत्तिनांतरी
यकमादायप्रोतव्यवहारस्तुतनांतरीयकदानोद्देश्यत्वस्यापिप्रत्येकंसत्त्वेनेंद्राग्निदेवत्वेसोमभक्षणेनच
मंत्रापत्तेः यत्तुस्वीकारेयाधातोर्लक्षणास्वत्वत्वाद्यवादैंद्राग्न्यादिविषयेउभयव्युत्पत्तिरूपितएकएवन
प्रत्येकंनिरूपितइतितन्न इदंममेत्याद्याकारकबुद्धिविषयत्वरूपस्यतस्यबुद्धेः प्रत्येकंवृत्तितयोभय
निरूपितत्वाभावात् निर्वापप्रभृतिप्रतिपत्तिपर्यंतमनुष्ठेयदेवतासंबंधीदमितियाज्ञिकव्यवहारस्तुदेवतो
द्देशेनोपकल्पितत्वमात्रेण उपकल्पितनिरूपितोद्देश्यताञ्चप्रतिपत्तितास्येतिनतदुत्तरंतथाव्यवहारः
तस्माद्बहुव्रीहिरिंद्रेणप्रीतोयस्मिन्नितिप्रातःसावनस्येत्यधिकृतंप्रातःसवनमन्यपदार्थः नचकर्मस
मुदायाधारकात्वरूपस्यभक्षणासंभवतिवाच्यं तेनतत्संबंधिहविर्विशेषलक्षणायाउपहूतस्येत्याद्यन्वया
यतनवाप्यावश्यकत्वात् सवनीयहविरन्यपदार्थोइतितुनयुक्तः तस्मिन्हुतशिष्टेइंद्रपीतस्याभावेनातस्य

तदधिकरणत्वाभावात् अतीतायुगोयुचित्रगुरिति व्यवहाराभाववदिंद्रेणपीतस्यनष्टत्वेननमाशय
हविषइंद्रपीतइतिवहुव्रीहिणाव्यवहाराच्च नचपूर्वपदप्रकृतिस्वरेणैववहुव्रीहित्वनिर्णयइतितदर्थ
मधिकरणारंभोस्त्वितिवाच्यं इंद्रेणपीतइतितृतीयानुपूर्व्येपितृतीयाकर्मणीत्यनेनपूर्वपदप्रकृतिस्व
रसत्वात् देवानामग्निमुखत्वेनेंद्रायस्वाहेत्यादिमंत्रेणाग्नौराहुत्यैवेंद्रकर्तृकपानस्यानंतरनुपपत्तेः
अंतःपाधादीनेनतणेस्याशयात् पूर्वपक्षेदानलक्षणायामपिचतुर्थ्यर्थेवहुलंछंदसीतितृतीयांतेने
वसमासाच्च प्रकारांतरेणापिपूर्वपक्षोपपादनस्यकृतत्वाच्च किंचदानलक्षणायामपींद्रायपीतइति
चतुर्थीसमासादुर्लभः चतुर्थीतदर्थार्थेतिसमासस्यप्रतिप्रसोक्ततादर्थ्येचतुर्थ्येवप्रकृतिविकृतिभावए
वच प्रवृत्तेर्भाष्यसंमतत्वात् साधनकृतेत्यपिनचतुर्थीतदर्थेतिसूत्रेरस्तिनग्रहणेनचतुर्थ्यंतस्यतेनसमा
साभावबोधनात् तादर्थ्यचतुर्थ्याकारकविभक्तित्वाभावेनतृतीयेनसमासस्यदुर्लभत्वाच्च किंचतेनसमा
सेपूर्वपदप्रकृतिस्वरेणैववहुव्रीहित्वनिर्णयेऽधिकरणोच्छेदः नचचतुर्थीतदर्थेइत्यनेनतत्रापिपूर्वप
दप्रकृतिस्वरइतिवाच्यं तस्यस्वरस्यापिप्रकृतिभावेएवप्रवृत्तेर्भाष्यसंमतत्वात् प्रतिप्रसोक्ततादर्थ्य
चतुर्थ्यंतसमासएवतन्त्रप्रवृत्तेश्च प्रकृतेनुनतादर्थ्यचतुर्थीउपपदविभक्तेरितिन्यायात् नोचेत्सत्रापि
तदर्थेइत्यनुवर्त्तते गोरक्षितमित्येवतदुदाहरणं नतुगोहितमितीत्यमत्रनिरूपितं अतएवचतुर्थीतद

र्थ इत्यस्य प्रकृतिविकृतिभावेनावप्रतीतौ चेति न्यायकं भाष्योक्तं संछते: समासे शक्तिमनंगीकुर्वतां बहुव्रीहा
वप्यन्यपदार्थे लक्षणाव्यक्तिकरणत्वाल्लक्षणा पूर्वपदस्य विभक्त्यर्थांतर्भावेण लक्षणेति तत्पुरुषाद्विशे
षः नच दानार्थकयाधातोर्भावक्तांतादर्श आद्यचिपीतदंद्रोस्येति बहुव्रीहिर्दानसंबंधीन इति बोधः
आहिताग्न्यादित्वात्पीतशब्दस्य परनिपात इति न बहुव्रीहौ लक्षणाद्वयमिति वाच्यं धातोः सकर्मकतयाभा
वेकस्यासंभवात् अनुपपत्तिप्रतिसंधानमूलकतयैव विहितद्वयकल्पनायालक्षणातोपि दुष्टत्वाच्च
तदुक्तं जैमिनिना सर्वेषां चैकमंत्र्यमैतिशायनस्य भक्तिपानत्वात्सवनाधिकारो हीति भक्तिपानत्वा
दित्यनेन तत्पुरुषनिराकरणं दानलक्षणनिराकरणं च सवनाधिकारो हीति अन्यपदार्थप्रदर्शनं अंत
स्त्सवनसंबंधिनां सर्वेषामैंद्राणामनैंद्राणां च हविषां समंत्रकं भक्षणं यथाम्नातमेवाकरणवच्चमं
त्रः सर्वत्रेति तदर्थ इति तद्भाष्यात् द्वौ स्पष्ट इत्यलं उपदशाः दशानां समीपे ये संतीति विग्रहः अत्रायं संख्या
वत्सरः दशपदार्थस्य स्वदृत्तिदशत्वसमीपसंख्यासंबंधेयान्वयः दशसमीपसंख्यावंत इति बोधः
ईदृशसंबंधबोध एवास्य साधुत्वं शब्दशक्तिस्वभावात् संख्ययाव्ययेत्यादिसूत्रबलाच्च अतएव नवै
कादशावानेन प्रसाध्यते न तु दशानां हस्तादीनां समीपे ये गवादयस्ते प्रसाध्यंते एतेनासन्नविंशा
अदूरविंशा इति व्याख्यातं द्वौ वा त्रयो वा द्वित्राः अत्र वा शब्दो विकल्पार्थः स चैककालिकाधिकरणा

वृत्तित्वरूपः कोप्यॊभासते अत्र कार्यो विकल्पः नतु शाब्दबोधे अतः शब्दान्नियमेन बहुतामुपस्थितेर्नि
त्यबहुवचनांततात्पर्यं क्वचिदेकाधिकरणावृत्तित्वरूपः शब्दशक्तिस्वभावात् यथाशब्दोग्निस्तोनवेत्ति विप्र
तिवाक्ये तस्यशब्दोनिमत्वविरुद्धानिसत्ववानिस्यर्थः क्वचिदेककालावृत्तित्वरूपोविरोधोयथाकालेस
मभिव्याहृतान्वयिपदार्थासंबंधत्वरूपोविरोधोभासते मायोयमेवसर्वत्र व्रीहिभिर्यजेत यवैर्यजेते
त्यस्तैवाशब्दं विनापिसंर्पर्यवशादेव ततोवामेनास्णायश्यतीतिवदेकविशेषविधेविशेषांतरनिषेध
फलकत्वान्निरपेक्षत्वलाभेनसमुच्चयासंभवाद्धि कल्पोवुध्यतेसचसमभिव्याहृतकारकविशिष्टक्रि
यांभिन्नकालिकत्वरूपः अत्र व्रीहिभिर्यवैर्वायष्टव्यमितिष्टम्भवाक्यं यागत्वावच्छेदेनवयन्निरपेक्ष
व्रीहिकरणकत्वव्रीहिनिरपेक्षयवकरणकत्वसंज्ञायपरमुत्तरमपितथैवपरंतुतद्यागत्वसमानाधि
करणेनतत्परमित्येके अन्येतत्तरे वाशब्दोन्यतरार्थः एवञ्चद्वयोरपिवागसाधनत्वादिच्छयैकतरग्र
हणादैच्छिकोविकल्पः इदमेवाभिप्रेत्यअन्येवाशब्दः सर्वात्मनापक्षांतरप्रतिक्षेपार्थः उत्तरेतुस्वप्राप्ति
पक्षेनप्राप्तिक्षेपार्थइतिप्रवादः हित्राइत्सत्रापिद्धिअन्यतरेत्यर्थः अन्यतरत्वमुपस्थेतरव्यावृत्तैकत्व
रूपंतत्त्वकश्चिद्ध्यक्तिगतंकश्चिद्धर्मगतंतात्पर्यवशात् यत्तु स्वभिन्नभेदएवान्यतरत्वमितितन्न
घटपटान्यतरसमानयोत्पादिनः कदाचिदुभयस्याप्यानयनापत्तेः तद्भिन्नभेदस्यप्रत्येकंघटपटयो
र्विसत्त्वदितयोरपिसत्वादित्याहुः तत्र धर्मगतमेकत्वमितिपदार्थः पदार्थेनेतिन्यायविरुद्धमिति

द्विअन्यतरेर्थकथनंमसंगतंकिंचिद्द्वित्राइत्यादौनित्यबहुवचनांतत्वानापत्तिः अन्यतरत्वेनानेकबोधे
तुघटपटान्यतरमानयेत्यादौद्विवचनाद्यापत्तिरित्यन्ये क्वचित् देशपतावच्छेदकावच्छेदेनयावत्तिकः
समभिव्याहृतार्थप्रतियोगिकाभावोविवार्थः यथादीर्घासरांताद्वेत्यादौ शास्त्रीयमवस्थितविकल्पे
तुउद्देश्यतावच्छेदकसामान्याधिकरण्येनभावाभावबोधोलक्ष्यानुसाराच्च मवस्थास्थाणुर्नवेत्यासंशया
त्मकज्ञानजनके एकाधिकरणावृत्तित्वरूपोविरोधोवार्थः अन्यतरकोटेः सर्वथाबाधत्वात् अनेकको
ट्युपस्थितिरपिवाशब्दसमभिव्याहारादेव स्थाणुर्नेत्युक्ते स्थाणुभिन्नइत्येवप्रतीतेः कचित्वेकाधियान
धिकरणत्वंवार्थः यथाघटेपटेवासौदृश्यमित्यत्र अपरेतुवाशब्दसभिव्याहारेपरस्परप्रतियोगिकानेक
धर्मवत्त्वंधर्मिणिग्रहतेतदेवविषयनिष्ठंसंशायत्वंतदेववाशब्दवाच्यं इदमेवविकल्पितरूपत्वं तद्वि
षयकत्वाच्चज्ञानंसंशयः एवंचस्थाणुर्नवेत्यादौस्थाणुतद्भावरूपः संशयइतिबोधः द्वित्राइत्यादौद्वि
त्रिरूपसंशयः साधनिकाक्रियेत्यादिरीत्याबोधः अतएवमवेघदावहूनामानयंतदाहुवचनमुप
पन्नंपराहावानीयेतेतरानसिध्यतीत्याशंक्यद्वौवेत्युक्ते त्रयोवेतिनिगम्यते त्रयोवेत्युक्ते द्वौवेतिसेषा
पञ्चाधिष्ठानावागितिभाष्येउक्तं अन्यतरार्थोवाशब्दइत्याशंकाशयः कैयटोपिविकल्पोवार्थः इति
द्वित्रिशब्दः कदाचिद्द्वयोवाचिक इतिसंकाशायमुक्त्वासंशयोत्रवार्थः नतुविकल्पः विरुद्धानेकविष
यत्वाद्विपर्यासपर्यावस्थितद्वित्वत्रित्वाद्यारवस्तुसंकल्पयापञ्चाधिष्ठानत्वमुच्यतइति आह अनेकवि

षयत्वात् अनेकविषयरूपत्वात् विमर्शस्य संशयस्येत्यर्थः तत्र क्वचिद्बलवत्प्रमाणेनैककोटिर्बाध्यते
यत्र तु न तथा बाधकं तत्रैच्छिकं पाक्षिकानुष्ठानं यथा व्रीहियवविषये क्वचिद्व्यवस्थयेत्यस्य संशयत्वस्य
विषयनिष्ठत्वादेव संशयलक्षणपरे गौतमीये सूत्रे तद्वार्त्तिककृता संशयपदं विवृतत्वात् संशय्यते
विषयोऽनेनेति करणव्युत्पत्तिर्दर्शितामास्तयं मुत्सार्य विवार्य कार्यमार्यासमयादमुदाहरंतु सेव्या नि
तंबाः किमभूधराणां किंवा स्मरस्मेरविलासिनीनामिति यद्येव संशयो वाऽथ निश्चयोऽथवाऽगम इति प्रकाशे उक्तं
संदेहालंकारश्च न तेन पृथगुक्तः निश्चयांतसंदेहालंकारेणैव गतार्थत्वादित्याहुः द्विराहुसाः दशाद्विद
शाः अत्र भुजयोरंतरभावेनाद्वित्वविषयाद्दशौ क्रियांतरभावेन चद्विशाद्व्यपद्वित्वविषयेह्नि: अद्वितीजन्म
गणने चाद्विशदः द्वित्वसंख्याविशिष्टोसक्तिकाद्वित्वविषयाद्दशेति बोधः अन्यथाद्वित्वान्वयो न स्यात् द
शत्वसंख्यायाः संख्यप्रयानसंख्येये द्वौ दशोत्पत्तिसंभवः भेदाभावान्न संख्यायां न विरोधात् तदाश्रये इति
केशाकेशि ग्रहणमिदं प्रवृत्तं केशाकेशि अत्र कायसयोर्ध्याहृतस्थित्यादिक्रियामादाय बोधः ग्रहणकर्मत्वंच
प्रत्यासत्या केशादिविशिष्टपुरुषयोरेव परस्परग्रहणादिरूपः कर्मव्यतिहारः समुदायशक्त्यो उद्भाविह्
पक्रियापरस्परकेशाधिकरणकतद्वत्पुरुषकर्मकग्रहणोत्तरकालिकस्थितिकर्तृपुरुषः कर्तृकाक्रियेति
बोधः क्रियायुद्धादिरूपेति कश्चित्प्रकरणात् कश्चिद्युद्धादिवाचकपदसमभिव्याहारान्निर्णयं यथाम्बधं

किमु छत्रकदंडतांडवं भुजाभुजं तोलिभ्रतां दिदृक्षसे इत्यादौ एतेन कर्णाकर्णि प्रथितमपत्रपाति व्याख्यातं
कर्णाभ्यां कर्णाभ्यां माकर्ण्य दृष्ट्वा प्रथितमित्यर्थः एतेनायं समासो युद्धक्रियायामेवेत्यपास्तं इति बहुव्रीहिः
धवखदिरादिसमासोऽपीतरेतरयोगद्वंद्वे उद्भूतावयवभेदः समूहः समासार्थः अत एव चार्थे द्वंद्व इति सूत्रभाष्ये चा
र्थे विधीयमानस्य द्वंद्वस्य तद्वदेवालिंगसंख्यतामाशंक्य शब्दशक्तिस्वभावेन गुणत्वं च नानामिवाश्रयतो लिंग
वचनानीत्यनेन वा परिहृतं बहुव्रीहावन्यपदार्थस्येवात्रापि चार्थस्यैव प्राधान्यौचित्यात् अत एव गोष्ठि
योरिति सूत्रे भाष्ये कुक्कुटमयूर्याविसत्र हस्त्यमांशं क्यद्वंद्वे प्रतिषेधो वक्तव्यः इत्युक्तं समासार्थेन्वयवार्थस्या
प्राधान्यात्स्वयमानिर्दिष्टत्वाच्चोपसर्जनमिति कैयटेनोक्तं प्रमाणप्रमेयेत्यादिसूत्रे न्यायभाष्यकारोपि
चार्थे द्वंद्वः समास इत्यतः सर्व एते प्रमाणादयो विज्ञेया इति निति वार्त्तिके च तेन हि समासस्य चार्थे वृत्तिः
स्पष्टमुक्ता तेन समूहस्य ज्ञेयत्वलाभः अन्यथा समासांतर इव चकाराघटितवाक्ये इव चात्रापि समासे कथं
ज्ञेयत्वलाभः स्यात् एवं च परार्थबोधे समासस्य शक्तिरित्युक्तमेवेति दिक् पाणिपादमित्यादि समाहारे त्वनु
द्भूतावयवभेदः समूहो विशेष्य इति बोध्यं उद्भूतान्वयवयवभेदत्वं चावयवसंख्यारोपवत्त्वं तद्विपरीतमनु
द्भूतावयवभेदः एवं उभयत्रापि द्वंद्वे समूहो नावयवव्यतिरिक्तः धवखदिरं धवखदिराविति स्वशब्देनैवा
भिधानात् अवयवातिरिक्तस्तु प्रपंचवनमिति शब्दांतरेणैवोच्यते एतेनेतरेतरयोगे तदनतिरेके

णभानं समाहारेतु तदतिरेकेणोक्तिभेदस्तस्यात्वं यत्त्वितरेतरयोगे साहित्यविशेषणत्वं तच्च समुदायश
क्यं उत्तरपदत्वस्यापीतिनु बहुव्रीहियुक्तरीत्या निरसनीयं समुदायत्वस्यापीतितु नयुक्तं अनुपपत्तिप्रतिसंधा
नं विनापि प्रतीतेः समाहारेतु तद्विशेष्यं साहित्यस्येतरेतरयोगद्वंद्वेऽभानेतु द्वित्वाद्यन्वययोग्यतावच्छेदक
साहित्यमंतरा तदन्वयो दुर्लभः स्यात् ननु पर्याप्ति योग्यता व तदन्वयनियमो न तु योग्यतावच्छेदकोपाधिस
पेक्षा अत एव घटेन जलमाहरेत्यादौ छिद्रेतरस्यैव योग्यतया नान्वये न छिद्रेतरत्वप्रकारको बोधः नच
घटाकाशादि द्वित्वादेः प्रत्येकावृत्तेः समुदायावृत्तित्वेनाकाशेऽपि सत्वेनाकाशपदाद्द्विवचनाद्यापत्तिवा
रणाय संख्याया अन्वयितावच्छेदकव्याप्यत्वविशिष्टसमवायसंबंधेन प्रकृत्यर्थेऽन्वये तेषां साधुत्वम
वश्यं वाच्यं अत एवैकोन द्वावित्याद्युपपद्यते द्वित्वान्वययोग्यतावच्छेदकोभयवृत्तिधर्मव्याप्यसमवा
यस्य प्रतियोगितावच्छेदकसंबंधत्वात् अन्यथा केवलसमवायस्यैकस्मिन्नपि सत्वनतदनुपपत्तिः
समवायस्तु नानातस्यैकत्वेतु तद्व्याप्यत्वविशिष्टाप्रसिद्धिः तस्यैकत्वेतु तद्व्याप्यत्वविशिष्टापर्याप्ति
संबंधोस्तु एवं च धवखदिरावित्यादौ साहित्यभानं नावश्यकं अन्यथा त्वयितावच्छेदकधवत्वख
दिरत्वादिव्याप्यद्वित्वद्वयादिप्रतीत्यापत्तेस्तथाचैकैकखदिरादितात्पर्येण तथाप्रयोगानुपपत्तिरिति
वाच्यं घटद्वयमित्यत्र द्वित्वस्य घटत्वव्याप्यसंबंधेनान्वये एकघटाभिप्रायेणापि घटावित्यापत्तेस्तस्मा

द्वित्वं द्वयोरेव पर्याप्तं एको न द्वावित्यादिप्रतीतिबलात् पर्याप्तेः प्रत्येकावृत्तेरपि समुदायवृत्तित्वं स्वीका
र्यं प्रत्येकावृत्तेरपि वनत्वादेः समुदाये वृत्तित्ववत् अंतःकरणविशिष्टब्रह्मरूपजीववृत्तिजीवत्वस्य प्रत्ये
कावृत्तेरेव विशिष्टवृत्तित्ववच्च यद्वा द्वित्वादिसमवायस्यैव नाश्रयत्वं एको न द्वाविति प्रतीतेः समवायविषय
तायाएवानुभवात् द्वित्वादिसमवायस्यैव च पर्याप्तिरिति नामांतरं अन्यथा साहित्य भानांगीकारेपि त
त्र प्रत्येकधर्मयोरेव संबंधितावच्छेदकतया साहित्य द्वयबोधापत्तिरिति चेन्न घटद्रव्यादौ विभक्त्युप
स्थाप्यसंख्यायाः प्रकृत्यर्थतावच्छेदकव्याप्यत्वदर्शनात् तदुपस्थाप्यसंख्यात्वावच्छेदेनैव तत्कल्पनेन द्वं
द्वे तद्व्यापकस्य पदार्थतावच्छेदकस्य पदार्थतावच्छेदकस्य साहित्यस्यावश्यमभ्युपेयत्वात् किंचान्वय
योग्यतावच्छेदकधर्मवत्त्वेनोपस्थित एव द्वित्वादेः साकांक्षत्वात् तज्ज्ञानमावश्यकं किंच दत्तचैत्रौ पच
त इत्यादावाख्यातोपात्तद्वित्वान्वयेन्वयितावच्छेदकलाभाय तज्ज्ञानमावश्यकं सुबुपात्तद्वित्वमेव ल
येति न युक्तं चैत्रो मैत्रश्च गच्छत इत्यादावनन्वयापत्तेः चशब्दस्तु न द्वित्वबोधकः कोशाभावादावनु
क्तेः चार्थे द्वंद्वविधानेन द्वंद्वाद्द्विवचनानापत्तेश्चेति तन्न प्रकृत्यर्थतावच्छेदकानेकधर्मावच्छिन्नान्वयेपि
द्वित्वादेराकांक्षायोग्यतयोः सत्वेनान्वितेः क्वचित्संख्यायाः प्रकृत्यर्थतावच्छेदकाव्याप्यत्वेपि सर्वत्र त
त्कल्पने मानाभावाच्च ममतु न दोषः द्वित्वादिसंबंधस्य प्रत्येकावृत्तेरेव समुदायवृत्तित्वास्वीकारात् सम

हस्यविशेष्यतयाभानांगीकारेणद्वित्वादेः समूहएवभानात् घटाविमावेकशेषेपिद्वंद्ववत्समूह
एवविशेष्येतदन्वयः किंचसाहित्यस्यविशेषणत्वेप्रमाणप्रमेयेमावौसर्वस्यज्ञेयत्वात्सिद्धिरेवसहि
तद्वित्वादिज्ञानेविशाख्यार्थसिद्धेः परस्परसहितानांसर्वेषांज्ञेयत्वमितिसमूहस्यविशेष्यत्वएवसिद्धेः
एकस्यापिअज्ञानेसमूहाज्ञानात् समूहस्यविशेषणत्वेप्येवमेव नह्येवमेवघटपटराशावेकराशौघ
टंपटमानयेत्युक्तेइमंराशिमानयेत्यतइवसकलघटाद्यानयनंनियमेनप्रतीयते अतएवसमास
स्यालिंगासंख्यात्वादिशंकापरमुक्तभाष्यंसंगच्छते तत्रनैतद्भाष्यंसमाहारविषयंतस्यवाच्यनि
कलिंगैकवचनयोःसत्वात् तस्याश्रयलिंगस्यसंख्याग्राहित्वाभावाच्च इतरेतरयोगपदेनचसमू
हएवतस्याश्रयलिंगसंख्याग्राहित्वोक्त्याऽवयवतादात्म्येनभानंस्पष्टमेवोक्तं एतावतैवचोभयपदा
र्थप्रधानोद्वंद्वइतिव्यवहारः समूहस्यावयवेभ्योभेदेनाप्रतीतेः किंचदशसाध्योस्थापनकूभारोस्था
पनक्रियातत्कर्तृत्वंचप्रत्येकसंबद्धमपीतरसाहित्येनैवबुध्यतेनत्वेकोनोस्थापयतिसमूहउत्थाप
यतीतिचप्रयोगः तत्राद्येएकशब्दोऽसहायपरः एवंद्वित्वादिकमपिप्रत्येकसंबंधमेवइतरसाहित्य
रूपसमूहबुद्धिश्चतद्व्यंजका इतरसाहित्यबुद्धिरपेक्षाबुद्धिः अपेक्ष्यतेसापेक्षासमूहस्तद्विषयोबु
द्धिरित्यर्थः लोकेहाविमादिप्रयोगेचैकशेषंविनापिद्व्यादिशब्दानांसमूहबोधकत्वमतएवद्वंद्वे

मंज० २२३

कश्चैषयोरुभयार्थसमूहमानंगीकारस्तदज्ञानेनतद्बोधात्स्पष्टंचेदंसरूपसूत्रेभाष्ये तस्यपूरणे इतिसूत्रेभाष्येपु
क्तं अन्योन्यंवाच्यमाश्रित्यसर्वस्मिन्द्व्यादयः प्रवर्त्ततइति अन्योन्यं अन्योन्यसापेक्षंवाच्यंसंख्येयमाश्रित्य
पूरणप्रत्ययांतपंचम्यादिप्रकृतयः पंचादयः सर्वस्मिन्प्रत्ययवाच्यसहितेवर्त्ततेतत्रतत्संख्याश्रयसमू
हस्यप्रकृतेर्वाच्यत्वात्तदंतर्गतस्यैकदेशस्यप्रत्ययोवाचकोयथावार्त्तीशास्त्रवादृत्तस्यावयवइत्यर्थः अ
नेनहितन्नत्संख्यावत्त्वेनपरस्परसापेक्षसमूहप्रतीतिस्पष्टमेवोक्तासर्वएवद्व्यादयोऽन्योन्यमपेक्षंतइति
चतत्रोक्तं तत्रसमूहः उद्भूतावयवभेदएववाच्यः अतएवपंचादयोनित्यंबहुवचनांताएवंचद्वित्वादि
योनिरेकत्वंभेदात्तत्सर्वकार्यत्वः विनातेननसंख्यानामन्यासामस्तिसंभवएकत्वेनविनाद्वित्वादीना
मुत्पत्तिसंभवाद्द्वित्वादीनामेकत्वंयोनिःकारणंतेनविनान्यासामसंभवंदर्शयितुंभेदाइतितत्सर्व
काः अभेदमलत्वैकपूर्वकाइत्यर्थः तस्मादेकत्वमाद्यंद्वित्वादयस्तुतत्संनिधौतत्पूर्वकाजायंते तदे
वाह एकत्वेबुद्धिसहितेनिमित्तंद्वित्वजन्मनि एकत्वाभ्यांसमुत्पन्नमेववाप्रतीयते एकत्वविषयाबुद्धि
त्वादेकारणं तत्रद्रव्यस्यैवसमवायकारणत्वात्समासस्यभावाच्चसमवायिकारणत्वासंभवेनतस्या
निमित्तकारणत्वमेवसमवाय्यसमवायिकारणभिन्नंसान्यसमाख्यायानिमित्तमित्युच्यते यद्वेक
त्वाभ्यामेवद्वित्वमुत्पन्नमेकत्वद्वयबुध्यानुतत्त्वानमेतदेवमीमांसकमतंद्वित्वादिस्वरूपेमतभेदमा २२३

हएकत्वसमुदायो वासापेक्षेवा पृथक् पृथक् द्व्येकयोरितिनिर्देशो प्राप्तिरामस्तथासति एकत्वा
भ्यांतापर्वंद्वित्वमुत्पाद्यते किंतु तयोः समुदाय एव द्वित्वं तत्रावयवाश्रयो भिन्नाकारावभासः संघाश्रयश्चै
काकाराभासः यथा वृक्षसमुदायो वनशब्देनोच्यते तथैकत्वसमुदायो द्वित्वशब्देनायद्वापरस्परापे
क्षेएकत्वेएव द्वित्वं अंशं संदूषयति एकत्वद्वित्वपरे द्व्येकयोरिति निर्देशे एकत्वत्रयस्य द्वंद्वविषयत्वाद्ब
हुवचनतापत्तेः तस्मादेकत्वाभ्यांजनितमन्यदेव समुदायरूपं द्वित्वमेवं त्रित्वादयोपीत्येवन्याय्यं न
तु द्वित्वादेरेकत्वात् द्वयोर्द्विवचनमित्याद्यनुपपन्नं तत्रोक्तं एकोपिगुणभेदेन सद्योभेदं विकल्पये
त गुणाः समूहावयवास्तेषां भेदेन स्वात्माभेकस्यापि द्वित्वादेर्भेद इति तदुपपत्तिरितिहरिणोक्तं ननु पंक्तिविंशतीति
सूत्रे भाष्ये विंशत्यादिषु प्रकृतिप्रत्ययोस्तदर्थयोश्चाज्ञानमिति ग्रन्थे द्विदशाददयं दशदार्थो विधायिनः शतिश्चस
यो द्वौ दशतो विंशतिः विंशत्यादयो दशदर्थे चेत्सामानाधिकरण्याभावेन विंशतिर्गवामिति समासानापत्तिः
विंशतिर्गावः इत्यस्य चासिद्धिः दशतोर्द्वित्वात् द्विवचनं प्राप्नोतीत्युक्तेः सिद्धांतेनोक्तं समुदाये एते विंशत्या
दयो भविष्यंति कथं संघ इति वर्त्तते न च प्राणिसमूहः संघ इति हस्तानां विंशतिरिति न सिद्ध्येत् विंशतिश
ब्देनैव गोसंघस्योक्तत्वात्तत्र परिमाणत्वाद्द्रव्यतो नापत्तेरितिवाच्यं द्रव्यादद्रव्यसंघस्य दशतो दशत्संघ
स्य दशतो गवां च पारमार्थिको भेदो नास्ति केवलं तत्र आपरिकल्पते बुद्ध्यवस्थापितार्थनिबंधनाश्चत्र

मं.ज्र.० त्वाद्द्रव्यसंघेपरिमादायसामानाधिकरण्यंच सिद्धं विंशतिर्गाव इतिगवां शतमितादिकभेदाद्वा गवामपि
२२५ दासततसंघगुणित्वेनगुणिनागुणविशेषणेनगवां विंशतिरितिषष्ठी समुदायाभिधाने समुदायस्यैकत्वा
देकवचनं सिद्धं सामानाधिकरण्येपिविंशतिर्गाव इत्यादौ विंशतिसंख्यासमुदितद्रव्यसमवायेनानुप्रस
क्तं समानाश्रितिगावोधनमित्यादिवत्तत्र तैकत्वस्य विशेष्ये आरोपेणैकवचनसिद्धिरतद्द्रव्यगतलिंगसंख्याननु
वृत्तिः प्राक्शतादेषां स्त्रीलिंगत्वमेकवचनांतत्वंच शतस्य तु नपुंसकत्वं विंशतीतिविंशत्यइत्यादिलेकशेषेसा
ध्वेवेतिकैयटः तदुक्तं भाष्येतेनतेविंशात्सादश्यायः समुदायेसंतोभाववचनाभवंति भाववचनाः सत्वोगुणव
चनाभवंतिगुणवचनाःसंतोःविशाभवंत्यस्मैगुणवनैः अन्येषुगुणवचनेषु काचित्गुणोगुणिविशेष
कोभवति यथापटःशुक्ल इतिकदाचिद्गुणिनागुणोविशेष्यते पटस्यशुक्ल इतीतिभाववचनत्वसहनत्र्कि
यावचनत्वात् गुणवचनाइस्यपत्सीद्स्मात … व्यवहार्या इत्यर्थः गुणवचनाः संतइत्यादिनातत्सा
दृश्योपपादनात् अतएवगोविंशत्यादिषुषष्ठीसमाससिद्धिः गुणवाचित्वेहि पूरणगुणेतिनिषेधः स्या
त्मुख्यगुणत्वेनकेपटादिकृतोव्यवहारस्त्वसंगतएवभाष्यविरोधात् विंशतिद्रव्यसमुदायएवविंशति
त्वमितिभाष्यंतरेणप्रकृतिप्रत्ययविभागबोधनायोक्तं तथाचद्वारियोषितनइद्रव्यसमूहवचनाइ
त्युक्तमेवअसमूहएवचएकत्वंप्राहीति तत्रेभाष्येपिभेदमात्रसंख्या आहेत्युक्तं भेदोवेत्तत्वएपमितिके

यदः एकत्वस्याभेदबोधकत्वात्तथाव्याख्यातं तदुक्तं हरिणा भेदाभेदविभागोऽलोके संख्यानिबंधन इति सि
द्धित्वादिर्भेदव्यवहारहेतुरेकत्वमभेदव्यवहारहेतुरिति हेलाराजः विलक्षणाविलक्षणसमूहरूपत्वं च व्याख्य
आहुः असमूहरूपत्वं चैकशब्द आहः एवं च हरिणा कथमेकत्वसमुदायरूपत्वमुक्तमिति चेत्स संपरमते
न तथाभिधानात् अतएवोपक्रमे संख्यावान् सत्वभूतोर्थः सर्व एवाभिधीयते सर्वधर्मी व्यतिरिक्तो वा ते
षामात्मैव वा तथेत्युक्तं यस्य धर्मः संख्यारूपो धर्मः व्यतिरिक्त इति वैशेषिकमते तेषां द्रव्याश्रिता गुणरूपा
संख्या स्वमतमाह तेषां मात्मैवेति तेषां सत्वभूतार्थानां समूहस्यासमूहस्य हि भिरसंत भेदाभावादात्मैवेत्युक्तं तथा सं
ख्यात्ववान् असमूहरूपकमेकत्वं समूहरूपं द्वित्वादित्रेव संख्यात्वस्याभंगीकारेण समूहस्य समयापेक्ष
याविलक्षणः प्रत्ययः उपपन्नः एतेन पदार्थमात्रात्तुल्याधेर्विलक्षणप्रत्ययानापत्तिरित्यपास्तं संख्यैव
त्वस्य समूहरूपत्वस्य चोपाधित्वात् इति पुंजराजादयः तत्र आद्य अनुद्भूतावयवभेदः ससंख्यात द्विपरी
तस्य तदाश्रयः यद्वा समूहत्वेनाबाधे च ता संख्यागतैकत्वस्यानुविशेषमारोपः शब्दशक्तिस्वभावात्
दशाब्दं दशरथसंबंधिसमूहबोधकः अनुद्भूतावयवभेदः सविशेष्यसमूहत्वेन च विशेष्यता संख्या
वसर्वपदार्थभेदिका तस्यापि भेदिका गुणक्रियाभेदिका च क्रियाभेदापकालतस्तु संख्या सर्वस्य भेदिके
त्युक्तेः एकविंशत्यादयो विसंख्यात्वरात्येव न संख्यासमूहः संख्याकार्यानापत्तेः स्वांगसमुदायादौ

स्वांगादिकार्याभाववद्द्विसंज्ञे एवं चेतरेतरयोगे साहित्यं विशेषणमिति तत्र भाष्याद्यसंमतं एतेनोपस्थितधवख
दिरयोरवद्धित्वान्वयः एकक्रियान्वयितस्यैकबुद्धिवच्छिन्नरूपस्य वा साहित्यस्य पश्चादेव भानेन न तत्र द्वन्द्व इति कल्पना
याश्चानौचित्यात् एकक्रियान्वयितस्यैकबुद्धिवच्छिन्नरूपस्य वा साहित्यस्य पश्चादेव भानेन न तत्र द्वन्द्व इति कल्पनाया
अनौचित्यात् अन्यतरस्यान्यतरत्रान्वयविवक्षायां पश्य धवखदिरौ छिंधीति तु न सामर्थ्येन समासाप्राप्तेः
एकरूपेणैकविशेष्यान्वयित्वरूपसामर्थ्यस्यैव द्वंद्वनिमित्तत्वात् द्वित्वरूपैकधर्मावच्छिन्नयोरेकत्रान्वयस्यै
वौचित्याच्च अत एव सर्वो मत्तिकयोत्पादावेवैरीसा समासो नानभिधानात् किंच नात्र द्वंद्वः एकरूपेणतया
न्वयाभावात् नापि तत्पुरुषः तत्र तथा सामर्थ्यग्रहणे मानाभावात् चार्थे द्वंद्व इस्य चार्थे सति यथा
विशेष्यान्वयित्वं तथा विशेष्यान्वये सतीति द्वंद्व इत्यर्थः समर्थसूत्रे तूभयविधसामर्थ्यग्रहणं परं तु व्यव
स्थितं समुच्चयान्वाचययोस्तु न समासोऽनभिधानात् सोमेवसानावग्निमादधीयातामित्यादौ सहितयोर
धिकारलाभस्तु यत्कर्त्तृकं तदनयासहेतिवाक्यादिस्यपानं ल्वट्कसूचार्थस्याशाब्दत्वाच्च धवखदिरावित्या
दौ प्रत्ययानां प्रकृत्यर्थान्वयित्वेन विभक्त्यर्थानन्वयापत्तेश्च संनिहितार्थबोधकत्वमिति तु बहुव्रीहिप्रकरणे
दूषितं धवादित्वानन्वयापत्तेश्च न चानुशासनिकसंनिधानग्रहणेन पदं उत्तरं यः प्रत्ययोनुशिष्टः सत
दर्थकार्थत्वस्यैतरन्यतरगतत्वार्थबोधक इति धवेष्वन्वयोयोग्यतादेर्नियामकत्वाच्चार्थविप्रलीरा

जपुरुषं संपश्येमादौ न दोषइत्तिवाच्यं अुसमंतरकल्पने गौरवात् एकरूपेणैकक्रियान्वयित्वसमनियतसम
समानपदार्थसमूहभानानुरोधेनद्वंद्वेतरावद्योपकत्वाच्च अतएवात्रविग्रहवाक्येरवचादिप्रयोगेनेत्युक्तं चार्थे
द्वंद्व इतित्वनेकमन्यपदार्थेइतिवच्छक्तिग्राहकमेव एतेनचार्थेइत्यस्यैकक्रियान्वयित्वरूपसाहित्येसतिद्वंद्व
इत्यर्थः इत्यपास्तं एकक्रियान्वयित्वेचशब्दशक्तेरभावाच्च अग्नीषोमाविमादौ समुदितस्य देवतात्वाद्यत
एवसंगच्छते नचचैत्रोमैत्रश्चागच्छतइत्यादावाख्यातोपात्तसंख्यान्वयाय चार्थसमूहस्यविशेष्यत्वापत्त्या च
स्यतद्वाचकत्वं वाच्यं एवंच चैत्रस्यमैत्रस्यच समूहइत्यत्रैवषष्ठ्यायस्याइतिवाच्यं तदात्मकेनसमूहप्रती
साभेदनिर्बंधनषष्ठ्यानापत्तेः सचसमूहः क्वचिद्वास्तवः क्वचिद्बौद्ध इत्यन्यत पुष्पवंतादिपदेविसमूहः
शक्योतएवद्वित्वान्वयः पुष्पवंताविसस्य प्रकृतिस्तांतादंतान्च एकयोक्त्या पुष्पवंतौदिवाकरनिशाकरा
वित्यमरे द्वंद्वेन पर्यायप्रदर्शनात् पुष्पवंताविसत्रद्विवचनोच्चारणाच्चैकयोक्त्येत्युक्तेश्च समूहस्यशास्त्र
तायाः स्पष्टमेवलाभात् पुष्पवंतपदं चंद्रसूर्यसमूहशक्तमित्साकारः शक्तियहोनोनतत् एकतरमात्र
बोधोनाविशतत्त्पावंतंयनुभेदश्चार्थ इतितन्नतद्बोधाननुभवात् येनकापितरयी प्रतीतेश्चत्वार्थः सा
हित्यं परं भिन्नानामित्यमत् शिवरामयोरभेदइत्यादौ तत्तदुपाधिकृतभेदवत्तोरेवोपाधिनिर्मोकेदभे
दप्रतियादनान्नविरोधः समूहश्चसमूहिभ्योभिन्नाभिन्न इतिनिरूपितं सहिताभ्यां कृतमित्यादेः सम्

मंजू० हः बुद्धिविषयाभ्यां कृतमित्यादिक्रमेणार्थः धवखदिरौ छिंधीत्यादौ क्रियान्वय एवं समूहस्य क्रियोत्पत्तिनु
२२६ समूहे संभवात् प्रत्येकमेव एवं विग्रोः आह्वाकुर्यादित्यादावपि इदमेवाभिप्रेत्य तुल्यवदेकक्रियान्व
यित्वं साहित्यमिति प्राञ्चः यथा तुल्ययोरेककालमेकधर्मसंबंधनिमित्तकं तुल्यत्वं तद्भिन्नतुल्यत्वासंभ
वात् तथैककालमेकक्रियान्वयित्वनिमित्तं साहित्यं समूह इत्युत्तरार्थः समुच्चयान्वाचययोस्तु न समा
सः ईश्वरं गुरुं च भजस्वेत्यादौ समुच्चये एकस्यान्यसहितस्यान्वयेप्येकस्य केवलस्यैवैवैकधर्मावच्छिन्ने
न्वयेन चार्थेनैकवृंतस्थत्वस्याभावात् एकधर्मावच्छिन्ने इत्युक्ते वस्तुतो भजनस्याभिन्नत्वेपि न दोषः
अत्रैकस्य केवलस्य क्रियान्वयोनन्तरमपरस्यान्यसहितस्याहृत्यात् तदन्वयः स च विशेष्यतया विशेषण
तया वा आद्यो देवः पचति हसति चेत्यादौ अन्यस्तु त्वं समुच्चये चैत्रो मैत्रश्च पचतीत्यादौ नित्यमेकव
चनांतात्स्यात् प्रयोग एव चरहितस्य केवलस्यैवान्वयात् चसहिते नापि तद्भूतावयवभेदः समूहस्ये
व प्रतीतेः किं चात्र समासे तत्र कपदोपदार्थस्याप्य समूहस्यैककालमेवेतरान्वयस्य पुष्पवंतादौ कृत्स्न
त्वेन समुच्चयत्वस्यैव भंगापत्तिः अत एव भिक्षामट गां चानयेत्यन्वाचयेपि न सः अत्र चकारसमभ्या
हृते आनुषंगिकत्वमितरसाहित्यं च भासते आनुषंगिकत्वं चान्यनिष्पादकयत्ननिष्पाद्यत्वमेवं च तत
द्याप्यत्वं फलति एवं चानुषंगिकं भिक्षाटनसहितं गवानमिति बोधः प्रायेणान्वाचयश्चस्य क्रियान्व
२२६

येभवति यत्रतुक्रियान्वयापिचद्वयंयथा पचंतिचहसंतिचेत्यादौ नत्रपरस्परसाहित्यावगमानानुषंगि
कत्वप्रतीतेः एवंचसमुच्चयेचसमभिव्याहृतस्यकिंचिदप्राधान्यंप्रतीयते अतएवसमकक्षयोरेकस्यसमु
च्चेयत्वेदुःखंदृश्यते इतरेतरयोगेतुमिलितस्यैकधर्मावच्छिन्नेनैवान्वयः धवखदिरौछिंधीत्यादौतथै
वानुभवात् मेलनंचसमूहरूपता अतएवतद्विग्रहवाक्येचद्वयप्रयोगः तेनप्लक्षोस्तिन्यग्रोधोस्सा
हित्यंगम्यते तेनसमूहतासिद्धिः अतएवचैत्रश्चमैत्रश्चपचतइत्यादौनित्यंद्विवचनाद्यंताख्यातप्रयोग
एव एकैकत्वेनद्वित्वादेर्विरोधेपिसमूहबुद्धिविषयगतनानेकत्वैरविरोधात् एकधर्मावच्छिन्नेसुकेर
जोग्राममनयतीत्यादौनसमासः क्वचिदेकचकारप्रयोगेपिप्रकारांतरगृहीततात्पर्यवशात् परस्परसाहि
त्यावगतिर्भवत्येव यथासांकाश्यकानांपाटलिपुत्रकाणांचपाटलिपुत्रकाअभिरूपतमाइत्यादौस्पष्टंचेदं
द्विवचनविभज्येत्यत्रभाष्यकैयटयोः एवंक्वचिच्चकाराभावेपितत्प्रतीतिः यथाहरहर्नयमानोगाम
श्वंपुरुषंपशुमित्यादावहरहः पदसमभिव्याहारात्तत्प्रतीतिः क्वचित्तुचद्वयसत्त्वेपिनतत्प्रतीतिः वाक्या
लंकारमात्रार्थत्वात् तयोर्यथापदग्नयेचप्रजापतयेचेत्यादौ मंत्रलिंगेननतत्रप्रत्येकंदेवतात्वस्यैवप्र
तीतेः समाहारेनङूतावयववनेरः समूहोविशेष्योतएवतत्रैकवचनंसिद्धं द्वंद्वश्चप्राणीत्यादिप्रकरणं
तुनियमार्थमितिभाष्येस्पष्टं पाणिपादंवादयेत्यादौवादनकर्मत्वंतुवस्तुतस्तस्यपाणिपादाभिन्नत्वादौ

धं यत्तु अत्र समाहारो न भासते द्विवचनादित्वनुशासनेनासाधुत्वबोधनान्नेति तत्र सर्वत्र तद्बोधकानुशा
सनाभावात् एकवचनविधायकाभावात् समाहारद्वंद्वगर्भेतरेतरयोगे द्विवचनानापत्तेश्चेत्यलं स्यादेतत्
अहरहर्नीयमानो गामश्वं पुरुषं पशुमित्यादौ इंद्रो वरुणस्त्वष्टा दिशां ते लोकपाला इत्यादौ च चार्थसंभ
सयाद्द्वंद्वः प्राप्नोतीति चार्थे च शब्दस्य द्वंद्वस्य चेत्युभयोरेव साधुतायाः शास्त्रेण बोधनात् आद्ये हरहरि
नेनांत्ये लोकपाला इत्यनेन तरेतरयोगप्रतीतेः ननु युगपदधिकरणवचने द्वंद्व इति भाष्येण दोषः अ
धिकरणं वर्त्तिपदार्थौ तयोर्युगपत्सद्वयेनाभिधाने द्वंद्व इति तदर्थः एवं च रामकृष्णावित्यादौ रामपदेन
रामकृष्णयोः कृष्णपदेन तयोरभिधानाद्भवति द्वंद्वः गामश्वमित्यादौ तु गवाश्वयोर्भिन्नैः शब्दैरेकैकरूपाणव
पृथक् प्रत्याय्यंत इति न दोषः विरूपाणामित्येकशेषस्तु नात्र द्वंद्वविधिसामर्थ्येन समानार्थानामिति साम
र्थ्येन च युगपदधिकरणतां विना विसमानार्थतायामेवैकशेषात् यद्वा मध्याविति त्रपुंवलमपि नह्यते:
प्रागादिवत्र सामानाधिकरण्येन नैव तत्स्वप्रवृत्तेः सहभूतयोरेव युगपदर्थद्वयबोधनसामर्थ्यमिति नाम्नतरवै
यर्थ्ये द्वंद्वविषयं चेतरत्तः केवलरामपदाद्रामं कृष्णं चेति वाक्यघटकाश्वनोभयबोधः वेदेनुक्तविहितावे
त्यादौ द्यावा हन्तामित्यादौ एकैकेनार्थद्वयानिधानेऽपि तिब्यपुनर्नवस्योरिति सत्रस्य बहुवचनस्यैत्सने
न सर्वो द्वंद्वो विभाषैकवद्भवतीति ज्ञापनात् पलेधववादिरामित्यादि सिद्धिरिति चेन्न सेयं युगपदधि

कारणवचनता दुःखादुरुत्थपादावेत्यादिभाष्य एव तस्यादूषितत्वात् नच दुःखत्वं प्रतीतावनुपारोहात्
तस्याहि द्वन्द्वव्यवहाराद्विशब्दार्थावसायः नच यत्र तत्र शब्दस्य न्यग्रोधाभिधायित्वं लोके दृश्यते न च तत्र तत्र श
ब्दस्य लक्षणा न्यग्रोधशब्देनैव तत्त्वाभावात् द्विवचनाद्यन्तप्रयोगस्यानुपपत्तिदोषश्च समूहस्यावयवावे
क्षाहित्वादितः समुदायात्प्रतीतेः दुरुत्थपादे तस्य दुष्टत्वं निःसारमुपपादनं यस्यासाविष्णाणे समर्थः नच यथा
वाहस्ताम्बेसादौ मासदर्शनात् समासे पि सेति वाच्यं तस्य छान्दसत्वेन तत्र सुपां सुपः स्वेव सिद्धेः नच
समासात् द्विवचनबहुवचनोत्पत्त्यर्थं तदावश्यकता पूर्वपक्षमुपपादितत्वात् समुच्चयान्वाचययोः
समासाभावार्थमपि न सा उक्तरीत्या सामर्थ्येनैव तत्र समासवारणात् अंगश्च वंगश्च कालिंगश्चेति
अंगवंगकलिंगा इत्यादौ तद्राजस्य बहुषु तेनैवास्त्रियामिति लुक् न तु तद्राजप्रत्ययार्थसमूहगतबहुत्वविव
क्षायां तद्राजप्रत्ययस्य लुगित्यर्थान्तां विनापि विधत्त इति चेत्स चेत्कृतस्यार्थस्याभावात्समासाप्राप्तेरि
तिभाष्य एव समाधानात् यत्र विग्रहे चेन बोध्यं साहित्यं तत्रैव द्वन्द्वो न चात्र तथा अहरहरादिपदसम
भिव्याहारेण तस्य तत्र बोधेपि चकाराबोध्यत्वात् उक्तार्थत्वाच्च न तत्र चकाराप्रयोग इति दिक् उपदं
शं दंतोष्ठं दशासमीपो दंतोष्ठसमाहार इत्यविबोधः समाहारे दशासमीपत्वं यत्र बहुव्रीहिर्दशात्वसंख्यासमी
पसंख्यावरवयक्तत्वेन अत्र बहुव्रीहेर्नानुप्रयोगं तस्मिन्निस बहुवचनांतत्वेन दंतोष्ठमिसनेनान्व

धीयोग्यत्वात् इतिद्वंद्व घटाविमारावपि घटद्वयासमूहोघटशब्दार्थः एकशेषात् एकशेषविधायकं च
सरूपाणामेकशेषएकविभक्ताविति सूत्रं तच्च द्वंद्वे रत्यनुवर्त्तनात् द्वंद्वविषयं तेन तत्र शिष्यमाणं
लुप्यमानार्थाभिधायीति भाष्येन लुप्यमानार्थस्य हि तास्मद्वृत्तिता च अतएव तत्र द्विवचनाद्यन्वयः ननु
तंत्रेणैवेष्टसिद्धं तथा हि द्विविधं तंत्रं शब्दतंत्रमर्थतंत्रं च तत्र केचित् अर्थभेदाच्छब्दभेद इति मते सकृ
तास्वोरुपवृद्धमायाराद्धिनगमनाविरहेणानेकशब्दानां भेदापन्नवेनोच्चारणमिसाय तत्रतदर्थान्वयि
समभिव्याहृतैकशब्दैकानुसंधानेन कर्मत्वादिवैशिष्ट्येनानेकार्थसमूहबोधः यथास्माभिस्सारे
विद्युन्मानसेत्सादावेकशब्दस्यैकानुसंधानेनैवानेकार्थबोधः स्मततयैकदेशस्यानेकस्यैकानुसं
धानासंभवात् यद्वा तत्राप्यत्वनेकस्यैकानुसंधानमेव विद्युन्मानसमानसेति यच्चतुष्टुत्विते दुः
त्विते चेतसि रवरहनराशितुनहिरीध्रेतिरिमारावेकानुसंधानेनविरुद्धार्थयोर्युगपद्बोधासंभव
त्तत्रयक्रमाच्छ्रोतुः शब्दद्वयानुसंधानद्वयं भवत्विति तात्पर्ये सकोच्चारणेपि श्रोतुरनुसंधानद्वयेन क
मेणबोधादावृत्तिरितिव्यवहारः एवं च तत्र श्रोतुः एवं च तत्र श्रोतुः शब्दावृत्तिर्वक्तुस्तु तंत्रेणोच्चारण
मितिबोध्यं एवं चैकशेषविषयेतत्राहुरनेकशेषाणामनंतममस्त्विति ग्रंथस्यालमेतिकविकल्पपर
तया प्रवृत्ताभिसाएव घटं पटं चानयेत्यादावपि समुच्चयार्थकचशब्देन क्रमेण बोधे तात्पर्यात्

श्रोतुरावृत्तिरेव अन्नाभग्नंतांभस्मंतांदीर्घंतामित्यादौसमभिव्याहृतानेकपदप्रयोगरूपात्तात्पर्यग्रा
हकात् विभक्त्यंतानामेवतंत्रेणबहुत्वमनोतत्तत्कारकशक्तिमतांभिन्नक्रियान्वयितयाबोधेनश्रोतुरनेका
नुसंधानाद्बोधस्तस्मादावृत्तिरेव प्रातिपदिकतंत्रमेवतुनात्र एकक्रियाद्यन्वयेएवतस्यसत्वात् तदुक्तं
हरिणा: सकृदुच्चरितःशब्दःसकृदर्थंगमयतीति सकृदर्थमित्यादेरेकवारमेवप्रतीतिंजनयतीत्यर्थः सा
चप्रतीतिरेकविषयानेकार्थविषयावेत्यन्यत् गंगायांमीनघोषावित्यादावनेकार्थस्ययुगपदुप
स्थितेः यत्तुसकृदर्थमित्यस्यैकमर्थंबोधयती त्यस्यैकमर्थंबोधयतीत्यर्थः इत्युक्तंतन्न क्रियाभ्यावृत्ति
गणनेकृत्वसुच् इत्यधिकारेएकस्यसकृच्चतस्यसकृदादेशविधानेत्यर्थकेनैकस्यसकृच्चेतिसूत्रेणनिपातनेनस
कृच्छब्दस्यैकार्थकत्वाभावात् एकवारमित्यर्थकत्वाच्च अतएवसर्वादिसूत्रे तेनसूत्रेणसर्वादीनां
सर्वनामसंज्ञाविधीयते सर्वादीनिसर्वादयइतिगणपाठश्चविशेष्यते इत्युक्तासकृदुच्चरित इतिसु
त्वतिमलकतयाकथंपुनरेकेनयत्नेनोभयंलभ्यमित्याशंकायामेकशेषनिर्देशादितिसमाहितं वक्त्रै
कशेषेणोच्चारणादित्यर्थकेनैकशेषनिर्देशादित्यनेनवक्तुःशब्दद्वयस्यबुद्धिस्थतयाबोद्धुः एव
कशब्दद्वयज्ञानंभवत्वितिवक्तृतात्पर्यंतत्रैवततस्यतस्यानुसारात्श्रोतुर्ग्रह इतितद्बलेनपुनर
नुसंधानादर्थद्वयप्रतीतिरितितत्वाशयः एतेनसतितात्पर्येएकशब्दज्ञानेनापिसमूहालंबन

विधयोपस्थितानेकार्थानामनेकैः संबंधिभिः समूहालंबनात्मकोन्वयबोधः इत्यत्राभ्यंता
मितादौ विनाप्यावृत्तिं बोधदर्शनात् तथानुभवाभावात् उक्तभाष्ये एकेनाप्युभयं लभ्यत इति समा
धानानुपपत्तेः सा बोध उक्तं प्रयोगस्याधानुत्वबोधनाच्च शब्दसादृश्यं च तंत्रबीजं अर्थभेदेपि
शब्दैक्यमिति नये तात्पर्यग्राहकप्रकाशात् एकशब्देनैकवृत्तिगतानेकफलस्यायेनानेकार्थसंबं
बद्धे तानेकार्थबोधादर्थतंत्रमित्याहुः वस्तुतस्तु अक्षादिस्थलेषु साशब्दभेदेपि लोकानां न भेदप्र
तीतिः पदादिषु पदसामिन्नभेदः अर्थभेदाभावात् बोद्धृभिरनेकशब्दज्ञानाननुभवाच्च एवं च मत
भेदेन शब्दतंत्रं आर्थतंत्रयोरुपपत्तिर्नयुक्ता तस्मान्मतद्वयेपि शब्दस्य परिवृत्तिसहत्वे शब्दान्वयव्यतिरे
कानुविधायिशब्दतंत्रं तस्य परिवृत्तिसहत्वेऽर्थतंत्रं उभयत्रापि सकृदनुसंहितेकशब्देन युगपदनेका
र्थबोधः अस्माकमपि सादावाद्यं पदाम्नायेसादावंतं अत्राभ्यंतोऽभक्तं तामित्यादावृत्तिः किं
च प्रसमर्थशब्दनिवेशेनेकार्थबोधनायानेकशब्दप्रयोगे प्राप्ते एकशेषारंभ इति तत्सामर्थ्यादेकस्या
नेकार्थत्वं वाच्यं एवं च लोकत एवैकस्यानेकार्थत्वे सिद्धे शास्त्रमर्थं न नयस्ती बोधकत्वशक्तिः शा
स्त्रे लोकस्यायंदरिति शक्यं वक्तुं न चैवं प्रसमर्थशब्दनिवेशहानिः स्वस्वार्थप्रमायनेनैव प्रसमर्थशब्दनिवे
शस्वीकारात् अर्थार्थी प्रतिअर्थानर्थान्प्रतिपतरपि प्रसमर्थमेवेति भाष्यात् अर्थभेदाच्छब्दभेद इ

सत्त्वापितत्त्वार्थभेदात्तच्छब्दभेद इत्येवार्थः यथार्थद्वयबोधकत्वं तादृशाद्भ्यो वक्तुरर्थप्रतियारकत्वं
त्तादृशशब्दाभिन्नाः सर्वथैकशेषस्तत्रैमर्थमितिचेन्न अर्थमर्थप्रतियत्तस्मापिप्रसर्थत्वेन घटघटादि
त्वादिचारणार्थं सत्यपाणौ द्वंद्वविशेषयेएकशेषणवेतिनियमार्थं तत्सत्वात् द्वंद्वविषये इत्युक्तेऽथ वे
त्ता योवकारगर्भयेवाक्यसिद्धिः एवंच प्रातिपदिकनंत्रं सहविवक्षाविषयमेव तत्रैव शेषव्यवहारो
मुख्यः अस्महविवक्षाविषये विभक्तंतं तन्नैकशेषव्यवहारो गौणः यथा सर्वादिस्त्रे भाष्ये एकशेष
विषये द्वंद्वतावयवभेदसमुदायस्यनकदापि विशेष्यतनुनाभिधानात् अत एव नपुंसके नेति सूत्रे
एकवचनस्यान्यतरस्यामिति चरितार्थं द्वंद्वस्यानभिधानमाश्रित्य सूत्रं प्रत्याख्यातमाकरे एतदेवा
भिप्रेत्य तंत्रत्वमेकरूप्येण भावे तुल्योपकारकः उपकारान्यथात्वं तु भवेदावृत्तिलक्षणमिति मीमां
सकाः तत्र शब्दविषये तुल्योपकारतश्चास्य तुल्यकालमुपकारतोऽन्वयतश्चार्थः विद्यमानसेत्या
द्यो परस्परान्वये विमानसाभिन्नमानस्य विकरणकहंसेति युगपदेव बोधाः सदृत्तिः कदाचित्तत्र
पृथक् प्रयोगोपि विद्यमानसमानस्येति सारथ्योभिजदृत्तिवत् उपकारान्यथात्वं भिन्नकालमन्व
यत्वेन क्रमेण बोधे आवृत्तिरित्यर्थः एकरूप्येणेसनेन शब्दस्यारूप्यं तंत्रबीजमुक्तं क्रिययोरपि सा
रूप्यमेव तंत्रबीजं क्रियाविषयतंत्रादेरेवेदं लक्षणमित्यन्येन आलभेतेत्यात् घटमानयेत्यादौ जाते:

मं.ऊ.० प्राधान्येनानेकवृत्तिबोधेऽपि एकवचनं एकशेषेऽवृत्तित्वमव्यहारस्तु हंसपदवाच्यत्वेन गोत्वाः इत्यगर्या
२३० नामेकार्थीभवनरूपैकार्थीभावस्याभावात् शुद्धव्यक्तौ स्वसंबंधेन व्यक्तिप्रकारक एव शक्तिग्रह
स्तस्या एव च शब्दतो बोध इति मते एकशेषसूत्रस्योक्तिसंभवो बोध्यः जातिशब्दार्थस्तु उपलक्षितं द्रव्यं
शब्दार्थ इत्यादिमते तु जात्यनुगतीकृतानेकव्यक्तिबोधस्यैकस्यापि संभवेनानेकशब्दप्रयोगाप्राप्त्या
सूत्रस्योक्तिसंभव एव नास्ति अत्रापि इत्यादौ जातिष्वपि जात्यंतरांगीकारेण तस्या एव शब्दवाच्यत्वेन न दो
षः एतेन डित्थादिष्वपि व्याख्यातं यद्वानेकेषु तत्तच्छब्दत्वं नाम सामान्यमभिन्नप्रत्ययाभिधानहेतुस्त
च्छब्दार्थयोः सोऽपि समवेतो धर्मसाधारणः तस्मात्सशब्देषु संज्ञिषु वर्तत इति तद्वैशिष्ट्येनानेकप्रतीतिः
एवमेव गोत्वाश्वत्वे सामान्ये इत्यपि लिंगसकलसामान्येषु सामान्यत्वं जातिरूपमस्ति तिः सामान्यानि
सामान्यानीति च तार्किकदर्शनं न नियोगतो वैयाकरणैरास्थेयमिति कैयटः अभावत्वधाराद्या
वविनिरूपाख्यत्वं तत्तत्सनियतमभावत्वं सामान्यं बोध्यं सूत्रारंभे च्छेदेव बोधप्रक्रियाः तेन प्रत्या
ख्याने फलभेदः ब्राह्मणश्च ब्राह्मणी च ब्राह्मणौ इत्यादौ पुमान् स्त्रियेत्यादिनैकशेषः अत्र वृ
त्वे स्त्रीत्वाभ्यां ब्राह्मणत्वजात्याश्रयो बोधः न च तत्रापि तज्जातिमत्वेब्राह्मणीबोधेऽपि ब्राह्मणयो
रूपायां स्त्रीत्वापत्तिरिति वाच्यं उक्तरूपापरूपब्राह्मणबोधे इव तत्तद्बोधे तस्य वाचनिकत्वात्

एवं शिवौ भ्रातरौ पुत्रौ स्वसुराविसादौ इत्यभिमितिर्वेदितव्यं भाष्यानुसारिणस्तु तत्र सादिष्वेकशे
षविषये भ्रातृत्वं द्रष्टव्यमिति भ्रातृपुत्रावितिसूत्रभाष्योक्तेः भ्रातराविसादौ भ्रातृत्वेनैव स्वस्रादिबो
धः तस्यां तत्वारोपात् पितराविसादौ पितृत्वादेर्मातर्यारोपेण पितृत्वादिनैव मात्रादिष्वपि बोधः प्रक
रणादिवशाच्च विशेषावसायः कदाचिदपि तत् द्वयस्यापि ततः प्रतीतेः गार्ग्यावित्यादाववयिरनीगर्ग
गोत्रत्वारोपेण तेनैव रूपेण स्त्रीयोपि बोधः ब्राह्मणाविसादितो ब्राह्मणत्वेनैव ब्राह्मणी बोधस्तद्रूपारोपात्
ननु ततत्तद्रूपेणानुभवविरोधात् एकत्रैव नन्वेवं शक्तिकल्पनापर्यंतरे हस्तिकल्पने गौरवाच्च पिता भ्रात्रेत्या
दिनस्तु न तथा बोधः एकदेशादिविषये एवं तेषां स्वप्रवृत्तिनिमित्तारोपेण मात्रादिबोधकत्वस्य शाब्दश
क्तिस्वभावसिद्धत्वात् भाष्यात् एवं वा भात्र सूत्रमतमप्येवमेव स्त्रात्तितुदंदनिहितस्यांनीत्याहुः इत्येक
शेषः घटं निहंति देवदत्त इत्यादौ एतत्पर्यंतच्छायाकरे वदत्तकर्तृकास्य संबंधि घटकर्मिके च्छेति बोधः स्वसंबंधि
त्वादिभानं शाब्दशक्तिस्वभावात् महांतं पुत्रीयती सादितु न त्रसामर्थ्यात् पुत्र आत्मनः क्यजितिसूत्रेणैवं वि
तसंबंधीच्छा कर्मवाचकादिच्छायां क्यजिस्यर्थकेनात्र क्यच् तस्य परं विधिलं स्पष्टमेव पुत्रकाम्यतीति काम्य
तेतेप्येवमेव विष्णूयति द्विजमित्यादौ उपमानवाचकात् कर्मण आचारे क्यजितिसर्थकेनोपमानादाचार इत्यने
नकृत्य उपमानत्वमित्याचारविद्गमेव प्रसारात्मयेः चैत्रकर्तृको विष्णुकर्मकाचारसदृशाद्विजकर्मक आ

चारइतिबोधः तत्रप्रत्यासत्त्याविग्रहवाक्यविग्रहकर्मकाराचारोपि चैत्रादिकर्त्तृकएव चकास्यते चैत्रइत्यत्ररूपस्य
इवाचरतीमिधेकवड् अत्ररूपस्यकर्त्तृकाचारसदृशाश्चैत्रकर्तृक आचारइतिबोधः विग्रहद्वियोः रूपस्यै
क्येयोग्योपमानोपमेयभावः अयः अन्येतुउपमानत्वंकर्माद्यंतइतिह्यपितंकर्मत्वादिचाचारनिरूपितं
प्रत्यासत्त्येत्ततएवचाचारस्यसाधारणधर्मत्वमनुक्तंतुप आत्मनइत्यत्राकरे आचारकर्तृत्वंत्वादावुपमानक
र्माद्यंतर्भूतंउपमेयकर्मादिनासकर्मकत्वंसकर्तृकत्वंचेति एवंचोपमानविग्रहकर्मक आचारउपमेयादि
जकर्मकइत्यादिरीत्याहरिशीलाबोधइत्याहुः सुपर्वभिः शोभितांत्रिविष्टपंभारतायतेइत्यादौश्लेषेणभेदग्र
हेऽपिचशब्दरूपसाधर्म्येणसादृश्यग्रहेरस्यप्युपपत्तिर्बोध्याः अत्रसर्वत्रपरस्मैपदिष्ट्वेनकार्याभावसामर्थ्येन
वसायुत्वांसुंदरः रूपसायतइत्यादिनाशब्दशक्तिस्वभावाश्च प्रकृसर्वस्यापिसाधुत्वेभावात् व्याकरणस्य
त्रंकरोतीतिवाक्येसंबंधेनान्वितस्यापिव्याकरणस्यव्याकरणंसत्रयतीत्यादौकर्मत्वंहेतुमतिचेतिसूत्रे इ
हव्याकरणस्यसत्रंकरोतीतिवाक्येषष्ठीव्याकरणस्यसत्रयतीतिसिद्धितीयाके नैतदेवंभवतियोसौसूत्रव्याकर
णयोरभिसंबंधः सउत्सन्नेप्रत्ययेनिवर्त्ततेइतिचकरोतेर्व्याकरणेनसामर्थ्यापितिभाष्यात् मुंडादिसूत्रेके
षांचिद्ग्रहणंसादेत्तेभ्योपिविधानार्थमित्याकात् प्रातिपदिकप्रकृतिकात्तिचोविसमर्थाद्देवोसत्तिः अ
तएवमहांतघटयतीत्यादिना नचसूत्रशब्दार्थस्यसाध्यत्वेनभानेपितराश्रयत्वेकथंव्याकरणस्य

कर्मत्वमितिवाच्यं स्वत्र्यागानुकूलव्यापारार्थकस्य स्त्र्यजतेरखंडत्वात् मुंडिस्तु आद्यः स्याद् भेर्भागेरखु
गताइवविभक्ताः कल्पितात्मानो धातवः कुट्टिचंचिवत् इतिह युक्तेः विभक्ताः अन्वाख्याताः कल्पिता
त्मानः वस्तुतः कुट्टिप्रभृतिवदखंडाएवते अयलन्वाख्यानोपायाएवैतेतिभावः तदाह पुत्रीयतीनपुत्रोस्ति
विशेषे छागुतादृशोवक्निवपुत्रानुगमाद्यापुत्रेमवतिष्ठते प्राणोर्थैनायथाधारिजीवतो प्राणकर्म
कः अन्वाख्यानायभेदीसुसदृशाः प्रतिपादकाइतिभेदाः प्रकाराः सदृशाः पृथगभूतपुत्रादिसदृशा
घटिताः प्रतिपादकाः अखंडधात्वंतरं स्येतिशेषः अन्वाख्यानायतस्यैवबोधनायकल्पिताइतिशे
षः तदुक्तं समर्थस्यानुगमंकृ विहद्वावपरिकल्पितंवाक्येपरं पदे धातुर्धातोर्भागश्चमुंडिवत् यथैव
दित्येउपसि पाचकेपिपचेस्तत्तथा उपतिष्ठ्यतिष्ठेवद्वावप्येतावनर्थकाविति भाणकमात्मनः
पुत्रमिच्छतीतिवन्माणवकं पुत्रीयतिसादितुनानभिधानात् तदुक्तं सुप आत्मनः क्यच् अभावेमुंड
यतिमाणवकमित्यत्र यथोभयोः करोतियुक्तत्वं यथावामुंडीयतिमाणवकमित्यत्रोभयोराचा
रेणायोगस्तथामाणवकं पुत्रीयतीत्यादावुभयोरपियोगोपिस्यादिस्याशंकयनाव्ययार्थेनुगं
तमोगमकत्वाद्भविष्यतीति अगमकत्वादिछाकर्मजं तेनयोप्रयोगो नेतिकैयटः एवंचोधर्मनया
कीयतिओरनस्यपाकीयतिसाध्यत्वगमकमितिबोध्यं एवं प्रातिपदिकप्रकृतिकक्विंतेपिसः क

र्गुः व्यादितिसूत्रे उपसंख्यानेनतत्साहचर्यात् अतएवसुंदरः हस्तीसादिनासनंतेष्वेकार्थीभावसत्वे
वीजमुक्तं प्राक् कृदंते ष्यपपदनिमित्तके परोद्देश्यक विधित्वेनैकार्थीभावः अतएवतत्रोपपदमितिसूत्र
भाष्येउक्तं महांतंकुंभंकरोतीत्यत्राणप्रतीतिः नैतदस्ति उपपदमितिमहतीसंज्ञाक्रियते उपोच्चारि
तंपदमुपपदं यावचसत्वेदानींपदगंधोस्ति पदविधिरवंभवतिपदविधिश्चसमर्थानांभवतितचासाम
र्थ्यान्नभविष्यतीति पाचकादावपिसः पाचकादिशब्दानांक्रियाप्रवृत्तिनिमित्तकत्वस्यभाष्येव्यवहारा
त् अतएवव्यापारान्वयव्यवच्छायामादिः पचतीतिवदादिः पाचकइतिन फलविशेष्यणानांत्वेकदे
शेविकल्पेनवयोभवत्येव पूजनात्पूजितमितिसूत्रभाष्येदारुणाध्यापकइत्यत्र समस्ताध्यापकपदार्थै
कदेशफलेदारुणपदार्थान्वयस्वीकारात् फलावच्छिन्नव्यापारस्यधात्वर्थत्वेन सर्वत्रैकदेशेफले
एवतदन्वयस्वीकारात् उपगोरपत्यमौपगवइत्यादौतस्यापत्यमित्येवं जातीयसूत्रैर्विहितप्रत्यया
मपत्यादिरर्थः षष्ठ्याद्यर्थश्चसमुदायगम्यः उपगुसंबंध्यपत्यमित्यादिरीत्याबोधः अत्रापिसुंदर
स्यापिगोरपत्यमुपगोरेवदत्तस्यचापत्यमितिवत् सुंदरस्यौपगवऔपगवोदेवदत्तस्यचेत्यादिवा
रणायैकार्थीभावव्यावर्तकः सुवंतद्धितोत्पत्तेः पदविधित्वात् नचतद्धितएकार्थीभावांगीकारे
पर्वतोवह्निमान् धूमादित्यादौ धूमादित्यस्यवह्न्यावच्छिन्नव्याप्तिरितिवाच्यं विशिष्टपर्वतएवान्व

यात् ज्ञानगतहेतुमद्भावस्य विषये आरोपेण हेतावत्र पंचमी अत एव मायस्तत्र भाष्यवार्त्तिककारैः
प्रज्ञापनीयविशिष्टो धर्मी साध्य इत्युक्तं सास्य देवतेत्यस्योदाहरणे आग्नेयादौ देवताविशिष्टं द्रव्यं प्रत्य
यार्थः प्रकृत्यर्थः प्रत्ययार्थैकदेशे ऽभेदेन विशेषणं यद्वा देवताप्रदेययोर्भिन्नैव प्रत्ययस्य शक्तिः अ
ग्न्यभिन्नदेवतासंबंधीति बोधः प्रदेयं च संबंधित्वेनैव प्रत्ययार्थः प्रदेय इति मंत्रस्याप्युपलक्षणं अग्निहो
दिपदेष्वसंबंधित्वेन बुद्धिस्थैव प्रदेयस्य विशेषः समर्प्यते इन्द्रादिपदैर्देवताया लाभे ऽपि देवता
त्वेन लाभात्तेन रूपेणालाभाय देवतायां शक्तिरित्याहुः अस्मे तु चतुर्थ्यादौ प्रकृत्यर्थस्य प्रकृत्यैव लब्धत्व
तुर्थी देयत्वमात्रं यथोच्यते एवमत्रापि देवताप्रदेयं च प्रत्ययार्थस्तत्र प्रदेये देवतात्वस्य निरूपकता
संबंधेनान्वयः अग्निवृत्तिदेवतात्वनिरूपकमिति बोधः न त्वेवं तद्धितेन चतुर्थ्या वा मन्त्रवर्णेन वापु
नः देवतासंगतिस्तत्र दुर्बलं चयाश्रयमिति मीमांसकोक्तं दार्ढ्यं कथमिति चेदित्थं चतुर्थ्या वाक्याद
वतात्वसंबंधलाभस्तद्धिते समानपदोपादानवशेनेति प्रत्ययवशात्वलाधीनं तत्र देवतात्वसंब
वधित्वयसापेक्षत्वेन चतुर्थ्यादितीयासंबंधिनः स्वपरूपदोपात्तत्वेन वाक्यात्तल्लाभः प्रकृते तु संबं
धित्वयस्याप्येकपदोपस्थाप्यत्वात् श्रुत्या तल्लाभः यद्वा प्रदेयमेव प्रत्ययार्थः स्ववृत्तिदेवतात्वनि
रूपकत्वसंबंधेन प्रकृत्यर्थस्य प्रत्ययार्थे ऽन्वय इत्याहुः देवतात्वं च हविर्दानैर्मन्त्रकर्मणो देवतेति देवा

मंत्र० नास्तीति सत्वभाष्यात् मंत्रकर्णकोयोहि विस्मागतजन्मस्वर्गादिदित फलाश्रयत्वेतदुद्देश्यत्वे मंत्रस्तुसंत्वं
२३३ च अतएवेंद्रहविरिंद्रो मंत्रइत्यादिलिंगं देवतानिष्ठंफलंचास्मेदं फलंभवत्विति आरूपाप्रीतिरेवकोद्दा
दित्यादिमंत्र प्रयोज्यस्वामित्वभागिनिप्रतिगृहीतर्यतिप्रसंगवारणायस्वर्गादिरित्युक्तेति नयोगिञ्च : स्थ
ग्धादित : श्राद्धेमृतपत्नीनांमृतानांहवि : संबंधात्रब्राह्मणायोद्देश्यत्वमितिमृतकर्तृकस्वाहाकारावषिन
मस्कारोमंत्रोक्तेव अनुमतोस्मिनमस्कारोमंत्रइतिगौतमस्मृते : उद्देश्यता च मंत्रोक्तशब्दशरीरेणयथावच्छि
न्नेश्वरचैतन्यस्यतदेवचमंत्रोक्तेंद्रादिपदवाच्यं इंद्रंमित्रंवरुणमग्निमाहुरथोदिव्य : ससुपर्णोगुरुत्मान्
एकंसद्विप्रावहुधावदंत्यग्निंयमंमातरिश्वानमाहुरितिमंत्रवर्णात् आहुर्मंत्रारतिशेष : एवउ ह्येवस
र्वेदेवा इतिश्रुतेश्चातेन सोमादीनांदेवतात्वसिद्धं पर्यायांतरेणोद्देश्येचनदेवतात्वं इंद्रादीस्यर्थमा
णमन्वमेधाद्यनुष्ठानंचनासंगतं इंद्रादिपदैरेवेश्वरस्वरूपदेवतोद्देशेनतैरविहितयितुस्तागोपपत्तेः इंद्रंच
यागानुष्ठानंतत्वज्ञानात्सर्वमेव तदुत्तरमपि वालोकानुग्रहायेतिबोध्यं अतएवइंद्र : सहस्राक्षोगोत्राभि
द्वज्रबाहुरित्याद्यर्थवादप्रदर्शितविग्रहहविर्भोजनैश्वर्यतृप्तिफलदातृत्वानांनबाध : श्राद्धार्थस्यदेवता
त्वेपवीयांतरप्रयोगापत्तिः अग्नयेस्वाहेत्यादौ नद्रन्यापत्तिश्च उद्देशात्स्यदेवतात्वेयोद्देश्यशरीर
स्यवासंनिधेयभावदाहनमंत्राणांश्रुद्धादृष्टार्थत्वमात्रापत्तिः गंगाशालिग्रामादौ निसंनिधा

नादावाहनमंत्रान् पठनीया इत्यादेस्तत्साद्धं विनाप्यदृष्टसिद्धेरित्यत्र तावत्सर्य्यं चक्रं तस्मात् क्षिर्वगाधिक
रणेन देवताः कर्मस्वारभ्क्रियंते इंद्रादेर्हविस्त्यागे देवत्वसंबंधोंतरा देरभावात्स्वात्मनेसंकल्पमानद्रव्यस्यस्व
त्वसमागासंभवेन कर्मानिष्पत्तेरित्यर्थः नेनन देवतादेवतांतराभावादितिसूत्रेण शब्दास्तिदेवताया जैमि
निनाप्यंगीकाराच्च न च देवताया अपियागांगत्वमाग्नेयइत्यादितद्धितादिभिर्बोध्यते अनुष्ठेयमुपकार
कं चांगं भवति न च देवतायागमध्ये स्वरूपाणानुष्ठानुं शक्यानापि कालिंनाभिवतासामुपकारकत्वमितिवा
च्यं तहा चरुशब्दोच्चारणस्यैवानुष्ठेयत्वात् वा चकत्वाराद्वा देवतास्मुपकारत्वात् शब्दस्यैवदयितत्वात्स्मा
द्विव तदुक्तं शबरस्वामिभिः शब्द एवहविषा संबध्यते तत्संबंधात् यो देवता भविष्यतीति आवाहनमंत्रै
श्चानेकयागेषु संनिधानमयं यागो मदर्थ इतितदुद्देश्यविशेषणत्वेतिन शास्त्रादिभिरंगः नाप्यनेकेषु सं
निधानानुपपत्तिः योगिवद्भूतानां तद्वत्त्वेनेच्छयानंतामधिष्ठायानेकैः स्वस्मत देशरीरैस्तत्र सं
निधाने बाधकाभावात् चांतर्धानशक्तियोगाच्च परैरदर्शनं ईश्वरस्येव देवतात्वेतु नानुपपत्तिलेशोपि
किंच देवैर्नीरसादीनां संवारः उपालेषु श्रूयते संविग्रहत्वेएवोपपद्यते एतं च तेनैवोपहृहणेनार्थवा
दानांवास्यार्थबोधविषयीभूतविग्रहे विश्रुताद्देवतासर्थेन श्रुतौ मुख्यतास्यर्य विग्रहेपितदुपयोगि
त्यात् एवं च ध्यानविधयो देवतासायुज्य सालोक्यादिफलनिर्देशाश्चोपपन्नाः अतएव सन्त्यत्रैभाष्ये

सर्वस्यपदार्थस्यचेतनात्वंस्यात्तथाचात्मइत्यर्थंवादवलेनोक्तं ईश्वरोपिप्रसाध्यतिलेश्यवलानुमानेन
ग्रस्तनुग्राहकं अंतर्यामितयाजगत्कारणतयाच्चरि इत्तविरोत्तेषुप्रसिद्धं चेतनस्यैवमेवसाधवात् भेदप्रती
तित्वौपाधिकीसदिति तत्रैवस्पष्टं चरकेपतंजलिरप्याह देहीसर्वगतोह्यात्मा विभुत्वमतएवास्य यस्मात्सर्ग
तोमहान् स्तुपत्रम्यभिसानुवद्धंमनसा देहकर्मानुयातिनासर्वयोनिगतंविद्यादेकयोनावपिस्थितम्
ति देहनिर्वर्तककर्मणानुयातः संबंधोयस्यतादृशेनमनसांतःकरणेनश्लिष्टः अंवद्धंचेतनंसर्वयोनिग
तमवितकयोनौस्थितंविद्यात् कारणकर्मात्थेदेहेएवतदंतःकर्मधर्मानुगच्छतीति नामांतःकरणधर्मा
त्नात्मरेहेइत्यर्थंतद्व्याख्यातारः योनिदेहाणांवचानेकेभिन्नवप्रात्मानइतिपरास्तं एकवचनेनात्मनः
एकत्वस्यनित्यानुद्वित्त्वाहिनाऽप्यापाधिकभेदस्यचस्पष्टमेवाभिधानात् परमार्थसारेपिपतंजलिराह य
द्दिनकरो एकोविभातिसलिलाशयेषुसर्वेषुतद्वत्सकलोपाधिषुसंस्थितोभातिपरमात्मेतिगीतायाम
पिसर्वभूतेषुयेनैकं भावमव्ययमीक्षते अविभक्तंविभक्तेषुतज्ज्ञानंविद्धिसात्विकं पृथक्त्वेनतुयज्ज्ञा
नंनानाभावात् पृथग्विधानात् वेत्तिसर्वेषुभूतेषुव्यक्तिसमाक्तिरूपेषु एकमव्ययंजन्मादिहीनंभावंचे
तनं अविभक्तमव्याहतंयेनज्ञानेनेक्षते तज्ज्ञानंसात्विकमित्यर्थः केनचेतन्यैक्यमुक्तं यत्तिरस्तीयार्थे
येनज्ञानेनपृथक्त्वेनभेदेनस्थितेषुदेहेषु भावान् चेतनान् नानाभिन्नान् पृथग्विधान् परस्परविलक्ष

णान् वेत्तित द्वाजसन्निसर्थकेन द्वितीयेनापि तद्वेव दृढीकृतं अंतेनाधि बहुषु भक्तकार्येषु सत्सु एकस्मिन् त
त्कार्ये दृष्टे ततः करणे वा प्रतिमाहो वा कृत्स्नवत्स्नं परिपूर्णवत् स्थितं एतावाने वात्मने स्वरो वा नातः परं
किंचिद्रस्तीत्याकारं हेतुहीनं अनवगतार्थविषयकं असंनिसत्वाद्यग्रहात् एवं ज्ञानं नाम सन्निसर्थः केन
तद्वेव दृढीकृतं एवं तत्रवर्तिया दृकशास्त्राणां पुराणानां च तत्त्वदर्शिनमिसन्मत्रा विस्तरः एवं तद्दृशं ग्रह
णमिति क्रीडायां णः सोम्यनिवासः साम्नि पौर्णमासीम् एवंजातीयकेषु साम्स्वेव तेषु दाहरणेष्वबो
धनिर्णयो बोधः तेन प्रोक्तं नन्वत्र किं प्रोक्तत्वं न चाध्यायनेन प्रकाशितत्वं सुसम्पंणा ध्यायिते काठके
सौसम्पंत्ता मित्स्प्रयोगात् न च नन्न तत्त्वं कृतं ग्रंथेष्वेवसिद्धेः यद्यप्यर्थौ नित्यत्वात् सौ वर्णानुपूर्वी सा
नित्या नडेरा द्वैतद्भवति काठकं का नायकमिति भाष्यात् प्रलयेषु स्थारिथित पुरुषाभावाशान पूर्वी वि
नाशे न पुनः तत्सदृशरूपयः संस्कारातिशयातिशयाद्देशार्थं स्मृत्वा शब्दरचनां विदधति अनुपूर्वीभेदाद्देव
पूर्वाभेदे पिकेषु चित्काठकादिव्यवहारस्तत्रकथात्द्यो वेदानुपूर्व्याः कर्त्तारः प्रवक्तारः किमेकेय
टोकेष्वकृतत्वात्तते: अर्थोत्र ईश्वरः तत्रैव पुरुषतया सर्ववेदतात्पर्यात् वेदैश्वसवैरहमेव वेद्य इ
तिगीतोक्तेः साम्स्वेव तेतिरक्त्र ओतमंत्रवर्णादिभ्य ऋग्यजुः ज्योतिष्टोमादिरूपोर्थः समान नाम रूपस्वा
न्निसः आनुपूर्व्यानुभिन्नरूपत्वाद्विनिसेसर्थः इति तत्त्वः कृतेषु ग्रंथेष्वेवसिद्धे तेन प्रोक्तमिति अर्थेमि

मंज० ति शंकायां नच नित्यानि छंदांसीति तेन तेषां कृतत्वाभावात्तेनासिद्धिरित्येकदेशिनोक्ते यद्यप्यर्थो नित्यस्
२३५ साधुत्वं अर्थस्य कृतत्वेपि वर्णानुपूर्व्याः कृतत्वात्तेनैव सिद्धमिति नदाक्षेप्यः त्वदुक्तिसाध्यात्वात्तेनुता
दृष्टाः नित्यत्वेपि कृतत्वाबाधात्तदुक्तेर्वोविषयत्वस्यात् अनित्यानि छंदांसीत्येव च वदेत् यद्वा सो व
र्णानुपूर्वीत्येवमनेन सर्वं बोधार्थानुपूर्व्यां अपि संग्रहः अनित्यत्व माप्य भेदेन तद्दृष्टयतितरभेदाच्चे
नीश्वरेतु न किंचिन्नित्यादिनो भेदः सर्वत्र पत्वात्स्येति चेन्न माधुरेण प्रकाशितायां तत्कृतायां कृतौ
माधुरीत्यस्यापि धर्मस्य बोधकत्वात् प्रोक्तशब्देन स्वकृतं परकृतं वा यद्दृत्यमं प्रकाशितं तदुच्य
ते नचखण्डशर्मादयत्तथाप्रकाशाकाद्दसदोषः तत्र कठादयः संस्कारातिशयाद्वेदार्थं तद्बोधकवैदि
कशब्दानुविद्धमेव स्मरंत्यतस्तादृसः शब्दाविच्छेदः अनुपूर्व्येंशश्रावात्पत्वं यद्यपीदानीमानुपूर्वी
यस्या तेनाप्यदृष्टहानिस्तथापि तत्तयोमाहात्म्यात्तत्कृतानुपूर्वीमत्तयो तादृष्टहानिकरः भाष्ये
वर्णानुपूर्वीत्यत्र वर्णशब्देनपदस्तु च्यते अनुपूर्वीमात्रभेदेत्तपदहानि तान्येवेति सूचितं तथाच
स्मृतिः प्रतिमन्वंतरं चैव श्रुतिरन्याविधीयते इति स्वयंभूरेषभगवान् वेदो गीतस्त्वया पुराशिवा
द्या ऋषिपर्यंताः स्मर्तारोस्य न कारका इति पुराणे तर्हि तान्वेन्महर्षयः लेभिरे तपसा पूर्वमनुसा
ताः स्वयंभुवेति च तत्राध्यात्मतिरानुपूर्वीभेदादुपपन्ना अंसचार्थनित्यत्वादुपपन्ने तथाव्यास

स्कंतोरःशादौब्रह्मणोवेदामुखेभ्यस्त्वविनिर्मुक्ता तत्रैवचप्रलयंयांति प्रलयेसमुपास्थितेइति विष्णुपुरा
णेपि द्वापरेद्वापरेविष्णुर्व्यासरूपीमहामुने वेदमेकंसबहुधाकुरुतेजगतोहितः वीर्यंतेजोबलंचा
ल्पं मनुष्याणामवेक्ष्य वैहितायसर्वभूतानांवेदभेदान्करोतिसः द्वापरेद्वापरेइत्यस्यद्वापरेद्वापरेतत्संध्यांशेष्वि
त्यर्थः द्वापरेनुपराहत्तेमनोःस्वायंभुवेंतरे ब्रह्मामनुमुखाच्चेदंवेदांतस्यप्रजायते इतिवायुक्तेः आद्यो
वेदश्चतुष्पादः शतसाहस्रसंमितइतिशतशब्दोनानंतवाची अनंतावैवेदा इतिश्रुतेः चतुष्पादः
ऋग्यजुःसामाथर्वरूपः इतिचतत्रोक्तं अतएवदेवीपुराणे स्वयंभूरूपभगवान्सात्त्विकमुक्ताकथं
देवीवेदमाताएतत्कोतूहलंममेतिमनुप्रश्ने इच्छाज्ञानक्रियाशक्तिर्देवीत्युपाप्रकीर्तिता मातृकानु
क्रियाशक्तिःक्रियासातमरूपिणी संप्रसूताष्टवर्गोनुस्वरवर्णविभेदतः क्रियारूपाभवेद्देवी
वेदमाताततोभवदितिब्रह्मणउत्तरेणवर्णानांजन्मत्वंतद्द्वारावेदस्यजन्मत्वंचस्पष्टमेवोक्तं ॐका
रप्रभवावेदा इत्यपितत्रोक्तं तस्योंकारस्यसर्ववर्णसमष्टित्वादुपपन्नं ऊर्ध्वमूलमधःशाखमश्व
त्थंप्राहुरव्ययं छंदांसियस्यपर्णानीतिगीतावाक्यादपि छंदसामनित्यत्वंस्पष्टं संसारवृक्षावयव
त्वेन तेषांवर्णानां ईश्वरप्रतिपादकपुराणादीनांतुवेदतएवज्ञात्वावुद्धिपूर्वंरचनमितिविशेषः
तस्मान्नयलेमानाश्चत्वारोवेदा अजायंतेसादौजने: प्रादुर्भावमात्रमर्थोनतूत्पत्तप्रादुर्भावस्यावे

मं.ज.० ब्रह्माणं विदधाति पूर्वं यो वै वेदांश्च प्रहिणोति तस्मै इति श्रुते प्रदानं च तदर्थानुसंधानुकूलशक्तिरा
२३६ नमेवात्र बोध्यं अत एव सर्वेषां तु स नामानि कर्माणि च पृथक् पृथक् वेदशब्देभ्य एवादौ पृथक् संस्था
श्च निर्ममे इति वेदेभ्य एव सर्वज्ञानप्रवृत्तिकाले हि तत्त्वसंगच्छते कठादीनां तु न तत्सत्तेऽपि तन्नामकत्व
मात्रेण कल्पे कल्पे विनश्यंति तन्नामानो भवंति चेति देवीपुराणात् अत एव व्यासादीनां तत्तदधिका
रं तेषु मुक्तिश्रवणेन न विरोधः अस्मे तु पदानां ज्योतिष्टोमाद्यर्थस्य च नित्यत्वं प्रवाहनित्यत्वेन तथा च
व्यासस्तत्र समाननामरूपत्वाच्चावृत्तावप्यविरोध इति आह तो आनुपूर्व्याः पुनः पुनरुत्पत्तावपि
वेदस्य नित्यत्वेनाविरोधः समाननामरूपत्वात् नाम्नां पदानां रूपाणामर्थानां च समानत्वादिति
एवं च नामरूपप्रवाहाविच्छेद एव नित्यत्वमिति तद्भावः वेदोऽपि मायापरिणामविशेष एवेत्याहुः
ईश्वरनिर्मितत्वेऽपि तन्निर्मितहिरण्यगर्भवाक्ये वास्तवं यथार्थत्वं बोध्यं एवं च वक्तृपुरुषकल्पकशंका
राहित्येन वेदः प्रमाणमेव किंच न दृष्टं धर्माधर्मफलस्य तत्तारतम्यस्य च लोके प्रसिद्धं ततः क
स्यचित्स्तुतित्वं कस्यचिद्दुःखित्वं कस्यचिल्लोकपालत्वं कस्यचित्स्वकुलपालत्वमित्येवरूपेणानुभ
यमानतया प्रामाण्ये सिद्धे अथर्ववेदाद्येकदेशे वानुभवेन प्रामाण्ये सिद्धे इतरांशेऽपि प्रामाण्यमेव सिध्य
ति तस्य किंचिन् न तत्पुरुषाज्ञेयत्वाच्चनयोरदृष्टेषु स्वर्गे योगिसामर्थ्यमर्यादादिविषये चेवातिश

यज्ञत्विं न धर्माधर्मादि प्रसक्तजनकं किंत्वतीत धर्माधर्मजनकक्रियादिविषयमेव तेषां प्रसक्तं तत्रत
त्रेऽनुमर्यंते किंच निर्दुष्टसर्वज्ञेश्वरव्यासप्रभृतिसरूपत्वान्नतन्नाप्रामाण्यशंका अपौरुषेयत्वं त्विदं मयाक
र्तव्यमिति बुद्धिपूर्वकं प्रयत्नेनाकरणान्न एतावतैव वा कर्तृकत्वव्यवहारः वेदजनकत्वं च देवव्रजगज्जन
कत्वमीश्वरस्येति बोध्यं शाक्त्याद्यागमास्तु नैव तेषां बुद्धिपूर्वं मोहनार्थत्वेनकृतत्वस्मरणात् तदुक्तं स
तसंहितायां श्रुतिः सनातनी साध्वी सर्वमानोत्तमोत्तमा प्राह चाद्वैतमेनेमस्पेनिर्विकारत्वमात्मनः
ततः सर्गादिचाप्याह चेतनाचेतनस्य च श्रुतीन्द्रियार्थविज्ञानैर्मानैर्नः श्रुतिरेव हि श्रुतिः सनातनीशं
भोरभिव्यक्ता न सेश्वरः शंकरेण प्रणीतेति प्रवदंस्य परेजनाः यद्वासा नादिभूतैव न तु रामानमतीवसा स्वत
श्च परतो देषो नास्ति यस्माद्विजर्षभाः श्रुतिचेह्यवहारस्य लोपस्य प्रसज्यते परतश्च न दोषोऽस्ति परस्या
भावतो द्विजाः स्वतो दुष्टोऽपि शब्दस्तु मानमत्रापि सेस्मात् इति वार्त्तानुवार्त्तैव मुनीन्द्राः सत्यदर्शिनाः स्वतो
दुष्टः कथं मानं भवत्यस्य संगमात् क्रमयोगेन यो भावो यस्य प्राप्ताः प्रविध्यति स तस्य भ्रांत एवास्यान्य
स्वभावः कथंचन जपाकुसुमलौहित्यं विभाति स्फटिके भृशं तथापि तत्र लौहित्यं भ्रांतमेव नवास्तवं
अन्यत्रान्यस्य धर्मस्तु प्रतीतो विभ्रमो मतः असापेक्षतया शब्दः प्रमाणं न ससर्वथा अनाश्रयोगा
कदस्य प्रामाण्यं मुनिपुंगवाः तिरोभूतं स्वतः सिद्धं विनाशयेव केवलं परासाक्षं कारेणोक्ता न तु दिग्ग

मं.ज.० तिरगत्तिका: प्रमाणांतराभावत्तमतयमहेश्वरः सर्वदोषविहीनस्य महाकारुणिकस्य च सर्वज्ञस्य च
२३७ शुद्धस्य कथं दोषः प्रकल्पतो सर्वदोषविशिष्टस्यानिघृणस्य दुरात्मनः अल्पज्ञस्य च जीवस्य दृष्टानासिद्धि
सत्तमाः अत्रयत्तद्वयेनापि वेदे प्रामाण्ये संशयः विहीनादिशिवस्यात्ते व्यंजकः परमार्थतः आजिम्यति
मये स्यैव प्रणेतेतु च्यतो शिवः ईश्वरस्य स्वरूपे च जगत्सर्वादिके द्विजाः अतींद्रियार्थे प्रमेयेषु मानं नुष्यति
रेवहि श्रुतिसहाय्यरहितमनुमानं न कुत्रचित् निश्चयात्साधयेदर्थं प्रमाणांतरमेव वा मुनेवेदी महेशोद्धः
प्रमाणं सर्ववस्तुनि अन्यथानजडः शब्दो तींद्रियस्य साधकः अनंतमल्विनान्नां तु प्राणिनां वेदमार्गतः
पंचरात्रादयो मार्गाः कालेनैवोपकारकाइति तत्र वेदप्रामाण्यं साधयितुं शब्दमात्रस्य प्रामाण्यं साधयन्
शब्दस्य तु तो दोषो नास्ती स्यादाशक्तिचेदितिस्वतो दुष्टस्यैवास संबंधानउत्तप्रामाण्ये व प्रामाण्यत्वमिस्य
संगतमित्याह स्वतो दुष्टोपि स्यादि तदुक्तप्रामाण्यस्य भ्रमविषयत्वेनासिद्धानियामकतापत्तिरितिभावः किं
चाप्तापेक्षेशब्दस्य प्रमाणत्वे तदाप्तत्वं केनचित् मानेन ज्ञातव्यं तत्प्रामाण्यमपि मानांतरेणेत्यनवस्था
तस्मात्स्वतः सिद्धमेवशब्दस्य प्रामाण्यमनासबुद्धिप्रभवत्वरूपकारणदोषेणतिरोभूतं क्रियतेइतिनवं
च कारित्वावप्रामाण्यमितिभावः ईश्वरस्याप्तत्वेमानमाह सर्वदोषविहीनस्येति तत्तवेसर्वज्ञत्वं तद्धी
नत्वं च केनापि तद्दोषाद्यसाक्षात्कारात् शंकरकृतत्वं खंडयति ईश्वरस्यस्वरूपे चेत्यादि ईश्वरस्य तत्त्व

रूपत्वान्निर्मितंजगत्तद्रूपमेवईश्वरोभोक्तातद्रूपमेवजगद्भोग्यंतथाप्ययंचोवाधईश्वरः ज्ञानतद्बाधकंपर
स्यांत्ववाध्यवाधकतातत्रयथैतद्द्वकारित्वस्वभावमायावशादित्याद्यर्थेषुश्रुतिरेवमानंएवंचकृतत्वे
नप्रामाण्यविहितस्यप्रमाणत्वेचेश्वरसिद्धिरित्यन्योन्याश्रयइत्यर्थः अतएवदेवीपुराणेसुहितः प्राणि
मात्रस्यशिवेनपरमात्मना खड्गाजिघांसतावत्सआयुर्वेदः प्रकाशितइतिशिवस्यतत्प्रकाशकत्वमे
वोक्तं खड्गांखड्गासुरंभुद्धानुमानात्तत्सिद्धिर्नैसाह श्रुतिसहाय्येति कुतर्कशंकाकलंकयासा इतिभावः
श्रुतिविरुद्धंत्वनुमानंअनुमानाभासएव यत्पुनरनुमानेप्रसक्तागमविरुद्धंन्यायाभासः सइतिन्यायभा
ष्योक्तेः वेदमार्गतः सार्वविभक्तिकस्तसिः वेदमार्गेणेत्यर्थः हीनानामितिशेषः पांचरात्रादयः इत्या
दिनाशाक्यादयः तेनैतेषांवेदकुत्सितानिरस्ता असंतमलिनम्न्यामिमनेनोदितानुदितहोमवदधिकारि
भेदेनप्रामाण्यमवस्थोक्ताशाक्याद्यागमानाशावरमप्यात्मज्ञानोपयोगितयास्वंतमलिनाप्रतिप्रा
माण्यमस्त्वेवेतिविरोधेत्वपेस्यं स्यादित्यधिकरणेभट्टपादैरयुक्तं किंचवेदोक्तार्थबाधनिश्चयाभावे
नगुरुतरत्वेनचाप्रामाण्यकल्पनादेस्तया प्रामाण्यकल्पनेवोचिता: प्रामाण्यस्यस्वतोग्राह्यत्वाच्च
एवंभगवन्मात्रेपितस्यचमायापरिणामस्यवेदस्यसमीयोभगवान्नीश्वरोपिछ्रतातेनचांतर्यामित
याप्राप्तः सइत्यस्माच्छब्दादेतदर्थबोधोभवत्विति मायावृत्तिरूपा तदिछापितत्रांतरभूतेतिविवस्यो

मंज०
२३८

निर्वाहः मुनेर्वेदो महेशोद्भवः इत्यादिस्मृतसंहितोक्ते ग्रहाधिकरणवार्त्तिके पि शब्दब्रह्मात्मनोप्येवं सर्ववेदा
नुसारिणः विवर्त्तावा विवर्त्तावावस्थात्मा विधिशक्तितरति शब्दवादाभ्युपगमे तु ब्रह्मणोपि सर्ववेदात्मक
देहाधिष्ठानत्वाद्विवर्त्ताविवक्षेव वक्तुं शक्येति न च विधिशक्तितोज्ञायंते इत्यर्थ इत्तिराणकहृत् प्रथद
कांतरेपि शब्दब्रह्मेतियच्चेदं शास्त्रं वेदाख्यमुच्यते तदप्यधिष्ठितं सर्वमेकेन परमात्मना तेषामंतर्गते
ष्वानां वास्यार्थप्रतिपादने विवर्त्तावाद्विवर्त्ताच्च जायते शब्दशक्तित इति सन्दसूत्रेभाष्येउक्तं सर्वं चेत
नावदिति याद्दशी चानुपूर्वीकदाचिल्लतानजातीयैवाध्ययनं धर्महेतुः अन्यथा वाग्व्ययतयानर्
र्थहेतुः एतदभिप्रायेणैव यास्कादिरप्यभिचरितस्वरवर्णानुपूर्विका इत्याहुः अर्थाद्यस्यया स्वपुरुष
सापेक्षत्वं वेदे सर्वदानुपूर्व्याप्यैकैवकेनाप्यकृतैवचेति नन्वमीमांसकप्रद्वानाप्यंतु तदर्थकस्यतदीया
र्थस्य चलोनुपलंभान्महाभाष्यकारादिवचनेविरोधाच्चानादेयं वेदत्वं नु सति संभवे शब्दार्थयोः प
र्यासंस्थो भास्करे पूर्णादर्शनास्सति संभवे वेदस्तुक्तं नित्यानित्यं हंसीति दृर्चैपक्षे द्व्यप्यर्थौ इति नित्य
इति भाष्योक्ते वैदिकोऽर्थो विशेषणं कश्चिद्दर्थे शब्दो विशेषणं यथा चेदं स्याच्चहइत्यादौ कश्चिद
न्यथं समं यथा चेदं जानाती त्यादौ इदं इमे वा प्रियेस शब्दार्थौ काव्यमिति प्रकाशकारकैरुक्तं अत ए
व शब्दमात्रता सर्थकेनदनुकरणे न वेदत्वमिति मतौ छ इति सूत्रे भाष्ये उक्तं अर्थभेदात्मत्वनि

अथयइतिकेपठनेनोक्तं अतएवानुकरणेनसुत्रादिदेशस्वाध्यायादिकालनियमः नाधिकृतानामनुक
रणेश्रवणेप्रायश्चित्तंवाले: पठ्यमानेवेदेशब्दमात्रतात्पर्यकत्वाभावेनवेदत्वमस्त्येव अतएवदेश
कालनियमस्तत्रशिष्याणामनुकरणेनुशब्दमात्रतात्पर्यकत्वेनतदर्थबोधाभावेवेदतात्पर्येणाञ्च
नदोषः अतएवनकस्याप्यनुकरणे दर्थबोधः मर्धाध्यापकवालादीनांचमुसलभावात्रार्थबो
धोनैतावताबालै: पठ्यमानेर्थासंविधानेमुसल्लस्यततोर्थबोधात् कश्चित्तु अर्थभेदेनशब्दभेदव
त् वेदमंत्राणां विनियोगभेदेनापिभेदएव नतुक्रमन्यासंस्कारगायत्री कर्मलपमा प्रयुज्यते अन्या
ज्जपप्रबंधेसासात्वेकेवप्रतीयतइति सादृश्यादेकत्वबुद्धिरित्यर्थः वेदेषुसर्वेषांतंत्रेणोच्चारण
मित्याहुः वेदत्वमखंडोपाधिः प्रमाणशब्दार्थबोधकत्वघटितत्वनवेदत्वं नत्वप्रमाणशब्दम
नंगीकुर्वतां बौद्धानां वेदत्वव्यवहारात् स्तोभादरेषु अभियुक्तानां वेदत्वव्यवहाराच्च यत्कि
चिच्छब्दानुविद्धतदर्थस्य योगवलेनज्ञानान्निवध्यनास्मृतिरितिभेदः तेनदीव्यतीत्वनतिनय
तितिनमस्मनेनाहेदीमसासिकरसाद्याविकप्रसयः अत्रतद्धितेनभासमानमपिदेवनंनकारका
न्वययोग्यक्रियारूपं अतएवास्तिकोदेवदत्तमितिनत दुक्तंभट्टैः याहशीभावनाख्यातेधात्वर्थ
स्यापियादृशः नासौतेतैवरूपेणकथ्यतेमैः परैः कश्चिदितिन्यत एव कार्यकर्मणोरितिसूत्रेत्र

तीमस्यशास्त्रइतिनप्रसुराहृतं भाष्येधातोः कर्तृकर्मणीतस्माच्चहृयेप्रसयास्तिङः कृतश्च तत्रतिङो
गेनलोकेतिनिषेधात्कृद्योगएवसिद्धेः कृत्ग्रहणवैयर्थ्यंचशंकितं अधिकारवारीद्रोणेनेत्यत्र
तुहेतौतृतीया अध्यात्मदारवारीद्रोणेनेतत्रैवक्रियायोगाभावात् कर्तृत्वाभावेपिहेतुत्वसत्वात्
तत्रत्ययेविग्रहेस्येचरीप्रतीतत्रकर्तृविशेष्यकोबोधइति बहुव्रीहिप्रकरणेनिरूपितं एवंत्वद्धी
तेनदुवेदंसाद्यावृप्त तेनतुल्यंक्रियाचेद्वतिः उपमेयस्यक्रियात्वेउपमानवाचकात्तृतीयांतात्तु
ल्यमितिसर्वेवतिरित्यर्थः नन्वेवंब्राह्मणवदधीतेइत्यादौतस्मात् ब्राह्मणसादृश्यस्याध्ययनेऽभा
वात्इतिचेन्न ब्राह्मणादिशब्दानांतत्कर्तृकाध्ययनलाक्षणिकत्वात् सोप्यवादिभ्यसाधारणो
धर्मः नचब्राह्मणादिपदलक्ष्यस्याध्ययनस्यविभक्त्यर्थान्वयित्वेनसत्वरूपतयानक्रियात्वमिति
वाच्यं तुल्यस्यक्रियात्वेतृतीयासमर्थाद्वतिरित्यनेनतृतीयासमर्थस्यसामर्थ्यात्क्रियोपमानत्वयो
ग्यार्थत्वलाभेपि क्रियात्वलाभेमानाभावात् स्यात्तथेनतुल्यंगच्छतीत्यादावपितृतीयार्थान्वयेन
तस्यसत्वरूपतैवनमुख्यक्रियान्वयित्वंतिङर्थस्यतुनोपमानत्वं नवेतिङंतोनीयमानमस्तीति
सन्तत्रस्यभाष्यात् एवंचास्यक्रियान्वयेएवसाधुत्वं अरविंदवत्सुंदरं मुखमित्यादौभवति क्रि
याध्याहारः अरविंदपदेनसुंदरारविंदभवनंलक्ष्यते एवंचसुंदरारविंदभवनसदृशंसुंदरम्

स्वभवनमितिबोधः अर्थविरमुख्ययोः सौंदर्य्यधर्मकसादृश्यंतुव्यंजनयाबुध्यते अतएवआसत्ते
नतुल्यमस्यरूपमित्यादौभवति तत्रतस्येवेतिसूत्रेद्रव्यगुणादितुल्यार्थमित्यमत्रनिरूपितं मथुरा
वत्पाटलीपुत्रेप्राकारः मथुरायामिवेत्यर्थः मथुरावत्पाटलिपुत्रस्यविस्तारः मथुरायाइवेत्यर्थः किं
चेवार्थस्योपमानविशेषणतयातुल्यपदार्थस्यतद्विशेष्यतयाबोधेभेदः अत्रप्राकारयोरुपमानोप
मेयभावः द्वितीयमथुरादिपदानांतदधिकरणकतत्संबंधिप्राकारादिषुतात्पर्येणवृत्तिरितिकेचित् परेतु
षष्ठ्यर्थसप्तम्यंतात्तषष्ठ्यंताच्चायंसाधुः अधिकरणसप्तम्यंतात्तुनायमसामर्थ्यादतएवतत्रतस्येवेति
सूत्रस्थतत्रग्रहणस्यैववशाद्योगेषष्ठ्यर्थसप्तमीज्ञापकतोक्ता भाष्ये देहेष्विवमनुष्येषुनामेत्युदाहृतं
चतत्रैवदेववन्मनुष्येषुनामेतिसाधुउपमानदेवसंबंधिनामाभिन्नंमनुष्यसंबंधिनामेतिबोधः म
थुरावत्पाटलिपुत्रकेप्राकारइत्यत्रोपमानविशेषणात् उपमेयविशेषणाच्चषष्ठ्यर्थेसप्तमीनत्वा
धिकरणकारकस्यकर्त्रादिद्वारैवक्रियान्वयइतिनासामर्थ्यमितिवाच्यं एवंवृत्तीस्याध्याहारावश्यकत्वे
नक्रिययोरेवतुल्यत्वेनतेनतुल्यमित्येवसिद्धेवत्प्रत्ययवैयर्थ्यापत्तेः अतएवद्रव्यगुणतुल्यार्थोपमारंभ
इतिभाष्येध्वनितंकैयटेनचस्पष्टमुक्तमित्याहुः मथुरापाटलिपुत्रयोः सादृश्यंत्वार्थ विधिवत्प्रत्य
ते इत्यादौविधिविषयोऽयंताकर्तृहरिकर्मकंदेवदत्तकर्तृकंपूजनमितिबोधः विधिशब्देनतदुक्तः

मंज० प्रकारः विधिमर्हतीति विग्रह तदर्हमिति सूत्रेण वत्तिः यथावद्विहिताध्वरायथावत्माहृत्तायेसादौ य
२४० थाशब्दो वृत्तिविषये शास्त्राद्युक्तप्रकारवाची शास्त्राद्युक्तप्रकारकर्मकार्हता वद्विधानकर्मीभूताध्वरसं
बंधिनेत्यादिसुक्तप्रकारकर्मकार्हतावद्याज्ञिककर्तृवृत्तसंबंधिने इत्यादिप्रकारेण बोधः राजवद्वृत्तमस्येत्या
दौ राजयोगमेतद्वृत्तमिति बोधः नत्वराजयोग्यमिति त्वर्थः प्रतीयते एवं विनीतवदागमनं चेच्छेदहू
तहस्तवदित्यादौ विनीतयोग्यमागमनं हूतहस्तानामिदं योग्यं छेदनमिति बोध इत्यलं घटत्वमित्या
दौ प्रकृत्यर्थसंबंधिप्रवृत्तिनिमित्तत्वादिवाच्यमिति सिद्धांतः अत्र केचित् संज्ञाशब्दे केवलं द्रव्यमेव
शक्यं एवं च तत्र प्रवृत्तिनिमित्तरूपप्रत्ययार्थो दुर्वच इति मत्वा प्रकृतिर्लक्षणया शब्दपरा तत्तद्रूपेण
प्रकारत्वाद्यर्थः स च प्रवृत्तिनिमित्तरूप एव जन्यबोधप्रकारत्वं तद्विषयसंसर्गत्वं च संसर्गः गोत्वमि
त्यादौ गोशब्दजन्यबोधप्रकारो गोत्वमित्यर्थः राजपुरुषत्वमित्यादौ तज्जन्यबोधविषयः संसर्ग इति बो
धः शाब्दबोधे शब्दस्य भानमिति मते विशब्दस्य न प्रवृत्तिनिमित्तत्वमिति गोत्वमित्यादौ न गोशब्द प्र
तीतिः प्रवृत्तिनिमित्तत्वं यज्ज्ञानाच्छब्दस्यार्थे प्रवृत्तिस्तत्त्वमित्युक्तं तच्च घटादिषु जातिः शुक्लादिषु गुणः
स्तद्गतजातिः क्रियापाचकादिषु क्रियातत्संबंधो वा राजपुरुषोपगवादिषु संबंधः डित्थादिषु द्रव्यस्यै
व विषयता ह्ययं न मानाभ्द् द्रव्यमेव प्रवृत्तिनिमित्तं तस्यैव प्रकारत्वात्वेदिशेन भावप्रत्ययार्थत्वमिति

प्रकृतिप्रत्ययार्थयोर्भेदः सुवचः प्रकृतेः शब्दपरत्वात् उक्तसंबंधस्य चनानुपपत्तिरिति वदंति सर्वत्र श
ब्दः शब्दार्थो वा प्रवृत्तिनिमित्तमिति मते तदेवत्वाद्यर्थ इति बोध्यं अपरे तु भाष्यमते गुणसमुदायो द्रव्य
मिति निरूपितं तत्र शब्दत्वादिस्वभावात् क्वचिज्जात्यतिरिक्तसमुदायो विशेष्यो जातिर्विशेषणं क्व
चिद्गुणातिरिक्तो विशेष्यः यथा शुक्लादिपदे गुणस्तु तत्र विशेषणं संज्ञाशब्दे कुशकाशादौ काद्यव्यक्ति
रेव शक्या कत्वादीनुपलक्षणानीत्यस्य यः शुक्लवासाः सदेवदत्त इत्यादावपि भग्नद्व्यक्तोवाक्किग्रहः
न चैवं कुत्वमित्यादौ त्वाद्यनुपपत्तिः प्रकृत्यर्थातिरिक्तप्रत्ययार्थाभावादिति वाच्यं तत्र शब्दपरा
त् अर्थरूपे भावे प्रत्ययेनादोषात् एवं च ककुत्वशब्दो पर्यायो अत एव तस्य भाव इति सूत्रस्यापि
प्रायादि घृति प्रशंगमाशंक्य यस्य गुणस्य भावात् द्रव्ये शब्दनिवेशस्तदभिधाने त्वतलाविति सुक्ता न
स्यापि मा सस्पष्टइत्यादि द्वयाद्रिः ततो व्यक्त्यतिरिक्तधर्माभानादित्याशंक्य व्यक्तेरेव विषयता द्वयेन
भानात् प्रकारत्वावच्छिन्नव्यक्तेरेव त्वाद्यर्थ इत्येकं समाधानं कृत्वा यद्वा सर्वे शब्दाः स्वेनार्थेन भवं
ति स तेषामर्थस्तदभिधाने त्वतलावित्यनेन समाधानांतरमुक्तं शब्दस्य द्विविधोर्थो वाच्यः प्रवृत्ति
निमित्तभूतस्थ्लतदन्यतराभिधाने त्वप्रत्यय इति तत्र घटत्वमित्यादावंत्यः तत्र प्रकृतिरर्थपरैव
आद्यकत्वं डित्थमित्यादौ तत्र प्रत्ययार्थो उपपत्त्या प्रकृतिः शब्दपरा न त्वेतावता सर्वत्र प्रकृतिः शा

मं.ज.० द्यपरामानाभावात् लक्षणायां मानाभावाच्च तस्य भावस्य तत्र तद्दस्य शब्दमात्रपरत्वे गुणवचनेति
२४१ सूत्रे शब्दाधिकारापत्तेश्च तद्धितप्रकरणे सर्वत्र तस्यापत्तमित्यादावर्थपरतायाएव सत्वाच्च एवंच
प्रकृतिजन्यबोधप्रकारः प्रवृत्तिनिमित्तभूतो घटत्वादिधर्मत्वेन त्वाद्यर्थः प्रकृत्यर्थो व्यक्तिश्च स्वेत
रासंबंधित्वावच्छिन्ननिखिलस्वसंबंधित्वसंबंधेन प्रकारः तस्य भाव इति घटत्वत्वं चाखिघक धर्मविशे
षरूपं यद्यप्यक्तिरेव घटत्वपदजबोधे प्रकारस्तथैव घटत्वत्वं यत्तु घटेतरासंबंधित्वे सति निखिल
घटसंबंधित्वमेव घटत्वत्वमित्यादेरर्थ इति तत्वसंतगौरवग्रहस्तु रूपादिभ्यो गुणवृत्तिजातौ त्वादयः
शुक्लादिभ्यो गुणिपरेभ्यो गुणे गुणपरेभ्यो जातौ अणुत्वादिभ्योनित्यं परिमाणवृत्तिभ्यः परिमाणरूपे गुणे
परिमाणं चतुर्धा अणु महद्ध्रस्वं दीर्घं चेति त्वण्वादिवृत्तीस्पर्थकं जातिमात्रपरगवादिभ्यः शब्दस्वरूपेभा
वप्रत्ययः शब्दार्थयोरभेदाध्यासेन तस्यैव प्रवृत्तिनिमित्तत्वादिति कैयटः शावलेयस्य गौरितितु न त
थाव्यवहाराभावेन तत्र जातिपरत्वाभावात् गोर्नित्यत्वेतीष्टमिति तदाशयः घटत्वं णत्वमित्यादौ वर्णा
नां वास्तवस्यौपाधिकस्य वा भेदस्य सत्वाज्जातिः स्वरूपपदार्थउपाधिरूपमेव वा तत्त्व परेतु जातिपरगवादि
भ्यो नैव प्रत्ययो नभिधानात् गोत्वत्वमिति विद्वान्तलो वोधः घटत्वमित्यादौ कुत्वशब्दवदर्थ एव प्रत्य
यः घटस्येवार्थ इत्याहुः नानात्वं योगपद्यमित्यत्रापि नानादिशब्दजन्यवोधप्रकारो सहभावो युगप

द्रावश्यार्थः पाचकश्चौपगवो राजपुरुष इत्यादौ क्रियाकारकभावस्य विभक्त्यर्थसंबंधस्य प्रवृत्तौ प्रवेशा
च्छब्दप्रवृत्तौ तस्यैव निमित्तत्वाच्च तत्त्वैव त्वादय: उक्तं च हरिणा कृत्तद्धितसमासेभ्यो भावप्रत्ययेन संबं
धाभिधानमिति पाचकादौ क्रियाया भेदस्यैवानियमेन प्रतीतेर्व्यभिचाराच्च क्रियासंबंधज्ञानादेव
शब्दस्य द्रव्ये प्रवृत्तिः सत्त्वं शुक्ल इत्यादौ जातिगुणयोस्तु लौकिकनिरूढेनस्तो यमिति प्रत्ययेत भेदनिवं
धनसंबंधस्यातिविरोधानान्न तस्य प्रवृत्तिनिमित्तत्वं सर्वत्र समासादौ संबंध एव भावप्रत्ययं वदता
हरिणा विभक्त्यर्थमात्रस्य षष्ठ्यर्थवत्संबंधतया भानमिति सूचितं राजपुरुषादावपि राजादिसंबं
धज्ञानादेव शब्दस्य प्रवृत्तिरिष्टस्य इदमपि प्रायिकं कृष्णसर्पस्त्वं पटे शुक्लत्वं सत्से सादौ जातिगुण
प्रकारकबोधस्यैवानुभावात् तदुक्तमन्यत्र रूढ्या भिन्नत्वाद्या व्यभिचरितसंबंधे स्यादिति तत्र कृष्ण
सर्पत्वमित्यादौ रूढिः शुक्लत्वमिसभिन्नरूपं पटः शुक्ल इति व्यवहारात् मतेस्थितत्ति यं न हि स
त्सत्तयोः संबंधः कदाचिद्व्यभिचरित इति बोध्यं नीलघटत्वमित्यादौ नीलघटादिवृत्ति धर्मो घटत्वा
दिकमेव त्वाद्यर्थः तदेव च नीलघटादिशब्दानां प्रवृत्तिनिमित्तं नीलादिविशेषणत्वाच्च तेन रू
पेण नीलादिव्यक्तीनामेव भानेन नीलसमानाधिकरणघटत्वादेव प्रवृत्तिनिमित्तत्वेन भासते उपा
धिभेदाच्च घटत्वादीनामपि भेदः नत्वत्र संबंधो भावप्रत्ययार्थः अभिन्नरूपत्वेन पूर्वोत्तरपदार्थयो

विशेष्यविशेषणभावातिरिक्तस्य तस्याभावात् एतेन प्रवृत्तिनिमित्तगुणजात्याद्योः सामानाधिकरण्येनतद्
तरभावप्रत्ययार्थइत्ययास्तं तस्यत्वप्रत्ययप्रकृतितोभानाभावात् भानसत्वेपितस्यविशेष्यावृत्तितयाप्र
वृत्तिनिमित्तत्वाभावेनभावप्रत्ययवाच्यत्वेभानाभावात् नीलघटत्वसमुदायः प्रवृत्तिनिमित्तमित्यपिके
चित् धवखदिरत्वमित्यादौजातिसमुदायस्तद्वाच्यस्तत्रतस्यानुद्भूतावयवत्वेएकवचनमुद्भूतावयवत्वे
द्विवचनाद्यपि येप्यपेक्षावादिनो दंडीत्यादाविनोद्रव्यमात्रवाचित्वंप्रकृत्यर्थस्यचतत्रान्वयः संबंध
स्यवाक्यार्थविधयालभ्यः एवंपाचकइत्यादावपि प्रकृत्यर्थत्वेनानुगतीकृतंदंडादिउपलक्षणीकृत्य
स्वनंतेष्वपिदंडेषुशक्तिग्रहसंभव इति वदंति तन्मतेपिसंबंधस्यैवशब्दप्रवृत्तावुक्तरीत्यानिमित्तत्वात्त
त्रैवभावप्रत्ययःसुलभः संबंधस्यविभक्तिवाच्यत्वात् प्रकारतयाभानमितितुनयुक्तं सांसर्गिकविषय
तयाभासमानेएवसंबंधप्रयोगात् वाच्यस्यापिषष्ठ्यादिभिः संसर्गतयाभानस्यसर्वसंमतत्वात् यत्तु
तत्तद्रूपेणधर्माणांशक्यतेति तन्न शक्त्यानंत्यापत्तेः किंचतस्यापत्यमित्यादिशास्त्राद्यर्थोपगवादीनामु
पगवपत्यत्वेनैवबोधकता ननुतत्तद्रूपेणतयातस्यभावइतिशास्त्रबलात्तस्यापिधर्मत्वेनैवबोधकत्वेत्वस्यो
चितत्वात् अतएवघटवृत्तिधर्मइतिबोधइत्युक्तं घटेघटत्वमित्यादेरनापत्तेश्चेति प्राहुः पंचानांपूरणः
पंचमः पंचसंबंधिपंचत्वसंख्यापूरणइतिबोधः उद्भूतावयवभेदः समूहः प्रकृत्यर्थः अवयवः प्रत्ययार्थः

भूतस्यावयवोवासीशालेतिवत् तस्मात्तस्मिन्निमित्तमनुप वर्त्तमानकालोत्रविवक्षितइतिभाष्येस्पष्टं
अतएवगवामतीतत्वेनागतत्वेवामनुपोनसाधुत्वं यद्यपिबुद्धिसत्वासमाविष्टस्यैवशब्देनबोधात्सार्थे
ष्वव्यभिचारित्वात्तथाप्यसतीसुपाशानसामर्थ्यादत्रवाह्यसत्तैवास्तिपदेनोच्यते नचसांप्रतबुद्धिसत्तएव
वर्हि :सत्तातदभावप्रसाधनायप्रवृत्तेस्तिनास्तित्यादिप्रयोगात् एवंचगोमानित्यस्तो वर्त्तमानसत्ताश्रयगो
संबंधीतिबोधः गोमानासीद्भविनेतितुवाह्यसत्ताविशिष्टगोसंबंधरूपायागोमत्वस्यायानाशेनभा
वित्वेन वातादृशावस्थाविशिष्टस्यगोमतोतीतत्वेनभावित्वेनवानेयं यद्वातादृशावस्थागतातीतत्वादे
र्गोमत्यारोपः एवमेवजीवित्येवतस्मिन्नीम्वधरोयमासीत् शिखीनष्टइत्यादेरूपपत्तिः यत्रतुगवांगोम
तश्चातीतत्वंतत्र यद्यपिगोषुवर्त्तमानसत्ताश्रयत्वंनास्तिअतीतेसंबंधिनिवर्त्तमानगोसंबंधश्चनास्ति
तथापिज्योतिष्टोमयाज्यस्यपुत्रोभवितेत्यादो यथायागगतातीतत्वस्यस्वागोभावित्वप्रतीतिश्चभवितेत्येतत्स
मभिव्याहारात्तथाप्रकृतेगोसत्तायांवर्त्तमानत्वस्यागोतीतत्वादिप्रत्ययश्चेत्यदोषः यद्वासर्वत्रतथाव्यवहार
विषयेगोमत्वस्यलक्षणेतिवेः यदेस्पष्टं यद्देत्तिपक्षएवात्रयुक्तः एवंचसंबंधस्याश्रयश्चेत्युभयंस्फुरा
यशक्यंसंबंधएवप्रवृत्तिनिमित्तं यद्वाश्रयात्मेदमापन्नः संबंधएवशक्यः नचसंबंधस्यशक्यत्वेदंड
संबंधसंबंधीतिबोधापत्तिरितिवाच्यं संसर्गविधयैवतस्यशक्यत्वात् येनुगुणगुलिनोः समानरूपाएव

मंज०
२८२

लोके प्रयुज्यंते शुक्लादयस्तेभ्यो मतुपो लुगुक्तो वार्त्तिककृता गुणवचनेभ्यो मतुपो लुगिति यत्तु संसर्गि भेद
कं यद्यत्समवायात्प्रतीयते गुणत्वं परतंत्रत्वात्तस्य शास्त्रे उदाहृतमिति न तु यस्य गुणस्याभावाद् द्रव्ये शब्द
निवेशास्तदभिधाने त्वतत्त्वादित्यादावुपयुक्तं तदर्थस्तु संसर्गि आधारेण संबद्धं भेदकं तदाश्रयस्येतरतो भेद
कं समवायमवच्छेदकत्वेन प्रतीयमानं तेनावच्छेद्यद्रव्यनिरासः यद्यपि इति वीप्सया जात्यादेरप्येवं भूतस्य
गुणत्वमुक्तं परतंत्रत्वादित्यनेन तद्व्यवहारप्रयोजकमुक्तं परतंत्रो हि लोके गुण इत्युच्यते यद्यपि गुणगु
णिनोः सोयमित्यभेदाध्यवसायेन लुकं विनापि शुक्लः पट इत्यादि सिद्धं तथापि पटस्य शुक्ल इति भेदव्य
वहारस्यापि सत्वात् शुक्लवानित्येतदभावप्रसक्त्यर्थं लुग्वचनं एवं चास्य गुणिनि यौगिकत्वात्सर्वलिंगत्वं रूढत्वे
तु गुणगुणिनोरुभयोरपि स्वं लिंगत्वं नियतलिंगत्वं वा स्यात् अयं च लुक् द्रव्यवाचकसमभिव्याहारेण प्र
करणादिना तदवगतौ बोध्य इति तं चेदं स्मरणसूत्रेति तत्र भाष्ये गुणलिंगास्तु तद्वतीति कोशस्य मतुप् लु
कोभेदेन वा तद्वति वर्त्तमाना इत्यर्थः यदि त्वनभिधानादेव ततो मतुवाद्यनुत्पत्तिः सर्वलिंगत्वमप्यभि
धानस्वाभाव्यादेव तदा व्यर्थं लुग्वचनं जातेस्तु घटादिशब्देभ्यो न कदापि द्रव्याभेदेन बोधः शावलेयस्य गो
रिति प्रयोगाभावात् इति न तेभ्यो द्रव्ये मतुवादि सा करे स्पष्टं प्रकारवचने थाल् प्रकारोत्र न सादृश्यम
न्यथा सर्वथेत्यादेः तत्प्रतीतेः किं तु सामान्यस्य भेदको विशेषः प्रकारः बहुभिः प्रकारैर्भुंक्ते इत्यतो बहु

२८२

भिर्विशेषैरिति सर्वप्रतीतेर्यथा हरिस्तथा हर इत्यादौ यद्विशेषधर्मवान् हरिस्तद्विशेषधर्मवान् हर इति बो
धः हरिसदृशो हर इति नु फलति यतः श्रान्तयोः प्रकारयोरैक्यावगतौ तादृशैकधर्मेण निमित्तेन मानस
स्य तथा बोधस्यांगीकारात् वचनग्रहणाच्चात्र जातीयविधौ स्थूलादिभ्यः प्रकारवचने कनित्यत्र प्रका
रवान् प्रत्ययार्थः यानाजातीपरार्द्धबोधस्तु न तथाजातीयक इत्याद्यभाष्यप्रयोगात् एकधा कुर्वित्यादेरे
कप्रकारं कुर्वित्यादिप्रकारेण बोधः अनेकराशीन् एकधा कुर्वित्यत्रैकत्वसंख्याविशिष्टं कुर्विति बोधः म
हितं कुर्विति फलति वैयाकरणपाशः कुत्सितवैयाकरणत्ववानित्यर्थः एकदेशसंबंधोत्र शाब्दशक्तिस्वभा
वात् एवमन्यत्रापि प्रवृत्तिनिमित्तकुत्सायामेवायं अयमेषां शुक्लतम इत्यादावतिशायने तमबिष्ठनौ
अतिशायनं प्रकर्षः सचेतरस्य न्यूनीकरणरूपोभिभवस्तत्र वर्तमानात्प्रत्यय इत्यर्थः तेनाभिभवकर्तृत्वद्यो
तकोयं इतराभिभवकर्त्ता शुक्ल इत्यादिरीत्या बोधः यद्यपि द्रव्येन स्वतः प्रकर्षस्तथापि प्रवृत्तिनिमित्त
भूतगुणादिगतप्रकर्षेण परंपरया द्रव्यस्यापि प्रकर्षः पाचकतर इत्यादौ प्रवृत्तिनिमित्तसंबंधप्रतियो
गिक्रियागतप्रकर्षेण प्रकर्षो बोध्यः अयमेव च द्रव्यप्रकर्ष उच्यते अतएवोच्चैस्तरां तरूरित्यादावाम्
न उच्चैस्तमामित्यादौ त्वाधिकरणशक्तिप्रधानतया तस्या एव प्रकृत्यर्थगुणप्रकर्षेण प्रकर्ष इत्यां भवत्ये
वाद्रव्यप्रकर्षसत्वात् तत्र शुक्लगुणानां नानात्वे एकनिष्ठस्यापरगुणाभिभावकत्वं स्पष्टमेव सर्वाश्रये

मंजू०
२४४

ष्वेकोगुणः सावयवइतिमतेक्वचिदाश्रयेल्पंक्वचिदधिकमितिस्वाश्रयेतान्यल्पाधिकत्वाभ्यांभेदात्तेदेनतदुप
पत्तिः एकंनित्यंनिरवयवंचेतिमतेपि ओघुक्लादिगुणांतरेणमिश्रणात् शुक्लस्यप्रकर्षः रूपादिमिश्रणे
ल्पप्रकर्षः यथाजातुसलादिवासितमल्लिकायांगंधप्रकर्षः एवंरसगंधस्पर्शादिष्वपिबोध्यं गोतरइत्या
दौप्रवृत्तिनिमित्तस्यजातेः प्रकर्षाभावेपितत्सहचरितत्वाहदोहादिगतातिशयमादायप्रत्ययोयथाश्वो
गंवोध्यः आदिमस्तुनप्रत्ययस्तदर्थेप्रकर्षाभावात् बहुत्वादस्तुभवस्येवसंख्याधिक्यकृतातिशयस्यत
त्रवक्तुंशक्यत्वात् बहूनांमध्येएकस्यातिशयेतमबादिः द्वयोरेकस्यातिशयेर्थद्वयप्रतिपादकशब्दे
उपपदेतरबादिः यथाअयमनयोःपटुतरः अस्माकंचदेवदत्तस्यचदेवदत्तोभिरूपतरइति बह्वर्थे
केविभागप्रतियोगिन्युपपदेतरबादिरेवउदीच्याःप्राच्येभ्यःपटुतराइतियथासांकाश्यकानांपा
टलिपुत्रकाअभिरूपतमाइत्यत्र बहूनामेवप्रतीतेस्तमप् तमपपेक्षत्वंतुनशब्देनोपात्तं पर
इदान्पटुरासीत्सदुत्तरस्यैषमइत्यादावेकस्यैवद्रव्यस्यगुणभेदेनभेदमारोप्यतरप् गुणांतरयोगेन्यो
भवान्संवृत्तइतिव्यवहारात् क्वचित्स्वरूपस्यैवगतप्रकर्षेतरप् यथानतरामित्यादौ नत्रहिप्रतियो
ग्यसमानाधिकरणत्वरूपमासंतकत्वमभावगतःप्रकर्षः एवमेवघटस्यशुक्लतरोरूपमस्या
युपपत्तिः प्रकृत्यर्थविशेष्यगतप्रकर्षासंभवेतुप्रवृत्तिनिमित्तादिगतप्रकर्षेतरप् एवंघोतार्थे

प्रकर्षद्योतकातरप्‌निरंगकृतीत्यादौ गुडकल्पा द्राक्षा बहुगुडो द्राक्षेत्यादौ गुडशब्दस्य द्राक्षायां सादृश्या
त्‌ द्राक्षायां वृत्तिस्तत्र सादृश्यप्रयोजकस्य माधुर्यादेरीषद्‌समाप्तिर्गम्यते तेनेषत्सादृश्ये प्रत्यया
नापत्तेः अत्र सर्वत्रायमाशयः गुडगतमाधुर्याश्रयेण द्राक्षायां गुडत्वारोपात्‌ गुडजातसमभावाच्चेष
द्‌समाप्तं गुडत्वं द्राक्षायामिति गुडश्यं द्राक्षा गुडकल्पा द्राक्षेति प्रयोग इत्यस्मै नच सादृश्यरूपेषद्‌स
माप्तिः प्रत्ययार्थ एवास्तु गुणगुणिनोर्नियमतोऽभेदोपचारादत्र पटुकल्पश्चैत्र इत्यादिसिद्धिरिति
वाच्यं सादृश्यस्य द्राक्षाश्रयत्वे बहुगुड इत्यसामानाधिकरण्यापत्तेः गुडाश्रयत्वेऽनुभवविरोधात्‌ गुडकल्पा इत्या
दिप्रयोगासिद्धेश्च स्वार्थिकत्वे तु प्रकृतितो लिंगतद्व्यक्तिक्रमौ सिद्धौ उपमानगुडाभिन्ना द्राक्षेति वो
ध इति परे पाचककइत्यादौ कुत्सिते इति कः कुत्सितपाचकत्ववानित्यर्थः प्रवृत्तिनिमित्तकुत्सा
या असंभवे च स्वक इत्यादौ तत्सहचरितधर्मान्तरगतकुत्साश्रयः कुत्सितक इत्यादौ यत्र कुत्सितत्वं
कुत्स्यते नास्य सम्यक्‌ कुत्सितत्वं किंतु शत्रुभिर्द्वेषेणारोपितमिति तत्राप्रत्ययः यत्रानिर्धारितधर्म
विशेषनिबंधना कुत्सा प्रवृत्तिनिमित्तं ब्राह्मणत्वादिनिबंधनायां तस्यां प्रत्ययः यथा प्रकृष्टतम
इति प्रकर्षस्य प्रकर्षे तमप्‌ यद्वा नियमेन कुत्सासंबंधं प्रतिपादयितुं प्रवृत्तिनिमित्तकुत्साया
मेव पुनः प्रत्ययः किंचशब्दः स्वार्थजातसाधिविधया भिधायकह विशेषयोरभेदत्वेतरानपेक्ष एवत

त्संबद्धं द्वयमाह ततः संख्यायांपेक्षयांतरंगत्वात्तद्गतं लिंगमाह अत एव तद्बोधकं यथादृष्टं ततः क्रि
यापेक्षकारकापेक्षयांतरंगत्वात्संख्यामाह ततः कारकमित्येवं कल्पितक्रमेण शास्त्रप्रक्रियानिर्वाहः एवं
चैतत्सकलबोधकविभक्त्यंतस्यैवाज्ञातकुत्सितादौ इति तिरिक्तसुपास्थितलिंगादिगततयापि कुत्सादिबोधनं
प्रत्ययेन तत्र स्वार्थकुत्सा यथा पंडितक इति द्रव्यकुत्सा यथा शुक्लकं रूपमित्यादौ लिंगकुत्सा यथा ग्रा
प्पगांडीवधन्वानं विद्धि कौरवकान् स्त्रिय इति संख्यायां यथा पुत्रकः शतं शतभरणेऽयं दुःखं तदेकस्यैव
भरणे इति एकत्वसंख्याकुत्सेति दिक् अथ इवार्थकः इवे प्रतिकृताविति कन् उपमानाद्याभिन्नाइ
ति बोधः एवं प्रतिमा चित्रनटध्वजप्रतिमासु शिवारेवनन्विवार्थप्रतीतिरिति न तत्र प्रत्ययः स्यादे
चेदं रसनिरूपणे प्रकाशे काकतालीयं काक इव तालमिवेति विग्रहे समासाच्च तद्विषयादितिछः
तस्यामाणादिवार्थेपि सुप्सुपेति समासः तत्र पूर्वं पदमुपमानं काकागमनपरमुत्तरपदं चोक्तरूपपरार्थे
समानाधिकरणोपमानतालपतनपरं समुदायश्चोपमेयपरः एवं चोपमानकाकागमनसमा
नाधिकरणोपमानतालपतनाभिन्नं देवदत्तागमनं समानाधिकरणं चोरपतनमिति बोधः तत्त
दुपमेयबोधे तत्तदुपमेयबोधे च कसमभिव्याहारस्तत्र ततस्त्वद्धिते समासार्थोपमानप्रयोज्योपमा
नभूततालकृतकाकवधाभिन्नः समासार्थोपमेयप्रयोज्यश्चोरकृतदेवदत्तवध इति बोधः एते

नपरस्परंसंबंधाभावेनासमर्थ्यादृत्तिद्वयमपि दुर्लभमित्यपास्तं यत्तुकाकागमनसदृशासमानाधिक
रणं काकागमनसमानाधिकरणतालपतनसदृशप्रयोजनतालफलकाकमरणमितिबोध इतितन्न
निपातवादे दूषिते उपमानोपमेयभावश्चाकस्मादुपनतत्वेन उपमेयवाचकतत्तत्पदसमभिव्याहारेण
प्रयोजनतया कदाचित्कारकमरणस्य कदाचित्काकततोपभोगस्यभानं उपमानतावच्छेदकरूपेणवो
धकाभावाच्च बहुप्रत्ययोपमायामुपमानलोपइत्यालंकारिकाः पंचकृत्वोभुंक्ते पंचशब्दः पंचसं
ख्योत्पत्तिकपरः तस्य चक्रियायामन्वयः संख्यायाः क्रियाभ्यावृत्तिगणने कृत्वसुजितिसूत्रात् त
त्राभ्यावृत्तिः पुनःपुनर्जन्मसंख्योत्पत्तिकाभुजिक्रियेति बोधः प्रत्ययस्तुस्वार्थे कर्तृबहुत्वेतु पंचकृत्वो
भुंजत इति बहुवचनमपि त्रिराहत्ता दशेमादावावृत्ति क्रियाजन्मगणने एवसुच् यत्राक्रियान्वय
यते तत्रभवति क्रियाध्याहारो बोधः पंचकृत्वः पाचकः पक्वइत्यादीत्यमेव लकृसकृत्खलर्था
नां तथाव्ययकृतामपि रुडि· निष्ठाद्यत्रादीनां धातुः साध्यस्यवाचक इति हर्युक्तेः अत्रहेलाराज
कृत्यादियोगे कृत्वसुजादयो भवंत्येवेत्याह कृत्येत्यादिः क्तोनपुंसकविषयः कृदिशब्दात्ता स्त्रीलिकाः
घञादयः भावकर्मादिविहिताः आदिनात्वजादयः हिः शयितमंग हि सुकरो हिर्हसितं हि दत्तवान्
हिकर्त्ता हि पाकः हिर्भुक्तागतरत्युदाहरणानीति अतत्वाद्धिः अयोगो द्विर्वचने विहि द्विर्बहु सुवर्ध्वभ

वतीत्यादि संगच्छते अतिप्रसंगस्त्वनभिधानाद्वारणीयः तत्प्रकृतवचने मयट् प्रकृतशब्देनात्र प्रचुरं भा
वे ल्युट् तेन प्रचुरार्थबोधकात्प्रथमांतात्स्वार्थे मयट् यथा घृतमयं वर्त्तते प्रवरे घृतमित्यर्थः यद्वाधिक
रणे ल्युट् प्राचुर्यवदन्नादिबोधकादधिकरणेऽर्थे मयट् यथान्नमयो यज्ञः प्रचुरान्नवानित्यर्थः आनंदमयो
ब्रह्म चिन्मयं ब्रह्मेत्यादावयमेव मयट् प्राचुर्ये तु तत्र निर्धर्मत्वमेव व्यावहारिकमपरिच्छेद्यत्वं च अनंतत्व
प्रतिपादकश्रुतेः नच प्राचुर्यस्य स्वसमानाधिकरणविरोधिस्वल्पतासापेक्षत्वेन दुःखानुवृत्तेरपि प्रतीत्याप
त्तेस्तस्य ब्रह्मत्वहानिरिति वाच्यं वैपुल्यरूपप्राचुर्यस्य तदपेक्षत्वेप्यपरिच्छेद्यत्वरूपस्य तस्य तदनपेक्षत्वात्
सत्यं ज्ञानमनंतं ब्रह्मेति तैत्तिरीयश्रुतावनंतत्वोक्तेः अतपरिच्छेद्यत्वं बोध्यम् प्राणमयादावप्ययमेव
मयट् विकाररूपार्थस्यांजसेनोपपत्त्यभावात् तदवच्छिन्नत्वेन तद्विकारत्वस्यादृष्टत्वात् नहि घटमय आका
श इति भवति किंचानंदमयेन ब्रह्मणानंदविकारत्वं तस्याविकारित्वात् नापि तस्यानंदविकारत्वं तद्विष
यविज्ञानस्य तत आंतरत्वेन तस्य विज्ञानमयांतरत्वानुपपत्तेः प्रश्नमाहो मेऽन्नमयप्राणमयमनोमय
विज्ञानमयानंदमया मे शुध्यंतामिति मंत्रे शुद्धिः तद्विषयावरणनाशरूपेति न तेन विरोध इति व्यास
सूत्रवृत्तिकृतः ल्हादैकमयीमिति प्रकाशप्रयोगेप्ययमेव मयट् एकपदप्रयोगाद्रसनिरूपणोक्तरीसा
च तत्राप्यपरिच्छेद्यरूपप्राचुर्यस्यैव भानात् ब्रह्मण आनंदरूपत्वं तु आनंदो ब्रह्मेत्यादिश्रुतिबलात् न

चदुःखज्ञानकालेसुखानुभवाभावेनसुखज्ञानयोर्भेदादेकस्यात्मनउभयरूपत्वंतुआनंदोब्रह्मेत्यादिश्रुति
नयुक्तं अतएवानंदशब्दस्तुदुःखाभावेगौणःसएवेदंसांख्यसूत्रेइतिवाच्यं इष्टनाशस्थलेसुखनिवृत्त्यैव
दुःखव्यवहारोपपत्तौतस्यापिदुःखजनकत्वानापत्तेःसर्वत्रतत्तदुपादेयवस्त्वभावस्यतदुःखनिवृत्त्यैवतत्तद्वस्तु
लाभेसुखव्यवहारोपपत्तौसुखपदार्थविलयापत्तेश्चतस्मादिष्टनाशस्थलेदुःखकार्यस्योरस्ताडनरो
दनादिरूपस्योपलंभेनचिरविरहपीडितस्यकांतालाभेविरजदुःखनिवृत्तिवन्निरवधिसुखस्याप्यनुभवे
नवल्लवदनिष्टनाशस्थलेदुःखनिवृत्तेरिवसुखस्यापिअनुभवेनचलाघवात् दुःखनिवृत्तिसामग्रीत्वेन
सुखप्राप्तिजनकतासुखनिवृत्तिसामग्रीत्वेनदुःखप्राप्तिजनकतावाच्या एवंचतत्त्वज्ञानस्यापिदुःखनि
वृत्तिसामग्रीत्वेनसुखप्राप्तिजनकताप्राप्तातत्रमुक्तिकालेऽन्तःकरणलयेनवृत्तिरूपकार्यसुखप्राप्त्यसं
भवात् आत्मसुखप्राप्तिरेवतथेतितस्यसुखरूपत्वसिद्धेः अस्याःसामग्र्याःसुखजनकत्वमितिमतेव्याव
रणभंगादिनिष्ठजन्यत्वस्यतत्रारोपान्नदोषः एतदेवाभिप्रेत्याचार्यैर्द्वंद्वइतिसूत्रे भाष्येसुखप्रतिघाते
नदुःखंदुःखप्रतिघातेनसुखमितिविप्रतिषिद्धावेतावित्युक्तं तेनहिसुप्रतिघातेनेत्यादितृतीयावला
त्सुखप्रतिबंधिकायास्तन्नाशिकायाश्चसामग्र्याःदुःखजनकत्वंदुःखप्रतिबंधिकायास्तन्नाशिका
याश्चसुखजनकत्वंस्पष्टमेवोक्तं ननुदुःखार्त्तस्यदुःखनिवृत्तिमात्रफलकतयाविषमस्तलेप्रवृत्ति

ईश्यते तद्रक्षणस्य दुःखनाशकत्वेपि सुखजनकत्वाभावेन व्यभिचारः स्पष्टं चेदं तथायुक्तमिति सत्रे भा
ष्यकैयटयोरिति चेन्न अतः परमहं सुखीत्यनुभवेन तत्राप्याभिमानिकसुखसत्वात् अतएव भाष्येऽ
प्यानि दुःखान्यनुनिशाम्य विषभक्षणमेव ज्यायो मन्यते इत्युक्तं तत्र ज्याय इत्यस्य प्रशस्यतरमित्यर्थः त
त्वं च सुखसाधनत्वज्ञानादेव एतेन भारोत्तीर्णस्याहं सुखीत्यादिव्यवहारो गौण इत्यपास्तं किंच दुःखा
भावस्यात्मरूपत्वे दुःखज्ञानकाले तदभावज्ञानाभावाद्दोषो दोषस्तवापि दुःखज्ञानकाले आनंदानानु
भवस्य कल्पितानंदत्वांशेऽनावरणात् नह्यस्माकं निर्धर्मकतज्ज्ञानसंभवः किंच स्रक्चंदनादिकरणादिर
सानुभवकाले सुखानुभवसत्वात्तत्र चान्यसुखासंभवात्ब्रह्मसुखमेव भासत इति प्रकाशादौ स्पष्टं
तथा च श्रुतिः रसो वै सः रसं ह्येवायं लब्ध्वानंदीभवतीति एवं च रसानुभवोपि ब्रह्मणः सुखरूपत्वे मा
नं अतएव गीतायामुक्तम् अभ्यासाद्रमते यत्र दुःखांतं च निगच्छति यत्तदग्रे विषमिव परिणामेऽमृतो
पमं तत्सुखं सात्विकं प्रोक्तमात्मबुद्धिप्रसादजमिति यत्र समाधौ भासमाने सुखे न च सुखेरतो दुःखना
शप्राप्त्युत्या तस्य सुखस्य तदतिरिक्तत्वं स्पष्टमेवोक्तं अग्रे समाध्यभासकाले सात्विकत्वं सत्वाविर्भाव
प्राप्यत्वात् तदेवाह आत्मबुद्धिप्रसादजं प्रसादजातामभिव्यक्तिकमित्यर्थः दीधितिकारोपि नित्यसु
खाभिव्यक्ति र्मुक्तिः न च तत्र मानाभावः आनंदं ब्रह्मणो रूपं तच्च मोक्षे प्रतिष्ठितमिति श्रुते स्त्वादि

पकत्वंच वहुत्रा: प्रागुक्तेति दिशा निर्वाह्यं तत्र द्विर्वचनं पृथक्संख्यायुक्तानां नानाद्रव्याणां तदावुद्धिस्था
नां प्रत्येकरूपेण गुणक्रियाद्रव्यैर्युगपदन्वये भवति तत्रैव व्यापकत्वप्रतीतेः पृथक्संख्यायुक्ताना
मित्यनेन ब्राह्मणो न हंतव्य इत्यादौ जात्यभिप्रायेण प्रयोगे न द्वित्वमेकशेषविषये च न अतएव गर्गाः
शतं दंड्यंतामित्यादौ न प्रत्येकं शतदंडनं तथा मति वीप्साविषयापहारः सामस्त्येकं शतदंडने संख्या
तरोपजननाच्च तसंख्याश्रवणं च विरुद्धं स्यात् वृषलैर्न प्रवेष्टव्यमित्यादौ प्रत्येकं समुदाये च वाक्य
समाप्तिः ब्राह्मणैः प्रवेष्टव्यमित्यादौ च ब्राह्मणा भोज्यंतामित्यादौ भोजनस्य तृप्तिफलत्वादन्नादृन
रूपत्वाच्च प्रत्येकमेव समाप्तिर्न समुदाये संभवात् युगपद्ग्रहणाच्च क्रमविवक्षायां न तत्रानेक
प्रयोगस्यैव दर्शनात् तदा वुद्धिस्थानामित्यनेन जगतीतलवर्त्तिसर्ववृत्तस्येच्छया भावेपि तथा प्रयो
गः प्रकरणादेः संकोचकस्य सत्वात् यत्र तु संकोचकं नास्ति तत्रासंकोच इष्ट एव जातो ज्ञातो निध
नमुपैतीति यथा व्यापकत्वं च तदर्थाश्रयेन संबंधेनेतरान्वयः तत्संबंधे वुध्यते संबंधश्च विभक्त्य
र्थ एव एवं च तादृशव्यापकत्वविशिष्टस्य संसर्गतया भानमत्रैव द्विर्वचनं तात्पर्यग्राहकं एवं च ब्रा
ह्मणाय ब्राह्मणाय शतं देहीत्यादौ वुद्धिस्थयावद्ब्राह्मणोद्देश्यकं शतकर्मकं दानमिति वोधः ब्राह्म
णव्यापकं शतदानमिति तु फलति संबंधे एकसंबंधी व्यापकत्ववोधस्य परसंबंधिनी तद्व्यापकता

बोधकत्वकत्वात् एवमन्यत्रापि यद्यदुद्देश्यविधेयाभिमतावीप्सयाप्रयोगेणोभयत्रापि व्यापक
त्वबोधो भवत्येव तथापि क्वचित्स्फुटप्रतिपत्तये कश्चिद्विशेषव्यापकत्वद्योतनायोभयत्रापि द्वित्वं यथा
ब्राह्मणाय शतं शतं देहीत्यादौ एकैकस्मै शतं शतमित्यादौ च यत्र यत्र धूमस्तत्र तत्र वह्निरित्यादौ
यद्व्यापकाधिकरणत्ववत्का धूमसत्ता तद्व्यापकाधिकरणतावत्का वह्निसत्तेति बोधः एवं हि वह्निधू
मयोर्व्याप्यव्यापकताफलति गजे गजेन मौक्तिकमित्यादौ गजव्यापकाधिकरणतावत्कं मौक्तिकस
त्ताभाव इति बोधः सचाधिकरणतायां गजव्यापकत्वरूपविशेषणाभावमादाय पर्यवस्यति शत्रोश
शेन भ्रंशगमित्यत्र तादृशाभावस्य विशेष्याभावप्रयुक्तस्य बोधः राज्ञो राज्ञः पुरुष इत्यादौ उद्दिश्य यावद्रा
जस्वामिकः पुरुष इति बोधः ग्रामो ग्रामो रमणीय इत्यादौ विशेष्यविशेषणाभावस्यैव संसर्गतया
रमणीयानिष्ठविशेषतानिरूपितग्रामव्यापकविशेष्यतावान् ग्राम इति बोधः अत्र वने रमणीयो रमणी
यः अस्त इत्यादौ रमणीयव्यापकविशेषणतानिरूपितविशेष्यतावान् अस्त इति बोधः यो यो धूमवा
न् सोऽग्निमानित्यत्र यच्छब्दो धूमवानि सर्व एव यथायं चंद्र इत्यत्र तेनायोक्ताविदंपदार्थचंद्र एवेति दृशा
मे प्रकाशोऽयुक्तं यच्छब्दप्रयोगस्तु लघुभूततदुक्तकद्विरुक्तप्रयोगात् रमणीयो रमणीय इत्यत्रैव बोधः
धूमवन्योर्व्याप्यव्यापकभाव एवं फलति यत्तु अत्र धूमव्यापकत्वस्य वह्नौ बोधः धूमवान् धूमव्या

त्याह सार्वभौमोपि सुखं नित्यानतिशयं तत्साक्षात्कार एव च मोक्षस्तेनोपपद्यंते अत एवोपि यथाश्रुताः
सुप्रकाशसुखव्यक्तिरेव मुक्तिस्तु वस्तुतः आपकं सर्वजीवानामानंदमयमैश्वरं रूपं श्रुतिबलादिष्टं तत्स
साक्षात्कार एव च तस्मिन्नभेदोपि जीवानामिष्टमेवेति दृश्यतामिस्तं अकृत्स्नः कृत्स्नः संपद्यते तथा करोति कृ
त्स्नीकरोतीत्यत्र प्रकृतिरेव विकारसादृश्यमापद्यमाना विवक्ष्यते तत्र च्विप्रत्ययः कृभ्वस्तियोगे संपद्यक
र्तरि च्विः अभूततद्भाव इति वक्तव्यमिति सूत्रवार्तिकतद्भाष्यबलात् अतथाभूतस्य तथाभावे कृभ्वादियो
गे संपद्यकर्तृत्वेन विवक्षितार्थवाचकात् च्विरिति तदर्थः विकारवाचकात्स्वसादृश्येन प्रकृतौ वर्त्तमाना
द्यं प्रत्ययः करोत्यादिक्रियाकारकत्वं प्रकृतिभूतस्यैव विकारसादृश्यं प्राप्तस्येति बोध्यम् अत एव सं
धीभवंति ब्राह्मणाः स्वद्भवति देवदत्त इत्यादौ वचनपुरुषव्यवस्था तदुक्तं हरिणा पूर्वावस्थामजहत्संस्पृश
त्धर्ममुत्तरं सम्मूर्छित इवार्थात्मा जायमानोभिधीयते पूर्वावस्था कारणावस्था उत्तरं धर्मं कार्या
वस्था एवं चावस्थाद्वयावच्छिन्नमेकं वस्तु पूर्वावस्थानुगुणरूपेणोत्तरावस्थाप्राप्त्युन्मुखं विकाररूपमिव प्रा
प्तं जायते इत्यभिधीयते असंधिः संधीभवतीत्यादौ अत एव प्रकृतिविकृत्योः सामानाधिकरण्यं
नन्वेवमुभयोः कर्तृत्वापत्तिरत उक्तं सम्पादारतरः कश्चित्कश्चिद्धर्मः प्रतीयते संसृज्यंते च भावा
नां भेदवत्योपि शक्तयः तत्त्वानुसाराद्वाक्ये विकृतेरेव साक्षात्कर्तृत्वं वृत्तौ तदीयलौकिके च प्रकृते

रेवसाक्षात्त्वं अत्वंत्वंसंपद्यते इत्यर्थे त्वङ्वतीत्येव भवितव्यमितियुष्मद्युपपदे इति सूत्रभाष्योक्तेः अयमे
वप्रकर्षस्तरयोक्तः संसर्गः कर्तृसंख्ययोरेकवृत्तित्वरूपः अतएवात्वं त्वंभवतित्वङ्वतीत्यादौ प्रकृतेः कर्तृत्वा
त् प्रथमपुरुषः त्वमत्वंभवसीत्यर्थेऽत्वद्भवसीत्येव वाक्येतुसाक्षात्कारस्येवसुवर्णपिंडः खदिरांगारसदृ
शेकुंडलेभवत इतियस्यशायांभाष्यप्रयोगे विकृतेः कर्तृत्वदर्शनात् किंचयंतेतद्वाक्येचप्रकृतिरूपम
नारोपितंविकाररूपंत्वारोपितम् आरोपितानारोपितसमभिव्याहारेनारोपितस्येवमुख्यतयाज्ञायमान
त्वादिनातस्येवसाक्षात्कर्तृत्वंप्रकृतेस्तुतद्भेदेनतद्द्वारा रूपंचेदितिनकश्चिद्विसुवर्णपिंडाश्रयाविभक्ति
रितिवोध्यं एवंचविकृतेः प्रकृतेर्वापियत्रोक्तत्वंद्वयोरपिवाचकः प्रकृतेः संख्यांगृह्णातिविकृतेर्ने
तिति प्राचीनप्रवादश्च्विप्रत्ययविषयकएव च्विप्रत्ययांतेसादृश्यमस्याभेदाध्यवसायेनविकाराभे
दमापन्नप्रकृतेः कर्तृत्वेनोभयोरप्युक्तत्वं महद्भूताब्राह्मणीत्यादौसामानाधिकरण्यंगौणत्वंचेति
वोध्यं एवंचकारणीभूतोदंडइत्यादौच्विप्रत्ययोसाधुरेव सादृश्यमस्त्येव विकाराभेदप्रतीतावेवत
त्प्रवृत्तेः ध्वनितंचेदमोत्त्रे भाष्येइत्यत्रनिर्णीतंब्रह्मीभवतीत्यादिप्रयोगेछांदसत्वादसंकल्यार्थिक
च्विरितिवोध्यं इतितद्धिताः इत्संवत्सरसिंचति अत्रवीप्सायांद्वित्वं अत्रत्वप्रकृत्यर्थनिष्ठव्याप्यत्वंतन्नि
रूपितंव्यापकत्वंचशाब्दबोधविषयः व्याप्तिंतुबोधयितुंपौनरुक्त्यंवाक्यमिवगमाद्वीप्साप्रयोक्तुः धर्मएवव्या

पकवन्हिमानिति तन्नानेकसुसत्तिविरोधात् जातोजातोनिधनमुपैतीत्यादौ जातव्यापकविशेषण
तावच्छेदकनिधनप्राप्तिरिति बोधः क्वचित्तु व्याप्यव्यापकभावसंबंध एव विभक्त्यर्थः यथाहस्तंह
स्तं प्रतिसिंचतीत्यादौ अत्र द्विर्वचनप्रतिज्ञश्रैतात्पर्यग्राहकौ सर्वान्यदामश्वेपत्यादौ नद्वित्वं कास्य स
र्वशब्देनोक्तत्वात् हस्तहस्तामित्यादौ बहुवचनं तु न प्रत्येकनिष्ठैकत्वस्यैव तत्रभानात् ब्राह्मणाय ब्रा
ह्मणाय शतं देहीत्यादौ च प्रत्येकं शतदानप्रतीतिरेकवचोबेलुनैवं ब्राह्मणेभ्यः शतं देहीत्युक्ते नियने
न प्रत्येकं शतदानाप्रतीतेः यदा तु परिगृहीतद्वित्वानां वीप्सा तदा ब्राह्मणौ ब्राह्मणौ पूजयद्वाभ्यां
त्रिभ्यस्त्रिभ्य इत्यादि भवत्येव अत्रेदं बोध्यं यत्र यस्य देवीप्सा तत्र तस्य देनसा यस्य दीयद्वित्वेन
यस्य दार्थसंसर्गे यच्छदार्थतावच्छेदकव्यापकत्वे बोधिते विनापि द्वित्वं तस्य पदार्थसंसर्गे तच्छब्दा
र्थतावच्छेदकव्यापकत्वबोधात् कारकं चेच्छ जानीयाद्यां यां मन्येत सा भवेदिति कथितं चेतिस्य च
भाष्ये प्रयोगात् व्यंजनानि यस्य यस्याचः कार्यमुच्यते तं तं भजंते इत्यजादेरिति स्त्रस्य भाष्य प्रयोगा
त्स्यष्टत्वाय कश्चित्तस्य देवीप्सा द्वित्वं यत्तु नात्र द्विर्वचनं किंतु भिन्नभिन्नौ यत्तच्छब्दौ भिन्नरूपे
णोव बुद्धिस्थपदार्थपरामर्शकाविति तन्न वक्तृर्थप्रतिविपादयिषायां बहुयच्छब्द प्रयोगापत्तेः
द्वाभ्यामेव सर्वप्रतीतिरिति चेदेकेनैव सर्वप्रतीत्युपपत्तौ द्वितीयप्रयोगस्यापि वैयर्थ्यापत्तिरित्यलं

एवंप्रकृतिप्रत्ययाद्यर्थबोधनद्वाराशास्त्रं विशिष्टस्य पदपदार्थबोधनद्वारा वाक्यार्थस्य बोधकं मल्लो
के व्यवहारोपयोगि यद्यपिशास्त्रज्ञानं विनाप्रकारांतरेणापिपदार्थज्ञानंलोके दृश्यते तथापिशास्त्री
यप्रकृतिप्रत्ययव्युत्पादनपूर्वकं विजातीयतज्ज्ञानपूर्वकप्रयोगस्य चित्तशुद्धिद्वाराऽपवर्गसंपादकत्वे
नशास्त्रज्ञानस्यावश्यकत्वात् तदुक्तं हरिणा तद्द्वारमपवर्गस्य वाङ्मलानां चिकित्सितमिति एवंल
घुनोपायेनसर्वशब्दप्रतिपत्तौ चशास्त्रस्योपयोगो बोध्य इति शिवम् अधीत्यफणिभाष्याब्धिंसुधी
न्द्रहरिदीक्षितात् न्यायतंत्रंरामरामाद्वादिरक्षोघ्नरामतः १ याचकानां कल्पतरोररिकक्षहुताशा
नात् शृंगवेरपुराधीशाद्रामतोलब्धजीविकः २ वैयाकरणनागेशः स्फोटायनऋषेर्मतं परिष्कृ
त्योक्तवांस्तेन प्रीयतामुमयाशिवः ३ ढंढस्तर्कस्यनाभास इति चिंत्यंनपंडितैः दृषदोपिहि संती
र्णाः पयोधौरामयोगतः ४ इतिश्रीमदुपाध्यायोपनामकसतीगर्भजशिवभट्टसुतनागेशकृतो
वैयाकरणसिद्धांतमंजूषाख्यः स्फोटवादः समाप्तमगमत् शुभंभूयात् मंगलंददतु

२५१

मंजूषापत्र २५१

گڈہ منجوشا در علم صرف سنسکرت تمام

२५१

१५८